THE FREE INDOLOGICAL COLLECTION

WWW.SANSKRITDOCUMENTS.ORG/TFIC

# FAIR USE DECLARATION

This book is sourced from another online repository and provided to you at this site under the TFIC collection. It is provided under commonly held Fair Use guidelines for individual educational or research use. We believe that the book is in the public domain and public dissemination was the intent of the original repository. We applaud and support their work wholeheartedly and only provide this version of this book at this site to make it available to even more readers. We believe that cataloging plays a big part in finding valuable books and try to facilitate that, through our TFIC group efforts. In some cases, the original sources are no longer online or are very hard to access, or marked up in or provided in Indian languages, rather than the more widely used English language. TFIC tries to address these needs too. Our intent is to aid all these repositories and digitization projects and is in no way to undercut them. For more information about our mission and our fair use guidelines, please visit our website.

Note that we provide this book and others because, to the best of our knowledge, they are in the public domain, in our jurisdiction. However, before downloading and using it, you must verify that it is legal for you, in your jurisdiction, to access and use this copy of the book. Please do not download this book in error. We may not be held responsible for any copyright or other legal violations. Placing this notice in the front of every book, serves to both alert you, and to relieve us of any responsibility.

**If you are the intellectual property owner of this or any other book in our collection, please email us, if you have any objections to how we present or provide this book here, or to our providing this book at all. We shall work with you immediately.**

**-The TFIC Team.**

॥ श्री जिनाय नमः ॥

अनन्तलब्धिनिधानाय श्री गौतमस्वामी गुरुभ्यो नमः ॥

अंचलगच्छस्थापक आर्यरक्षित गुरुभ्यो नमः

श्रीमज्जयशेखरसूरिविरचितम्

# श्री जैनकुमारसंभवाख्यं

## महाकाव्यम्--टीकासहितं च ॥

-: प्रकाशयित्रि :-

जामनगर श्री आचार्यरक्षित पुस्तकोद्धार संस्था.

: मुद्रिता :

जामनगर श्री जैनभास्करोदय मुद्रणालये
जेसंगलाल हीरालालेन मुद्रयित्वा.

मूल्यम् [illegible]-०-०

श्री जैनभास्करोदय मुद्रणालय
आशापुरा रोड–जामनगर

सुज्ञ महाशय !

आ "जैनकुमार संभव" नामनुं अति अद्भुत तथा काव्य चमत्कृतिवाळुं अने साहित्यरसथी भरेलुं रमणिक काव्य छे. आ काव्यना कर्ता अंचलगच्छ दिनमणि कवि चक्रचक्रधर पूज्य आचार्य श्रीमज्जयशेखरसूरि छे. प्रस्तुत कविश्वर अंचलगच्छनी ५६ में पाटे थयेला पूज्य भटारक श्री महेंद्र प्रभसूरिजीना शिष्य हता. तेओश्रीनी साहित्यसेवा अनुपम छे. तेओए रचेला उपदेश-चिंतामणि, प्रबोधचिंतामणि, धम्मिलचरित्र आदि ग्रंथो तेमनी अद्भुत कवित्व-शक्ति अने महा विद्वता प्रगट करे छे, आचार्य महाराज विक्रम संवत् १४३६ मां विद्यमान हता. आ कविश्वरने सरस्वती देवीए वरदान आप्युं हतुं, एम तेमना "वाणीदत्तवरश्चिरं" इत्यादि काव्यथी खुल्लुं जणाइ आवे छे. जेम प्रखर महाकवि श्री कालीदासे कुमारसंभव नामनुं काव्य रचेल छे तेम आ कविश्वरे जैनकुमार संभव काव्य रची साहित्यनी अपूर्व सेवा बजावी छे.

प्रथम आ ग्रंथ मूळ श्लोक अने तेनो गुजराती अनुवाद जामनगर निवासी पंडित हीरालाल हंसराज पासे करावी संवत् १९५७ मां श्रावक भीमसी माणेके प्रसिद्ध करेल हतो. त्यारपछी ग्रंथावली विगेरेमां तपास करतां आ ग्रंथ उपर आशरे ८०० श्लोकनी टीका उपरोक्त कविश्वरेज करेल छे परंतु प्रति कोइपण जग्याए उपलब्ध थती न्होती त्यारबाद एक प्रति सुरत आनंदपुर पुस्तकालय मारफत मळतां तेनी प्रेसकोपी पं० मणिशंकर छगनलाल पासे करावी एटलुंज नहिं पण सिद्ध हेमना व्याकरणना शब्दो ब्रेकेटमां आपी वधु स्पष्ट करेल छे.

આ ગ્રંથ અગીયાર સર્ગોથી વિભૂષિત થયેલ છે આ કાવ્યમાં ઋષભદેવ અને ભરતકુમારનું વર્ણન આપેલ છે, વળી લૌકિક વિવાહવિધિ વગેરેનું વર્ણન આપીને કવિશ્વરે (પોતાના) સમયમાં પણ ચાલતા લૌકિક રીવાજોથી આપણને વાકેફ કરી આપણાપર મોટા ઉપકાર કરેલ છે.

આ ગ્રંથ પ્રસિદ્ધમાં લાવવા માટે પૂજ્યપાદ પંન્યાસજી મહારાજશ્રી દાનસાગરજી મહારાજ તથા તેમના શિષ્ય નેમસાગરજી મહારાજે સતત્ પ્રયત્ન કરેલ છે.

ગ્રંથમાં પ્રેસદોષ અથવા બીજી અશુદ્ધિઓ માટે ક્ષન્તવ્ય ગણી સૂચના કરવા નમ્ર વિનંતિ છે.

ૐ શાંતિઃ શાંતિઃ

સંવત્ ૨૦૦૦ વસંત પંચમી. | લી૦ બાલુભાઇ હીરાલાલ.

આ પ્રતિ આનંદપુસ્તકાલય તરફથી મળતાં તેમનો ઉપકાર માનવામાં આવે છે.

# शुद्धिपत्रकम् ।

| पृष्ठ | पंक्तिः | अशुद्ध | शुद्ध |
|---|---|---|---|
| १ | ४ | श्रीमद्- | श्रीमद- |
| ,, | ५ | प्रत्याहा | प्रत्याहार |
| २ | १ | सारदा | शारदा |
| ,, | २ | विवृत्ति- | विवृति- |
| ,, | २२ | सारदा | शारदा |
| ३ | ९ | दिग्मण्डले | दिङ्मण्डले |
| ,, | १६ | पूजात्सव | पूजोत्सव |
| ४ | १६ | अदृष्ट | अदृष्ट |
| ,, | २३ | सुन्दर | सुन्दर |
| ५ | १८ | मेध | मेघ |
| ६ | २ | कर्मणा: | कर्मणोः |
| ,, | ३ | प्रत्ययाश्च | प्रत्ययश्च |
| ७ | ५ | सिद्धि | सिद्धि |
| ,, | १७ | १११ | १०१ |
| ८ | ८ | प्रतिमम्रा | प्रतिमम्रा |
| ,, | १४ | गुपी | (गुपी |
| ,, | २४ | धातो | धातो· (४-४-२९ |
| ,, | ,, | शिति | शिति(३-४-७०) |
| ९ | १ | तन.स्ये | तन.क्ये (४-२-६७) |
| ,, | ,, | ज्ञेयः । | ज्ञेयः ) |
| ९ | २ | स्फुलिगै· | स्फुलिङ्गैः |
| ,, | १४ | मिच्छून | मिच्छून् |
| १० | २ | भ्रिय | भ्रिय |
| ,, | १० | याश्चाया | याच्ञाया |
| ,, | ११ | टयण् | ल्यण् |
| ,, | १४ | २३ | ३३ |
| ,, | २४ | २-१-१०९- | २-१-१०९ |
| ११ | २ | तनुज | तनूज |
| ,, | ८ | मावे, | भावे, ५-१-१३१ |
| ,, | १५ | दिच्छू. | दिच्छुः |
| १२ | १६ | उहिते | उदिते |
| १३ | ७ | उपाविश्य | उपवेश्य |
| ,, | १४ | इन्दो | इन्द्रो |
| १४ | ७ | तन्दा | तन्द्रा |
| ,, | ९ | दष्ट्वा | दृष्ट्वा |
| १५ | ९ | श्वतो | श्वेतो |
| १६ | ८ | मित्यथ. | मित्यर्थः |
| १७ | ४ | द्रुलिपु | द्रुघुलिपु |
| ,, | १७ | किशलयः | किसलयः |
| १८ | १८ | सुष्टु | सुष्ठु |
| १९ | ४ | पदार्थे दृष्टि | पदार्थे दृष्टिः |
| ,, | ,, | यस्य | यस्य |
| ,, | १३ | तत्वे | तत्त्वे |
| ,, | २१ | पुतै | पुतैः |
| २१ | ८ | औचिती | औचिती |
| ,, | २० | चन्द्रश्चरण | चन्द्रचरण |
| २२ | १६ | नाम्न | नाम्नः |
| २३ | २५ | प्रमाम्बु | प्रभाम्बु |
| २५ | १ | समाहारे च | समाहारे |
| ,, | १० | शेषः | विशेष. |
| २६ | ७ | सदक् | सदृक् |
| ,, | २० | कोदशो | कीदशो |
| २७ | ५ | उदक | उदकस्य |
| ,, | १२ | मृदु | मृदु |
| २८ | २२ | नस्या | तस्या |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ३० | १७ | दारिद्र | दारिद्र्य |
| ३२ | ७ | महोज | महोर्जः |
| ,, | १० | छलात् | च्छलात् |
| ३३ | १५ | स्वस्रादेडीः | स्वस्रादेर्डीः |
| ,, | २२ | र सः | र. सः |
| ३५ | १७ | इ सू ड | इ. सू. डः |
| ३७ | २१ | भुभार | भूभार |
| ३८ | १३ | च | च-३-२-१११ |
| ,, | १४ | त्वतल् | त्वतल् ३-१-५५ |
| ३९ | ७ | षष्टीन्द्रे | षष्टीन्द्र |
| ,, | १७ | ते ते | ते तैः |
| ,, | २० | या | यो |
| ४० | १४ | याद्वेद | यावद्वेद |
| ,, | २३ | अपुठ तु | अपुष्ठ तु |
| ४१ | १५ | ध्यैघातो | ध्यैधातो |
| ४२ | १८ | ७७ ॥१॥ | ७७ ॥ १ ॥ सूरिश्री श्लोक – |
| ,, | २० | सभव | संभवमहाकाव्ये |
| ,, | ,, | रो उपाध्याय | रोमहोपाध्याय |
| ४३ | ६ | रिन्द्रिस्य | रिन्द्रस्य |
| ,, | १५ | च्छलेन | छलेन |
| ,, | २२ | मि. | मृ इ.६-३-१६० |
| ४४ | ६ | स्वरादेः | स्वरादेः२-१-११४ |
| ,, | २० | म्रस्यति | अश्यति |
| ४५ | १ | धेनुज | धेनुज ( |
| ४६ | ५ | यशा | यशो |
| ४७ | ६ | मयोगे | संयोगे |
| ४८ | १ | तैदेवैः | तैर्देवैः |
| ,, | ११ | समुदय | समुदाय |
| ,, | १९ | त्वार्थे | स्वार्थे |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ४९ | ७ | लक्षणाः | लक्षणः |
| ५० | ७ | च । | च ३-१-२२ |
| ५१ | १ | ह्रस्वः | ह्रस्वः४-१-३९ |
| ,, | ३ | औः | औ.(४-२-१२० |
| ५२ | ५ | अज्जन | अञ्जन |
| ५४ | ४ | आह्वत्यत् | आह्वयत् |
| ,, | १६ | अणेञेयेकण् | अणेञेयेकण् (२-४-२०) |
| ५५ | ७ | वारीणि | वारि |
| ,, | १८ | श्रमत्य | श्रमस्य |
| ,, | २० | पुसीति | पुसीति (४-३-९४) |
| ५६ | २ | रतामां | स्तासां |
| ,, | १३ | सित्यनव्यय | खित्यनव्यय (३-१-१११) |
| ५७ | १ | पकारः | यकारः |
| ,, | ५ | परोक्षा | परोक्षा ४-१-१ |
| ५८ | ९ | घनः | वनः |
| ५९ | ३ | घन | घनः |
| ५९ | १३ | किं | किं |
| ६० | ११ | तै | तैः |
| ,, | २३ | य-म | यन्म |
| ६२ | ६ | यदौषधि | यदौषधी |
| ,, | ,, | रदित | रर्दित |
| ,, | ७ | देडी | देर्डीः |
| ,, | १३ | द्रया | द्वया |
| ,, | १७ | मन्धकारं | मन्धकारं |
| ६३ | ३ | ऊर्यादि | ऊर्यादि– |
| ,, | २१ | अणेञेये | अणेञेये२४२० |
| ६४ | १० | म्यादिभ्यो | म्यादिभ्यो |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ,, | २० | वसू | वस् |
| ,, | २३ | स्थाप | स्था |
| ६५ | ३ | मृष्य | वृष्य |
| ,, | ११ | जातीय | जातीयै |
| ,, | १६ | गुजा | गुञ्जा |
| ६६ | १० | खड्डौ च | खड्डौ च ५-१-१३६ |
| ,, | १२ | नगरासू | नगरीषू |
| ,, | १३ | मन | सन्न |
| ६७ | ९ | मन्द्रा | मन्दारा |
| ६७ | ९ | सूत्रन् | स्रवत् |
| ,, | ,, | मधुर्मे | मधुम |
| ,, | १४ | किं | किं० |
| ,, | २० | छत्र | छत्र |
| ,, | २१ | किं | किं० |
| ६९ | १ | रिद्र. | रिन्द्रः |
| ,, | १० | स्मस्त | समस्त |
| ,, | २४ | धार्ष्ट्यं | धार्ष्ट्यं |
| ७० | ३ | पारग्ग | पारग |
| ,, | १७ | कौकव् | कौःकत् |
| ,, | १६ | मन | मनः |
| ,, | २१ | श्रादि | श्रादि |
| ७१ | ९ | शींड् | शीङ् |
| ,, | १४ | इ म. | इं सु |
| ,, | २० | हेना य | हे नाथ |
| ७२ | १८ | धारयति | धारयत्ति |
| ७२ | १० | सुत्रणां | सूत्रणां |
| ,, | २२ | सूत्रणा | ,, |
| ,, | २३ | भावे | भवे |
| ७३ | २ | कूर्वता | कुर्वता |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ७३ | ५ | वेध्यतु | वेध्यति |
| ,, | १३ | मधे | भवे |
| ,, | १८ | पुष्य | पुष्प |
| ,, | २३ | वात | वाक् |
| ७४ | १ | जननाय | जननाप |
| ,, | ९ | धैर्य | धैर्य |
| ,, | १४ | स्रयः | स्त्रियः |
| ,, | ,, | तेषां | स्तेषां |
| ,, | १७ | कोटकुट्टने | कोट्टकुट्टने |
| ७५ | १ | प्रोढानि | प्रौढानि |
| ,, | ५ | ददित | ददितुं |
| ,, | ७ | लिकत | कलितं |
| ,, | २० | जनेद्द: | जनेर्छ |
| ,, | २१ | हकधूम | धूम |
| ७६ | २ | तळ | तल् |
| ,, | ,, | तह्नः | नह्नः |
| ,, | २२ | प्रीक | प्रीक् |
| ७७ | १९ | उनता | ऊनता |
| ७८ | १४ | प्रत्वयः | प्रत्ययः |
| ,, | १५ | दिशितुः | दीशितुः |
| ,, | १८ | पाप | पापं |
| ७९ | २१ | शचीशच | शचीश |
| ,, | ,, | संपद् | संपद |
| ,, | २३ | स्नानां | स्नाणां |
| ८० | ४ | यताः | यत्ताः |
| ८० | ११ | संविद | संविद् |
| ,, | १६ | धान्तो | घान्तो |
| ,, | १९ | घना | धना |
| ८१ | ३ | लक्षणा | लक्षणः |
| ,, | ,, | निर | निर् |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ८१ | ३ | कात | कात् |
| ,, | १३ | अमि | अभि |
| ,, | १५ | धतो: | धातोः |
| ,, | २६ | सर्गातु | सर्गात् |
| ८२ | ३ | मपि | मयि |
| ,, | ५ | ग्रथाई | यथार्ह |
| ,, | १३ | ऽयमाद्यो | द्वितीयो |
| ,, | | ॥ १ ॥ | ॥ २ ॥ |
| | | तृतीय सर्गः । | |
| ८३ | २ | प्रासाद | प्रसाद |
| ,, | २१ | इयर्तु | इयर्तु |
| ८४ | १ | सर्ग २ | सर्गः ३ |
| ,, | १ | मोऽतो | मोऽन्तो |
| ,, | ३ | वेश्यतितु सस्पौ | वेष्यति तु मस्यौ |
| ,, | ८ | वर्त्तते | वर्त्तते |
| ८४ | ९ | इन्द्रोश्चन्द्रो | इन्द्रो |
| ,, | १९ | ऽस्यघ. | ह्रस्व |
| ,, | १९ | तथोदधि | तथोर्वे. |
| ८५ | ३ | ह्वावाम. | ह्वावामः |
| ,, | ४ | स्वरादे | स्वरादेः |
| ,, | ७ | गोचर | गोचरः |
| ,, | ८ | धान्तो | वान्तो |
| ,, | १५ | आह्वया | आह्वया |
| ,, | १८ | क्वं | क्व |
| ८६ | १ | स्वशात्तया | स्वशक्त्या |
| ,, | ९ | शात्तया | शक्त्या |
| ,, | १३ | गृह्णन्ति | गृह्णन्ति |
| ,, | १५ | रक्षितु | रक्षितु |
| ,, | १९ | त्रिशब्दात् | द्विशब्दात् |
| ८७ | १ | सर्ग २ | सर्ग ३ |
| ,, | ४ | राधारि | राधारे |
| ,, | ५ | गृह्यति | गृह्यते |
| ,, | ९ | पूर्वक | अपूर्वक |
| ८८ | ५ | जीविता | जीवितानि |
| ,, | १० | भित्र | मित्र |
| ,, | १५ | सद्घातो: | सद्धातोः |
| ८८ | १६ | रष्ट | रष्ट |
| ,, | २३ | लिवा | लिता |
| ८९ | ५ | उच्छलभ्रमरभि | उच्छलद्भ्रमरसि |
| ९० | २ | यत्तेतां | यतेतां |
| ,, | २० | नोह. | मोहः |
| ९१ | २ | बहु | बहू |
| ,, | ५ | तीति | स्तीति |
| ,, | १७ | न वा | वा |
| ,, | १९ | क्विप् | क्विप् |
| ९२ | ४ | धेनुस्या | धेनुष्या |
| ,, | ५ | गतौ | गतो |
| ,, | १२ | कौशा | कोशा |
| ,, | ,, | ,, | ,, |
| ,, | १६ | द्वयापारयति | द्वयापारयति |
| ,, | २२ | निर | निर् |
| ९३ | १२ | पयणे | पयणौ |
| ९३ | २४ | सन्यङ्श्च | सन्यङश्च |
| ९४ | ७ | यायावर. | यायावरः, ५-२-८२ इति |
| ,, | २४ | अनुपक्तलोक. | अनुषक्तलोक |
| ९५ | २ | स्थित्ति | स्थिति. |
| ,, | ९ | लस | लम् |
| ,, | १० | ३-१-५८ | ७-१-५८ |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ९६ | ४ | न्यायोऽवत्र | न्यायोऽत्र |
| ,, | ,, | ५-३-९१ द्वारादेः ७-४-६ दौवारिक इति सिद्धम्। | |
| ,, | ९ | स्त्रियांक्तिरित्यारभ्यस्त्रियांभावेक्तिरित्यस्य स्थाने, तत्र नियुक्ते इत्यारभ्य औकारः इति पाठः ज्ञेयः। | |
| ,, | १९ | तत्र नियुक्ते इत्यारभ्य-औकारः इत्यन्तपाठस्य स्थाने नवमपङ्क्तिपाठः ज्ञेयः। | |
| ९७ | १२ | निवृर्त | निर्वृत |
| ,, | ,, | भावो | भावः |
| ९८ | ३ | शस्त्रा | शत्रा |
| ,, | ६ | ढर्मि | ऊर्मि |
| ९९ | ३ | र लकारः | रस्यलकारः |
| १०० | १ | च्चयर्थे | च्व्यर्थे |
| ,, | ३ | इच्या | इच्वा |
| ,, | २१ | यैकर्थि | यैकार्थि |
| ,, | २४ | सहूर्त | मुहूर्त |
| १०१ | १ | हल्लेखा | हल्लेखित |
| ,, | २३ | मिनो | मिनो |
| १०२ | १ | वा | वा |
| ,, | ८ | श्रादि | श्ववादि |
| १०३ | १६ | वेलं प्राप | वेलमाप |
| ,, | २४ | दिव | न दिवं |
| १०४ | ५ | ताश्वताः | ताश्रताः |
| ,, | १८ | क्रत्रिमः | कृत्रिमः |
| १०५ | ३ | किन् | कित् |
| ,, | ६ | एप | एष |
| ,, | १८ | तस्व | तस्य |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १०५ | २१ | मूद् | मृद् |
| १०६ | ५ | रत्नां | रत्नानां |
| ,, | ८ | ताती | तीति |
| ,, | १० | संव्युक्तानि | संयुक्तानि |
| १०७ | ८ | मज्जेमौ | मज्जैनौ |
| ,, | ९ | भज्न् | भञ्ज् |
| ,, | १२ | चन्द्रन | चन्दन |
| ,, | १९ | सपा | सर्पा |
| ,, | २२ | पुष्य | पुष्प |
| १०८ | १ | पूर्व | पूर्वकपा |
| ,, | ४ | हस्त्यु | हस्त्युव |
| ,, | ५ | प्रागतत्त्वे | प्रागतत्वे |
| ,, | १३ | परारे त्नः | परारेः त्नः |
| ,, | २४ | बुद्धया | बुद्ध्या |
| १०९ | १ | काश्मिरं | काश्मिरे |
| ,, | ९ | लक्ष्ये | लक्षे |
| ११० | १ | गृहणाति | गृह्णाति |
| ,, | २ | अन्विष्यति | अन्विष्यसि |
| ,, | ५ | मुञ्चति | मुञ्चसि |
| ,, | ७ | द्व्यादि | द्वयादि |
| ,, | १० | पश्यसि | पश्यति |
| ११२ | ,, | चुम्व | चुम्ब |
| ११४ | ३ | यस्मात् | यस्मात् |
| ,, | ,, | कुम | कुम्भ |
| ,, | १० | दृश् | दृश् |
| ११५ | ६ | धारा | पूरा |
| ११६ | १० | देडी। | देर्डीः |
| ,, | १२ | ह्यां | हयां |
| ११७ | ५ | शब्दा | शब्दात् |
| ,, | ,, | स्यन्त | अन्त्य |

| पृष्ठ | पंक्तिः | अशुद्ध | शुद्ध |
|---|---|---|---|
| ११८ | ४ | सिम्नि | सीम्नि |
| ,, | ७ | स्वरादेर्लोपः | स्वरादेर्लुक् |
| ,, | २२ | रोहता | रुहता |
| ११९ | १ | करणमूले | करमूले |
| ,, | ४ | भट्योः | भटयोः |
| ११९ | ७ | धाधातोःकिः | दाधातोःकिः |
| ,, | १२ | व्यरचीति | d |
| ,, | ,, | त्रभुवनेति | त्रिभुवनेति |
| ,, | १५ | हृद | d |
| ,, | २४ | त्रिभुवन | त्रिभुवनं |
| १२० | १५ | तदह्यो | तदह्यो |
| १२१ | १ | जन | जैन |
| ,, | ५ | उद्वृत्य | उद्धृत्य |
| ,, | १८ | ळादि– | ह्लादि– |
| ,, | २१ | रचितस्य | रचिते |
| ,, | २२ | काव्यस्य | काव्ये |
| १२३ | २ | ह्य | ह्य |
| ,, | ३ | मरवांश | मखांश |
| ,, | १० | मिश्रित | मिश्रितः |
| ,, | १६ | कळकळः | कळकळः (गोत्रजं) |
| १२४ | ८ | निच्छिद्र | निश्छिद्रं |
| ,, | २२ | सादीनां | सादेनां |
| १२५ | ३ | रत्वं | रेत्वं |
| ,, | २३ | रतदेव | स्तदेव |
| १२६ | १९ | पाणिर्हस्ताः | पाणिर्हस्तः |
| ,, | १७ | कुर्वतो | कुर्वती |
| १२७ | २० | स्वां | तां |
| १२९ | ७ | अतिन | अनेन |
| ,, | १४ | हित्यन्त | हित्यहत्य |

| पृष्ठ | पंक्तिः | अशुद्ध | शुद्ध |
|---|---|---|---|
| १२९ | १६ | दीर्घश्चि | दीर्घश्चिच्च |
| ,, | २० | द्रुनत | द्रान्त |
| १३० | ७ | मूर्ध्नि | मूर्ध्नि |
| ,, | १२ | भविष्यर्थे | भविष्यदर्थे |
| ,, | १३ | मूर्ध्नि | मूर्ध्नि |
| ,, | २२ | वारिणां | वारिणो |
| १३१ | १ | गुळ | गुण |
| ,, | ४ | गांगागाः | गाङ्गाः |
| ,, | ५ | पीचयः | वीचयः |
| १३२ | ३ | मोघा | मोवा |
| ,, | ४ | वभावतः | स्वभावतः |
| ,, | ५ | त्वरि | त्वरी |
| ,, | २० | कळकः | कळङ्कः |
| ,, | २३ | तत | तत् |
| ,, | २४ | दृशा | दृष्ट्वा |
| १३३ | ४ | मुकुटः | मुकुट– |
| ,, | ११ | कन् | कल् |
| १३४ | १७ | समुज्वला | समुज्ज्वला |
| १३५ | २३ | तत् | तत् |
| ,, | २४ | परिष्कृता | परिष्कृता |
| १३७ | १८ | मत्ति | मिति |
| ,, | २३ | अमु | अमू |
| १३८ | १२ | ऐगवणः | ऐरावणः |
| १३९ | ७ | इषद् | ईषद |
| १४० | २० | छद्म | च्छद्म |
| १४१ | १ | मत्रूः | वक्रूः |
| ,, | १४ | विरक्तिसशयम् | विरक्ति-संशयम् |
| ,, | १५ | भिमान | भिमान |
| १४२ | १६ | सरि | सरी |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १४२ | २३ | यासा | यासां |
| १४३ | २२ | किं किं | किं |
| ,, | ,, | रूढो | रूढो |
| १४४ | ९ | मरक् | मरक् |
| ,, | १० | , | ,, |
| ,, | १५ | अमूत्स्यु | अमूत्पु |
| ,, | १९ | तपो | तयो |
| ,, | २२ | श्रवण | श्रवणं |
| ,, | २५ | हस्तरत | हस्तर्स्त |
| १४५ | ४ | तडिल्लता | त्तडिल्लता |
| ,, | ११ | ध्रुसच्चये | ध्रुसमुच्चये |
| ,, | १३ | तेषा | तेषां |
| १४६ | ११ | पुजः | पुञ्जः |
| ,, | २१ | पुरी | पुरो- |
| १४७ | ४ | अमृमुहत् | अमूमुहत् |
| ,, | ६ | प्रसिद्धः | प्रसिद्ध |
| ,, | १६ | गमद् | गमृद् |
| १४८ | ६ | पट्पदा | षट्पदा |
| ,, | ७ | कल्पास्य | कल्याणस्य |
| ,, | १८ | वश्यम् | वश्यधर्म्यम् |
| ,, | १९ | जवर्णे | अवर्णे |
| १४९ | ३ | ४-२-८ | ४-२-४८ |
| ,, | ६ | तनूमन्तः | तनूमन्त. |
| ,, | १८ | देञ्णिति | देञ्णिति |
| ,, | ,, | आवि | आदि |
| १५० | ६ | संहवा | संहतौ |
| ,, | १२ | क्षुब्धः | क्षुब्ध |
| ,, | ,, | फाण्ट | फाण्ट |
| ,, | ,, | वढ | वृढं |
| ,, | १३ | मिट्: | निट् |
| १५० | १५ | गर्जितो | गर्जितोर्जितो |
| ,, | २२ | यड् | यङ् |
| १५१ | ४ | बर्हि | बर्हि |
| ,, | ६ | ५-२-४ | ५-२-३ |
| ,, | ९ | सन्यङस्व | सन्यङश्च |
| ,, | २० | मान | मानः |
| ,, | २१ | मुखितं | मुषितं |
| ,, | २२ | भाप | d |
| ,, | २४ | तिस्थे | तिसाद्रस्थे |
| १५२ | ३ | मुखित | मुषितं |
| ,, | १६ | लक्षया | लक्षणया |
| ,, | २५ | निषेहि | निषेहि |
| १५४ | १६ | युगं | युगं |
| १५५ | १६ | विनचि | व्यनजिम |
| ,, | १७ | तय । | तया |
| ,, | १९ | २५ । | ५ । |
| ,, | २१ | च्व्युतं | च्च्युतं |
| १५६ | ४ | पूर्वापरा इत्यारभ्य पुरआदेशः इत्यन्तं | d |
| ,, | १२ | च्छ्वासत् | च्छ्वसत् |
| ,, | २३ | इन्छया | इच्छया |
| १५७ | ६ | विहितास्रहः | विहिताग्रहः |
| १५८ | ६ | च | तया |
| ,, | ९ | भर्तुर्वि | भर्तृ वि |
| ,, | २० | संधौ | सन्धौ |
| ,, | २२ | पात्रं | पात्रं |
| १५९ | २ | टयण् | ट्यण् |
| ,, | १० | जैनी | जैत्री |
| ,, | १४ | टितम् | टिताम् |
| ,, | १६ | ७-१-१११ | ७-१-११ |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १५९ | १८ | क्रुत्सम्य | क्रुध्मम्य |
| १६० | ५ | यच्छीयाञ्जल | दञ्जल |
| ,, | ,, | रचितस्य | रचिते |
| ,, | ६ | काव्यस्य | काव्ये |
| १६१ | १ | कराभ्यं | कराभ्यां |
| ,, | ६ | आप्पूर्वक | अप्पूर्वक |
| ,, | ७ | आप्शब्द | अप्शब्द |
| ,, | १३ | माभि | मभि |
| ,, | ,, | वेत्तुं | वेतु |
| ,, | १४ | मणि | मणी |
| ,, | २० | घृणयो | घृणयः |
| १६२ | ५ | सन्निना | सन्निर्ना |
| ,, | ७ | इति | नु इति |
| ,, | १३ | चर | वर |
| १६३ | १५ | राजते | राजेते |
| १६४ | १६ | वधूच | वध्वौच |
| ,, | २३ | वंश | वंशं |
| १६५ | १ | उत्पाद्य | उत्पाद्य |
| ,, | ९ | भूधारा: | भूधराः |
| १६६ | ३ | अन्त्यास्व-रादेलो | अन्त्यस्वरा-देर्लो |
| ,, | ३ | रतं | रत |
| ,, | ६ | अग्नि | अग्ने |
| ,, | १२ | देह | देहः |
| १६७ | ७ | स्याना | स्थाने |
| ,, | ११ | यस्व | यस्य |
| १६८ | २० | काटयः | कोट्यः |
| ,, | २४ | तैरत | तैस्त |
| १६९ | ७ | क्डिति | क्ङिति |
| ,, | १९ | षन्नि | षड्भि |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १७० | १७ | रंम | रम्मा |
| १७१ | १ | नाम्नाः | नाम्नः |
| १७२ | १९ | त्तयर्थात् | त्वर्थात् |
| ,, | २३ | नृपु | नृपु |
| १७३ | ३ | धीनं | धीन |
| ,, | ,, | ,, | ,, |
| ,, | ,, | ,, | ,, |
| ,, | १८ | वीच्यः | वीचयः |
| १७४ | ७ | अनध | अनघ |
| ,, | ११ | कळान | कळा, न |
| १७६ | २१ | तेत्रे | नेत्रे |
| ,, | २२ | उच्छ्वा | उच्छ्व |
| १७८ | १ | लुटित | लुठितं |
| ,, | ५ | अनद्ध | अबद्ध |
| ,, | २० | यस्या. | यस्याः |
| १७९ | ४ | धातो. | धातोरु |
| ,, | १५ | चाटु | चटु |
| ,, | १७ | कृच्छं | कृच्छ्र |
| १८० | ६ | गततेव | गतमेव |
| ,, | १७ | युगलं | वामळं |
| ,, | १९ | ट | टः |
| १८० | २३ | सुवृतं | सुवृत्तं |
| ,, | २५ | असं | अंस |
| १८१ | ५ | निधो | निवो |
| ,, | ,, | निमित्त | निमित |
| ,, | ६ | त्याधा | त्याधानात् |
| ,, | ८ | मत्वं | मत्त्व |
| ,, | १७ | युग्म | युग्म |
| १८२ | १२ | धिष्णय | धिष्ण्य |
| ,, | १४ | जथो | अथो |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १८३ | १८ | इन्दः | इन्द्रः |
| ,, | १ | वाक्यतिः | वाक्पतिः |
| ,, | ३ | कुष्प्राया | कुष्प्रापा |
| ,, | ९ | ,, | ,, |
| ,, | ११ | दाम्बूशस् | दाबूशस् |
| ,, | १४ | भिह् | मिह |
| १८४ | २ | यम | यम |
| ,, | ६ | बधूयं | बधूय |
| १८५ | २ | नेह्रि | नैर्हि |
| ,, | ४ | तृतीथा | तृतीया |
| १८५ | १८ | गपाय | मणाय |
| १८६ | १ | दोपात् | दोषात् |
| ,, | ११ | षालु | वालु |
| ,, | १३ | हेम्ब | हेम्ब |
| १८७ | १३ | प्रथभ | प्रथम |
| १८८ | १० | टीस्त्रात् | टिस्त्रात् |
| ,, | १२ | दाय | दार्य |
| ,, | १५ | सता | सतां |
| ,, | १९ | सुभ्रुवा | सुभ्रुवां |
| ,, | २३ | सर्ज्ञ | सम |
| १८९ | १८ | भुङ्क्ते | भुङ्क्ते |
| ,, | २२ | प्राक् | प्राक् |
| १९० | ५ | मे | मेत्र |
| ,, | १४ | धातोश्च | भातोश्च |
| ,, | १४ | कप्टे | कष्टे |
| ,, | १७ | माह्नि | माह्नि |
| १९१ | १५ | डया | कथा |
| ,, | २१ | बुद्धि | बुद्धि |
| १९२ | १२ | तुप्यति | तुष्यति |
| ,, | १९ | श्रेण | श्रैण |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १९२ | २२ | श्रेण | श्रैणं |
| ,, | ,, | श्रेणं | श्रैणं |
| १९३ | २ | भ.भा | भंग्या |
| १९४ | ९ | रचितस्य | रचिते |
| ,, | १० | काव्य | काव्ये |

पञ्चमः सर्गः ।

| | | | |
|---|---|---|---|
| १९६ | ५ | बातो | भातो |
| १९७ | ११ | मतोमो | मतोर्मो |
| १९८ | २ | स्वभादेही- | स्वगादेर्ही |
| ,, | ८ | वाह | वाद् |
| ,, | १२ | दवल | [illegible] |
| ,, | १८ | स्नलि | मलि |
| १९९ | २ | रतैः | रत्नैः |
| २०० | २ | विम्ब | बिम्ब |
| ,, | १४ | चान्दा | चान्द्र |
| २०१ | ७ | लक्ष्मणश्चि | लक्ष्मणश्चि |
| ,, | ९ | पाम्रितं | पापितं |
| २०२ | ११ | मोगि | भोगि |
| २०३ | ७ | राम | रामा |
| २०४ | २४ | मगवान् | भगवान् |
| ,, | २५ | नर्मण. | नर्मणः |
| २०५ | १० | मतिबुद्धि | मतिबुद्धि |
| ,, | २३ | कंदप्पे | कंदर्प. |
| २०६ | ७ | जत | अत |
| ,, | ८ | वासि | निवासि |
| ,, | ९ | न | d |
| ,, | १२ | तस्थ | तस्याः |
| ,, | १९ | काभ | काम |
| २०८ | २ | कः | क |
| ,, | २४ | प्रत्यय. | प्रत्ययः |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २१० | २ | लक्षया | लक्षणया |
| ,, | ७ | वां | वां |
| ,, | ८ | नीलि | नींलि |
| ,, | ११ | प्राप्नाति | प्राप्नोति |
| ,, | १३ | कलुष्व | कलुषत्व |
| २११ | ३ | तत्य | तस्य |
| ,, | ४ | उत | उत्त |
| ,, | ८ | छाया | च्छाया |
| ,, | ११ | तै | तैः |
| ,, | २३ | स्वेरं | स्मेरं |
| २१२ | ७ | पुण्यप्र | पुण्यप्र |
| ,, | १८ | श्वासौ | श्वासौ |
| २१३ | २ | परावें | परावे |
| ,, | ४ | त्म | आत्म |
| ,, | १६ | सुर्य | सूर्यं |
| ,, | २२ | वञ्जन | व्यञ्जन |
| ,, | २३ | रिठ | रिव |
| २१४ | ११ | रतं | रत |
| ,, | २५ | वर्ण | वर्ण |
| २१५ | २ | अद्वितायी | अद्वितीया |
| २१६ | २ | स्वर्ग | स्वर्ग |
| ,, | ११ | आस्य | आस्वा |
| ,, | १७ | उदकूचडश्चा | अवकूचडश्चा |
| ,, | २२ | श्रीकष | श्रीकृष |
| २१७ | ९ | परि | पारे |
| ,, | १० | निष्प्रा | निष्प्रा |
| ,, | १६ | अन्त | अन्तः |
| ,, | १९ | क्रिडा | क्रिडां |
| ,, | ,, | प्रामेत | प्रामेऽन्त |
| ,, | २१ | सोरस्य | सौरस्य |
| २१७ | १८ | देय | देयं |
| ,, | २३ | मन्दोः | मन्दुः |
| ,, | २४ | शै-र्य | शैत्यं |
| ,, | ,, | छयण् | छयणु |
| २१८ | १ | मृदुलां | मृदुलां |
| ,, | ९ | द्रावामः | द्रावामः |
| ,, | ११ | रत | रतं |
| २१९ | १४ | भस्य | अस्या |
| ,, | १७ | पुपुपे | पुपोष |
| ,, | २५ | चसौ | चासौ |
| २२० | १ | वर्ल्ली | वल्ली |
| ,, | ,, | श्रेणय | श्रेणय |
| ,, | ५ | पुष्पर्य | पुष्पर्थं |
| ,, | ,, | जलोघैः | जलौघैः |
| ,, | ८ | वातो. | वातोः |
| ,, | २१ | वारिधाराः | वारिधाराः |
| ,, | ,, | वारीणां | वारिणां |
| ,, | २४ | तस्य | स्वस्य |
| ,, | २५ | द्रवन्त, | पवन्त |
| २२१ | २ | श्चै पि | जनाश्चैरपि |
| ,, | २४ | घन-त्वा | घनन्त्वा |
| २२३ | १५ | माम | साम |
| २२४ | १० | पद् च्छवि. | पद् छविः |
| २२५ | ५ | टिरवात् | अणन्तत्वात् |
| ,, | ७ | विपुलस्वभाव | विपुलस्य |
| ,, | ११ | गाहार- | गाहारविहार |
| ,, | १२ | भितिः | भीतिः |
| २२६ | ७ | ११४ | १२४ |
| ,, | १० | गरमं | गर्भं |
| ,, | १८ | च्छीय | [illegible] |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २२६ | १८ | गन्तितन्य | गविते |
| ,, | १९ | दाव्यत्य | काव्ये |
| | | षष्ठ–सप्तमः सर्गः । | |
| २२७ | १२ | स्वर्सा | स्तासां |
| २२९ | १ | सर्ग ६ | सर्गः ७ |
| २२९ | १८ | स्फटि | स्फाटिक |
| २३० | ८ | वासय्य | वास्य |
| ,, | १९ | प्रामवती | प्रासवती |
| २३० | २६ | हस्ता | हस्त |
| २३१ | १ | सर्गः ६ | सर्गः ७ |
| ,, | १४ | सस्वीः | सखी. |
| ,, | १५ | सुस्वा | सुखा |
| ,, | २० | एकास्त | एकान्ते |
| २३२ | (१) | सर्गः ६ | सर्गः ७ |
| २३३ | ,, | ,, | ,, |
| ,, | ९ | घन् | व्रण् |
| ,, | १२ | नेत्राणि | नेत्राण्येत्र |
| ,, | २३ | उत्सव | उत्सव· |
| ,, | २४ | दण्डम | दण्डमु |
| २३४ | (१) | सर्ग. ६ | सर्गः ७ |
| ,, | १० | स्पर्धा | स्पर्धा |
| २३५ | ४ | क्ष्वेडा | क्ष्वेडा |
| ,, | २१ | प्रती | प्रति |
| २३६ | ६ | नस्याः | तस्याः |
| ,, | ११ | ३१॥ | ३१॥ युग्मम् |
| ,, | १७ | प्रत्यक्ष | प्रत्यक्ष |
| २३७ | | ३७॥ | ३७॥ युग्मम् |
| ,, | ३ | अखड | अखण्ड |
| ,, | ११ | जर्च | जेचं |
| ,, | १३ | अणेन | अणेन |
| २३७ | २४ | समृद्धि | समृद्धि |
| ,, | ,, | ४१॥ | ४१॥ युग्मम् |
| २३९ | ५ | नपु | नपुंसक |
| ,, | ७ | ग्ला | ग्ला |
| ,, | ९ | लनेक | अने |
| ,, | ,, | वीनां | कवीनां |
| ,, | १३ | साधवः | साधवः |
| ,, | २६ | पृष्ठे. | पृष्ठैः |
| २४० | १७ | दीप्यन्त्या | दीप्यन्त्यो |
| २४१ | १३ | आवारधार | आधारधार |
| ,, | १७ | आधार | आधार |
| ,, | २५ | श्मश्रु | श्मश्रु |
| २४२ | ४ | धातो भावे | धातोर्भावे |
| ,, | २० | ए | ए( |
| २४३ | १ | स्वना | स्वप्ना न |
| ,, | १० | पुष्प | पुष्प |
| २४४ | २४ | ता | ताः |
| २४५ | १५ | विष्करी | विष्किरी |
| ,, | १६ | ,, | ,, |
| २४६ | २ | सृष्टि | सृष्टिः |
| ,, | १२ | धरः | धारः |
| ,, | १२ | धर | धार |
| ,, | १८ | विद | विद् |
| २४७ | ९ | रभम | राम |
| ,, | ११ | पाप्यमाना | प्राप्यमाना |
| ,, | १५ | विभागिनी. | विभागिनीः |
| २४८ | २१ | दिठे | दिष्ठि |
| ,, | २४ | चिस | चिसं |
| २४९ | १ | दिव्य | दीव्य |
| ,, | ३ | दिव्य | दीव्य |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २४९ | ३ | निरुद्ध | निरुद्ध |
| ,, | ६ | कान्ति | कान्त्या |
| ,, | २२ | काश | कास |
| २५० | ५ | क्लिन | क्लिन्न |
| २५० | १७ | श्रीमद्वच्छीय | श्रीमद |
| ,, | १८ | विरचितस्य | विरचिते |
| ,, | १९ | काव्यस्य | काव्ये |
| | | अष्टम. सर्गः । | |
| २५१ | ५ | असो | असौ |
| २५२ | १४ | शब्दान् | शब्दात् |
| २५३ | ७ | स्त्रु देवीः | स्त्रुदेवीः |
| ,, | ८ | यस्या | यस्याः |
| ,, | ९ | भवन् | भवत् |
| २५४ | ८ | पद्मिनां | पद्मिनीं |
| २५५ | २५ | अपृ | अपृथ |
| २५७ | १४ | द.परात् | दु परात् |
| ,, | १६ | वचनाश्च | वचनाश्च |
| २५८ | १० | मप्प | मप्य |
| ,, | १७ | ह्रिस्वात् | ह्रिस्वात् |
| २५९ | २३ | विदूरि | विदूरी |
| २६० | १७ | जङ्गस्य | अङ्गस्य |
| २६१ | ३ | स्वभाग | स्वभोग |
| ,, | १९ | दास्यो | दास्यो |
| ,, | २४ | माला | माली |
| २६२ | ७ | प्रकरि | प्रकारे |
| ,, | ,, | भारा | भ |
| ,, | १७ | समापद्य | समाप्य |
| २६३ | ४ | भुखो | मुखो |
| ,, | १२ | संदर्शना | संदर्शनया |
| ,, | ,, | मोघः | मोघः |
| २६५ | १ | त्वनि | त्वमि |
| ,, | ५ | कुभः | वपुरेवकुम्भः |
| ,, | ९ | कुतोऽवि | कुतोऽपि |
| ,, | १४ | भास्वाद्वस्त्र d | |
| ,, | २३ | ततरत | ततस्त |
| २६८ | १३ | निद्रा | निद्रा |
| ,, | १८ | सुप्त | सुस्थ |
| २६९ | ९ | भक्तस्य | भक्ताय |
| ,, | १३ | दधाति | दधाति |
| २७१ | ४ | ऊर्ध्व | ऊर्द्ध |
| ,, | १६ | निनी | निधी |
| ,, | १८ | निवि | निधि |
| २७२ | १९ | द्धितं | द्धितं, तत्रावस्थयाः |
| २७३ | ७ | मेधि | मेधि |
| २७४ | ९ | अस्ताञ्ज | अस्ताघ |
| २७५ | १८ | धाप | धाम |
| २७६ | १० | मदच्छीय | मद |
| ,, | ,, | रचितस्य | रचिते |
| ,, | ११ | काव्यस्य | काव्ये |
| | | नवम. सर्गः । | |
| २७७ | १४ | श्यण् | ष्यण् |
| ,, | १५ | ड्येन | श्येन |
| २७८ | १० | तनोर्ति | तनोति |
| २७९ | २ | मोधस्य | मोघस्य |
| ,, | ५ | बीरी | विरी |
| ,, | ९ | सभाजन | सभाञ्जन |
| २८० | ७ | त्येति | त्यते |
| ,, | २४ | लक्ष | कक्षाणि |
| २८१ | ९ | कुत्सिथः | कुत्सितः |
| २८२ | ७ | कायसी | कारयसि |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २८२ | ८ | काश्चित | काश्चित् |
| ,, | १२ | सुगृहारब्या: | सुगृहाख्या: |
| २८३ | ६ | प्ररूट | प्ररूढ |
| ,, | ११ | महीत्व | महिपित्व |
| ,, | १९ | प्रकर्ष | प्रकर्ष |
| २८४ | १० | द्वघू | ह्यघू |
| ,, | १२ | ,, | ,, |
| ,, | १३ | त्विचया | त्विषा |
| ,, | १४ | परोऽन्य | परोन्य: |
| २८५ | २४ | चिरंतना | चिरन्तना |
| २८६ | ४ | दोषभुवा | दोषधीभुवा |
| ,, | १५ | उदया | उदयो |
| ,, | १७ | मण्ल | मण्डल |
| ,, | २१ | प्रभुत्व | प्रभुत्व च |
| ,, | २३ | घृति | घृति |
| २८७ | ५ | प्रभु | प्रभु |
| ,, | ५ | समर्थ | समर्थ: |
| ,, | ६ | समधि | समाधि |
| ,, | १० | गागं | रागं |
| ,, | ११ | रत् | रत् |
| ,, | १४ | भूय | भूर्ये |
| ,, | २४ | वाञ्छ्यते | वाञ्छ्यते |
| २८८ | १५ | तना | तनो |
| ,, | १९ | कृतं. | कृतै. |
| ,, | २० | तदर्घ | तदर्घ |
| ,, | ,, | गग | राग |
| ,, | २३ | रत | रत |
| ,, | ,, | तदर्ध | तदर्धं |
| ,, | २५ | तम | तम् |
| २८९ | ४ | समार | ससार |
| २८९ | १९ | विलाक | विलोक |
| २९० | १ | हदि | हरि |
| ,, | ८ | कृन | कृत |
| ,, | ,, | दधाति | दधाति |
| ,, | १२ | जड | जठ |
| ,, | १५ | अज्ञत: | अज्ञन: |
| ,, | ,, | दन्त | दन्त: |
| ,, | २४ | भूधातो: | भूधातो- |
| २९१ | १ | सृधातो: | सृधातो: |
| ,, | २ | महान | महान् |
| ,, | ५ | यत्थे | यत्थे |
| ,, | १० | महोक्षो | महोक्षो |
| ,, | २१ | जनेने | जनेन |
| ,, | २२ | लक्षवि | लक्षयि |
| २९२ | १ | खत | णत. |
| ,, | ४ | वनो | यनी |
| ,, | ७ | दर्शन | दर्शन |
| ,, | १९ | सह | सहा |
| ,, | २० | पशु | पशू |
| २९३ | ३ | यदिवि | यदि-इति |
| ,, | ६ | उत्पति | उत्पत्ति: |
| ,, | ८ | परि | विपरि |
| ,, | ,, | विशेषणो | विशेषणे |
| ,, | ९ | अभीष्टा | अभीष्टा. |
| ,, | १२ | गज | राज |
| ,, | २३ | चण्द्र | चन्द्र |
| २९४ | १० | सुरमे | सुरमे |
| ,, | १६ | सुग |  |
| ,, | १७ | भु | भुव: |
| ,, | २० | नोऽस्माम् | नोऽस्मान् |

| पृष्ठ | पङ्क्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २९५ | ५ | गपी | रापी |
| ,, | २५ | स्पधा | स्पर्धा |
| २९६ | २० | शोभतो | शाभनो |
| ,, | २३ | तेपु | तेषु |
| २९७ | ४ | ता | ता |
| ,, | ११ | ब्राह्म | ब्रह्म |
| ,, | १२ | रंव | रेव |
| ,, | २२ | कुसुङ्ग | कुमङ्ग |
| ,, | २५ | ढयः | ढ्य. |
| २९९ | १ | ऊरु | ऊरू |
| ,, | २२ | छेयम् | छेयसू |
| ३०० | २ | भिसे | भिषे |
| ,, | ९ | धातोः | धातो |
| ३०१ | १८ | जलस्य | जलस्य |
| ,, | ,, | संतृ | संस्पृ |
| ,, | २१ | गार्थि | रर्थि |
| ,, | २४ | कुल | कूल |
| ३०२ | , | ,, | ,, |
| ,, | ,, | प्रासेन | प्रासेन |
| ,, | ,, | प्रोढा | प्रौढा |
| ३०५ | १८ | जाडय | जाड्यं |
| ,, | ,, | जडचं | जडत्वं |
| ३०७ | १३ | सुभे. | सुमै. |
| ३०८ | ११ | चकारः | चकार |
| ३०९ | ५ | रचितस्य | रचिते |
| ,, | ६ | काव्यस्य | काव्ये |
| | | दशम, सर्गः । | |
| ,, | १० | रन्द | मरन्द |
| ३१० | ४ | जाडय | जाड्य |
| ,, | ,, | ,, | ,, |
| ,, | १७ | विमति | विमर्त्ति |
| ,, | २५ | निवार | वार |
| ३११ | १५ | अश्वश्व | अश्वश्व |
| ३१२ | १९ | धाम | धारा |
| ,, | २२ | प्रितिभाजिन् | प्रीतिभाजी |
| ३१३ | १ | ईशय | ईशस्य |
| ,, | ४ | वनाना | घनाना |
| ३१४ | ५ | र्गि | निर्ग |
| ,, | ६ | स्वसदहैः | स्वसदेहैः |
| ,, | ७ | र्गित. | निर्गतः |
| ,, | १७ | च्यन | च्यत |
| ३१५ | ,, | दशि | दशि |
| ३१६ | २० | दुखे | दु खे |
| ३१७ | २१ | गमन | गमन |
| ३१८ | ११ | पुरन्घ्रिमी | पुरन्घ्रिमी |
| ,, | १९ | दम्य | दम्य |
| ३१९ | ४ | बले | बलो |
| ३२० | १० | सदृष्ये | सदृक्ष्येये |
| ३२१ | ७ | व्यम | व्यम् |
| ३२२ | २४ | पूर्वोच–प्र | पूर्वोक्तप्र |
| ३२३ | ७ | सलना | ललना |
| ३२४ | २ | भरत | भर |
| ३२५ | ३ | मनृत | सूनृत |
| ,, | ७ | निरतर | निरन्तर |
| ,, | २५ | योपान्यात् | योपान्त्यात् |
| ३२६ | ४ | दुःस्तीष | दु.स्त्रीष |
| ,, | ५ | दुर्पूर्व | दु पूर्व |
| ,, | १४ | पीडय | पीड्य |
| ३२७ | १९ | नपेयाय | उपेयाय |
| ,, | ,, | युर्षी | युपी |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ३२८ | ६ | धमति | धर्मात् |
| ,, | ११ | निसृतैः | निःसृतै. |
| ,, | २१ | ताथ | तार्थे |
| ३२९ | ८ | निसृता | नि.सृता |
| ,, | १३ | प्रचुर | प्रचुर |
| ,, | २२ | धन | घन |
| ३३० | १२ | पति | पटि |
| ३३१ | १० | तो | तो |
| ,, | २४ | क्षयस्त्व | क्षायित्वं |
| ३३२ | ३ | निर्वति | निर्वृति |
| ,, | ११ | ,, | ,, |
| ३३३ | १ | पोरुषे | पौरुषे |
| ,, | ३ | स्वरा | स्वरा |
| ,, | २५ | पञ्च | पञ्च |
| ३३४ | ९ | खरखं | खररवं |
| ,, | १५ | वी | वीर |
| ३३५ | १२ | अनन्य | अन्य |
| ३३६ | १३ | उदुम्बरी | उदुंबरी |
| ,, | २० | उद्गाहादौ | उद्गानादौ |
| ,, | २४ | हे | ह |
| ३३७ | १९ | सुरुपा | सुरूपा |
| ३३८ | ३ | सोहृद ' | सौहृद |
| ३३९ | १६ | सौख | सौख्य |
| ,, | २० | ,, | . |
| ,, | ,, | ,, | ,, |
| ३४० | ६ | जनिक | जनिकस्य |
| ,, | ११ | दोधि | दीधि |
| ३४१ | १० | शूदात् | शूगात् |
| ३४३ | १३ | रचितस्य | रचिते |
| ,, | १४ | काव्यस्य | काव्ये |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ३४४ | १४ | भुरि | भूरि |
| ,, | १६ | व्यघात् | व्यधात् |
| ३४५ | २ | गच्छेत | गच्छेत् |
| ३४६ | १२ | बद्धा | प्रबद्धा |
| ,, | १६ | ,, | ,, |
| ३४९ | ४ | सुमङ्गला | सुमङ्गलाया |
| ,, | १९ | व्यते | च्यते |
| ३५० | १८ | श्रेयस् | श्रेयस् |
| ३५१ | ४ | अर्त्तेमु | अर्त्तेर्मु |
| ,, | १२ | इन्द | इन्द्र |
| ,, | १६ | नाकीकं | नालीक |
| ३५२ | १ | आयतां | आयतनां |
| ,, | २ | द्वयाख्या | द्वयाख्या |
| ,, | ६ | कशी | कृशी |
| ,, | २४ | कर्मण | कर्मणा |
| ,, | २५ | नी च गा | नीचगा |
| ३५३ | ९ | असार | असारता |
| ,, | २१ | यच्च | यच्चे |
| ३५४ | १२ | तुर | तुर |
| ,, | २२ | र. | रः |
| ३५५ | १० | समूढ् | मूढ् |
| ,, | १५ | सुनु | सूनु |
| ,, | २२ | पुण्यै | पुण्यैः |
| ३५७ | ८ | मध्भे | मध्ये |
| ,, | १० | अपट् | अपद् |
| ,, | ११ | मित्रजो | मित्रतेजो |
| ,, | १७ | पयस् | सरस् |
| ३५८ | ७ | हस्यैव | रस्यैव |
| ३५९ | १९ | निधिपु | निधिषु |
| ३६० | २१ | विद्धत् | विद्वत् |



॥ श्रीमदर्हद्भ्यो नमः ॥

॥ अनन्तलब्धिनिधानेभ्यः श्रीगौतमस्वामिभ्यो नमः ॥

॥ विधिपक्षगच्छाचार्य श्रीमदार्यरक्षितगुरुभ्यो नमः ॥

श्रीस्तंभतीर्थे श्रीमदञ्चलगच्छनभोमण्डलमार्तण्डेन सकलविद्वद्वर्गमानसचकोरसुधाकरेण यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाध्यात्मकाष्टाङ्गयोगपरिकलितात्मना निजप्रतिभाधरीकृतामृतागमसूरिणा भारतीप्रदत्तवरेण प्रबोधचिंतामणि, उपदेशचिंतामणि, धम्मिल्लकुमार चरित्राद्यनेकसच्छास्त्रप्रणेत्रा प्रातःस्मरणीयनामधेयेन पूज्यपादारविन्दयुगलेनतत्रभवता परमगुरुवर्येण **श्रीमज्जयशेखरसूरिणा** विरचितं–

श्री

# जैनकुमारसंभवाख्यं महाकाव्यम्

## तदन्तेवासिश्रीधर्मशेखरोपाध्यायप्रणीत–
## टीकासमलंकृतम् ॥

इह खलु तत्र भवन्तः सकलकविशिरोमणयः श्रीजयशेखरसूरयः 'काव्यं यशसेऽर्थकृते' इत्याद्यालंकारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनताम् 'काव्यालापांश्च वर्जयेत्' इत्यस्य निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन्तो **जैनकुमारसंभवाख्यं महाकाव्यं** चिकीर्षवश्चिकीर्षितप्रबन्धनिर्विघ्नसमाप्तये वस्तुनिर्देशात्मकं मङ्गलं शिष्यशिक्षार्थमाचरन्ति । अस्त्युत्तरस्येति ॥

ध्यात्वा श्रीसारदांदेवीं, नत्वा श्रीसद्गुरूनपि ।
कुमारसंभवस्येयं, विवृत्तिर्लिख्यते मया ॥ १ ॥

यस्मै काव्यसुखप्रदा च वरदा श्रीशारदा देवता,
श्रीमज्जैनकुमारसंभवमहाकाव्यादिकर्ता कलौ ।
सिद्धान्तोदधिचन्द्रमाः सहृदयश्रेणीशिरःशेखरः
सोऽयं श्रीजयशेखराख्यसुगुरुर्जीयाज्जगन्मङ्गलम् ॥ २ ॥

लौकिककाव्यानुसारेण अस्त्युत्तरस्यां दिशीति समाक्षराणि वर्तन्त इति न ज्ञातव्यं किन्तु श्रीस्तम्भतीर्थे श्रीमदञ्चलगच्छगगनप्रभाकरेण सकलविद्वज्जनचित्तचकोरनिशाकरेण यमनियमासनप्राणायामाद्यष्टांगयोगविशिष्टेन समाधिध्यानोपविष्टेन निजमतिजितसुरसूरिणा परमगुरुणा श्रीजयशेखरसूरिणा चन्द्रमंडलसमुज्ज्वलराजहंसस्कंधोधितया चंचच्चलकुण्डलाद्याभरणविभूषितया भगवत्या श्रीभारत्या वत्स त्वं कविचक्रवर्तित्वं प्राप्य निश्चिन्त इवासीनः किं करोषीति प्रोच्य

**अस्त्युत्तरस्यां दिशि कोशलेति, पुरी परीता परमर्द्धिलोकैः ।**
**निवेशयामास पुरः प्रियायाः, स्वस्नावयस्यामिव यां धनेशः ॥१॥**

**संपन्नकामा नयनाभिरामाः, सदैव जीवत्प्रसवा अवामाः ।**
**यत्रोज्झितान्यप्रमदावलोका, अदृष्टशोकान्यविशन्त लोकाः ॥२॥**

एतदाद्यं काव्ययुग्मं दत्वा विहितसुरासुरसेवनश्रीयुगादिदेवसत्कजन्मबालकेलियौवन महेन्द्रस्तवन सुनन्दा सुमङ्गलापाणिग्रहणचतुर्दशस्वप्नदर्शनभरतसंभवप्रातर्वर्णनपुरस्सरं श्रीजैनकुमारसंभवं महाकाव्यं कारितं तथा लौकिककुमारसंभवे कुमारः कार्तिकेयः तस्य संभवस्तथात्र कुमारो भरतस्तस्य संभवो ज्ञेयः । पुत्राश्च सर्वे कुमारा उच्यन्ते अतः **कुमारसंभव** इति नाम्ना महाकाव्यमत्रापि ज्ञायते । तेनादौ ध्यात्वा श्रीसारदांदेवीमिति प्रारम्भे न दुष्टम् ॥

**अस्त्युत्तरस्यां दिशि कोशलेति,**
**पुरी परीता परमर्द्धिलोकैः ।**
**निवेशयामास पुरः प्रियायाः,**
**स्वस्या वयस्यामिव यां धनेशः ॥ १ ॥**

(टीका) अस्त्युत्तरस्येति अस्ति विद्यते कासौ कर्त्री कोशला अयोध्या इति पुरीनगरी अयोध्याया शाश्वतत्वेन त्रिकालव्यापकत्वेऽपि वर्तमानकालनिर्देशः अतीतभविष्यतोः कालयोर्विनष्टानुत्पन्नत्वेन अवस्तुत्वात् वर्तमानत्वम् । कास्ति उत्तरस्यां दिशि कौवेर्यांककुभि इह यद्यपि नानादेशनिवेशभाजनं जनं प्रतीत्य विवक्षितनगर्यादिक् नियमनं न तादृशां सङ्गतिमङ्गति तथापि सकले दिग्मण्डले उत्तरस्या प्रशस्यत्वात् तन्नामोत्कीर्तनं चकार कवि स्वाक्रान्तां दक्षिणदिशमाश्रित्य वा । कथंभूता कोशला परमर्द्धिलोकै परीता परमा ऋद्धिर्धनकनकादिका येषां ते परमर्द्धयस्ते च ते लोकाश्च परमर्द्धिलोकास्तै परीता परिगता अन्विता इति यावत् । अथ कोशलामेव प्रधानपुरुषः कर्तृत्वेन विशिनष्टि । धनेशो धनदः कुवेर इति यावत् उत्तरदिक्पालोयां कोशलां पुरीं निवेशयामास स्थापयामास । ऋषभजन्मत पूर्वलक्षाणां विंशतौ व्यतीतायां एवं हि आगमे श्रूयते यदा किल भगवान् ऋषभस्वामी अस्या अवसर्पिण्यास्तृतीयारकस्यावसाने विश्वव्यवहारबन्धत्वेन मुग्धमतीनां प्रजानामखिलन्यायप्रदर्शनाय राज्यभारमङ्गीचकार तदा सौधर्मसुरपतिनिर्देशवशंवदो धनदो वर्ण्यमौवर्णप्राकारां अभ्रंलिहस्फुटस्फटिकागारां संभवन्नवनवपूजोत्सवविहारां नवयोजनविस्तारां द्वादशयोजनायामां सरःसरसीदीर्घिकागृहवाटिकारामाभिरामां काले भविष्यदयोध्याभिधानां विनीतापुरीं निवेशयामास । ततो दूरस्थान........................... इति कालेन सा कोशला अभूत् । एतेन दक्षिणभरतार्द्धमध्यवर्त्तित्रिभागरूपस्य कोशलाया स्थानस्य शाश्वतत्वं तन्निवेशस्य च गृहप्राकारारामलक्षणस्य धनदकर्तृकत्वमुक्तं भवति । उत्प्रेक्षते स्वस्या आत्मन संबन्धिन्याः प्रियाया इष्टाया पुरो नगर्याः अलकायाः वयस्यामिव सखीमिव सख्यं हि समानशीलयोरेव शोभते इत्यनेन कोशलायाः

केनापि रमणीयकगुणेन अलकायाः सादृश्यं मन्यन्ते तेन च कोशलायां दृष्टायां अदृष्टामप्यलकां दृष्टामिव मन्यन्ते । अन्योऽपि धनेशोधनवान् स्वस्याः प्रियायाः कान्तायाः पुरोऽग्रे वयस्यां सखीं निवेशयति । ननु इदं शास्त्रं नगर सागर शैल ऋतु चन्द्रार्कोदयोद्यान जलकेलि मधुपान सुरतमन्त्र दूतप्रयाण जिनालयाभ्युदय-विवाह विप्रलंभ कुमारवर्णनरूप विशिष्टाष्टादशलक्षणोपेतत्वान्महाकाव्यम् । तत आदौ मङ्गलाभिधानमन्तरेण न श्रोतुः प्रवृत्तिनिमित्तं भवति, नैवम् । अस्य महाकाव्यस्य तत्र तत्राधिकारे श्रीऋषभदेवनाममन्त्रपवित्रितस्य सर्वस्यापि मङ्गलमयत्वात् मङ्गलस्यापिमङ्गलान्तरकरणे अनवस्थादौस्थ्यस्य दुर्निवारत्वात् । नहिप्रकाशमयः प्रदीपः स्वप्रकाशे प्रदीपान्तरमपेक्षते ? किं च–'यदध्यासितम-र्हद्भिस्तद्धि तीर्थं प्रचक्षते' इतिवचनाद् वहुभिस्तीर्थकृद्भिरध्यासितायाः कोशलाया-स्तीर्थरूपतैव । शास्त्रारंभे च तन्नामग्रहणात् कर्तुः श्रोतुश्च निश्चिन्तो मङ्गलाभ्यु-दयोभवति इति सर्वं सुस्थम् ॥ १ ॥

**संपन्नकामा नयनाभिरामाः,**
**सदैव जीवत्प्रसवा अवामाः ।**
**यत्रोज्झितान्यप्रमदावलोका,**
**अदृष्टशोका न्यविशन्त लोकाः ॥ २ ॥**

संपन्नकामा इति यत्र यस्यां नगर्यां एवंविधा लोका न्यविशन्त धातूनाम-नेकार्थत्वात् वसन्ति स्म । निविश इति सूत्रेणात्मनेपदम् । यत्र किं लक्षणा लोकाः ? संपन्नकामाः संपन्नाः कामा अभिलाषामनोरथा येषां ते संपन्नकामाः ('रदाऽमूर्च्छमदःक्तयोर्दस्य च' ॥ ४–२–६९ इति सूत्रेणोक्तस्य नत्वं तद्योगे धातोर्दस्य च नत्वम् ॥ ) तत्कालमेव प्राप्तमनोवाञ्छितसर्वसुखसंपत्तित्वात् । पुनः किं ल० नयनाभिरामाः नयनानां लोचनानां अभिरामाः मनोज्ञाः सर्वांगसुन्दर सौभाग्यसुन्दरत्वात् । पुनः किं ल० सदैव जीवत्प्रसवाः सर्वकालं जीवितावधि जीवन्तः प्रसवाः अपत्यानि येषां ते जीवत्प्रसवाः पुन किं ल० अवामाः न परस्परं प्रातिकूलामिथः सौहार्दपरत्वात् । पुनः किं ल० उज्झितान्यप्रमदावलोकाः

उज्झितस्त्यक्तोऽन्यप्रमदानां परस्त्रीणामवलोको दर्शन यैस्ते उज्झितान्य परस्त्रीपराङ्मुखत्वेन परनारीसहोदरेति लब्धबिरुदत्वात् । पुन· किं ल० अदृष्टशोकाः न दृष्टः शोको यैस्ते अदृष्टशोका· इष्टवस्त्वादेरवियोगात् ॥ २ ॥

**चन्द्राश्मचञ्चत्कपिशीर्षशाली, सुवर्णशालः श्रवणोचितश्रीः ।**
**यत्राभितो मौक्तिकदत्तवेष्ट–ताटंकलीलामवहत् पृथिव्याः ॥ ३ ॥**

(व्या०) चन्द्राश्मेति यत्र यस्यां नगर्यां सुवर्णशालः स्वर्णप्राकार· अभित· समंतत· पृथिव्या· वसुधायाः मौक्तिकदत्तवेष्टताटंकलीलां मौक्तिकैर्दत्तो वेष्टो यस्मिन् एवंविधो य· ताटंक· कर्णाभरण तस्य लीला मवहत् । किं· ल० सुवर्णप्राकारः अभितः ( पर्यभेः सर्वो भये । ७ । २ । ८३ । इ. सू. अभेस्तसुप्रत्यय· ) समन्ततः चन्द्राश्मचंचत्कपिशीर्षशाली चन्द्रकान्तसत्कानि चचन्ति प्रसरन्ति कपिशीर्षाणि तै· शाली शोभमान· । पुन· कि ल० श्रवणोचितश्रीः श्रवणायोचिता योग्या श्री·शोभा यस्य स श्रवणो । ताटंकपक्षे श्रवणोचितश्री· कर्णस्य योग्या श्रीर्लक्ष्मी यस्य सः ॥ ३ ॥

**नदद्भिरर्हद्भवनेषु नाट्य–क्षणे गभीरध्वनिभि र्मृदंगैः ।**
**यत्राऽफलत्केलिकलापिपङ्क्ते, र्विनाऽपि वर्षा घनगर्जिताशा ॥ ४ ॥**

(व्या०) नदद्भिरिति । यत्र यस्यां नगर्यां केलिकलापिपंक्ते·–क्रीडामयूराणां श्रेणे. वर्षाकालं (विना ते तृतीया च । २ । २ । ११५ इ. सू. विनायोगे वर्षा. इत्यत्र द्वितीया) विनापि घनगर्जिताशा मेघगर्जारवस्याशा अफलत् । वर्षा शब्दो बहुवचनान्तो ज्ञेय· । यथा प्राणदार प्रमुखा· । कै र्मृदंगै· । किं कुर्वद्भि· । अर्हद्भवनेषु सर्वज्ञप्रासादेषु नाटयक्षणे नाटकावसरे । नदद्भि· (शत्रानशावेष्यति तु सस्यौ । ५ । २ । २० इ. सू. परस्मैपदात् धातोः वर्तमाने शतृप्रत्ययो ज्ञेयः तेन नदद्भिरिति सिद्धम्) शब्दायमानै· । किं विशिष्टैर्मृदगै· गभीरध्वनिभि· गभीरो ध्वनिर्नादो येषां ते गभीरध्वनयस्तै· ॥ ४ ॥

**हर्षादिवाधःस्थितनायकानां, प्राप्य स्थितिं मौलिषु मन्दिराणाम् ।**
**यस्यां क्वणत्किंकिणिकानुयायि, नित्यं पताकाभिरकारि नृत्यम् ॥५॥**

(व्या०) हर्षादिति यस्यां नगर्यां पताकाभि र्नित्यं निरंतरं नृत्यमकारि । (भाव कर्मणाः । ३ । ४ । ६८ इ. सू. सर्वधातोरद्यतन्यास्ते परे भावकर्मणोर्ञिच्प्रत्ययश्च तस्य लुक्) उत्प्रेक्षते हर्षादिव । किं कृत्वा मन्दिराणामावासानां मौलिषुश्रृंगेषु स्थितिं प्राप्य किं विशिष्टानां मन्दिराणां अधःस्थितनायकानां अधः स्थिता नायकाः स्वामिनो येषु तेषामत एव हेतोः पताकानामुपरि स्थितत्वहर्षान्नृत्यमिति भावः ॥ किं लक्षणं नृत्यं क्वणत्किंकिणिकानुयायि शब्दायमानक्षुद्रघंटिकां घर्घरिकामनुगच्छत् ॥ ५ ॥

**तमिस्रपक्षेऽपि तमिस्रराशे, रुद्धेऽवकाशे किरणैर्मणीनाम् ।**
**यस्यामभूवन्निशि लक्ष्मणानां, श्रेयोर्थमेवावसथेषु दीपाः ॥ ६ ॥**

(व्या०) तमिस्रेति यस्यां पुर्यां लक्ष्मणानां लक्ष्मीवतां आवसथेष्वावासेषु (लक्ष्म्या अनः । ७ । २ । ३२ इति सू. लक्ष्मी शब्दादनप्रत्ययोज्ञेयः) निशि रात्रौ दीपाः प्रदीपाः श्रेयोर्थमेव मंगलार्थमेवाभूवन् । निशि इत्यत्र 'मासनिशासनस्य शसादौ लुग् वा' इति सूत्रेणाकारलोपः । कस्मिन् सति तमिस्रपक्षेऽपि अंधकारपक्षेऽपि तमिस्रराशेरंधकारसमूहस्य अवकाशे मणीनां किरणै रुद्धे सति अत एव दीपानां श्रेयोऽर्थत्वमेव तमसो मणिकिरणैरेव रुद्धत्वादिति भावः ॥६॥

**रत्नौकसां रुग्निकरेण राकी-कृतासु सर्वास्वपि शर्वरीषु ।**
**सिद्धिं न मन्त्रा इव दुःप्रयुक्ता, यत्राभिलाषा ययुरित्वरीणाम् ॥ ७ ॥**

(व्या०) रत्नौकसामिति । यत्र यस्यां नगर्यामित्वरीणां ( सृजीणनशष्ट्वरप् । ५ । २ ७७ । इ. सू. इण् धातोष्ट्वरप्प्रत्ययः च ह्रस्वस्य तः पित्कृति । ४ । ४ । ११३ । इ. सू. तू च अणञेयेकण्नञ्स्नञ्टिताम् । २ । ४ । २० । इ. सू. टित्वात् ङीप्रत्यये इत्वरी शब्दसिद्धिः ) असतीनां अभिलाषाः मनोरथाः सिद्धिं न ययुः न गताः । के इव दुःप्रयुक्तामन्त्रा इव मारणादिकर्मव्यापारिता मन्त्रा इव सिद्धिं नयान्ति । कासु सतीषु रत्नौकसां रत्नमयावासानां रुग्निकरेण कान्तिसमूहेन सर्वास्वपि निखिलास्वपि शर्वरीषु रजनीषु राकीकृतासु राका पूर्णिमा तत्सदृशासु कृतासु सतीषु । कुलटाचौराणामभिलाषसाधकं तमः एवास्ति तच्च तत्र नास्तीतिभावः ॥ ७ ॥

**यद्वेश्मवातायनवर्तिवामा,-जने विनोदेन बहिःकृतास्ये ।**
**व्योमाम्बुजोदाहरणं प्रमाण,-विदां भिदामापदभावसिद्ध्यै ॥ ८ ॥**

(व्या०) यद्वेश्मेति प्रमाणविदां तार्किकाणां व्योमाम्बुजोदाहरणं व्योम्न आकाशस्याम्बुजं कमलं तस्योदाहरणमाकाशकमलदृष्टान्तः । अभावसिद्ध्यै अभावस्य सिद्धिस्तस्यै अभावसिद्ध्यर्थं प्रयुक्तं सत् भिदामापत् ( लृदिद् द्युतादि पुष्यादेः परस्मै । ३ । ४-६४ इ. सू. आप्धातोरद्यतन्यां लृदित्वादङ् भेदं प्राप । असद्वस्तु-प्रमाणेन स्थाप्यते सा अभावसिद्धिः कथ्यते यथा महीतले घटो नास्ति आकाशे कमलमिव । कस्मिन् सति यद्वेश्मवातायनवर्तिवामाजने यस्या नगर्या वेश्मानि गृहाणि तेषां वातायनानि गवाक्षाः तेषु वर्तत इत्येवंशीलो वामा स्त्री इति जनः तस्मिन् विनोदेन यस्या नगर्या धवलगृहे गवाक्षवर्तिनि स्त्रीजने अत्र जातावेकवचनं । विनोदेन बहिःकृतास्ये सति कौतुकेन गवाक्षद्वारात् बहिःकृत-मुखे इत्यर्थः । स्त्रीणां मुखान्येव आकाशे कमलानि सत्यानि । अतएवाकाशक-मलानामसत्कल्पनावादिना व्यर्थमजनीति भावः ॥ ८ ॥

**युक्तं जनानां हृदि यत्र चित्रं, वितेनिरे वेश्मसु चित्रशालाः ।**
**यत्तत्र मुक्ता अपि बन्धमापु, र्गुणै र्वितानेषु तदद्भुताय ॥ ९ ॥**

(व्या०) युक्तमिति यत्र यस्यां पुर्यां वेश्मसु आवासेषु चित्रशालाः जनानां लोकानां हृदि (दन्तपादनासिकाहृदय-वा २ । १ । १११ इ. सू. हृदयस्य हृदादेशः) चित्रं युक्तं वितेनिरे विस्तारयामासुः चित्रशब्देन चित्रकर्म आश्चर्यं वा । चित्रशालाश्चित्रं कुर्वन्ति एतद्युक्तं । यस्य यद्वस्तु स्यात् स तदन्येभ्योऽपि दत्ते युक्तमेवैतत् । तत्र तासु चित्रशालासु मुक्ता अपि गुणै र्वितानेषु बंधमापुः प्राप्ताः तदद्भुताय आश्चर्याय जातं किमिति चेत् ये मुक्ताः सिद्धाः स्युः ते गुणैः सत्वरजस्तमोलक्षणै र्बंधं कथमाप्नुवन्ति । अथवा वितानेषु शून्यप्रदेशेषु मुक्ताः स्थापिताः स्युः ते गुणैर्विनयादिभिर्बन्धं कथमापुः प्राप्ताः । अथवा ये मुक्ताश्चौ-रादयः स्युस्ते गुणैरज्जुभिश्च कथं बन्धमापुः इत्यं विरोधः । अथ विरोधपरिहारमाह । मुक्ताशब्देन मौक्तिकानि वितानेषु चन्द्रोद्योतेषु गुणैस्तंतुभिर्बन्धमापुरितितत्त्वम् अत्र विरोधालंकारो ज्ञेयः ॥ ९ ॥

**प्रभुप्रतापप्रतिभग्नचौरे, पौरे जने ज्योतिषिकै र्न यत्र ।**
**चौराधिकारः पठितोऽपिसम्यक्, प्रतीयते स्मानुभवेन वन्ध्यः १०॥**

(व्या०) प्रभुप्रतापेति । यत्र यस्यां नगर्यां ज्योतिषिकैर्गणकैश्चौराधिकारः सम्यक् पठितोऽपि न प्रतीयतेस्म (स्मे च वर्तमाना । ५ । २ । १६ । इ. सू. भूतानद्यतने वर्तमाना) न ज्ञायतेस्म । किं भूतश्चौराधिकार अनुभवेन विना वन्ध्यो निष्फलः । कोऽपि चौर्यं न करोतीति भावः । कस्मिन् सति पौरजने पुरे नगरे भव. सचासौ जनश्च तस्मिन् नागरिकलोके । प्रभुप्रतापप्रतिभग्नचौरे सति प्रभोः श्रीऋषभदेवस्य प्रतापात् प्रभावात् प्रतिभग्नानिरस्ताश्चौरास्तस्करा येन स तस्मिन् ॥ १० ॥

**पणायितुं यत्र निरीक्ष्य रत्न, राशिं प्रकाशीकृतमापणेषु ।**
**रत्नाकराणां मकराकरत्व-मेवावशिष्टं बुबुधे बुधेन ॥ ११ ॥**

(व्या०) पणायितुमिति । यत्र यस्यां पुर्यां बुधेन विदुषा रत्नाकराणां समुद्राणां मकराकरत्वं मकराणां मत्स्यादीनामाकरत्वमेव अवशिष्ट मुध्धृतं बुबुधे ज्ञात मित्यर्थः । किं कृत्वा आपणेषुहट्टेषु पणायितुं गुपो–धूप–विच्छि–पणि पनेरायः । ३ । ४–१ इ सू. स्वार्थे पणेराय ) रत्नराशिं मौक्तिकपद्मरागादिरत्नसमूहं प्रकाशीकृतं न प्रकाशोऽप्रकाशः अप्रकाशः प्रकाश. कृतस्तं निरीक्ष्य वीक्ष्य । समुद्रस्य रत्नाकरमकराकरौ इति द्वे नाम्नी प्रसिद्धे स्तः । रत्नाकरत्वं पुर्यां गृहीतं मकराकरत्वं स्थितमिति भावः ॥ ११ ॥

**यच्छ्रीपथे संचरतो जनस्य, मिथो भुजेष्वंगदघट्टनोत्थैः ।**
**व्यतायत व्योमगतैः स्फुलिंगै, र्नक्षत्रचित्रं न दिवापि कस्य ॥१२॥**

(व्या०) यच्छ्रीपथ इति । यत्र यस्यां पुर्यां व्योमगतैः व्योमनभस्तद्गतास्तैराकाशस्थितै स्फुलिंगै दिवापि दिवसेऽपि कस्य पुरुषस्य नक्षत्रचित्रं नक्षत्राणां चित्रमाश्चर्यं नक्षत्रसम्काश्चर्यं न व्यतायत विस्तारयामासे अर्थात् सर्वस्यापि । 'तनूयी' विस्तारे तन् धातोर्ह्यस्तनीत' 'अड्धातो' इत्यडागमे–'क्य' शिति'

इत्ति क्यप्रत्यये 'तनः क्ये' इति सूत्रेण नकारस्याकारे कृते प्रयोगो ज्ञेयः । किं लक्षणैः स्फुलिंगैः यच्छ्रीपथे यस्यां नगर्यां श्रीपथो राजमार्गस्तस्मिन् संचरतः संचरतीति संचरन् तस्य गच्छतो जनस्य लोकस्य मिथः परस्परं भुजेषुबाहुषु । अंगदघट्टनोत्थैः अंगदानां बाहुरक्षाणां घट्टनं मीलनं ततः समुत्थितैरुत्पन्नैरित्यर्थः ।१२

**हल्लीसके श्रीजिनवृत्तगानै, र्यद्बालिकालिः किल चारणर्षीन् ।**
**शुश्रूषमाणानिह निश्चलय्या-ऽऽलम्पद्दिवः सप्तऋषिव्यवस्थाम् ॥ १३ ॥**

(व्या०) **हल्लीसक इति** यद्बालिकालिः यस्या नगर्या बालिकानां बालाना मालि श्रेणि. किल इति सत्ये दिव आकाशस्य सप्तऋषि-(ऋत्यति ह्रस्वो वा । १ । २ । २ इ. सू. ह्रस्वः ह्रस्वस्य ह्रस्वकरणादत्र असन्धिः संख्या समाहारे च द्विगुश्चानाम्न्ययम् । ३ । १ । ९९ । इ. सू. संज्ञाविषये कर्मधारयः संज्ञाविषयत्वान्न द्विगुः) व्यवस्थां सप्त च ते ऋषयश्चेति द्विगुसमास. तेषां व्यवस्थां मर्यादामलुम्पत् । सप्तभ्योऽप्यधिकतरा मुनयो जाता इत्यर्थः । किं कृत्वा हल्लीसके रासकमध्ये श्रीजिनवृत्तगानैः श्रीऋषभदेवस्य गुणगानैरिह आकाशे शुश्रूषमाणान् श्रोतुमिच्छून् चारणर्षीन् आकाशगामिनो मुनीन् निश्चलय्य निश्चलीकृत्य (प्रयोक्तृव्यापारे णिग् । ३ । ४ । २० । इ. सू. चल् धातोर्णिग् । लघोर्यपि । ४ । ३ । ८६ । इ. सू. यपिपरेणेरयादेशः अनञः क्त्वोयप् । ३ । २ । १५४ । इ. सू. क्त्वोयप्) ॥ १३ ॥

**दत्तोदकभ्रान्तिभिरिन्द्रनील-भित्तिप्रभाभिः परिपूर्यमाणाः ।**
**आनाभिनीरा अपि केलिवापी, र्यस्यां जनो मन्दपदं जगाहे ॥१४॥**

(व्या०) **दत्तोदकेति** यस्यां पुर्यां जनो लोकः केलिवापीः-क्रीडावापीः मन्दपदं मन्दं मन्दं पदन्यासं यथा भवति तथा जगाहे अवगाहयामास । किं लक्षणा वापीः आनाभिनीरा अपि नाभिं यावन्नीरं यासां ताः पुनः किं विशिष्टाः इन्द्रनीलभित्तिप्रभाभिः इन्द्रनीलमणीनां भित्तयस्तासां प्रभाभिः कान्तिभिः परिपूर्यमाणाः ( परिपूर्यन्ते इति शत्रानशावेष्यति तु सस्यौ । ५ । २ । २० । इ.

सू. कर्मणि आनश् अतो म आने । ४ । ४ । ११४ इ. सू. आनपरे अकारस्य अन्ते मः) सामस्त्येन म्रियमाणा· किं विशिष्टाभिः इन्द्रनीलभित्तिप्रभाभि· दत्तोदकभ्रान्तिभिः दत्ता उदकस्य जलस्य भ्रान्तिर्याभिस्ताः ॥ १४ ॥

**यथाचिषौ यत्र जने यथेच्छं, कल्पद्रुमाः कल्पितदानवीराः ।**
**निवारयन्तिस्म मरुद्विलोल,-प्रवालहस्तैः प्रणयस्य दैन्यम् ॥ १५ ॥**

**(व्या०) यथाचिषाविति** यत्र यस्यां पुर्यां कल्पद्रुमाः कल्पवृक्षा मरुद्विलोलप्रवालहस्तैः मरुता वायुना विलोलाः चंचलाः प्रवाला· किशलयानि एव हस्ताः करास्तैः जने लोके 'तृणं लघु तृणात्तूलं तूलादपि हि याचकः' इति न्यायात् प्रणयस्य याञ्चाया दैन्यं (वर्णदृढादिभ्यष्ट्यण् च वा ७ । १ । ५९ । इ. सू. दीनात् भावे टयण्) दीनस्य भावस्तत् निवारयन्ति स्म । किं विशिष्टे जने यथेच्छं (योग्यतावीप्सार्थानतिवृत्तिसादृश्ये । ३ । १ । ४० । इ. सू. अर्थानतिवृत्तौ अव्ययीभाव· समास·) इच्छामनतिक्रम्य यथेच्छया यथाचिषौ (सन् भिक्षाशंसेरु· । ५ । २ । २३ इ. सू. शीलादिसदर्थे सन्नन्तादुप्रत्ययः) गृहभूषणादीनि यथाचिषौ याचितु मिच्छौ किं लक्षणा· कल्पद्रुमाः कल्पितदानवीराः कल्पितस्य वाञ्छितस्य दाने वीरा· समर्था· ॥ १५ ॥

**पूषेव पूर्वाचलमूर्ध्नि घूक-कुलेन घोरं ध्वनतापि यत्र ।**
**नाखंडि पाखंडिजनेन पुण्य-भावः सतां चेतसि भासमानः ॥ १६ ॥**

**(व्या०) पूषेवेति** यत्र यस्यां नगर्यां पाखंडिजनेन कुटिलजनेन सतां सत्पुरुषाणां चेतसि मनसि भासमानो दीप्यमान· पुण्यभावः नाखंडि न खंडयामासे । किं लक्षणेन पाखंडिजनेन घोरं रौद्रं ध्वनतापि प्रलपतापि क इव पूषा इव (इन् हन् पूषार्यम्णः शिस्यो. । १ । ४ । ८७ । इ. सू. सौपरे दीर्घः) सूर्य इव यथा पूषा सूर्यो घोरं ध्वनतापि घूककुलेन कौशिककुलेन न खंड्यते सूर्य· किं लक्षण पूर्वाचलमूर्ध्नि (ईङौ वा । १ । २ । १०९ । इ. सू. ङिपरे अनोऽस्यलुग्) पूर्वाचलस्य उदयाचलस्य मूर्ध्नि मस्तके भासमानः प्रकाशमानः ॥ १६ ॥ इति पुरीवर्णनम् ॥

**इक्ष्वाकुभूरित्यभिधामधाद्भू र्यदा निवेशात् प्रथमं पुरोऽस्याः ।**
**नाभेस्तदा युग्मिपतेः प्रपेदे, तनुजभूयं प्रभुरादिदेवः ॥ १७ ॥**

(व्या०) **इक्ष्वाकुरिति** यदा यस्मिन्नवसरे अस्या पुरो नगर्याः निवेशाद् रचनायाः प्रथमं पूर्वं भू र्भूमिरीक्ष्वाकुभूरित्यभिधां नाम अधात् (पिबैति दाभूस्थः सिचो लुप् परस्मै न चेट् । ४ । ३ । ६६ । इ. सू. परस्मैपदे सिचोलुप् न च इट् ) धरतिस्म । तदा तस्मिन्नवसरे आदिदेवः श्रीऋषभप्रभुर्युग्मिपतेर्नाभि र्युगलस्वामिनो नाभिनृपस्य तनुजभूयं पुत्रभावं प्रपेदे प्रपन्न इत्यर्थ तनुजभूयमित्यत्र ' हत्याभूयं भावे ' इति सूत्रेण भवतेर्नपुंसकभावे क्यबन्तो भूय इति निपात ॥ १७ ॥

**योगर्भगोऽपि व्यमुचन्न दिव्यं, ज्ञानत्रयं केवलसंविदिच्छुः ।**
**विशेषलाभं स्पृहयन्न मूलं, स्वं संकटेऽप्युज्झति धीरबुद्धिः ॥ १८ ॥**

(व्या०) **य इति** । यो भगवान् गर्भगोऽपि गर्भस्थोऽपि दिव्यं देवलोकसंबंधि ज्ञानत्रयं ज्ञानानां मतिश्रुतावधीनां त्रयं न व्यमुचत् (लृदित् द्युतादिपुष्यादेः परस्मै । ३ । ४ । ६४ । इ. सू. लृदित्वात् मुचेरद्यतन्यां अङ् प्रत्यय) न मुक्तवान् । किं विशिष्टो भगवान् केवलसंविदिच्छूः (विन्दु इच्छू । ५ । २ । ३४ इ. सू. उप्रत्ययान्तो निपात) केवलज्ञानप्राप्तुकाम । अत्र दृष्टान्तमाह धीरबुद्धिः धीराबुद्धि र्यस्य सः पुमान् विशेषस्याधिकस्य लाभ प्राप्तिस्तं स्पृहयतीति स्पृहयन् इच्छन् संकटेऽपि आपद्यपि मूलं स्वं मूलधनं नोज्झति न त्यजति ॥ १८ ॥

**यत्रोदरस्थे मरुदेव्यदीप्यत्, पुण्येति साध्वीति न कस्य चित्ते ।**
**श्रीधाम्नि सन्मौलिनिवासयोग्ये, महामणौ रत्नखनिः क्षमेव ॥ १९ ॥**

(व्या०) **यत्रेति** यत्र यस्मिन् भगवति उदरस्थे (स्थापास्नात्रः कः । ५ । १ । १४२ इ. सू. स्थाधातो क प्रत्ययः) सति मरुदेवी पुण्या पवित्रा इति निष्पापत्वात् साध्वी (स्वरादुतो गुणादखरो । २ । ४ । ३५ । इ. सू. गुणवाचिसाधुशब्दात् ङीप्रत्ययः) सती इति शीलनिर्मलत्वात् कस्य चित्ते मनसि न

अदीव्यत् न दिदीपे अपितु सर्वस्य चित्ते दिदीपे इति भाव । काइव रत्नखनिः रत्नानां खनिः क्षमा भूमिरिव यथा रत्नखनिः पृथिवी महामणौ उदरस्थे मध्यस्थिते सति कस्य चित्ते न दीव्यति तद्वत् । किं विशिष्टे भगवति श्रीधाम्नि श्रिय' शोभाया' धाम्नि गृहे । पुनः किं विशिष्टे भगवति सन्मौलिनिवासयोग्ये सतां साधूनां मौलौ शीर्षे निवासस्य योग्ये । मणिपक्षे श्रीधाम्नि श्रियो लक्ष्म्या धाम्नि गृहे । पुनः किं० मणौ सन्मौलिनिवासयोग्ये प्रशस्यमुकुटनिवासयोग्ये इति१९

**मध्येऽनिशं निर्भरदुःखपूर्णा–स्ते नारका अप्यदधुः सुखायाम् ।**
**यत्रोदिते शस्तमहोनिरस्त–तमस्ततौ तिग्मरुचीव कोकाः ॥ २० ॥**

(व्या०) मध्य इति । यत्र यस्मिन् भगवति उदिते जाते सति नारका अपि सुखायाम् सुखानुभवं अदधुः (वाद्विषातोऽन' पुस् । ४ । २ । ९१ इ. सू. शितोऽन' पुस्) धरन्ति स्म सुखायामित्यत्र 'सुखादेरनुभवे' इति सूत्रेण सिद्धिः । किं लक्षणा नारका' मध्ये चित्ते अनिशं निरंतरं निर्भरदुःखपूर्णाः (रदादऽमूर्च्छमद'क्तयोर्दस्य च । ४ । २ । ६९ इ. सू. पूरै धातो' परस्य क्तस्य तोन') क्षेत्रजान्योन्यकृत परमाधार्म्मिक कृताभिः त्रिविधवेदनाभिरत्यन्तं दुखिताः इत्यर्थ' । के इव कोकाश्चक्रवाका इव यथा कोकाश्चक्रवाका स्तिग्मरुचि तिग्मा रुक् कान्ति र्यस्यतस्मिन् भास्करे उदिते सति सुखायां सुखानुभवं दधति । किं लक्षणाः कोका' मध्येनिशं (पारे मध्येऽग्रेऽन्तः षष्ठ्या वा । ३ । १ । ३० । इ. सू. मध्ये निशमित्यत्र अव्ययीभावः ) निशाया रजन्या मध्ये रात्रावित्यर्थः । निर्भरेण दुःखेन पूर्णाः पूरिता' किं विशिष्टे भगवति शस्तमहोनिरस्ततमस्ततौ शस्तेन प्रशस्तेन महसा तेजसा निरस्ता निराकृता तमसां पापानां ततिः श्रेणिर्येन तस्मिन् । सूर्यपक्षे प्रशस्ततेजसा प्रकाशेन निरस्ता तमसामन्धकाराणां ततिः पंक्तिर्येनतस्मिन् तमोऽन्धकारे पापे च प्रवर्तते ॥ २० ॥

**निवेश्य यं मूर्धनि मंदरस्या–चलेशितुः स्वर्णरुचिं सुरेन्द्राः ।**
**प्रापेऽभिषेकावसरे किरीट–मिवानुवर्म्मानवरत्नरूपम् ॥ २१ ॥**

(व्या०) निवेश्येति । सुरेन्द्रा' सुराणां देवानामिन्द्राः स्वामिन. अभिषेकस्य अवसरे समये (यद्भावोभाव लक्षणम् । २ । २ । १०६ । इ. सू. भावलक्षणा सप्तमी) जन्माभिषेक समये प्राप्ते सति यं भगवन्तं अनुवन् स्तुवन्ति स्म । किं कृत्वा अचलानां गिरीणामीशिता स्वामी तस्य पर्वतेश्वरस्य मन्दरस्य मेरो मूर्द्धनि (सप्तम्यधिकरणे । २ । २ । ९५ । इ. सू. वैषयिकाधारे सप्तमी) मस्तके किरीटमिव मुकुटमिव स्वर्णवत् रुचिः कान्ति र्यस्य तं सुवर्णकान्तिं यं स्वामिनं निवेश्य उपविश्य कथंभूतं भगवन्तं मानवरत्नरूपं मानवेषु मनुष्येषु रत्नरूपं रत्नप्रायं । अन्यस्यापि अचलेशितु' अचला पृथ्वी तस्या ईशितुः पृथ्वीपते मूर्धनि मस्तके मुकुटो निवेश्यते अर्थवशाद् विभक्तिविपरिणामः कीदशो मुकुटः स्वर्णरुचिः पुनश्च मानवरत्नरूपः माया लक्ष्म्या नवो नूतनो रत्नरूपश्चयः समानः ॥ २१ ॥

**सुपर्वसु स्वानुचरेषु तोषा,–दिवेक्षुदंडेऽस्य सुपर्वणीन्द्रः ।**
**शिशोर्विदित्वा रुचि माशु वंश,–मीक्ष्वाकुनामांकितमातनिष्ट ॥२२॥**

(व्या०) सुपर्वसु इति ॥ इन्द्रो मघवा आशु शीघ्र इक्ष्वाकुनामांकितं इक्ष्वाकुनामा नृपस्तस्य नाम्ना अभिधानेन अंकितं वंशमन्वय मातनिष्ट विस्तारयामासे। कस्मादिव उत्प्रेक्षते स्वस्यात्मनः अनुचरा' सेवकास्तेषु निजसेवकेषु सुपर्वसु देवेषु तोषादिव हर्षादिव किं कृत्वा अस्य स्वामिन' शिशोर्बालस्य इक्षुदंडे रुचिमभिलाषं विदित्वा (प्राक् काले । ५ । ४ । ४७ । इ. सू. विद् धातोःक्त्वा) ज्ञात्वा किं विशिष्टे इक्षुदंडे सुपर्वणि शोभनानि पर्वाणि ग्रन्थयो यस्य तस्मिन् शोभनपर्वणि । सुपर्वशब्देन देवा अपि उच्यन्ते ग्रन्थयश्च इक्षुदंडोऽपि शोभनपर्वत्वात् इक्षुदंडेऽपि रुचिर्जातेति भाव' । देवेष्वपि तोष इति भावः कोऽर्थः अतीतवर्तमानैष्यतामाद्यार्हतां वंशस्थापनादि कार्यं शक्रस्याधीनमिति कृत्वा प्रभोर्वंश स्थापने प्रस्तुते इक्षुयष्टिहस्त आगत' अर्हद्दृष्टि मिक्षौ इक्षुविषये स्वामिनो रुचिं दृष्ट्वोचे प्रभो किं इक्षु–मकु र्भक्षयसि अक् भक्षणे इति । तदनन्तर मर्हन् स्वकरं प्रासारयत् । अतो हेतोर्हरि' शक्र इक्ष्वाकुवंशमस्थापयत् । तदाऽन्येऽपि क्षत्रिया

इक्षुं भुञ्जते तेन भवन्ति इक्ष्वाकव' प्रभोश्च पूर्वजा' काश्य मिक्षुरसं पीतवन्तस्ततः काश्यपगोत्र मिक्षुवंशश्च तदा पानीयवल्लीवद्रसं गलन्ति स्म ॥ २२ ॥

**विलोक्य यं पालनके शयालुं, यशोऽस्य लोकत्रयपूरकं च ।**
**कार्यं कलामश्वति कारणस्ये-त्युक्तिर्मृषैवानिमिषैरघोषि ॥ २३ ॥**

(व्या०) **विलोक्येति** । अनिमिषैर्देवैरित्युक्तिर्मृषैव अलीकैव अघोषि । इतीति काऽक्तिः कार्यं कारणस्य कला मश्वति—प्राप्नोति । किं कृत्वा यं भगवन्तं पालनके शेत इत्येवंशीलस्तं शयालुं ( शीङ्श्रद्धा—निद्रा—तन्द्रा—दयि—पति—गृहि—स्पृहेरालुः । ५ । २ । ३७ । इ. सू. शीलादिसदर्थे शीङ् धातोः आलु प्रत्यय') स्वप्नशीलं विलोक्य दृष्ट्वा च अन्यत् अस्य भगवतो यशो लोकानां त्रयस्य (द्वित्रिभ्या मयट् वा । ७ । १ । १५२ । इ. सू. अवयवार्थे त्रिशब्दात् अयट् प्रत्ययः) पूरकं (णक तृचौ । ५ । १ । ४८ इ. सू. कर्तरि णक') तत् विश्वत्रयव्यापकं च विलोक्य । कार्यं घट' कारणमृत्पिंडानुमानेन घटः स्यात् । अत्र कारणं भगवान् यशस्तु कार्यम् । भगवान् पालनके माति यशस्तु लोकत्रयेऽपि न माति अत एव कार्यकारणयोः सादृश्ये मृषात्वमिति भावः ॥२३॥

**आशाम्बरः शान्तविकल्पवीचि,-मना विना लक्ष्य मचञ्चलाक्षः ।**
**बालोऽपि योगस्थितिभूरवश्यः, स्वस्यायतौ यः कमनेन मेने ॥२४॥**

(व्या०) आशाम्बर इति । यो भगवान् कमनेन ( रम्यादिभ्य' कर्तरि । ५ । ३ । १२६ । इ. सू. कर्तरि अनट्) कन्दर्पेण आयतौ उत्तरकाले स्वस्यात्मन अवश्यो(दण्डादे र्यः । ६ । ४ । १७८ । इ. सू. अर्हत्यर्थे य')ऽनधीनो मेने मन्यतेस्म । कथंभूतो भगवान् बालोऽपि शिशुरपि योगस्तस्य योगिनो मर्यादानां भू' स्थानमित्यर्थ' पुन' कथंभूत' आशाः दिशः एव अम्बराणि वस्त्राणि यस्य सः दिगम्बर इत्यर्थ' । पुनश्च कथंभूतः शान्तविकल्पवीचिमनाः (अम्वादेरत्वस सौ । १ । ४ । ९० । इ. सू सौपरे दीर्घ') शाता' प्रशान्ताः विकल्पा एव वीचय' कल्लोलाः यस्मिन् तत् एवंविधं मनः चेतो यस्य सः । पुनश्च कथंभूत लक्ष्यं विलोकनीयं वस्तु विनापि न चञ्चले अचञ्चले निश्चले

अक्षिणी नेत्रे यस्य स निश्चललोचनः यो भगवान् एवंविधो विद्यते अतः कम-नस्य कामस्य हृदये भगवति अजेयत्वशंका जातेति भावः ॥ २४ ॥

**अस्तन्यपायीति विनिश्चितोऽपि, काऽमुं पयोऽपीप्यदिति स्वमातुः ।**
**चिराय चेतश्चकितं चकार, स्मितेन धौताधरपल्लवो यः ॥ २५ ॥**

(व्या०) अस्तन्यपायीति ॥ यो भगवान् अस्तन्यपायी स्तन्यं (दिगादिदेहांशाद्यः । ६ । ३ । १२४ । इ. सू. भवार्थे य.) दुग्धं पिबति इत्येवंशीलः शीलेऽर्थे णिन्) स न स्तन्यपायी (अजातेः शीले । ५ । १ । १५४ इ. सू. शीलेऽर्थे णिन्) स न भवतीति अस्तन्यपायी इति विनिश्चितोऽपि इति निर्णीतोऽपि स्वस्य आत्मनो माता जननी तस्याः आत्मीयजनन्याश्चेतोमनश्चिराय चिरकालं इत्यमुनाप्रकारेण चकितं चकार इतीति किं का स्त्री अमुं बालं पयो दुग्ध मपीप्यत् (ङे पिबः पीप्य् । ४ । १ । ३३ । इ सू. ङे परे अद्यतन्यां पिबः पीप्य्) पाययति स्म । अथ पयःपानशंकायां हेतुमाह किं विशिष्टो भगवान् स्मितेन हास्येन धौताधरपल्लवः धौतः अधर एव पल्लवो यस्य स. प्रक्षालितौष्ठपल्लवः सर्वेऽपि तीर्थकृतो बाल्ये मातुः स्तन्यपानं न कुर्वते इति भावः ॥ २५ ॥

**अश्रौघदंभाद्बहिरुद्गतेन, माता नमाता हृदि संमदेन ।**
**परिप्लुताक्षी तनुजं स्वजन्ती, यं तोषदष्टेरपि नो बिभाय ॥ २६ ॥**

(व्या०) अश्रौघेति ॥ माता मरुदेवी यं तनुजं पुत्रं स्वजन्ती (श्यशवः । २ । १ । ११६ । इ. सू. शवात् अतुरन्तादेशः) आलिंगन कुर्वती सती तोषदष्टे(पंचम्यपादाने । २ । २ । ६९ । इ. सू. भययोगे पंचमी)रपि संतोषदशोऽपि नो बिभाय न बिभेति स्म । माता किं विशिष्टा संमदेन हर्षेण परिप्लुताक्षी परिप्लुते अक्षिणी लोचने यस्याः सा प्लावितलोचना । किं विशिष्टेन संमदेन हृदि मनसि न माता मातीति मान् तेन माता पुनः किं विशिष्टेन अश्रौघदंभात् (प्रभृत्यन्यार्थे दिक् शब्द बहि रारादितरैः । २ । २ । ७५ । इ. सू. बहिर्योगे पंचमी) अश्रुप्रभावमिषात् बहिरुद्गतेन बहिर्निःसृतेन ॥२६॥

**अव्यक्त मुक्तं स्खलदंघ्रियानं, निःकारणं हास्य मवस्त्रमङ्गम् ।**
**जनस्य यद्दोषतयाभिधेयं, तच्छैशवे यस्य बभूव भूषा ॥ २७ ॥**

(व्या०) अव्यक्तमिति । जनस्य लोकस्येति पदं सर्वत्र संबध्यते । जनस्य लोकस्य यत् अव्यक्तं उक्तं मन्मनत्वेन भाषणं स्खलदंघ्रियानं लुठच्चरणाभ्यां यानं गमनं निष्कारणं कारणं विना हास्यं (ऋवर्णव्यञ्जनात् घ्यण् । ५ । १ । १७ । इ. सू. घ्यण् भावे ज्ञेयः) अवस्त्रं वस्त्ररहितं अंगं शरीरं दोषतया अभिधेयं दूषणत्वेन वाच्यं स्यात् तत् यस्य भगवतः शैशवे (इउऋ वर्णात् लघ्वादेः । ७ । १ । ६९ । इ. सू. भावेऽर्थे अण्) बाल्ये भूषा आभरणं बभूव जातमित्यर्थः २७

**दूरात् समाहूय हृदोपपीडं, माद्यन्मुदा मीलितनेत्रपत्रः ।**
**अथांगजं स्नेह विमोहितात्मा, यं ताततातेति जगाद नाभिः ॥२८॥**

(व्या०) दूरादिति । नाभि र्यं भगवन्तं दूरात् समाहूय (यजादि वचेः किति । ४ । १ । ७९ । इ. सू. य्वृत् दीर्घमवोऽन्त्यम् । ४ । १ । १०३ । इ. सू. अन्त्यं य्वृत् दीर्घम्) आकार्य हृदोपपीडं (उपपीडरुधकर्षस्तत्सप्तम्याः । ५ । ४ । ७५ । इ. सू. वाणम्) हृदा हृदयेन उपपीडय तात तातइति जगाद उवाच । कीदृशं भगवन्तं अंगजं पुत्रमपि नाभिः कीदृक् स्नेहविमोहितात्मा स्नेहेन प्रेम्णा विमोहित आत्मा यस्य सः पुनः कीदृग् नाभिः माद्यन्मुदा हर्षेण मीलितनेत्रपत्रः मीलिते नेत्रे एव पत्रे यस्य सः ॥ २८ ॥

**भारेण मे भूभरणाभियोगि, भुग्नं शिरो मा भुजगप्रभोर्भूत् ।**
**इतीव ताते ह्वयति द्रुतं यो, मन्दांघ्रिविन्यासपदं चचाल ॥ २९ ॥**

(व्या०) भारेणेति । यो भगवान् ताते पितरि नाभौ ह्वयति आकारयति सति द्रुतं शीघ्रं मन्दांघ्रिविन्यासपदं (पाठान्तरे रसं) मन्दं चरणन्यासपदं यथा भवति तथा चचाल । तत् उत्प्रेक्षतेइतीव इतिकारणादिव मे मम भारेण भुजगप्रभोः भुजं कुटिलं गच्छन्ति भुजगाः सर्पास्तेषां प्रभुः स्वामी तस्य शेषनागाधिराजस्य भूभरणे अभियोगि उद्यमकारि शिरो मस्तकं भुग्नं वक्रं मा भूत्

(अड् धातोरादि र्ह्यस्तन्यां चामाङा । ४ । ४ । २९ । इ. सू. ह्यस्तन्यां अद्यतन्यां क्रियातिपत्तौ धातोरादिरडागमः न तुमाङ्योगे तेन अत्र माङ् योगे न जातः) मा भवतु ॥ २९ ॥

**यः खेलनाद्धूलिषु धूसरोऽपि, कृताप्लवेभ्योऽधिकमुद्दिदीपे ।**
**तारै रनभ्रैः प्रभयानुभानु, रभ्रानुलिप्तोऽप्यधरीक्रियेत ॥ ३० ॥**

(व्या०) य इति । धूलिषु खेलनात् क्रीडनात् धूसरोऽपि यो भगवान् कृताप्लवेभ्यः कृतमाप्लवं स्नानं यैस्ते तेभ्यः कृतस्नानेभ्योऽप्यधिकं उद्दिदीपे दीप्यतेस्म । अत्र दृष्टान्तः अभ्रानुलिप्तः अभ्रैर्मेघैरनुलिप्त आच्छादितोऽपि भानुः सूर्यः अनभ्रैरभ्ररहितैः तारैः प्रभया तेजसा किमधरीक्रियेत तिरस्क्रियेत अपि तु नैव न क्रियेत ॥ ३० ॥

**उद्भूतबालोचितचापलोऽपि, लुलोप यो न प्रमदं जनानाम् ।**
**कस्याप्रियः स्यात् पवनेन पारि,-प्लवोऽपि मन्दारतरोः प्रवालः ॥३१॥**

(व्या०) उद्भूत इति उद्भूतं प्रकटीभूतं बालस्य शिशोः उचितं योग्यं चपलस्य भावश्चापलं (युवादे रण् । ७ । १ । ६७ । इ. सूत्रेणभावेऽर्थे अण्) यस्य सः प्रकटीभूतबालोचितं चपलभावोऽपि यो भगवान् जनानां लोकानां प्रमदं (संमद प्रमदौ हर्षे । ५ । ३ । ३३ । इ. सू. हर्षेऽर्थे अलन्तः प्रमदो ज्ञेयः ।) हर्षं न लुलोप न लुप्तवान् मन्दारतरोः कल्पवृक्षस्य प्रवालः किशलयः पवनेन वायुना पारिप्लवोऽपि चपलोऽपि सन् कस्य पुंसः अप्रियः स्यात् । अपितु न कस्यापीति ॥ ३१ ॥

**लसद्विशेषाकृतिवर्णवेषा, लेखाः परेषामसुलभमर्भम् ।**
**यं बालहारा इव खेलनौघैः, कटीतटस्थं रमयांबभूवुः ॥ ३२ ॥**

(व्या०) लसदिति ॥ लेखा देवा यं भगवन्तं अर्भं बालरूपं कटीतटस्थं (स्थापास्नात्रः कः । ५ १ । १४२ । इ. सू. स्थः कः ।) कटी एव तटस्तस्मिन् तिष्ठति तं रमयांबभूवुः (धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानुतदन्तम् । ३ । ४ । ४६ । इ. सू. अनेकस्वरेभ्यो धातुभ्यः परोक्षाया स्थाने

आम् प्रत्ययः तस्माच्च परोक्षान्ताः कृभ्वस्तयः प्रयुज्यन्ते तेन रमेरपि ज्ञेय.) कीदृशा लेखा देवा' लसद्विशेषाकृतिवर्णवेषाः आकृतिश्च वर्णश्च वेषश्च आकृतिवर्णवेषा' लसन्तः विशेषा आकृतिवर्णवेषा येषां ते कोऽर्थ देवानां देहः स्वभावेन केश रोम नख मांस चर्म अस्थि वसा रुधिर मलमूत्र रहित शुभवर्णादियुक्त पुद्गल निष्पन्नतेजोमयस्वरूपत्वात् विशेष. ते देवा वैक्रियरूपं कृत्वा सर्वोत्तमवर्णवेषादि भगवन्त रमयामासुरिति भाव' कीदृशं भगवन्तं बालं परेषामन्येषां सामान्यानां पुण्यहीनानां अलुलंभं दुष्प्राप्यं । लेखा' के इव बालहारा इव यथा नृपबालक्रीडाकारका बालं कटीस्थं रमयन्ति तद्वत् ॥ ३२ ॥

**रसाल सालं प्रति दत्तदृष्टौ. श्रोतुं च सूक्तानि सतृष्णकर्णे ।**
**अनन्यकृत्या अभजन्नमर्त्या, यत्र स्वभक्त्याशुकवित्वमुच्चैः ॥३३॥**

(व्या०) रसालसालमिति ॥ अमर्त्या देवा' यत्र यस्मिन् भगवतिविषये उच्चैरत्यर्थं स्वभक्त्या निजसेवया शुकवित्वं शुकपक्षित्वं पक्षे आशुकवित्वं शीघ्रकवित्वं अभजन् सेवन्ते स्म । किं लक्षणा अमर्त्याः अनन्यकृत्या' न विद्यते अन्यत् कृत्यं कार्यं येषां ते । कथंभूते भगवति रसालसालं सहकारवृक्षं प्रति दत्ता दृष्टिर्येन तस्मिन् सति पुनश्च कीदृशे भगवति सूक्तानि (क्तक्तवतू । ५ । १ । १७४ । इ. सू. क्तेपरे वचः यजादिवचे' किति । ४ । १ । ७९ । इ. सू. घ्यण् चज' कगम् । २ । १ । ८६ । इ. सू. चस्य कः सुः पूजायाम् । ३ । १ । ४४ । इ. सू. तत्पुरुषः सुष्ठु उक्तानि) अन्येषां सुभाषितानि श्रोतुं सतृष्णकर्णे तृष्णया सह वर्तेते एवंविधौ कर्णौ यस्य तस्मिन् सति ॥ ३३ ॥

**परार्थदृष्टिं कलहंसकेकि-कोकादिकेलीकरणैरकाले ।**
**नीत्वाभिमुख्यं सुखतो यमीशं, मुधाभिधानं विबुधैर्न दध्रे ॥३४॥**

(व्या०) परार्थदृष्टिमिति ॥ विबुधैः देवै र्विबुध इत्यभिधानं नाम मुधा वृथा न दध्रे न धृतम् ॥ विबुधा देवा विद्वांसश्च कथ्यन्ते । हेतुमाह किं कृत्वा यं ईशं स्वामिनं अथवा यमिन' संयमिनस्तेषां ईशं भर्तारं सुखतः (अहीयरुहोऽपादाने । ७ । २ । ८८ । इ. सू. वा तसु प्रत्यय') सुखादेव आभिमुख्यं

स्वसांमुख्यं नीत्वा प्राप्य अकाले अप्रस्तावे कैः करणभूतैः कलहंसकेकि कोकादि-करणैः कलहंसाश्च केकिनश्च मयूरा कोकाश्च चक्रवाकाः ते आदयो येषां तेषां पक्षिणां केल्यः क्रीडास्तासां करणैः विधानैः । किं विशिष्टं यं परार्थदृष्टिं परस्मिन् अर्थे घटपटादिपदार्थे दृष्टि इति बालस्वभावात् वस्तुतस्तु परोपकारे दृष्टिः यस्य सः तं परार्थदृष्टिं विभुवस्य एतदेवफलं यत् सुखेनैव सर्वकार्यसाधनमिति भावः ३४

**क्रोडीकृतः काञ्चनरुग् जनन्या, प्रियंगुकान्त्या घननीलचूलः ।**
**यः सप्तवर्षोपगतः सुमेरोः, श्रियं ललौ नन्दनवेष्टितस्य ॥ ३५ ॥**

(व्या०) क्रोडीकृत इति । यो भगवान् सप्तवर्षोपगत. सप्तवर्षसंयुक्तस्सन् सुमेरुपर्वतस्य श्रियं शोभां ललौ (आतो णव औ । ४ । २ । १२० । इ. सू. आकारान्तधातोः णव औः स्यात् तेन ललौ रूपं ज्ञेयम्) लभते स्म गृहीत-वानिति यावत् । किं लक्षणस्य मेरो नन्दनवेष्टितस्य नन्दनेन उद्यानेन परितो वेष्टितस्येत्यर्थः कीदृशो भगवाश्च प्रियंगुवत् कान्ति यस्याः सा तया नीलकान्त्या जनन्या मात्रा मरुदेव्या क्रोडीकृत (कृम्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्वे च्विः । ७ । २ । १२६ । इ. सू. च्वौ कृते ईश्च्वाववर्णस्याऽनव्ययस्य । ४ । ३ । १११ । इ. सू. अस्य ई वर्णे ऊर्याद्यनुकरणच्विडाचश्चगतिः । ३ । १ । २ इ. सू. गतिसंज्ञा गतिकन्यस्तत्पुरुषः । ३ । १ । ४२ । इ. सू. गतितत्पुरुषः अप्रयोगीत् । १ । १ । ३७ । इ. सू. च्विलोपः) उत्संगे उपवेशितः पुनश्च कीदृक् काञ्चनरुक् काञ्चनस्य रुक् इव रुक् यस्य सः काञ्चनवर्णः । मेरुपक्षे कांचनरुक्कांचनमयः सप्तवर्षोपगतः सप्तभिः वर्षैः क्षेत्रैः भरताद्यैरुपगतः तद्यथा 'भरहं १ हेमवयंति २ हरिवासंति ३ महाविदेहं ४ । रम्मय ५ मेरुण्णवयं ६ एरवयं ७ चैव-नामाइं ॥' ॥१॥ एतैः सप्तक्षेत्रैर्युक्त इत्यर्थः ॥ ३५ ॥

**पुरा परारोहपरा भवस्था,-वश्याः कशाकेष्टमदृष्टवन्तः ।**
**ववंधिरेऽनेन बलात्कुरंगा, इवोच्छलन्तः शिशुना तुरङ्गाः ॥ ३६ ॥**

(व्या०) पुरेति शिशुना बालेन अनेन भगवता तुरंगाः (नाम्नो गमः खड्डौ च विहायसस्तु विहः । ५ । १ । १३१ । इ. सू. खड् प्रत्ययः ।

खित्यनव्ययाऽरुषोर्मोऽन्तो ह्रस्वश्च । ३ । २ । १११ । इ. सू. खिति परे मोऽन्तः) तुरो वेगेन गच्छन्तीति तुरंगा। अश्वा बलात् हठात् बबंधिरे बध्यन्ते स्म । किं लक्षणास्तुरंगा. पुरा पूर्वं परारोह पराभवस्य परेषा मन्येषां आरोहश्चटनं स एव पराभवस्तस्य न वश्याः अवश्याः अनधीना पुनश्च किं कृतवन्तः कुरंगा मृगा इव कशाया कष्टं तर्जनकस्य कष्टं कदापि अदृष्टवन्त (क्तक्तवतू । ५ । १ । १७४ । इ. सू. भूते कर्तरि क्तवतु प्रत्ययः) न दृष्टवन्त पुनश्च किं कुर्वन्तः कुरंगा इव उच्छलन्त हरिणा इव उर्ध्वमापतन्तः ॥ ३६ ॥

**करे करेणुः स्वकरेण मत्तो, वने चरन् येन धृतो बलेन ।**
**रोषारुणं चक्षुरिहादधानो, गात्रं धुनानोऽपि न मोक्षमाप ॥ ३७ ॥**

(व्या०) करे इति ॥ करेणुर्हस्ती गात्रं धुनानोऽपि मोक्षं न आप किं विशिष्टः करेणुर्वनेचरन् पुनश्च कीदृक् येन भवता करे शुंडादंडे स्वकरेण स्वस्यात्मन करोहस्तस्तेन निजहस्तेन बलेन धृत । किं कुर्वाण इह भगवति रोषारुणं (तृतीया तत्कृतैः । ३ । १ । ६५ । इ. सू. तृतीया तत्पुरुषः) रोषेण कोपेनारुणं रक्तं चक्षुर्नेत्रं आदधानो निवेशयन् । अत्र वृत्ते करे इति पदं द्विः लिख्यते करे करे अणुः करो राजदेयभागस्तत्र करे करे अणु. सूक्ष्मः आदायकत्वात् योगी स्वकरेण आत्मीयतेजसा मत्तो मानी वनेचरन् योगिनां प्रायो वनचारित्वात् पुनश्च कीदृक् बलेन सामर्थ्येन या लक्ष्मी स्तस्या ईनः स्वामी कृष्णस्तेन धृत आदृतवैष्णवत्वात् केषांचिद्योगिनां किं कुर्वाण इह भगवति रोषारुणं चक्षुरादधानो जैनानिष्टत्वात् पुनश्च किं कुर्वाणः अश्वकर्म गजकर्म नौलीकर्म पूरकरेचककुंभकादिभिर्गात्रं शरीरं धुनानोऽपि चापलयन्नपि अत एव कारणान्मोक्षं मुक्तिं न आप—प्राप.प्रायः सम्यग्दर्शनं विना न मोक्ष—इति जिनवचनात् ३७.

**चापल्यकृद्बाल्य मपास्य सोऽथ, स्वे यौवनं वासयति स्म देहे ।**
**साध्वौचिती धुर्यविशेषदानात्, प्रकाशयामास तदप्यमुष्य ॥३८॥**

(व्या०) चापल्यकृदिति ॥ अथ अनन्तरं स भगवान् देहे स्वशरीरे यौवनं यूनो भावो यौवनं (युवादेरण् । ७ । १ । ६७ । इ. सू. अत्र भावेऽर्थे

अण् ज्ञेयः) वासयति स्म किं कृत्वा बाल्यं बालभावं—अपास्य परित्यज्य किं लक्षणं बाल्यं (वर्णदृढादिभ्यष्टयण् च वा । ७ । १ । ५९ । इ. सू. बाल्य चापल्य शब्दसिद्धिः) चापल्यकृत् (क्विप् । ५ । १ । १४८ । इ. सू. नाम्नः परात् धातोः क्विप् प्रत्ययः हृस्वस्य तः पित्कृति । ४ । ४ । ११३ । इ. सू. हृस्व धातोः पित्कृति तः अप्रयोगीत । १ । १ । ३७ । इ. सू. क्विपः इत्संज्ञा तेन चापल्यकृत सिद्धम्) चपलस्य भावं करोतीति चापल्यकृत् । तदपि यौवनमपि अमुष्य भगवतो द्युम्नं द्रव्यं बलं वा तस्य विशेषदानात् साधोः सत्पुरुषस्य औचिती औचित्यगुणं प्रकाशयामास । उपकारकारके प्रत्युपकारः क्रियते इतिः सतां लक्षण मिति भाव ॥ ३८ ॥

अथ भगवतो रूपवर्णनमाह । 'मानवा मौलितो वर्ण्या, देवा श्चरणतः पुनः' इति न्याये सत्यपि भगवतो मानवत्वेऽपि तीर्थंकराणां देवत्वमेव कथ्यते ॥

**तस्याननेन्दावुपरि स्थितेऽपि, पादाब्जयोः श्रीरभवन्न हीना ।**
**धत्तां स एव प्रभुता मुदीते, द्रुह्यन्ति यस्मिन्न मिथोऽरयोऽपि ॥३९॥**

(व्या०) तस्येति ॥ तस्य भगवत आननेन्दौ आननं मुखमेव इन्दुश्चन्द्रस्तस्मिन् मुखचन्द्रे उपरि स्थितेऽपि पादाब्जयो. पादावेव—अब्जे कमले तयोः चरणकमलयोः श्रीर्लक्ष्मीः हीना न्यूना न अभवत् । स एव पुमान् प्रभुतां (भावे त्वतल् । ७ । १ । ५५ । इ. सू. भावेऽर्थे तल् प्रत्ययः ।) स्वामित्वं धत्तां यस्मिन् पुरुषे उदीते सति मिथः परस्परं अरयोऽपि वैरिणोऽपि न द्रुह्यन्ति, द्रोहं न कुर्वन्तीत्यर्थः मुखचन्द्रश्चरणकमले एषां यो विरोध स भगवता भग्न इति भावः ॥ ३९ ॥

**दत्तैर्नमद्भिः ककुभामधीशैः, श्चान्द्रैः किरीटै र्निजराजचिन्हैः ।**
**पद्भ्यां प्रभोरङ्गुलयो दशापि, कान्ता अभूष्यन्त मिषान्नखानाम् ॥४०॥**

(व्या०) दत्तैरिति ॥ प्रभोः श्रीऋषभदेवस्य पद्भ्यां (दन्तपाद नासिका । २ । १ । १०१ । इ. सू. पादस्यत्वापद्) चरणाभ्यां दशापि अङ्गुलय

कान्ता मनोज्ञा नखानां मिषात् चान्द्रैः (तेन निर्वृते च । ६ । २ । ७१ । इ. सू. निर्वृतेऽर्थे अण् प्रत्ययोऽत्र ज्ञेयः) चन्द्रकान्तरत्ननिर्मितैः किरीटैर्मणिमयमुकुटैरभूष्यन्त अलंकृता । किं विशिष्टैः किरीटैः नमद्भिः नमस्कारं कुर्वद्भिः ककुभां दिशामधीशैः स्वामिभिः दिक्पालैर्दत्तैः (दत् । ४ । ४ । १० । इ. सू. धावर्जं दासंज्ञकस्य तादौ किति दत् आदेशः) पुनः किं विशिष्टैः निजराजचिन्हैः निजस्यात्मनः राजचिन्हभूतैः अन्योऽपि यो महान्तं राजानं सेवते स निजराजचिन्हानि पुरो ढौकयते ॥ ४० ॥

**अन्तः ससारेण मृदुत्वभाजा, पादाब्जयोरूर्ध्वमवस्थितेन ।**
**विलोमताऽधायि तदीयजंघा,-नालद्वयेनालमनालमेतत् ॥ ४१ ॥**

(व्या०) अन्तरिति तदीयजंघानालद्वयेन तस्य भगवत इमे तदीये (तस्येदम् । ६ । ३ । १६० । इ. सू. ईय प्रत्ययः) च ते जंघे एव नाले तयोर्द्वयेन (द्वि त्रिभ्यामयट् वा । ७ । १ । १५१ । इ. सू. अयट्) द्विकेन अलमत्यर्थं विलोमता लोमरहितत्वं अन्यनालेभ्यो विसदृशत्वं वैपरीत्यं वा अधायि धार्यते स्म एतत्-अनालं सम्यग् किं लक्षणेन तदीयजंघानालद्वयेन अन्तः ससारेण मध्येसारसहितेन पुनश्च किं० मृदुत्वभाजा (भावेत्वतल् । ७ । १ । ५५ । इ. सू. भावेऽर्थेत्व प्रत्ययः च भजो विण् । ५ । १ । १४६ । इ. सू. नाम्न परात् भज् धातोर्विण् प्रत्ययः । अप्रयोगीत् । १ । १ । ३७ । इ. सू. विण् लोपः) मृदुनः सुकुमारस्य भावं भजति तेन सौकुमार्यं सेवमानेन पादाब्जयोः पादौ चरणावेव अब्जे कमले तयोः चरणकमलयोः ऊर्ध्वमुपरि अवस्थितेन अतोऽन्यकमलनालेभ्योऽत्र वैपरीत्यमिति भावः ॥ ४१ ॥

**धीरांगनाधैर्यभिदे पृषत्काः, पञ्चेषुवीरस्य परेऽपि सन्ति ।**
**तदूरुतूणीरयुगं विशाल,-वृत्तं विलोक्येति बुधैरतर्कि ॥ ४२ ॥**

(व्या०) धीरांगनेति । बुधैर्विद्वद्भिः तदूरुतूणीरयुगं तस्य भगवतः ऊरू सक्थिनी तावेव तूणीरौ निषंगौ तयो र्युगं युगलं विलोक्य (अनञः क्त्वो यप् । ३ । २ । १५४ । इ. सू. क्त्वोयप्) प्रेक्ष्य इति वक्ष्यमाण प्रकारेण अतर्कि

विचार्यते स्म । कथंभूत तदूरुतूणीरयुगं विशालं च तत् वृत्तं च तत् । इतीति किं धीरांगनाधैर्यभिदे धीराश्चता अङ्गनाश्च स्त्रियस्तासां धैर्यस्य भिदे शीले निश्चलचित्तानां स्त्रीणां धैर्यभेदनार्थं पञ्चेषुवीरस्य पञ्च उन्मदेन १ मदन २ मोदन ३ तपन ४ शोषण ५ रूपा इषवो बाणा यस्य स पंचेषुः स चासौ वीरश्च तस्य परेऽपि अन्येऽपि पृषत्का बाणाः सन्तीति बहून् बाणान् विना तूणीरयुग्मं न स्यादिति वितर्के ॥ ४२ ॥

**कटीतटीमप्यतिलंघ्य धावँ,-ल्लावण्यपूरः प्रससार तस्य ।**
**तथा यथा नाऽनिमिषेन्द्रदृष्टि,-द्रोण्योऽप्यलं पारमवाप्तुमस्य ॥४३॥**

(व्या०) कटीतटीमिति ॥ तस्य भगवतो लावण्यस्य पूरस्तदा प्रससार किं कुर्वन् लावण्यपूरः कटीतटीं कटी एव तटी तामपि अतिलंघ्यातिक्रम्य धावन् धावतीति धावन् 'ल्लिलौ' इति सूत्रेण नकारस्य लत्वं जातम् । यथा अनिमिषेन्द्रदृष्टिद्रोण्य अनिमिषाणां देवानां इन्द्राः स्वामिनो देवेन्द्रास्तेषां दृष्टयो दृश एव द्रोण्यो बेडा नौका इति यावत् अथवा अनिमिषा–तेषु इन्द्रा. समर्थाः महान्तो मत्स्यास्तेषु दृष्टि र्येषां ते अनिमिषेन्द्रदृष्टयोधीवरास्तेषां द्रोण्यो बेडा अपि अस्य लावण्यपूरस्य पारमन्त मवाप्तुं (क्त्वा तुमम् भावे । ५ । १ । १३ । इ. सू. भावे तुम्) प्राप्तुं नालं न समर्था अभूवन् । प्रायः प्रचुरे पयः पूरे बेडानामसमर्थत्वमिति युक्तम् ॥ ४३ ॥

**सनाभितामञ्चति नाभिरेकः, कूपस्य तस्योदरदेशमध्ये ।**
**प्रभाम्बु नेत्राञ्जलिभिः पिपासुः, कथं वितृष्णा जनतास्तु तत्र ॥४४॥**

(व्या०) सनाभितामिति तस्य भगवत उदरदेशमध्ये उदरस्य यः प्रदेशस्तस्य मध्ये एको नाभिः कूपस्य सनाभितां सादृश्य मञ्चति प्राप्नोति तत्र नाभौ जनानां समूहो जनता (ग्राम जन बन्धु गज सहायात् तल् । ६ । २ । २८ । इ. सू. समूहेऽर्थे तल् ) जनसमूहः कथं वितृष्णा विगतातृष्णा यस्याः सा तृष्णारहिता अस्तु भवतु अपि तु नैव भवतु किं कर्तुकामा जनता नेत्राणि एव अञ्जलयस्तैः दृष्टिरूपाञ्जलिभिः प्रभाम्बु प्रभारूपजलं पिपासुः (सन् भिक्षा

शंसेरुः । ५ । २ । ३३ । इ. सू. उ) पातुमिच्छतीति पिपासतीति पिपासुः पातुमिच्छु रित्यर्थः ॥ ४४ ॥

**उपर्युरः प्रौढ मधः कटी च, व्यूढान्तराभूत्तलिनं विलग्नम् ।**
**किं चिन्मयेऽस्मिन्ननु योजकानां, त्रिलोकसंस्थाननिदर्शनाय ॥४५॥**

**(व्या०)** उपरीति ॥ अस्मिन् भगवति इति पदं सर्वत्र योज्यते उपरि उरो वक्षः स्थलं प्रौढं अन्यत् अधः कटी च व्यूढा विस्तीर्णा । अन्तराअव्ययः शब्दः मध्ये विलग्नमुदरं तलिनं कृशमभूत् । किमर्थं चिन्मये ज्ञानमयेऽस्मिन् भगवति अनुयोजकानां (णक तृचौ । ५ । १ । ४८ । इ सू. कर्तरि सर्वस्मात् धातोर्णकः) पृच्छकानां त्रिलोकसंस्थाननिदर्शनाय त्रिलोकस्य संस्थानमाकारस्तस्यनिदर्शनाय कोऽर्थः ज्ञानमयो भगवान् सर्वलक्षणोपेतत्वात् जडानां लोकानां वेत्रासमोधस्तादित्यादि त्रैलोक्यसंस्थानमदर्शयत् तथापि ते लोका न ज्ञातवन्तः पश्चात्तेषां स्वीयमेव रूपं दर्शयामास भगवानिति तात्पर्यार्थः ॥४५॥

**व्यूढेऽस्य वक्षस्यवसत्सदा श्री-वत्सः किमु छद्मधिया प्रवेष्टुम् ।**
**रुद्धः परं बोधिभटेन मध्य, मध्यूषुषासीद्बहिरङ्ग एव ॥ ४६ ॥**

**(व्या)** व्यूढ इति ॥ श्रीवत्सो लाञ्छनं कंदर्पो वा अस्य भगवतो व्यूढे विशाले वक्षसि हृदये किमु छद्मधिया कपटबुद्ध्या प्रवेष्टुं सदाजस्र मवसत् ॥ परं केवलं बोधिभटेन सम्यक् तत्त्वपरिज्ञानरूपसुभटेन रुद्धः सन् बहिरङ्ग एवासीत् । किं कृतवता बोधिभटेन मध्यमन्तरा अध्यूषुषा उषितेन 'वसं' निवासे, अधिपूर्वो वस् अध्युवास इति अध्युषिवान् तेन अध्यूषुषा तत्र क्वसुकानौ तद्वदिति सूत्रेण ववसुप्रत्यये ततो द्वित्वे वस्य संप्रसारणे उत्वेऽधिना सह यत्वे इडागमे षत्वे अध्यूषिवस् इति जातं ततस्तृतीयैकवचने टाप्रत्यये 'क्वस उस्' इति सूत्रेण वस्य उषिकृते अध्यूषुषा इति सिद्धम् ॥ ४६ ॥

**यत्र त्रिलोकी निहितात्मभारा, शेते सुखं पत्रिणि पत्रिणीव ।**
**सोऽस्मन्मते तद्भुज एव शेषः, कोऽन्यो जराजिह्मगतेर्विशेषः ॥४७॥**

(व्या०) यत्रेति ॥ यत्र भुजे त्रिलोकी (संख्या समाहारे च द्विगुश्चानाम्न्ययम् । ३ । १ । ९९ । इ. सू. असंज्ञायां द्विगुः द्विगोः समाहारात् । २ । ४ । २२ । इ. सू. स्त्रियांङी) त्रयाणां लोकानां समाहारः निहितात्मभारा निहितः स्थापितः आत्मनः भारो यया सा न्यस्तात्मीयभारा सुखं शेते स्वपिति का इव यथा पत्रिणी पक्षिणी पत्रिणि (अतोऽनेकस्वरात् । ७ । २ । ६ । इ. सू. मत्वर्थे इन् प्रत्ययः) वृक्षे सुखं शेते तद्वत् । स तद्भुज एव अस्मन्मते अस्माकं मतं तस्मिन् शेषः अस्मदीयमते जिनशासने तस्य भगवत एव भुजरूप शेषनागाधिराजोऽस्तु जराजिह्मगतेः (प्रभृत्यन्यार्थदिक्-तरैः । २ । २ । ७५ । इ. सू. अन्य योगे पञ्चमी) जरया वृद्धत्वेन जिह्मा गतिः यस्य तस्मात् अन्यो विशेषः कः शेषः न कोऽपि ॥ ४७ ॥

**पाणेस्तलं कल्पपुलाकि पत्रं, तस्यांगुलीः कामदुघास्तनांश्च ।**
**चिन्तामणींस्तस्य नखानमंस्त, दानावदानावसरेऽर्थिसार्थः ॥४८॥**

(व्या०) पाणेरिति ॥ अर्थिसार्थः अर्थिनां सार्थः याचक समूहः स्तस्य भगवतो दानावदानावसरे दानमेव अवदानं सत्कर्म तस्य अवसरे एतत् पदं सर्वत्र योज्यते अर्थिसार्थः दानावदानावसरे तस्य भगवतः पाणेर्हस्तस्य तलं कल्पपुलाकिपत्रं कल्पवृक्षसत्कं पत्रं गमंस्त मन्यते स्म च तस्य भगवतः अंगुलीः कामदुघास्तनान् कामान् दोग्धि सा कामदुघा (दुहेर्डुघः । ५ । १ । १४५ । इ. सू. डुघः । आत् । २ । ४ । १८ । इ. सू. स्त्रियामाप्) कामधेनु तस्याः स्तनान् अमंस्त च तस्य नखान् चिन्तामणीन् अमंस्त ॥ ४८ ॥

**येन त्रिलोकीगतगायनौघं, जिगाय धीरध्वनिरस्य कंठः ।**
**क्रमेण तेनैव किमेष रेखा-त्रयं कृतं साक्षिजनैर्बभार ॥ ४९ ॥**

(व्या०) येनेति ॥ अस्य भगवतः कंठो येन क्रमेण त्रिलोकीगतगायनौघं त्रयाणां लोकानां समाहारः त्रिलोकी तां गतानि च तानि गायनानि च

तेषा मोघस्तं त्रिभुवनस्थानां गायनानां समूहं जिगाय (द्विर्धातुः परोक्षाङे प्राक्तु स्वरे स्वरविधे. । ४ । १ । १ । इ. सू. द्विर्भावः जेर्गि सन्परोक्षयोः । ४ । १ । ३५ । इ. सू. पूर्वात्परस्य जेर्गि नामिनोऽकलिहले ४ । ३ । ५१ । इ. सू. वृद्धिः एदैतोऽयाय् । १ । २ । २३ । इ. सू. आयादेशः) जितवान् । कीदशः कंठ धीरध्वनिः धीरोगंभीरो ध्वनि र्यस्य स. एषः तेनैव क्रमेण किं रेखात्रयं बभार । किं विशिष्टं रेखात्रयं साक्षिजनैः कृतं कोऽर्थः त्रिभुवने एतावति स्वामिसदक् धीरध्वनि र्नास्ति इत्यर्थः ॥ ४९ ॥

**यज्जातिवैरं स्मरता तदास्यां-भोजन्मनाऽभाजि जगत्समक्षम् ।**
**निशारुचिस्तत्किमपत्रपिष्णुः, सोऽयं दिवाभूद्विधुरप्रकाशः ॥ ५० ॥**

(व्या०) यज्जातिवैरमिति ॥ यत् यस्मात् कारणात् तदास्यांभोजन्मना तस्य भगवतः आस्यं तदेवांभोजन्म तेन तदीयमुखकमलेन अयं विधुश्चन्द्रो जगतः समक्षं (सङ्कटाभ्याम् । ७ । ३ । ८६ । इ. सू. संपूर्वक अक्षि शब्दात् अत् समासान्त) सङ्गतमक्ष्णासमीपमक्ष्णोर्वा विश्वसमक्षं अभाजि जीयते स्मेत्यर्थ किं कुर्वता जातिवैरं जातेर्वैरं जातिवैर तत् स्मरतीति स्मरत् तेन सोऽयं विधुश्चन्द्रस्तत् तस्मात्कारणात् दिवा दिवसे अप्रकाशः (उष्ट्र मुखादयः । ३ । १ । २३ । इ. सू. नञ् पूर्व मस्त्यर्थं पदं समस्यते नञ्त् । ३ । २ । १२५ । इ. सू. उत्तरपदे नञ् अकार) न विद्यते प्रकाशो (भावाऽकर्त्रोः । ५ । ३ । १८ । इ. सू. भावे घञ्) यस्य सः निस्तेजा अप्रकटो वा अभूत् किं लक्षणो विधुः अपत्रपिष्णुः भ्राज्यलंकृग् निराकृग् भूसहि-इष्णुः । ५ । २ । २८ । इ. सू. शीलादिसदर्थे इष्णु) लज्जाशीलः पुनश्च कीदशो निशारुचिः निशायां रुचिः कान्ति र्यस्य सः । अन्योऽप्यत्र जिष्णु र्दिवा अप्रकाशः स्यात् तस्य बहि र्निशायां रुचिरभिलाषः स्यात् ॥ ५० ॥

**ओष्ठद्वयं वाक्समयेऽवदात-दन्तद्युतिप्लावितमेतदीयम् ।**
**बभूव दुग्धोदधिवीचिधौत-प्रवालवल्लिप्रतिमल्लितश्रि ॥ ५१ ॥**

(व्या०) ओष्ठद्वयमिति । एतदीयं (तस्येदम् । ६ । ३ । १६० । इ. सू. ईय प्रत्ययः) एतस्येदं ओष्ठद्वयं ओष्ठयो र्द्वयं दुग्धोदधिवीचिधौतप्रवाल-वल्लिप्रतिमल्लितश्रि दुग्धानां उदधिः (व्याप्यादाधारे । ५ । ३ । ८८ । इ. सू. धा धातो कि उदकस्योदः पेषंधि वास वाहने । ३ । २ । १०४ । इ. सू. उदक उद) क्षीरसागरः तस्य वीचयः कल्लोलाः तैः धौताश्चते प्रवालाश्च तेषां वल्लि तस्याः प्रतिमल्लिता प्रतिमल्लीकृता श्रीः शोभा येन तत् बभूव । किं लक्षण मोष्ठद्वयं वाक्समये वाच समयोऽवसरस्तस्मिन् वचनावसरे अवदात-दन्तद्युतिप्लावितं अवदाताश्चते दन्ताश्च तेषां द्युतय तामिः प्लावितं उज्ज्वलदन्त-सत्किरणै र्व्याप्तं ओष्ठद्वयं प्रवालवल्लीसदृशं दन्तद्युतयश्च क्षीरसमुद्रकल्लोल-सदृशा इति भाव ॥ ५१ ॥

**व्यक्तं द्विपंक्तिभवनादजस्रं, श्रीरक्षणे यामिकतां प्रपन्नाः ।**
**द्विजा द्विजेशस्य तदाननस्य, लक्ष्मीसमूहं प्रभुदत्तमूहुः ॥ ५२ ॥**

(व्या०) व्यक्तमिति ॥ तदाननस्य तस्य भगवतः आननं मुखं तदाननं तदीयमुखं तदेव द्विजेशस्य चन्द्रस्य द्विजा दन्ता लक्ष्मीसमूहं शोभासमूह मूहु र्वहन्ति स्म किं विशिष्टं प्रभुदत्तं प्रभुणा मुखेनदत्तस्तं मुखे एव स्थिता दन्ताः शोभां भजन्ते इति किं लक्षणा द्विजा (क्वचित् । ५ । १ । १७१ । इ. सू. जनेर्डः ।) व्यक्तं प्रकटं द्विपंक्ति भवनात् अजस्रं (स्म्यजस हिंसदीपकम्पकमन-मोरः । ५ । २ । ७९ । इ. सू. नञ् पूर्वक जसु धातो रः प्रत्ययः) निरंतरं श्रीरक्षणे शोभा रक्षणे यामिकता मारक्षकतां प्रपन्नाः (रदादमूर्च्छमदः क्तयो र्दस्य च । ४ । २ । ६९ । इ. सू. क्तस्य नत्वं तद्योगे धातोर्दस्य च नत्वम्) दन्तैरेव मुखस्य शोभा स्यात् । अथ पक्षे द्विजानां ब्राह्मणाना मीशः स्वामी द्विजेशः तस्य द्विजा ब्राह्मणाः स्वामिना दत्तं लक्ष्मीसमूहं वहन्ति स्म । व्यक्तं द्विपंक्तिभवनादित्यादि अत्रापि योज्यम् ॥ ५२ ॥

**अदान्मृदुमार्दवमुक्तियुक्त्या, युक्तं तदीया जनतासु जिह्वा ।**
**लोला स्वयं स्थैर्यगुणं तु सभ्या,-नभ्यासयन्ती कुतुकाय किं न ॥५३॥**

(व्या०) अदादिति ॥ तदीया तस्य भगवतः इयं तदीया जिह्वा । जनतासु (ग्रामजनबन्धुगजसहायात्तल् । ६ । २ । २८ । इ. सू. समूहेऽर्थे तल्) जनानां समूहास्तासु जनसमूहेषु । उक्तियुक्त्या उक्तीनां वचनानां युक्तिश्चातुर्यं तया वचनचातुर्येण मार्दवं (ऋवर्णाल्लव्वादेः । ७ । १ । ६९ । इ. सू. भावेऽर्थे अण्) सौकुमार्यं मदात् किं लक्षणा जिह्वा मृदु कोमला अत एव हेतो मार्दव मदात तु पुनः स्वयं लोला चपला सती सभ्यान् (तत्र साधौ । ७ । १ । १५ । इ सू. साध्वर्थेय प्रत्ययः) सभायां साधवस्तान् सभाजनान् स्थैर्यगुणं (वर्णदृढादिभ्यष्ट्यण् च वा । ७ । १ । ५९ । इ. सू. भावेऽर्थे ट्यण्) स्थैर्यमेव गुणस्तं अभ्यासयन्ती अभ्यासं कारयन्ती कुतुकाय आश्चर्याय किं न स्यात् अपितु स्यात् । कोऽर्थः स्वामिनो जिह्वया सर्वेषां स्वान्ते स्थैर्यभाव उत्पद्यते इत्यर्थः ॥ ५३ ॥

**प्राणं जगज्जीवनहेतुभूतं, नासा यदौन्नत्यपदं दधाति ।**
**कर्मारिमाराय तदग्रवीक्षा-दीक्षादिनात्तेन ततो विधाता ॥ ५४ ॥**

(व्या०) प्राणमिति ॥ यत् यस्मात् कारणात् नासा नासिका सा कथंभूता औन्नत्यपदं (वर्णदृढादिभ्यष्ट्यण् च वा । ७ । १ । ५९ । इ. सू. भावेऽर्थे ट्यण्) उच्चतायाः स्थानं । जगज्जीवनहेतुभूतं जगतोविश्वस्य जीवनाय हेतुभूतं प्राणं दधाति धारयति । तत् तस्मात् कारणात् तेन भगवता । कर्मारिमाराय कर्माणि एव अरयः शत्रवस्तेषां माराय विनाशाय । आदीक्षादिनात् दीक्षायाः प्रव्रज्यायाः दिनमहः तस्मात् आ दीक्षादिनात् दीक्षादिन मारभ्य । तदग्रवीक्षा तस्या नासिकाया अग्रवीक्षा (क्तेटो गुरोर्व्यञ्जनात् । ५ । ३ । १०६ । इ सू. भावे अः आत् । २ । ४ । १८ । इ. सू. स्त्रियामाप्) अग्रनिरीक्षणं

विधाता विधास्यते । कोऽर्थः स्वामी दीक्षानन्तरं नासाप्रवत् तादृक् कर्मशत्रून् हनिष्यतीति भावः । लोकेऽपि यो बलवान् स्यात् तस्यैव वीक्षा शत्रुहननावसरे क्रियते ॥ ५४ ॥

**श्रेयस्करावुल्लसदंशुराशी, पार्श्वद्वयासीनजनेषु तस्य ।**
**कलौ कपोलावकरप्रयत्न-हैमात्मदर्शत्वमशिश्रियाताम् ॥ ५५ ॥**

(व्या०) श्रेयस्कराविति ॥ तस्य भगवत कलौ मनोज्ञौ कपोलौ पार्श्वद्वयासीनजनेषु पार्श्वयोः द्वयं तस्मिन् आसीनाश्चते (आसीनः । ४ । ४ । ११५ इ. सू. आसीन निपातः) जनाश्च तेषु उभयोः पार्श्वयोः उपविष्टलोकेषु । अकरप्रयत्नहैमात्मदर्शत्वं हस्तोपक्रमरहितस्वर्णमयदर्पणत्वं अशिश्रियाता (णिश्रीद्रुस्रुकमः कर्तरिङः । ३ । ४ । ५८ । इ. सू. कर्तरिङ । द्वि र्धातु परोक्षाडे प्राक्तु स्वरे स्वरविधेः । ४ । १ । ४ । इ. सू. द्विर्भाव । संयोगात् । २ । १ । ५२ । इ. सू. इयादेश) माश्रितवन्तौ किं विशिष्टौ कपोलौ श्रेयस्करौ (हेतुतच्छीलानुकूले-पदात् । ५ । १ । १०३ । इ. सू. ट । ङस्युक्तं कृता । ३ । १ । ४९ । इ. सू. तत्पुरुषः) अत कृकमि-यस्य । २ । ३ । ५ । इ. सू. रस्य सः) पुनश्च किं विशिष्टौ उल्लसदंशुराशी उल्लसन्तः अंशूनां राशयः समूहा ययोस्तौ उद्गच्छत्किरणसमूहौ ॥ ५५ ॥

**वितेनुषी श्मश्रुवने विहारं, दोलारसाय श्रितकर्णपालिः ।**
**स्फुरत्प्रभावारि चिरं चिखेल, तदाननांभोजनिवासिनी श्रीः ॥५६॥**

(व्या०) वितेनुषी इति ॥ तदाननांभोजनिवासिनी (अजातेः शीले । ५ । १ । १५४ । इ. सू. शीलेऽर्थे णिन् स्त्रियां नृतोऽस्वस्रादे र्डीः । २ । ४ । १ । इ. सू. डीः) तस्य भगवत आननं मुखं तदेव अंभोजं कमलं तस्मिन् निवसति इत्येवं शीला तन्मुखकमलनिवासिनी श्रीर्लक्ष्मीः । स्फुरत् प्रभावारि स्फुरत् चतत् प्रभा कान्तिरेववाश्चजलं तस्मिन् प्रसरत्प्रभारूपजले

चिरं चिरकालं । चिखेल क्रीडां चकार । वार् शब्दो व्यंजनान्तोऽत्र ज्ञेयः । किं विशिष्टा श्रीः श्मश्रुवने कूर्चरूपोद्याने विहारं विचरणं वितेनुषी (तत्र क्वसुकानौ तद्वत् । ५ । २ । २ । इ. सू. परोक्षायां क्वसु वच्स उष् मतौ च । २ । १ । १०५ । इ. सू. अघुटिपरे क्वस उष् अधातूदृदितः । २ । ४ । २ । इ. सू. ङीः) कृतवती पुनश्च कीदृशी दोलारसाय दोलाया रसस्तस्मै आन्दोलनरसकृते । श्रितकर्णपालि श्रिता कर्णपालि र्यया सा ॥ ५६ ॥

**पद्मानि जित्वा विहितास्य दृग्भ्यां, सदा स्वदासी ननु पद्मवासा ।**
**किमन्यथा सावसथानि याति, तत्प्रेरिता प्रेमजुषामखेदम् ॥ ५७ ॥**

(व्या०) पद्मानीति ॥ अस्य भगवतो दृग्भ्यां नेत्राभ्यां पद्मवासा (उष्ट्रमुखादयः । ३ । १ । २३ । इ. सू. व्यधिकरणवहुव्रीहिः) पद्मेकमले वासो निवासो यस्या. सा पद्मवासा कमलनिवासिनी लक्ष्मी ननु निश्चितं सदा (सदाधुनेदानींतदानीमेतर्हि । ७ । २ । ९६ । इ. सू. सर्वशब्दात दा प्रत्ययः सर्व शब्दस्य स भाव कालेऽर्थे) निरन्तरं स्वदासी स्वस्यात्मनो दासी किंकरी विहिता किं कृत्वा पद्मानि कमलानि जित्वा । अन्यथा किं कथं सा पद्मवासा लक्ष्मीः तत्प्रेरिता ताभ्यां दृग्भ्यां नेत्राभ्यां प्रेरिता । प्रेमजुषां स्नेहवतां आवसथानि गृहाणि अखेदं खेदरहितं यथा भवति तथा याति । कोऽर्थः स्वामिदृग्भ्यां भक्तजनानां दारिद्र्यदौर्भाग्यादयो दोषा नश्यन्ति पदे पदे संपदश्च विजृम्भन्त इति भाव ॥ ५७ ॥

**कृष्णाभ्ररेखाभ्रमतो निभाल्य, तद्भ्रूयुगं यौवनवह्नितप्तैः ।**
**अकारि नृत्यं प्रमदोन्मदिष्णु-मनोमयूरै र्विलसत्कलापैः ॥ ५८ ॥**

(व्या०) कृष्णाभ्रेति ॥ प्रमदोन्मदिष्णु (उद:पचिपतिपदिमदे । ५ । २ । २९ । इ. सू. इष्णु तृतीयस्यपञ्चमे । १ । ३ । १ । इ. सू. उदो दस्य नो वा) मनोमयूरै. प्रमदानां स्त्रीणां उन्मदिष्णूनि उन्मदशीलानि

यानि मनांसि तान्येव मयूरास्तैः। पक्षे प्रमदेन हर्षेण उन्मदिष्णावो ये मनसो मयूरास्तैः। नृत्यं नाट्य मकारि (कृधातोः कर्मणि अद्यतनी) क्रियते स्म। किं कृत्वा तद्भ्रूयुगं तस्य भगवतो भ्रुवो युगं युगलं कृष्णाभ्ररेखाभ्रमतः कृष्णा श्यामा या अभ्राणां मेघानां रेखा पंक्ति स्तस्याः यो भ्रमो विभ्रमस्तस्मात् कृष्णाः दृष्ट्वा। किं विशिष्टैर्मयूरैः यौवनवह्नितप्तैः यूनो भावो यौवनं तदेव वह्निस्तेन तप्तास्तैः यौवनरूपवैश्वानरसंतप्तैः पुनः किंविशिष्टैः विलसत्कलापैः विलसन् कलानामापः प्राप्तिर्येषु ते तैः पक्षे विलसन् कलापः पिच्छसमूहो येषु ते तैः। दावानलसंभवे च वह्नितप्तत्वं मयूराणामपि स्यात् ॥ ५८ ॥

**भ्रान्त्वाखिलेऽङ्गेऽस्य दृशो वशाना, प्रभापयोऽक्षिप्रपयोर्निपीय।**
**छायां चिरं भ्रूलतयोरुपास्य, भालस्थले संदधुरध्वगत्वम् ॥ ५९ ॥**

(व्या०) भ्रान्त्वेति। वशानां नारीणां दृशो दृष्टयः अस्य भगवतः अखिलेसमस्ते अङ्गे शरीरे भ्रान्त्वा। (अहन् पञ्चमस्य क्वि क्ङिति। ४। १। १०७। इ. सू. दीर्घ। भ्रां घृड्टवर्गेऽन्त्योऽपदान्ते। १। ३। ३९। इ. सू. परस्वः) ततः परं अक्षिप्रपयोः अक्षिणी नेत्रे एवप्रपे तयोः लोचनरूपप्रपयोः प्रभा कान्तिरेव पयोजलं प्रभारूपं जलं निपीय पीत्वा। भ्रूलतयोः भ्रुवौ एव लते वल्ली तयो भ्रूवल्ल्योः छायां चिरं चिरकाल मुपास्य सेवित्वा। भालस्थले भालं ललाटमेव स्थलं तस्मिन् अध्वगत्वं (नाम्नो गमः खड्डौ च विहायसस्तु विहः। ५। १। १३१। इ. सू. डः। डित्यन्त्यस्वरादेः। २। १। ११४। इ. सू. अन्त्यस्वरादे र्लोपः। नाम्नोनोऽन ह्नः। २। १। ९१। इ. सू. अध्वनो नलोप भावेत्वतल्। ७। १। ५५। इ. सू. त्व) पथिकत्वं संदधुः संदधते स्म। अन्या अपि पथिकाः अंगनाम्निदेशे भ्रान्त्वा प्रपासु पयः पीत्वा लतयोः सर्ववल्ल्योः छाया मुपास्य स्थलमार्गे गमनं कुर्वन्ति ॥ ५९ ॥

**अर्धं च पूर्णं च विधुं ललाट-मुखच्छलाद्वीक्ष्य तदंगभूतौ।**
**न के गरिष्ठां जगुरष्टमीं च, राकां च तन्नाथतया तिथीषु ॥ ६० ॥**

(व्या०) अर्धमिति ॥ के विज्ञाः बुधा पुरुषा अष्टमी च अन्यत् राका-पूर्णिमां च तन्नाथतया तौ अर्धपूर्णौविधू चन्द्रौ नाथौ स्वामिनौ ययोस्ते तन्नाथे तयोर्भावः तन्नाथता तया तन्नाथतया तिथिषु पंचदशस्वपि गरिष्ठां (गुणाङ्गा-द्वेष्ठेयसू । ७ । ३ । ९ । इ. सू. इष्ठ प्रत्ययः प्रकृष्टेऽर्थे प्रियस्थिर स्फिरो-वृन्दम् । ७ । ४ । ३८ । इ. सू. गुरोःगरादेशः । ) ज्येष्ठां न जगुः (आत् सन्ध्यक्षरस्य । ४ । २ । १ । इ. सू. आः द्विर्धातुः परो—धेः । ४ । १ । १ । इ. सू. द्विर्भाव ह्रस्वः । ४ । १ । ३९ । इ. सू. पूर्व ह्रस्वः गहोजः । ४ । १ । ४० । इ. सू. पूर्व गस्य ज इडेत् पुंसि चातो लुक् । ४ । ३ । ९४ । इ. सू. आकारस्य लुक् गैं धातो कर्तरि परोक्षा) न कथयामासुः अपि तु जगुरेव । किं कृत्वा अर्धं विधुं च अन्यत् पूर्णं विधुं चन्द्रं ललाटमुखछलात् तदंगभूतौ तस्य भगवतः अंगभूतौ अंगतांगतौ वीक्ष्य दृष्ट्वा । कोऽर्थः स्वामिभाल मर्धचन्द्रसदृशं मुखं संपूर्णचन्द्रमंडलसदृशं चाभूत् तेन अष्टमीपौर्णमास्यौ सर्व-तिथिमध्ये गरिष्ठे जाते इति कथ्यते ॥ ६० ॥

**द्विष्टोऽपि लोकैरमुना स्वमूर्ध्नि, निवेशितः केशकलापरूपः ।**
**वर्णोऽवरः श्रीभरमापनाथ, प्रसादसाध्येह्युदये कुलं किम् ॥ ६१ ॥**

(व्या०) द्विष्ट इति ॥ अवरो वर्णः अप्रशस्यः श्यामवर्णः नीचवर्णो वा श्रीभरं श्रियाः शोभायाः भरः समूहस्तमाप प्राप । कीदृशो वर्णः लोकैर्जनै र्द्विष्टोऽपि पुनश्च कीदृगः अमुना भगवता । स्वमूर्ध्नि (ईङौ वा । २ । १ । १०९ । इ. सू. अनोऽस्य लुग् वा) आत्मीयमस्तके निवेशितः आरोपितः । पुनः कीदृशः केशकलापरूपः केशानां कलापः समूहः स एव रूपं यस्य सः हि निश्चितम् [illegible]नाथप्रसादसाध्ये (ऋवर्ण व्यञ्जनात् घ्यण् । ५ । १ । १७ । इ. सू. साध् धातो र्घ्यण्) नाथस्य स्वामिनः प्रसादोऽनुग्रहः तेन साध्यस्तस्मिन् एतादृशि उदये सति कुलं किं वीक्ष्यते । कोऽर्थः नृपो यस्य पुंसः प्रसादाभि-

मुख. स्यात् तस्याकुलीनस्यापि संपदः स्युरिति भावः ॥ ६१ ॥

'उक्तं च 'सुप्रसन्नवदनस्य भूपते, यत्र यत्र विलसन्ति दृष्टयः ।
तत्र तत्र शुचिता कुलीनता, दक्षता सुभगता च गच्छति' ॥ १ ॥

**बुद्ध्वा नवश्मश्रुसमाश्रितांक,-श्रीकं निशोदीतमदोमुखेन्दुम् ।**
**केशौघदंभात् किमु पुष्पतारा,-लंकारहारिण्यभिसारिकाऽभूत् ॥६२॥**

(व्या०) बुद्ध्वेति ॥ निशा रात्रिः केशौघदंभात् केशानामोघः समूहः तस्य दंभात् मिषात् अदोमुखेन्दुम् असौ मुखमेवेन्दुः अदोमुखेन्दुस्तं मुखचन्द्र मुदीतं बुद्ध्वा ज्ञात्वा अभिसारिका (णक तृचौ । ५ । १ । ४८ । इ. सू. णक प्रत्ययः । अस्यायत्तत् क्षिपकादीनाम् । २ । ४ । १११ । इ. सू. इः) भूत् 'अलंकृता या प्रियं याति कथ्यते साभिसारिका' । किं लक्षणमदो-मुखेन्दुं नवश्मश्रुसमाश्रितांकश्रीकं नवं नूतनं च तत् श्मश्रु च तेन समाश्रिता अंकस्य लाञ्छनस्य श्रीः शोभायेनतम् नवीनकूर्चाश्रितलाञ्छन शोभम् । कीदशी रात्रिः पुष्पतारालंकारहारिणी पुष्पाणि कुसुमानि तानि एव तारा तारकाणि तेषा मलंकार आभूषणं तेनहारिणी (ग्रहादिभ्यो णिन् । ५ । १ । ५३ । इ. सू. कर्तरि णिन् स्त्रियां नृतोऽस्वस्रादेर्ङीः । २ । ४ । १ । इ. सू. ङीः) मनोहरा । यतः शिरसि पुष्पाणि स्युः रात्रौ च तारकाणि स्युरिति भावः । एतावता मुखं पूर्णचन्द्रसमं केशकलापश्च रात्रिसमः इति भावः ॥ ६२ ॥

**वर्णेषु वर्णः स पुरस्सरोऽस्तु, योऽजस्रमाशिश्रियदंगमस्य ।**
**अवेपियच्छायलवेऽपि लब्धे, लोके सुवर्णश्रुतिमाप हेम ॥ ६३ ॥**

(व्या०) वर्णेषु इति ॥ स पीतलक्षणो वर्णो वर्णेषु श्वेतरक्तादिषु पुरस्सरः (पुरोऽग्रतोऽग्रेसर्तेः । ५ । १ । १४० । इ. सू. टः । शषसे शषसं वा । १ । ३ । ६ । इ. सू. वा. र. सः) पुर सरतीति पुरस्सरः अग्रेसरोऽस्तु । यः पीतवर्णोऽजस्रं (स्म्यजसहिंसदीप-रः । ५ । २ । ७९ । इ. सू. नञ् पूर्वजसुधातोः शीलादिसदर्थे रः) निरन्तरं अस्य भगवतः अङ्गमाशिश्रियत्

आश्रयति स्म । टुवेपृङ् केपृङ् गेपृङ् कपुङ् चलने इति धातोर्णिनि प्रत्यये वेपिन् इति स्यात् अत कारणात् अवेपियच्छायलवे न वेपते इत्येवं शील अवेपी तस्मिन् यस्य भगवत छायलवे कान्तिलेशेऽपि लब्धे प्राप्ते सति हेम सुवर्ण लोके लोकमध्ये । सुवर्णश्रुतिं (श्रूवादिभ्यः । ५ । ३ । ९२ । इ. सू. स्त्रियांक्तिः) शोभनोवर्णः यस्य सः सुवर्ण सुवर्ण इति श्रुतिः ख्याति तामाप । भगवान् सुवर्णवर्णशरीरो वर्तते इति भावः ॥ ६३ ॥

**द्युम्नं जगद्भृत्युपयोगि गुप्तं, यच्छैशवेऽभूत् परमार्थदृष्टेः ।**
**तद्यौवनेनोत्सववत् प्रकाश, मकारि माद्यत्प्रमदेन तस्य ॥ ६४ ॥**

(व्या०) द्युम्नमिति ॥ यत् द्युम्नं बलं पक्षे धनं तस्य भगवतः शैशवे-बाल्ये गुप्तमभूत् । किं विशिष्टस्य तस्य परमार्थदृष्टेः परमार्थे मोक्षे दृष्टिर्दर्शनं यस्य तस्य पक्षे परमार्थे प्रकृष्टार्थे द्रव्ये दृष्टि र्यस्य तस्य किं लक्षण द्युम्नं जगद्भृत्युपयोगि जगतो विश्वस्य भृतिः पोषणं तस्मिन् उपयोगि । धनवान् जगतः पोषणं कर्तुं समर्थ । भगवान् मेरुदंड पृथ्वीछत्रं कर्तुं समर्थोऽस्ति । तद् द्युम्नं यौवनेन प्रकाशं प्रकटमकारिक्रियते स्म । किं वत् उत्सववत् (स्यादेरिवे । ७ । १ । ५२ । इ. सू. सादृश्येऽर्थे वत प्रत्ययः) यथा उत्सवेन द्युम्नं धनं प्रकाशीक्रियते किं लक्षणेन यौवनेन माद्यत्प्रमदेन माद्यन्त्यः प्रमदाः येन तत् माद्यत्प्रमदंतेन उत्सवेन किं लक्षणेन पक्षे माद्यन्तः प्रमदा हर्षादयो येनतेन ॥ ६४ ॥

**यूनोऽपि तस्याजनि वश्यमश्व,-वारस्य वाजीव सदैव चेतः ।**
**सशंकमेवोरसिलोऽप्यनङ्ग, स्तदंगजन्मा तदुपाचरत्तम् ॥ ६५ ॥**

(व्या०) यून इति । तस्य भगवतो यूनोऽपि (श्वन् युवन् मघोनो ङी स्याद्युट् स्वरे व उ । २ । १ । १०६ इ. सू. व उ । समानाना तेन दीर्घ । १ । २ । १ । इ. सू दीर्घ ।) यौवनारूढस्यापि चेतश्चित्तं सदैव वश्यमधीनमजनि जातं कस्येव अश्ववारस्येव (कर्मणो अण् । ५ । १ । ७२ । इ. सू अण् । अश्वं वारयतीति अश्ववारः) यथा अश्ववारस्य वाजी (अतोऽनेक-

स्वरात् । ७ । २ । ६ । इ. सू. इन् । ) तुरगो वश्यो भवति । तत् तस्मात् कारणात् उरसिलोऽपि (लोमपिच्छादेः शेलम् । ७ । २ । २८ । इ. सू. उरस् शब्दात् इल प्रत्यय ) बलवानपि अनङ्गः नास्ति अंगं शरीरं यस्य सः कंदर्पः तं भगवन्तं सशंकमेव यथा भवति तथा उपाचरत् सेवते स्म । किं लक्षणोऽनंगः तदंगजन्मा तस्य चित्तस्य अंगजन्मा पुत्रः । कोऽर्थ. यदि पितावश्योभवति तदा पुत्रस्तु अवश्यमेव वश्यो भवेदिति भाव. ॥ ६५ ॥

**पश्चादमुष्यामरवृन्दमुख्याः, पट्टाभिषेकं प्रथयांबभूवुः, ।**
**प्रागेव पृथ्व्या प्रससार दुष्ट,-चेष्टोरगीवज्रमुखः प्रतापः ॥ ६६ ॥**

(व्या०) पश्चादिति ॥ अमरवृन्दमुख्या अमराणा देवानां वृन्दाः समूहाः तेषु मुख्याः सुरेन्द्राः अमुष्य स्वामिनः पट्टाभिषेकं (भावाऽकर्त्रोः । ५ । ३ । १८ । इ. सू. भावे घञ् । लघोरुपान्त्यस्य । ४ । ३ । ४ । इ. सू. गुणः । क्तेऽनिटश्चजोः कगौ घिति इ सू. चस्य कः । ४ । १ । १११ । ) राज्याभिषेकं पश्चात् प्रथयाबभूवुः विस्तारयामासु. । अमुष्य भगवतः प्रतापः (भावाऽकर्त्रो । ५ । ३ । १८ । इ. सू. भावे घञ् । ) पृथिव्यां प्रागेव प्रथममेव प्रससार प्रसरति स्म । कि लक्षण प्रतापः दुष्टचेष्टोरगीवज्रमुखः दुष्टाना मन्यायकारिणां चेष्टा सैव उरगी (नाम्नो गमः खड्डौ च विहायसस्तु विहः । ५ । १ । १३१ । इ. सू. ड पृषोदरादित्वात् सलोपः । धवाद्योगादपालकान्तात् । २ । ४ । ५९ । इ. सू. ङीः अस्य ङ्यां लुक् । २ । ४ । ८६ । इ. सू. अस्य लोपः) सर्पिणी तस्याः वज्रमुखो गरुडसमानः ॥ ६६ ॥

**आनर्चुरिन्द्रा मकरन्दबिन्दु-संदोहवृत्तस्नपनावयत्नम् ।**
**मन्दारमाल्यै र्मुकुटाग्रभाग-भ्रष्टैर्नमन्तोऽनुदिनं यदंघ्री ॥ ६७ ॥**

(व्या०) आनुर्चुरिति ॥ इन्द्रा यदंघ्री यस्य स्वामिनः अंघ्री यदघ्री तौ यदीयपादौ । मन्दारमाल्यैः मन्दारस्य माल्यानि तैः मन्दारकुसुममालाभिः ।

अयत्नं (यजिस्वपिरक्षियतिप्रच्छो न । ५ । ३ । ८५ । इ. सू. भावे नः) उपक्रमं विनैव आनर्चुः (अनातोनश्चान्तऋदाद्यशौ संयोगस्य । ४ । १ । ६९ । इ. सू. अर्चधातोर्द्वित्वे पूर्वस्यात्वं नागमश्च) पूजयामासुः किं लक्षणौ यदङ्घ्री मकरंदबिन्दुसंदोहवृत्तस्नपनौ मकरन्दस्य बिन्दवः तेषां संदोहः समूहस्तेन वृत्तं निष्पन्नं स्नपनं स्नानं ययोस्तौ तौ मकरन्द बिन्दु समूह जातस्नानौ । कि लक्षणैः मन्दारमाल्यैः मुकुटाग्रभागभ्रष्टैः मुकुटानां किरीटानामग्राणि तेभ्यो भ्रष्टानि पतितानि तैः । किं कुर्वन्तः सुराः अनुदिनं (योग्यता विप्सार्थानतिवृत्ति सादृश्ये । ३ । १ । ४० । इ. सू. विप्सायां अव्ययीभावः) निरन्तरं नमन्तः नमतां स्वयमेव मालापतने स्नात्रं पूजा च स्यात् अतोऽयत्नमित्युक्तमिति ॥६७॥

**आमोक्षसौख्यांहतिसंधयास्मि-न्नात्मातिरेकेऽभ्युदिते पृथिव्याम् ।**
**अशिश्रियन्मंदरकन्दराणि, संजातलज्जा इव कल्पवृक्षाः ॥ ६८ ॥**

(व्या०) आमोक्ष इति । कल्पवृक्षाः मंदरकन्दराणि मंदरस्य मेरोः कन्दराणि गुहा अशिश्रियन् आश्रितवन्तः । कथमिति उत्प्रेक्षन्ते संजातलज्जा इव संजाता लज्जा येषां ते उत्पन्नलज्जा इव । क सति अस्मिन भगवति आमोक्ष सौख्यांहतिसंधया आमोक्षात् इति आमोक्षं मोक्षावधि यत् सौख्यं सुखं तस्यां हतिर्दानं तद्विषये संधा प्रतिज्ञा तया । आत्मातिरेके आत्मनः अतिरेकोऽधिकस्तस्मिन् । पृथिव्यां मह्यां । अभ्युदिते सति । कल्पवृक्षै रात्मभ्योऽप्यधिक दातारं भगवन्तं वीक्ष्य लज्जया मेरुगुहा श्रितेति भावः ॥ ६८ ॥

**स्वर्गायनैः स्वर्गिपतेः सभाया, माविष्कृते कीर्त्यमृते तदीये ।**
**तत्पानतश्तृप्यति नाकिलोके, सुधा ग्रहीतारमृते मुधाभूत् ॥ ६९ ॥**

(व्या०) स्वर्गायनैरिति ॥ सुधा अमृतं ग्रहीतारं ग्राहकं ऋतेविना मुधा निष्फला अभूत् । कस्मिन् सति स्वर्गायनै (टनण् । ५ । १ । ६७ । इ. सू. शिल्पिनि कर्तरि टनण्) तुंबरु नारदाद्यैः गायकैः । स्वर्गिपते (अतोऽनेकस्वरात्

७ । २ । ६ । इ. सू. मत्वर्थे इन्) स्वर्गिणां देवानां पतिः स्वर्गिपतिस्तस्य इन्द्रस्य सभायां तदीये तस्य स्वामिसत्के कीर्त्यमृते कीर्ति (सातिहेतियूति जूतिज्ञप्तिकीर्ति । ५ । ३ । ९० । इ. सू. कीर्ति शब्दो निपात्यते) रेव अमृतं कीर्त्यमृतं तस्मिन् आविष्कृते प्रकटीकृते सति पुनश्च तत्पानतः तस्य कीर्त्यमृतस्य पानतः पानात् नाकि (नकं अकं नविद्यते अकं यस्मिन् स नाक उष्ट्र मुखादयः । इ. सू. समास नखादयः । ३ । २ । १२९ । इ. सू. नञो-ऽकाराभाव नाकोऽस्ति एषा मिति नाकिनं अतोऽनेकस्वरात् इति इन्) लोके देवलोके तृप्यति तृप्तिं प्राप्नुवति सति ॥ ६९ ॥

**मेरौ नमेरुद्रुतले तदीयं, यशो हयास्यैरुपवीण्यमानम् ।**
**श्रोतुं विशालापि सुरैः समेतैः, संकीर्णतां नन्दनभूरलंभि ॥ ७० ॥**

(व्या०) मेराविति ॥ सुरैर्देवैः विशालापि विस्तीर्णापि नन्दनभूः नन्दनस्य नन्दनवनस्य भूः भूमिः संकीर्णतां (क्तक्तवतू । ५ । १ । १७४ । इ. सू. क्तः । ऋल्वादेरेषां तो नोऽप्रः । ४ । २ । ६८ । इ. सू. क्तस्य नः । ऋतांक्ङिति इर् । ४ । ४ । ११६ । इ. सू. इर् रषृवर्णान्नोण-रे । २ । ३ । ६३ । इ. सू. नस्य ण । भावे त्वतल् इ. सू. भावे तल्) अलंभि संकीर्णत्वं प्रापिता । किं लक्षणैः सुरैः । तदीयं तस्येदं भगवतो यशः श्रोतुमाकर्णयितुं समेतैर्मीलितैः । कथंभूतं यशः मेरौ मेरुपर्वते । नमेरुद्रुतले नमेरुवृक्षस्य तले-ऽधस्तात् । हयास्यैः हयस्य अश्वस्य आस्यं मुखमिव आस्यं येषां ते तैर्गन्धर्वैः किंनरै रुपवीण्यमानं वीणया गीयमानम् ॥ ७० ॥

**यशोऽमृतं तस्य निपीय नागां-गनास्यकुंडोद्भवमद्भुतेन ।**
**शिरो धुनानस्य भुजङ्गभर्तु, र्भूभार एवाभवदंतरायः ॥ ७१ ॥**

(व्या०) यश इति । भुजङ्गभर्तु (नाम्नो गम खड्डौ च । विहायसस्तु विहः । ५ । ३ । १३१ । इ. सू. खड् प्रत्यय. । खित्यनव्ययाऽरुषोर्मोऽन्तो

ह्रस्वश्च । ३ । २ । १११ । इ. सू. मोऽन्तः । षष्ठ्ययत्नाच्छेषे । ३ । १ । ७६ । इ. सू. षष्ठी तत्पुरुषः भृधातोः णक तृचौ । इ. सू. कर्तरि तृच् नामिनोगुणोऽक्डिति । ४ । ३ । १ । इ. सू. गुणः) भुजं कुटिलं गच्छन्तीति भुजङ्गाः सर्पाः तेषां भर्ता स्वामी तस्य शेषनागाधिराजस्य । अद्भुतेन आश्चर्येण शिरः शीर्षं धुनानस्य धुनतः सतः । भूभारः भुवः भारः पृथ्वीभार एव अन्तरायो विघ्नरूपोऽभवत् । किं कृत्वा तस्य स्वामिनो यश एव अमृतं तत् निपीय पित्वा । कीदृशं यशः । नागांगनास्यकुंडोद्भवं नागानां सर्पाणामंगना भार्यास्तासामास्यानि मुखानि तान्येव कुंडा तेभ्य उद्भवो यस्य तत् पातालकन्यामुखरूपकुंडोत्पन्नं न च कुंडेष्वमृतं वर्तते इति वचनात् ॥ ७१ ॥

**धत्तां यशोऽस्याखिललोलगर्व-सर्वस्वसर्वंकषताभिमानम् ।**
**गुणैर्दृढव्यूढघनैर्निबद्ध, मपि त्रिलोकाटनलंपटं यत् ॥ ७२ ॥**

(व्या०) धत्तामिति । अस्य भगवतो यशः अखिललोलगर्वसर्वस्व सर्वंकषतामिमानं (सर्वात् सहश्च । ५ । १ । १११ । इ. सू. खः खित्यनव्य—च इ. सू. मोऽन्तः भावे त्वतल् इ. सू. तल् ) अखिलाश्चते लोलाश्च अखिललोलाः समस्तचपलपदार्थाः तेषां यो गर्वस्तस्य यत् सर्वस्वं तस्य सर्वंकषता सर्वङ्कषतीति सर्वंकषस्तस्य भावः सर्वंकषता अखिललोलगर्वस्य सर्वस्वसर्वंकषता तस्या अभिमानः अहंकार स्तम् । धत्तां बिभर्तु । कोऽर्थः भगवतो हि यशस्त्रिभुवने सर्व चपलपदार्थेभ्योऽप्यतिचपलत्वेन विश्वं व्याप्नोति यद् यशो गुणैरौदार्य धैर्य गांभीर्य चातुर्य माधुर्यादिभिर्दवरकैः वा निर्बद्धं बद्धमपि त्रिलोकाटनलंपटं त्रिलोकें अटनं तस्मिन् लंपटं विश्वभ्रमणरसिकं वर्तते । किं लक्षणैः गुणैः दृढा (बलि, स्थूले दृढ । ४ । ४ । ६९ । इ. सू. निपातः) निश्चला व्यूढा (वह् धातोः क्तक्तवतू इ. सू. क्तः यजादि वचेः किति । ४ । १ । ७९ इ. सू. वृत् । हो धुट् पदान्ते । २ । १ । ८२ । इ. सू. हस्य ढः अघश्चतुर्थात्तथोर्धः । २ । १ । ७० । इ. सू. तस्य ध । तवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ ।

१ । ३ । ६० । इ. सू. धस्य ढ. । ढस्तड्ढे । १ । ३ । ४२ । इ. सू. ढर्लुक् दीर्घश्च) विशालाः धनाश्च निचिताः तैः ॥ ७२ ॥

**स एव देवः स गुरुः स तीर्थं, स मङ्गलं सैष सखा स तातः ।**
**स प्राणितं स प्रभुरित्युपासा,-मासे जनैस्तद्गतसर्वकृत्यैः ॥ ७३ ॥**

**(व्या०)** स इति । जनैर्लोकैः स एव भगवान् इति अमुना प्रकारेण उपासामास सेव्यते स्म । उपासामासे इति क्रियापदं अष्टसु स्थानकेषु संयोज्यते । स एव भगवान् देव इति चतुःषष्टीन्द्र सुरासुरनरप्रभृतिलोकैः सेव्यपादारविन्दत्वात् स एव भगवान् गुरुरिति लोकानामाचार व्यवहार विद्या शिल्प विज्ञानादि प्रकाशकत्वात् । स एव जिनस्तीर्थमिति । 'अगाधे विमले शुद्धे सत्यशीलसमेऽकुले, स्नातव्यं जंगमेतीर्थे ज्ञानार्जवदयापरे ' इत्यादि तीर्थलक्षणाश्रितत्वात् । स स्वामी मंगलमिति सर्वपापच्छेदकरत्वात् । स एव जिनः सखा मित्रमाश्रितजनानां श्लाघ्यकर्मोदयकारकत्वात् । स जिनः प्रभुः स्वामी तातः पिता इति मन्यानां अन्तरंगशत्रुभ्योरक्षकत्वात् । स भगवान् प्राणितं (क्लीबे क्तः । ५ । ३ । १२३ । इ. सू. प्रपूर्वक अन् धातोर्भावे क्तः) जीवितमिति पुण्यभाजां पुण्यरूपजीवितदायकत्वात् । स जिनः प्रभुः स्वामी इति सकलरीतिनीतिस्थितिभिः प्रजानां पालकत्वात् । कैर्जनैः तद्गत सर्वकृत्यैः तस्मिन् भगवति गतानि स्थितानि सर्वाणि कृत्यानि येषां ते ते तद्गतसर्वकृत्यैः ॥ ७३ ॥

**योगीश्वरोऽभिनवभिन्नतनुप्रवेशः,-मभ्यस्य वांशुदरकंदरगः स्वमातुः ।**
**लीलो युवाप्यनपहाय तनूं स यानि-द्वंद्वं विवेश हृदयानि यदीक्षकाणाम् ॥**

**(व्या०)** योगीश्वर इति यो भगवान् योगीश्वरः (युजभुजभज–हनः । ५ । २ । ५ । इ. सू. युज् धातोः शीलादि सदर्थे घिनण् । क्तेऽनिटश्चजोः कगौ घिति । ४ । १ । १११ । इ. सू. जस्य ग स्थेशभासपिसकसो वरः । ५ । २ । ८१ । इ. सू. ईश् धातोः शीलादिसदर्थे वरः प्रत्ययः । योगिनः

मीश्वरः योगीश्वर. षष्ठ्ययत्नाच्छेषे । ३ । १ । ७६ । इ. सू. तत्पुरुषः) सन् अभिनवं नवीनं अन्यतनुप्रवेशं अन्यस्य तनुः शरीरं तत्र प्रवेशस्तं परकायप्रवेशं अभ्यस्तवान् । किं लक्षण. स भगवान् मातुर्जनन्या उदरकंदरगः (नाम्नो गमः खड्डौ । च विहायसस्तु विह. । ५ । १ । १३१ । इ. सू. गम् धातोः डः । डित्यन्तस्वरादेः । २ । १ । ११४ । इ. सू. अन्त्यस्वरादेर्लोपः) उदरमेव कन्दरं तत् गच्छतीति उदरकंदरगः । अन्योऽपि योगी कन्दरमध्यस्थितः परकाय प्रवेश विद्यामभ्यस्यति । स जिनोबालोऽपि युवापि सन् तनूं शरीरं अनपहाय अत्यक्त्वा ईक्षकाणा (णक तृचौ । ५ । १ । ४८ । इ. सू. ईक्ष् धातो कर्तरिणक ) मालोकनपराणा यत् यस्मात् हृदयानि यावद्वेदं यथालाभं । विवेश प्रविष्टवान् । अन्यो योगो निजशरीरं त्यक्त्वा अन्यस्य एकस्य कस्यचित् शरीरं परकायविद्यया प्रविशति । अयं तु भगवान् शरीरमत्यक्त्वा परेषां शरीरं प्रविवेश अतोत्र अपूर्वता । कोऽर्थः भगवान् बालो युवापि अन्यैर्दृष्टस्तेषां हृदयं प्रविष्टः जिनं विना लोकचित्तमध्ये नान्यो जनः स्थितः इति भावः । यावद्वेदमिति 'विंदती लाभे' विद यावत् पूर्वं 'यावतो विंद जीव' इति सूत्रेण. णम् यथा यावज्जीवं तथा तावद्वेदमिति प्रयोगः ॥ ७४ ॥

**अप्राप्यकारि नयनं न मृषाह जैनः,संपृच्य चेद्भगवतो वपुषा विदध्युः।**
**सेवामुपासकदृशस्तदिमा अपीह, दध्युः कराद्यवयवा इव दिव्यभूषाम् ॥**

(व्या०)—अप्राप्यकारीति। जैनो (देवता । ६ । २ १०१ । इ. सू. जिनात् देवतार्थेऽण् जिनो देवता अस्य इति जैनः) नयनं लोचनं अप्राप्यंकारि दूरस्थमेव विषयग्राहकं मृषा अलीकं नाह न जल्पति । जैनानां हि स्पर्शन रस न घ्राण श्रवणेंद्रियाणि प्राप्यकारीणि स्पृष्टविषयग्राहकत्वात् । नयनमनसी तु अप्राप्यकारिणी दहनाद्यसंभवे अस्पृष्टविषयग्राहकत्वात् । 'पुठं सुणेइ सद्दरूवं पुणयासइ अपुठंतु' इत्यागमवचनात् । अत्रोपपत्तिमाह चेद् यदि उपासकदृशः (णकतृचौ । ५ । १ । ४८ । इ. सू. उपपूर्वक आस्धातोः कर्तरिणकः भ्यादिभ्यो वा

५ । ३ । ११५ । इ. सू. दृश् धातोः क्विप्) इह जगति करावयवा इव दिव्य भूषां (भीषिभूषिचिन्ति–भ्य । ५ । ३ । १०९ । इ. सू. भूष् धातोः भावेऽङ् । आत् इ. सू. स्त्रियां आप्) दध्युः । कोऽर्थः करावयवा हस्तशीर्षाद्यंगानि भगवतो वपुषा संपृच्य सेवाकरणेन दिव्यभूषां कंकणमुद्रा मुकुटादिकां दधति न तथा दृशः उपासकदृशो दधति संपृच्य सेवाकरणाभावादिति ॥७५॥

**हृदि ध्याते जातः कुसुमशरजन्मा ज्वरभरः ।**
**श्रुते चान्यश्लाघा वचनविरुचित्वं श्रवणयोः ॥**
**दृशोर्दृष्टे स्पष्टेतरविषयगत्या मलसता ।**
**तथापीह स्नेहं दधुरमरवध्वो निरवधिम् ॥ ७६ ॥**

(व्या०) हृदीति ॥ इह भगवति हृदि (दन्तपाद नासिका हृदय–वा । २ । १ । १०१ । इ. सू. हृदयस्य हृत् ।) ध्याते (क्तक्तवतू । इ. सू. ध्यै धातोर्क्तः आत्संध्यक्षरस्य । ४ । २ । १ । इ. सू. ध्यैधातोरात्वं । व्यञ्जनान्तस्थातोऽख्याध्यः । ४ । २ । ७१ । इ. सू. ध्यावर्जनात् नत्वाभावः) सति कुसुमशरजन्मा कुसुमशरः कामः तस्मात् जन्म (मन् वन् क्वनिप् विच् क्वचित् । ५ । १ । १४७ । इ. सू. जन् धातोः मन्) यस्य स ज्वरभरः कामज्वरसमूहो जातः । च अन्यत् इह स्वामिनि श्रुते सति श्रवणयोः कर्णयोः अन्यश्लाघा (क्टितो गुरो र्व्यञ्जनात् । ५ । ३ । १०५ । इ. सू. श्लाघ् धातोरङ् प्रत्ययः आत् इ. सू. आप् स्त्रियाम्) वचनविरुचित्वं अन्येषां श्लाघा वचनानि प्रशंसावचनानि तेषु विरुचित्वं जातं तेषु अरुचिरुत्पन्ना । इह भगवति दृष्टे सति दृशोर्लोचनयोः इतरविषयगत्यां इतरे च ते विषयाश्च तेषु गतिर्गमनं तस्यां अन्यत्रावलोकने अलसता स्पष्टा जाता आलस्यं प्रकटं जातं । तथापि अमरवध्व. अमराणां देवानां वध्वो भार्या देव्य इह भगवति निरवधिं अवधिरहितं स्नेहं दधुर्धरन्ति स्म । यस्मिन् ध्याते ज्वर श्रुतेऽरुचि दृष्टे आलस्यं जायते तत्र स्नेह कथं ध्रियते इति विरोधः ॥ ७६ ॥

**नारीणां नयनेषु चापलपरीवादं विनिघ्नन् वपुः ।**
**सौन्दर्येण विशेषितेन वयसा बाल्यात्पुरोवर्तिना ॥**

निर्जितापि मनोभवस्य जनयंस्तस्यैव वामाकुले ।
भ्रान्तिं कालमसौ निनाय विविधक्रीडारसैः कंचन ॥ ७७ ॥

(७५।०) नारीणामिति ॥ असौ भगवान् विविधक्रीडारसैः विविधाश्चताः क्रीडाश्च तासां रसास्तैः कंचन कालं कियन्तं समयं निनायगमयति स्म । किं कुर्वन् वपुः सौन्दर्येण वपुषः सौन्दर्यं तेन शरीरमनोहरत्वेन निश्चलताकरणात् नारीणां स्त्रीणां नयनेषु नेत्रेषु चापलपरीवादं चपलस्य भावश्चापलं तेन परीवादः (भावाकर्त्रोः । ५ । ३ । १८ । इ सू. परिपूर्वक वद् धातो घञ् । घञ्युप-सर्गस्य बहुलम् । ३ । २ । ८६ । इ. सू. परिवादे परि उपसर्गस्य दीर्घ ) तं चपलतया अपवादं विनिघ्नन् (शत्रानशावेष्यतितुसस्थौ । ५ । २ । २० । इ. सू. विनिपूर्वक हन् धातो सदर्थे शतृ अनोऽस्य । २ । १ । १०८ । इ. सू. अल्लुकि हनोह्नोघ्न । २ । १ । ११२ । इ. सू. ह्नोघ्न । ऋदुदित् इ. सू. धुटिपरे नोन्त दीर्घङ्यावृ–से । इ. सू. सेर्लोप पदस्य । २ । १ । ८९ । इ. सू. संयोगान्तस्य लोपः) विनाशयन् । किं लक्षणेन वपुःसौन्दर्येण बाल्यात् पुरोवर्तिना बाल्यात् अग्रेसरेण वयसा यौवनलक्षणेन विशेपितेन विशेष विशिष्टतां सश्रीकतां प्रापितेन । किं कुर्वन् भगवान् मनोभवस्य कामस्य निर्जितापि वामाकुले स्त्रीवर्गे रूपश्रिया तस्यैव मनोभवस्य भ्रान्तिं अयमेव कामदेव इति भ्रान्ति जनयन् उत्पादयन् यो यस्य निर्जिता स्यात् स तस्यैव भ्रान्तिं कथमुत्पादयतीति चित्रम् ॥ ७७ ॥

इतिश्रीमद्अञ्चलगच्छे कविचक्रवर्त्तिश्रीजयशेखरसूरिविरचित श्रीजैनकुमार-
संभवस्य तच्छिष्य श्रीधर्मशेखरो उपाध्यायविरचितटीकायां
श्रीमाणिक्यसुन्दरशोधितायां प्रथमसर्गव्याख्या
समाप्ता ॥ १ ॥

सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि– ।
धम्मिलादिमहाकवित्वकलनाकल्लोलिनीसानुमान् ॥
वाणीदत्तवरश्चिरं विजयते तेन स्वयं निर्मिते ।
सर्गो जैनकुमारसंभवमहाकाव्येऽयमाद्योऽभवत् ॥ १ ॥

## ॥ अथ द्वितीयः सर्गः प्रारभ्यते ॥

तदा हरेः संसदि रूपसम्पदं, प्रभोः प्रभाजीवनयौवनोदिताम् ।
अगायतां तुंबरुनारदौ रदो-च्छलन्मयूखच्छलदर्शिताशयौ ॥ १ ॥

(व्या०) तदेति । तदा तस्मिन्नवसरे । तुम्बरुनारदौ (चार्थे द्वन्द्वः सहोक्तौ । ३ । १ । ११७ । इ. सू. इतरेतर द्वन्द्वः ।) तुम्बरुश्च नारदश्च तुम्बरुनारदौ । हरेरिन्द्रस्य संसदि (क्रुत् सम्पदादिभ्यः क्विप् । ५ । ३ । ११४ । इ. सू. सम्पूर्वक सद् धातो क्विप्) सभायां । प्रभोः श्रीऋषभदेवस्य रूपसम्पदं रूपस्य सम्पत् (क्रुत्सम्पदादिभ्यः क्विप् । ५ । ३ । ११४ । इ. सू. सम्पूर्वक पद् धातो स्त्रियां क्विप्) लक्ष्मीस्तां रूपलक्ष्मीमगायतां गायतः स्म । किं लक्षणां रूपसम्पदं प्रभाजीवनयौवनोदितां प्रभायां (सप्तमी शौण्डाद्यैः । ३ । १ । ८८ । इ. सू. सप्तमीतत्पुरुष) जीवनं तदेव यौवनं तस्मादुदितामुत्पन्नां । (पञ्चमी भयाद्यैः । ३ । १ । ७३ । इ. सू. पञ्चमी तत्पुरुषः) कि लक्षणौ तुम्बरुनारदौ रदोच्छलन्मयूखच्छलदर्शिताशयौ रदेभ्यो दन्तेभ्यः उच्छलन्तो ये मयूखाः (विशेषणं विशेष्येण—श्च । ३ । १ । ९६ । इ. सू. विशेषण कर्मधारयः) किरणा तेषां च्छलेन (षष्ठ्यत्नाच्छेषे । ३ । १ । ७६ । इ. सू. षष्ठीसमासः) मिषेण दर्शितः (कारकं कृता । ३ । १ । ६८ । इ. सू. तृतीया तत्पुरुषः) प्रकटितः आशयोऽभिप्रायो याभ्यां (एकार्थं चानेकं च । ३ । १ । २२ । इ. सू. तृतीया बहुव्रीहिः) तौ एतावता विशेषणेन विशदमानसौ इति भावः ॥ १ ॥

प्रभुः प्रभांभोनिधिरामरी सभा, किमु स्तुमस्तौ यदि गातुमुद्यतौ ।
मणिर्महार्घ्यः शुचिकान्ति काञ्चनं, कला कलादस्य कलापि वर्ण्यताम् ॥

(व्या०) प्रभुरिति । प्रभुः श्रीऋषभदेवः प्रभांभोनिधिः प्रभायाः कान्तेरंभोनिधिः समुद्रः वर्तते । सभा आमरी (तस्येदमि. सू. अण् अणञेयेकण्नञ्-म्

२ । ४ । २० । इ. सू. स्त्रियां ङी·) अमराणामियमामरी देवसत्का वर्तते । यदि तौ तुम्बरुनारदौ गातु (क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती । ५ । ३ । १३ । इ. सू. भविष्यदर्थे गाधातोस्तुम् प्रत्यय· ।) भुवतो । वयं किमु स्तुम· न किमपि । अत्रार्थे दृष्टान्तमाह मणिर्महार्घ्यो (एकार्थं चानेकं च इ. सू. बहुव्रीहि । जातीयैकार्थेऽच्वे । ३ । २ । ७० । इ. सू. महत् शब्दात् डाप्रत्ययः । डित्यन्तस्वरादे इ. सू. अत् लोप ) महत् अर्घ्यं यस्य स बहुमूल्यो- वर्तते । काञ्चनं सुवर्णं शुचिकान्ति शुचिः कान्तिर्यस्य तत् निर्मलकान्ति वर्तते । ततः परं कलादस्य कलामादत्ते इति कलाद (डश्चाड· । ५ । १ । ७८ । इ. सू. आङ्पूर्वक दाम् धातोर्ड । डित्यन्तस्वरादे· इ. सू. आलोप ) सुवर्ण- कारस्य कला मनोज्ञा कलापि वर्ण्यताम् ॥ २ ॥

**गुणाढ्यया गेयविधिप्रवीणया, न वीणया गीतमदोऽन्वगायि न ।**
**सरस्वती पाणितलं न मुञ्चती, किमौचितीतश्चवते कदापि सा ॥ ३ ॥**

**(व्या०)** गुणाढ्येति । वीणया अदो नारदतुम्बरुसंबंधि गीतं न अन्व- गायि न अनुपश्चाद् गीयते स्म । अत्र द्वौ नञौ प्रकृतार्थं गमयतः । किं विशि- ष्टया वीणया गुणाढ्यया गुणैस्तंत्रीभिर्विवेकादिभिर्वा आढ्यया समृद्धया अन्या गायिनी गुणैर्माधुर्यादिभि राढ्या स्यात् पुनः किं विशिष्टया गेयविधिप्रवीणया गेयं (आत्सन्ध्यक्षरस्य । ४ । २ । १ । इ. सू. गैधातो आकारः । यएचातः । ५ । १ । २८ । इ. सू. य प्रत्यय. आकारस्य च एकार· । गानं तस्य विधौ प्रवीणया निपुणया सा वीणा औचितीतः औचित्यगुणात् किं कदापि च्यवते भ्रस्यति अपितु नैव । किं कुर्वती वीणा सरस्वतीपाणितलं सरस्वत्या· पाणिर्हस्त- स्तस्य तलं सरस्वती हस्ततलं न मुञ्चती । य· सरस्वत्या· समीपं न मुञ्चति तस्य विवेकाद्या गुणाः स्युः अत्र किं चित्रम् ॥ ३ ॥

**निनिन्दुरेकेऽमरधेनुजं पयो, मरुद्द्रुमाणामपरे फलावलिम् ।**
**परेऽर्णवालोडनसाधितां सुधां, प्रभोः पिबन्तश्चरितामृतं सुराः ॥ ४ ॥**

(व्या०) निनिन्दुरिति । एके देवाः अमरधेनुजं सप्तम्याः । ५ । १ । १६९ । इ. सू. जनेर्डः ।) पयः कामधेनुसंबंधि दुग्धं निनिन्दुर्निन्दन्ति स्म । 'णिदु' कुत्सायामिति धातोः परोक्षाया प्रयोग इयं क्रिया सर्वत्र योज्यते । अपरे देवा मरुद्द्रुमाणां मरुतोदेवास्तेषां द्रुमाः कल्पवृक्षास्तेषां फलानि तेषा मावलिस्ता निनिन्दु ॥ अपरे सुरा अर्णवालोडनसाधिता अर्णवस्य समुद्रस्या लोडनं मन्थनं तेन साविता तां समुद्रमन्थनप्रकटितां सुधाममृतं निनिंदुः । किं कुर्वन्तः सुराः प्रभोः श्रीऋषभदेवस्य चरितामृतं चरित्ररूपममृतं पिबन्तः । कोऽर्थः देवानां श्रीयुगादिदेवचरित्रामृतं कामधेनुदुग्धकल्पवृक्षफलसुधानिर्यासादिभ्योऽप्यधिकतरं सरसं जातमिति तात्पर्यम् ॥ ४ ॥

**श्रवः श्रियं प्रापुरमी प्रभोर्गुणै,, र्वयं वृथा भारकृतः किमास्महे ।**
**मुदा शिरः स्वं धुनतां सभासदा, मितीव पेते किल कर्णवेष्टकैः ॥५॥**

(व्या०) श्रवः श्रियमिति ॥ किल इति सत्ये सभासदां (क्विप् । ५ । १ । १४८ । इ. सू. सद् धातोः क्विप् ।) सभायां सीदन्तीति सभासदस्तेषां सभ्यानां कर्णवेष्टनैः कुंडलैः पेते पतितम् अत्र पतने उत्प्रेक्षते इतीव इति कारणादिव इतीति किं अमी सभासदः सभ्याः प्रभोर्गुणैः श्रव श्रियं कर्णशोभां प्रापुः । वृथा मुधा भारकृतः भारं कुर्वन्तीति भारकृतः (क्विप् । ५ । १ । १४८ इ. सू. कृ धातोः क्विप् ह्रस्वस्यतः पित्कृति । ४ । ४ । ११३ । इ. सूत्) मुधा भारकारिणो वयं किमास्महे कथं तिष्ठामः । किं कुर्वतां सभासदां मुदा हर्षेण स्वं शिर स्वीयं मस्तकं । धुनतां कर्णवेष्टकशब्द पुंनपुंसकयोर्ज्ञेयः ॥

**यशोऽमृतौघः प्रससार तन्मुखा त्तथा प्रभोः पार्षदनिर्जरै र्यथा ।**
**अयं श्रवःकूपकहृत्सरःस्वमान् , दृगध्वनात्रामि मुदश्रुर्दंभतः ॥ ६ ॥**

(व्या०) यशोऽमृतौघ इति ॥ तन्मुखात तयोर्मुखं तन्मुखं तस्मात् तुंबरुनारदयोर्मुखात् प्रभोः श्रीऋषभदेवस्य । यशोऽमृतौघ यशांसि एव अमृ-

तानि तेषामोघः समूहः । पार्षदनिर्जरैः पर्षदि साधव· पार्षदा· पार्षदाश्चते निर्जराश्चतैः ४ पर्षदोण्यणौ । ७ । १ । १८ । इ. सू. पर्षद् शब्दात् अण् विशेषणं विशेष्येण । इ. सू. कर्मधारयः मुदश्रुदंभत मुद· अश्रूणि तेषां दंभतः हर्षाश्रुमिषात् । दृगध्वना दृक् एव अध्वा तेन दृष्टिमार्गेण अवामि वम्यते स्म । किं कुर्वन् यशाऽमृतोघ अव कूपकहृत्सर सु श्रवसौ कर्णाविव कूपकौ च हृत् एव सरश्च तेषु कर्णरूपकूपहृदयरूपसरोवरेषु अमान् न मातीति अमान् मातुं न शक्तः

**ध्रुवं दृशोश्च श्रवसोश्च संगतं, प्रवाहवर्त्मान्तरमस्ति देहिनाम् ।**
**श्रुतिं गतो गीतरसो दृशोदभूत्, मुदश्रुदंभाद् द्युसदां किमन्यथा ॥**

(व्या०) ध्रुवमिति । देहिनां मनुष्याणां । दृशो. नेत्रयोः च श्रवसो· कर्णयो· प्रवाहस्यवर्त्म प्रवाहवर्त्म पवनस्यमार्ग तत् कीदृशं आन्तर अन्तर्भवं तत संगतं मीलितमस्ति । ध्रुवमिति निश्चये । अन्यथा संगताभावे द्युसदां ( क्विप् इ. सू. सद्धातो· क्विप् । उ पदान्तेऽनूत् । २ । १ । ११८ । इ. सू. दिवो वस्य उ ) दिवि सीदन्तीति तेषा देवाना श्रुतिं (श्रवादिभ्यः । ५ । ३ । ९२ । इ. सू. श्रुधातो· स्त्रियां क्ति ) गत कर्णगत. गीतस्य रस· गीतरस· मुदश्रुदंभात् हर्षाश्रुमिषात् । दृशा नेत्रद्वारा कि कथं उदभूत् बहिर्निसृतोऽस्ति ॥ ७ ॥

**कथामृतं पीतवतां विभोरभू-द्यथा ऋभूणां श्रवसो भृशं सुखम् ।**
**तथा दृशोरर्तिरदोदिदृक्षया, न जन्तुरेकान्तसुखी क्वचिद्भवे ॥ ८ ॥**

(व्या०) कथामृतमिति ॥ विभोः श्रीऋषभदेवस्य कथामृतं कथारूपममृतं पीतवतां (क्तक्तवतू । ५ । १ । १७४ । इ. सू. पाधातोः कर्तरि क्तवतु· । ईर्व्यञ्जनेऽयपि । ४ । ३ । ९७ । इ. सू. ईः) ऋभूणां देवानां श्रवसोः कर्णयोः भृशमत्यन्तं सुखं यथाऽभूत् । तथा दृशोर्नेत्रयोरर्तिः पीडा आसीत् । यथा ऋभूणा मित्यत्र 'ऋलृति ह्रस्वो वा' इति सूत्रेण ह्रस्वाभावो विकल्पेन ज्ञेय । कथं नेत्रयो· पीडाभूत् इति प्रश्ने अदोदिदृक्षया द्रष्टुमिच्छादिदृक्षा ( तुमर्हादिच्छायां सन्-

तत्सनः । ३ । ४ । २१ । इ. सू. दृश् धातोः सन् । सन्यङश्च । ४ । १ । ३ । इ. सू. द्वित्वम् । सन्यस्य । ४ । १ । ५९ । इ. सू. पूर्वाकारस्य इः यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः । २ । १ । ८७ । इति सू. शः ष । षढोः कस्सि । २ । १ । ६२ । इ. सू. षस्य क । नाम्यन्तस्थाकवर्गात्-पदान्तःकृतस्य स शिड्नान्तरेऽपि । २ । ३ । १५ । इ. सू. सस्य षः कष संयोगे क्ष । शंसि प्रत्ययात् । ५ । ३ । १०५ । इ. सू. स्त्रियामः । आत् । २ । ४ । १८ । इ. सू. आप् । ) अमुष्य दिदृक्षा अदो दिदृक्षा तया । जन्तु प्राणी भवे संसारे क्वचित् कुत्रापि एकान्तसुखी नियमेन सुखवान् न भवेत् ॥ ८ ॥

**प्रकृत्य कृत्यान्तरशून्यतां सद-स्यदस्सगीतेन तदा दिवौकसाम् ।**
**ध्वनेः खजन्मत्वमसूचितं, यदुद्भवो यः स तदाभचेष्टितः ॥ ९ ॥**

(व्या०) प्रकृत्येति । सदसि सभायां अदस्य गीतेन अमुयो तुंबरुनारदयो रिदमदस्यं । अदस्यं च तत् गीतं च तेन तदा तस्मिन्नवसरे दिवौकसां देवानां कृत्यान्तर शून्यतां अन्यत् कृत्यं कृवृषिमृजिशंसिगुहिदुहिजपो वा । ५ । १ । ४२ । इ. सू कृधातोर्वा क्यप् । ह्रस्वस्य तः पित्कृति । ४ । ४ । ११३ । इ. सू. त् । ) कृत्यान्तरं कार्यान्तरं तस्मिन् शून्यतां अचेतनत्वं प्रकृत्य प्रारभ्य ध्वने शब्दस्य खजन्यत्वं सूचितं सुष्ठु उचितं यथा भवति तथा असूचि कथितं वैशेषिका शब्दं आकाशस्य गुणं कथयन्ति । यो यदुद्भवः यो यस्मादुत्पद्यते स तदाभचेष्टित. (तदस्य सञ्जातं तारकादिभ्य इतः । ७ । १ । १३८ । इ. सू. चेष्टाशब्दात् इत प्रत्ययः । अवर्णेवर्णस्य । ७ । ४ । ६८ । इ. सू. आलोपः) स तत्सदृगचेष्टावान् भवति । यदि आकाशं शून्यं कथ्यते तदा तदुद्भवः शब्दोऽपि शून्यताकारी स्यादिति युक्तमेवास्ति ॥ ९ ॥

**तदीयगीताहितहृत्तया समं, समुज्झिताशेषशरीरचेष्टितैः ।**
**स्वभावनिःस्पन्दनिरीक्षणैः क्षणं, न तत्र चित्रप्रतिमायितं न तैः ॥**

(व्या०) तदीयेति । तै देवै क्षणं (कालाध्वनोर्व्याप्तौ । २ । २ । ४२ । इ. सू. व्याप्तौ द्वितीया) न चित्रप्रतिमायितं न किन्तु चित्रलिखितप्रतिमावदाचरितमेव । कीदृशैर्दे वै तदीयगीताहितहृत्तया तस्य भगवत इदं तदीयं तस्मिन् गीते आहितं धृतं यद् हृद् हृदयं तस्य भावस्तत्ता तया करणभूतेन समं समकालं समुज्झिताशेषशरीरचेष्टितै समुज्झितानि त्यक्तानि अशेषाणि समग्राणि शरीरस्य चेष्टितानि यैस्ते तै । पुन किं विशिष्टै. स्वभावनिस्पन्दनिरीक्षणै स्वभावेन प्रकृत्या निस्पन्दानि निश्चलानि निरीक्षणानि येषां ते तै अनिमिष नयना देवा इति वचनात् ॥ १० ॥

**विभुं तमद्यापि निशम्य तन्मुखा, दखंडकौमारकमाकरं श्रियाम् ।**
**मृतः स कामः किमिति प्रजल्पिते, सुरीसमूहे मुमुचे रतिं रतिः ॥**

(व्या०) विभुमिति । सुरीसमूहे सुरीणां समूहस्तस्मिन् देवीसमुदयमध्ये अन्याः सर्वा अपि भगवन्तं निशम्य (प्राक् काले । ५ । ४ । ४७ । इ. सू. निपूर्वक शम् धातो क्त्वाप्रत्यय. । अनञः क्त्वो यप् । ३ । २ । १५४ । इ. सू. क्त्वो यप्) श्रुत्वा रति प्रीतिं प्राप्ताः रतिस्तु न प्रीता हेतुमाह । स सर्व प्रसिद्ध. कामः किं मृत इति सर्वै प्रजल्पिते प्रोक्ते सति रति' कामभार्या रतिं समाधिं मुमुचे । किं कृत्वा तं विभुं भगवन्तं अद्यापि तन्मुखात् तयो' तुंबरुनारदयो' मुखं वदन तस्मात् । अखंडकौमारक (युवादेरण् । ७ । १ । ६७ । इ. सू. भावेऽर्थे कुमारशब्दादण् । वृद्धि स्वरेष्वादेर्ञ्णिति तद्धिते । ७ । ४ । १ । इ. सू. आदिस्वरस्य वृद्धि' तत स्वार्थे क ) मपरिणीतं श्रुत्वा किं लक्षणं विभुं श्रियां लक्ष्मीणामाकरं (पुन्नाम्नि घ' । ५ । ३ । १३० । इ. सू. आपूर्वक कृधातो आधारे घ' । नामिनो गुणोऽक्ङिति । ४ ३ । १ । इ. सू. गुण ) स्थानमिति ॥ ११ ॥

**त्रिलोक भर्तुःपरमार्हतो विद-न्नथो विवाहावसरं सुरेश्वरः ।**
**विसृज्य सभ्यानुपसर्जनीकृता-परक्रियः प्रास्थित वैक्रियाङ्गभृत् ॥**

(व्या०) त्रिलोकेति ॥ अथोअनन्तरं सुरेश्वरः सुराणां देवानामीश्वरः इन्द्र. प्रास्थित चचाल स्था धातु प्रपूर्वकः 'संविप्रावात्' इति सूत्रेणात्मनेपदम् । 'अद्यतनीत अड्धातो' रितिसूत्रेण अडागम । 'इश्वस्थादइतिसूत्रेण आकार-स्थाने इकारे कृते सिजद्यतन्यामि सू. सिच् धुड्ह्रस्वाल्लुगनिटस्तथोः इ. सू. ते परे सिचो लुक् प्रास्थित इति रूपं सिद्धम् । किं लक्षण इन्द्रः वैक्रियाङ्ग भृत् देवेन्द्रा भवधारणीयदेहेनैव लोकान्ते भ्रमन्ति । परं मानुष्यलोक मागच्छन्तोहि उत्तरवैक्रियरूपं कुर्वन्तीति वैक्रियाङ्गधारी इन्द्रः इत्यर्थः । किं लक्षणाः परमार्हत. महाजैनः । पुन किं कुर्वन् त्रिलोकभर्तुः त्रयः अवयवा यस्य सः त्र्यवयव स चासौ लोकश्चेति त्रिलोकः मध्यमपदलोपी कर्मधारयः तस्य भर्ता स्वामी तस्य जिनेन्द्रस्य विवाहावसरं विवाहस्य अवसरः समयस्तं विदन् जानन् । किं कृत्वा सभ्यान् सदस्यान् विसृज्य त्यक्त्वा । पुनः किं विशिष्टः उपसर्जनीकृतापरक्रियः (कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागततत्वे च्विः । ७ । २ । १२६ । इ. सू. उपसर्जनशब्दात् अभूत तद्भावे च्वि ईश्चाववर्णस्याऽनव्ययस्य । ४ । ३ । १११ । इ. सू. च्वौपरे अस्य ईः ।) उपसर्जनीकृताः गौणीकृताः निरादरीकृताः इति यावत् अपराः अन्याः क्रियाः कर्तव्यानि येन सः ॥ १२ ॥

**स्वयंप्रयाणे वद किं प्रयोजनं, समादिशेष्टं तव कर्म कुर्महे ।**
**इमाः सुराणामनुगामिनां गिरो, यियासतस्तस्य ययुर्न विघ्नताम् ॥१३**

(व्या०) स्वयमिति । अनुगामिनां (अजाते शीले । ५ । १ । १५४ । इ. सू. अनुपूर्वक गम् धातोः णिन् प्रत्ययः । ञ्णिति । ४ । ३ । ५० । इ. सू. उपान्त्यस्याकारस्य वृद्धिः) अनुपश्चाद् गच्छन्तीति अनुगामिन स्तेषां सुराणां देवानां इमा गिरः वाच यियासत याधातो सनिकृते शतृ प्रत्ययः ।) यातु मिच्छतीति यियासति यियासतीति यियासन् तस्य गन्तुमिच्छत तस्य इन्द्रस्य विघ्नतामन्तरायतां न ययु न गच्छन्ति स्म । इमा काः हे स्वामिन् वद स्वयं प्रयाणे किं प्रयोजनं (अनट् । ५ । ३ । १२४ । इ. सू. प्रपूर्वक युज् धातो

रनट् । लघोरुपान्त्यस्य । ४ । ३ । ४ । इ. सू. उपान्त्यस्यगुणः ।) किं कार्य मस्ति । समादिश आदेशं देहि वयं तव इष्टं कर्म कुर्महे ॥ १३ ॥

**व्रजैः सुराणामनुवव्रजे व्रज-न्नसावनुक्त्वाप्यतिरिक्तभक्तिभिः ।**
**बलात् किमामन्त्रयते बलाहकः, स यद् बलाकापटलैः परीयते ॥ १४**

(व्या०) व्रजैरिति । असौ इन्द्रः अनुक्त्वापि व्रजन् अकथयित्वैव गच्छन् सन् सुराणां देवानां व्रजै. समूहै अनुवव्रजे अनुगम्यते स्म । किं लक्षणैः व्रजैः अतिरिक्तभक्तिभि· अतिरिक्ता अधिका भक्ति· येषां ते तै. । (एकार्थं चानेकं च । इ. सू. समास· ।) बलाहको (वारीणां वाहको बलाहक. 'पृषोदरादयः' । ३ । २ । १५५ । पृषोदरादित्वात् बलाहकशब्दः सिद्ध· ।) मेघ· बलात् किं बलाकापटलानि आमन्त्रयते (आमन्त्र् चुरादिभ्यो णिच् । ३ । ४ । १७ । इ. सू. णिच् कर्तरि वर्तमाना । ) आकारयति अपितु नैव । यत् यस्मात् कारणात् स बलाहको मेघ. बलाकानां बकपत्नीनां पटलानि समूहास्तै परीयते (परि इ. कर्मणि परोक्षा । क्यः शिति । ३ । ४ । ७० । इ. सू. क्यः) परिव्रियते ॥

**न चिक्लिशे क्वापि विभोः प्रयोजनात्, स योजनानामयुतानि लंघयन् ।**
**पदे पदे प्रत्युत तद्विवन्दिषा, रसेन कृष्टो गतिलाघवं दधौ ॥ १५ ॥**

(व्या०) न इति । स इन्द्रः क्वापि कस्मिन्नपि स्थाने न चिक्लिशे न खेदमाप्तवान् । 'क्लिशं च' उपतापे इति धातोः कर्तरि परोक्षा । किं कुर्वन् इन्द्रः विभो. प्रयोजनात् स्वामिकार्यात् योजनाना मयुतानि दशसहस्राणि लंघयन् । अयुतानि इति उपलक्षणमात्रमेतत् । यथा योजनानां दशसहस्राणि तथा क्वापि लक्षं क्वापि दशलक्षाणि लंघयन् इत्याद्यपि ज्ञेयम् । पदे पदे (वीप्सायाम् । ७ । ४ । ८० । इ. सू. द्वित्वम्) प्रत्युत इति विशेषत· तद्विवन्दिषारसेन तस्य भगवतो विवन्दिषा (शंसि प्रत्ययात् इ. सू वन्दे सन्नन्तात् अप्रत्यय आत् इ. सू. स्त्रियामाप् । ) वन्दितुमिच्छा वन्दनेच्छा तस्या रसस्तेन कृष्ट· सन् गति-

लाघवं गतौ गमने लघुत्वं शीघ्रत्वं दधौ। (धा धातो. द्विर्धातु रितिसू. द्वित्वं। ह्रस्वः इ. सू. पूर्वस्य ह्रस्वः द्वितीय तुर्ययो. । ४ । १ । ४२ । इ. सू. पूर्वधस्य दः आतो णव औ इ. सू. णव औ. । ऐदौत् सन्ध्यक्षरैः । १ । २ । १२ । इ. सू. औः । ) कोऽर्थः स्वामिवन्दनोत्कंठा १ चपला २ वेगा ३ जवनतरीभि ४ चतसृभिर्गतिभिरिति त्वरितं त्वरितं चलित. ॥ १५ ॥

**शिरांसि सर्पन् रुचकादिभूभृतां, तदग्रसिद्धायतनस्थिताऽर्हतः ।**
**विलंबभीरुर्मनसैवसोऽनमन्नयं न भिन्ते विबुधेशिता यतः ॥१६॥**

(व्या०) शिरांसीति। स इन्द्रः रुचकादि भूभृतां रुचकः आदौ येषां ते रुचकादय ते च ते भूभृत (क्विप् । ५ । १ । १४८ । इ. सू. भृधातोः क्विप् । ह्रस्वस्य त पित्कृति । इ. सू. तः । ) पर्वताश्चस्तेषां रुचकादि पर्वतानां शिरांसि शिखराणि गच्छन् सर्पन् गच्छन् सन्। तदग्रसिद्धायतनस्थिताऽर्हतः तेषां मग्रे सिद्धायतनेषु जिनभवनेषु स्थिता ये अर्हन्तस्तान् मनसा एव अनमत्। किं लक्षणः इन्द्रः विलम्बभीरुः विलंबात् भीरु (पञ्चमी भयाद्यैः । ३ । १ । ७३ । इ. सू. भययोगे पञ्चमीतत्पुरुषः । ) भयवान् यतो यस्मात् कारणात् विबुधेशिता इन्द्रः पक्षे विद्वन्मुख्यः नयं न्यायं न भिन्ते । अन्यथा 'श्रेयो हि प्रतिबध्नाति पूज्ये पूजाव्यतिक्रमः' इति नियमः ॥ १६ ॥

**न तस्य वज्रेऽपि विलोकितेऽधरै, धरै र्बभूवे क्वचिदंजनादिभिः ।**
**तदीयमौलौ प्रतिमा अकर्त्रिमाः, सदासते यज्जगदेकपालिनाम् ॥१७॥**

(व्या०) नेति ॥ तस्य इन्द्रस्य वज्रे विलोकितेऽपि दृष्टेऽपि सति (यद्भावो भावलक्षणम् । २ । २ । १०६ । इ. सू. सप्तमी । ) अञ्जनादिभि धरै (अच् ५ । १ । ४९ । इ. सू. कर्तरि अच् ) पर्वतै क्वचिद् अधरै कातरैर्न बभूवे यत् यस्मात् तदीयमौलौ तेषां पर्वताना मस्तके जगदेकपालिनां (ग्रहादिभ्यो णिन् । ५ । १ । ५३ । इ. सू. पाल् धातोर्णिन् ) जिनेन्द्राणामकर्त्रिमाः

ड्वितस्त्रिमक् तत्कृतम् । ५ । ३ । ८४ । इ. सू. डुकृंग् धातोः त्रिमक् प्रत्ययः आत् । इ. सू. स्त्रियामाप् ।) शाश्वत्यः प्रतिमाः सदा निरन्तरं आसते तिष्ठन्ति । कोऽर्थः पर्वतानां शत्रुरिन्द्रः वज्रेणपर्वतपक्ष छेदित्वात् अञ्जनाचलाद्या गिरयः इन्द्रं दृष्ट्वा मनागपि न क्षुभ्यन्ति स्म स्वशीर्षे शाश्वतजिनप्रतिमानां स्थितत्वात् ॥१७॥

**रुचाञ्जनक्ष्माधरमौलिमूलयां–तरा तमस्यञ्चति सूचिभेद्यताम् ।**
**निरुद्धचक्षुर्विषयः स चिन्मयीं, चरन् सहस्राभ्यधिकां दृशं दधौ ॥ १८**

(व्या०) रुचाञ्जनेति । स इन्द्रः चरन् गच्छन् सन् सहस्राभ्यधिकां सहस्रेभ्यः अधिका तां चिन्मयीं दृशं दधौ धत्ते स्म । कस्मिन् सति अन्तरा विचाले अञ्जनक्ष्माधरमौलिमूलया (आयुधादिभ्यो धृगोऽदंडादेः । ५ । १ । ९४ । इ. सू. धृग् धातोः अच् प्रत्ययः) अञ्जनाचलपर्वतमस्तके मूलमुत्पत्तिर्यस्या सा तया एवं विधया रुचा कान्त्या तमसि अन्धकारे सूचिभेद्यतां सूच्या भेद्यता तां (ऋवर्ण व्यञ्जनाद् घ्यण् । ५ । १ । १७ । इ. सू. भिद् धातोः घ्यण् । भावे त्वतल् इ. सू. तल् आत् इ. सू. स्त्रियामाप् ) अञ्चति गच्छति सति सूचिभिरन्धकारो न भिद्यते तथापि कविधर्मोयम् । यतः कविशिक्षायामुक्तम् 'तिमिरस्य तथा मुष्टिग्राह्यत्वं सूचिभेद्यता' मिति ॥ अत एव कारणात् निरुद्ध चक्षुर्विषयः निरुद्ध चक्षुषो विषयो यस्य सः निरस्तनेत्रगोचरः । कोऽर्थ अञ्जनाचलोऽतीव कृष्णः तेन तत्र अन्धकारं सूचिभेद्यं वर्तते तत्र इन्द्रः सहस्रनेत्रैरपि न पश्यति पश्चाद् ज्ञानदृशैव अन्तश्चलित ॥ १८ ॥

**लतामयागारशया रिरंसया, सुराः सदारा ददृशुस्तमञ्जगम् ।**
**स तानपश्यन्नतिवेगतस्त्रपाजडान्न चक्रेऽचलमूर्ध्नि चाचलिः ॥१९॥**

(व्या०) लतामयेति । सदारा (दारैः सह वर्तन्ते इति सदाराः सहस्तेन । ३ । १ । २४ । इ. सू. सह पूर्वपद बहुव्रीहिः । न्यायावायाध्यायोद्यावसंहारावहाराधारदारजारम् । ५ । ३ । १३४ । इ. सू. निपातः )

सकलत्राः सुराः देवाः तमिन्द्रं अभ्रग मार्गस्थं ददृशुः पश्यन्ति स्म । किं लक्षणाः सुराः रन्तुमिच्छा रिरंसा तया रिरंसया क्रीडेच्छया लतामयागारशयाः वल्लीमयागारे गृहे शेरते इति । (आधारात् । ५ । १ । १३७ । इ॰ सू. शीङ् धातो अः) स इन्द्रः तान् सुरानतिवेगतः अपश्यन् अनवलोकयन् त्रपाजडान् त्रपया जडा-स्तान् लज्जामूर्खान् न चक्रे । किं लक्षणः इन्द्र अचलमूर्ध्नि पर्वतमस्तके चाचलिः (डौः सासहि वावहि चाचलि पापति । ५ । २ । ३८ । इ. सू. निपात) चलनशीलः चाचलि चाचलिरिति निपातो ज्ञेयः ॥ १९ ॥

**दिवाकरस्योर्ध्वमधश्च रेजिरे, नभोऽजिरे ये प्रखरांशुदंडकाः ।**
**अमी महेन्द्रस्य दिवोऽवरोहतः, करावलम्बत्वमिव प्रपेदिरे ॥ २० ॥**

(व्या०) दिवाकरस्येति ॥ ये दिवाकरस्य दिवाकरोतीति दिवाकरस्तस्य सङ्ख्याऽहर्दिवा-टः । ५ । १ । १०२ । इ. सू. कृग् धातोः टः ।) सूर्यस्य प्रखरांशुदंडकाः प्रखराश्चते अंशव एव दंडकाश्च कठिनकिरणरूपदंडकाः नभो-ऽजिरे नभोऽगणे गगनांगणे ऊर्ध्वमधश्चरेजिरे (जृभ्रमवमत्रसफणस्यमस्वनराज-भ्राजभ्रासभ्लासो वा । ४ । १ । २६ । इ. सू. वा एत्वं) राजन्ते स्म । ते अमी प्रखरांशुदंडकाः महेन्द्रस्य सौधर्मेन्द्रस्य दिवः आकाशात् अवरोहतः उत्तरत सतः करावलम्बत्वं हस्ताधारत्वमिव प्रपेदिरे (अनादेशादेरेकव्यञ्जनमध्येऽतः । ४ । १ । २४ । इ. सू. पद्धातो परोक्षायामेत्वम्) प्रपद्यन्ते स्म । इव शब्दो-ऽत्र शंकायां कोऽर्थः यदा कोऽपिजन ऊर्ध्वभूमितोऽध उत्तरति तदावध्रवंशादि अवलंब्य अधोयाति तथा इन्द्रोऽपि सूर्यकिरणदंडकाधारेण अध उत्तरतिस्मेति-भावः ॥ २० ॥

**विवाहहर्म्ये त्रिजगत्प्रभो युवा,-मवाप्स्यथः किं न मणिप्रदीपताम् ।**
**इति प्रलोभ्याह्वयदिन्दुभास्करौ, कृतातिथेयौ पथि संगतौ हरिः ॥**

(व्या०) विवाहहर्म्ये इति ॥ हरिरिन्द्र इन्दु भास्करौ (चार्थे द्वन्द्व

सहोक्तौ । ३ । १ । ११७ । इ. सू. इतरेतरयोग द्वन्द्व ) इन्दुश्च भास्करश्चतौ चन्द्रसूर्यौ इति अमुना प्रकारेण प्रलोभ्य (प्राक् काले । ५ । ४ । ४७ । इ. सू. ण्यन्तलोभिधातोः पूर्वकाले क्त्वा प्रत्ययः । अनञः क्त्वो यप् । ३ । २ । १५४ । इ. सू क्त्वो यप् ) लोभयित्वा आह्वयत् आकारयति स्म । इतीति कि युवां त्रिजगत्प्रभोः त्रयाणां जगतां समाहारः त्रिजगत् तस्य प्रभुस्तस्य श्रीऋषभदेवस्य विवाहहर्म्ये विवाहस्य हर्म्ये तस्मिन् विवाहमंडपे मणिप्रदीपतां मणिसंबंधिमांगलिकरूपदीपत्वं किं न आप्स्यथः अपि तु प्राप्स्यथएवेत्यर्थः । किं लक्षणौ इन्दुभास्करौ कृतातिथेयौ कृतमातिथेयं प्रावूर्णत्वं याभ्यां तौ पुनः किं विशिष्टौ पथि मार्गे संगतौ मिलितौ ॥ २१ ॥

**निमेषविश्लेषिसमग्रदृग्मये, प्रिये सदा सन्निहितेऽत्र वज्रिणि ।**
**क्वचिन्न या मुह्यति सा किमायसी, शचीति तं वीक्ष्य जगुः शशिप्रियाः ॥**

(व्या०) निमेषेति ॥ शशिप्रिया शशिनश्चन्द्रस्य (अतोऽनेकस्वरात् । ७ । २ । ६ । इ. सू. इन् ) प्रिया भार्याः रोहिण्यादयस्तमिन्द्रं वीक्ष्य दृष्ट्वा इति जगुः ( गैधातो कर्तरि परोक्षा) परस्परमिति जल्पन्ति स्म । इतीति किं सा शची इन्द्राणी किमायसी (विकारे । ६ । २ । ३० । इ. सू. विकारे अण् । अणञेयेकण् इ. सू. स्त्रियांङी ) कि लोहमयी या शची अत्र अस्मिन् प्रिये इन्द्रे भर्तरि सदा निरन्तरं सन्निहिते समीपस्थे सति क्वचिन्न मुह्यति मूढत्वं न दधाति । कि लक्षणे इन्द्रे वज्रिणि वज्रयुक्ते पुनः कि लक्षणे निमेषविश्लेषि (अजातेः शीले । ५ । १ । १५४ । इ सू. शीलेऽर्थे णिन् ) समग्रदृग्मये निमेषरहिते समस्तलोचने कोऽर्थः रोहिण्याद्या स्वभर्तारं सौम्यं सोमं दृष्ट्वा सहस्रलोचनैर्विकरालरूपं वज्रयुक्तं इन्द्रं च दृष्ट्वा शच्या एव सर्वसहत्वं प्रशंसन्ति स्म । यद्यपि जैनानामिन्द्रस्य शरीरं सहस्रलोचनत्वं नोच्यते तथापि काव्यं लोकानुरोधेनैव स्यादिति ॥ २२ ॥

**विलोचनैरूर्ध्वमुखैर्वियत्युडू, रधोमुखैर्वार्धिजलेऽतिनिर्मले ।**
**स विप्रकीर्णा अवलोकयन्मणी–रणीयसीमप्यविदन्न मुद्भिदम् ॥२३॥**

(व्या०) विलोचनैरिति ॥ स इन्द्रः अणीयसीमपि स्वल्पामपि मुद्भिदं हर्षभेदं न अविदत् नालभत । अणुशब्दात् गुणाङ्गाद्वेष्ठेयसू । ७ । ३ । ९ । इ. सू. ईयसु प्रत्यये स्त्रीत्वे अणीयसीति किं कुर्वन् वियति आकाशे ऊर्ध्वमुखैः ऊर्ध्वं मुखं येषां तानि तैः विलोचनैः नेत्रैः ऊर्ध्वं उडूनक्षत्राणि अवलोकयन् पश्यन् अधोमुखैः विलोचनैः अतिनिर्मले वार्द्धिजले वार्द्धेः (वारीणि धीयन्ते अस्मिन्निति वार्द्धिः व्याप्यादाधारे । ५ । ३ । ८८ । इ. सू. धाधातोराधारे किः । इडेत् पुसि चातो लुक् । ४ । ३ । ९४ । इ. सू. आतो लुक् । ) जलं तस्मिन् समुद्रपानीये विप्रकीर्णाः विक्षिप्ताः मणीः रुचकाक स्फटिक लोहिताक्ष-मरकत प्रभृति मणिसमूहान् अवलोकयन् उडुशब्दः स्त्रीनपुंसकलिङ्गे ज्ञेयः । मणिशब्दस्तुपुंस्त्रीलिङ्गे ज्ञेयः ॥ २३ ॥

**अविश्रमे वर्त्मनि तस्य यायिनः, श्रमस्य यः कोऽपि लवोऽजनिष्ट सः ।**
**अनोदि दुग्धोदधिशीकरैस्तटा,–चलस्खलद्वीचिचयोत्पतिष्णुभिः २४**

(व्या०) अविश्रमे इति ॥ अविश्रमे नविद्यते विश्रमो विरामो यस्मिन् तत् तस्मिन् वर्त्मनि मार्गे यायिनो (प्रहादिभ्यो णिन् । ५ । १ । ५३ । इ. सू. कर्तरि णिन् ) गच्छतस्तस्येन्द्रस्य श्रमस्य खेदस्य यः कोऽपि लवोऽशोऽजनिष्ट जन् धातोः कर्तरि अद्यतनी जातः । स श्रमस्य लव दुग्धोदधिशीकरैः दुग्धानामुदधिः (उदकानि धीयन्ते अस्मिन् इति उदधिः व्याप्यादाधारे । ५ । ३ । ८८ । इ. सू. धाधातोः आधारे किः इडेत् पुसीति आलुक् उदकस्योदः पेषंधिवासवाहने । ३ । २ । १०४ । इ. सू. धीपरे उदकस्य उद आदेशः ।) समुद्रः तस्य शीकरास्तैः क्षीरसमुद्रजलकणैः अनोदि । भावकर्मणोः । ३ । ४ । ६८ । इ. सू. नुद् धातोः तेपरे ञिच् तलुक्च लघोरुपान्त्यस्य । ४ । ३ । ४ । इ. सू. उपान्त्य गुणः) किं लक्षणैः दुग्धोदधि शीकरैः तटाचलस्खलद्वीचि-

चयोत्पतिष्णुभिः तटेषु ये अचलाः पर्वताः तेषु स्खलन्त्यः आस्फालन्त्यः याः वीचयः कल्लोलास्तासां चयात् समूहात् उत्पतिष्णवः उत्पतनशीलास्तै। कोऽर्थः इन्द्रस्य सार्द्धराजप्रमाणं मार्गमतिक्रम्यागच्छतः सतः यः श्रमो जातः स शीतलैः क्षीरसमुद्रजलकणैः स्फेटितः इति भावः ॥ २४ ॥

**प्रभूतभौमोष्मभयंकरः स्फुरन्महाबलेनाञ्जनभञ्जनच्छविः ।**
**निजानुजाभेदधियामुना घनः, पयोधिमध्यान्निरयन्निरैक्ष्यत ॥ २५ ॥**

(व्या०) प्रभूतेति ॥ अमुना इन्द्रेण घनो (मूर्तिनिचिताऽभ्रेघनः । ५ । ३ । ३७ । इ. सू. हन् धातोः अभ्रेऽर्थे अल् प्रत्ययः घनादेशश्च निपात्यते ) मेघः निजानुजाभेदधिया निजस्य स्वीयस्य अनुजस्य लघुभ्रातुः नारायणस्य अभेदधिया ऐक्यबुद्ध्या पयोधिमध्यात् समुद्रमध्यात् निरयन् निर्गच्छन् निरैक्ष्यत निरपूर्वक ईक्ष धातोः कर्मणि ह्यस्तनी दृष्टः किं लक्षणो मेघः प्रभूतभौमोष्मभयंकरः प्रभूतस्य भूमिसत्कबाष्पस्य भयंकरः (मेघर्तिभयाभयात् खः । ५ । १ । १०६ । इ. सू. भयपूर्वक कृग् धातोः खः । खित्यनव्यय इति मोन्तः) पुनः किं विशिष्टः महाबलेन वायुना स्फुरन् पुनः किं विशिष्टः अञ्जनभञ्जनच्छविः कृष्णकान्तिः । नारायण किं लक्षणः प्रभवः स्वामिनः तेषु उतः प्रसिद्धो यो भौमो भौमासुरस्तस्य ऊष्मा गर्वस्तस्य भयंकरः उच्छेदकरः बलेन शरीरसामर्थ्येन बलदेवेन वा स्फुरन्महा प्रसरत्तेजाः शेषं स्पष्टमेव विशेषणैः जलदनारायणयोरैक्यं यद्यपि जैने मते समुद्रे नारायणः स्वपिति इति वक्तुं न युक्तं परमत्रापि कविरूढिरेवं ज्ञेया । यथा श्रीकल्पे लक्ष्मीवर्णनं दिग्गजाभिषेकवर्णनमिति ज्ञेयम् ॥ २५ ॥

**दिवस्पते द्यौरहमस्मि सांप्रतं, न सांप्रतं मोक्तुमुपेत्य मां तव ।**
**इति स्ववर्णाम्बुदगर्जितेन सा, द्रुतं व्रजन्तं किमु तं व्यजिज्ञपत् ॥२६॥**

(व्या०) दिव इति॥ सा द्यौ (दिव औः सौ । २ । १ । ११७ । इ. सू. सौपरे दिवो वस्य औ । इवर्णादेरस्वेरस्वरे यवरलम् । १ । २ । २१ ।

इ. सू. पकारः ) राकाशं स्ववर्णाम्बुदगर्जितेन स्वस्यवर्णः श्यामतालक्षण जाति-
विशेषो वा यस्य स स्ववर्ण एवं विधो योऽम्बुदो मेघ तस्य गर्जितेन गर्जारव-
च्छलेन तमिन्द्रं द्रुतं शीघ्रं व्रजन्तं गच्छन्तं सन्तं किमु इति व्यजिज्ञपत् (णिश्रि
द्रुस्रुकमः कर्तरि ङः । ३ । ४ । ५८ । इ. सू. ज्ञप् धातोः कर्तरि अद्यतन्यां
ङ. द्विर्धातुः परोक्षा इ. सू. द्विर्भाव । असमानलोपे सन्वल्लघुनिङे । ४ । १
। ६३ । इ. सू. ङपरे णौ सनवद्भाव ।) विज्ञपयति स्म । विज्ञप्तिरपि ।
स्वजनेन कार्यते इति व्यङ्गम् । इति इति किं हे दिवस्पते (वाचस्पतिवास्तोष्पति
दिवस्पतिदिवोदासम् । ३ । २ । ३६ । इ. सू. दिवस्पति षष्ठ्यलुपि सत्वं
च निपात्यते) अहं द्यौरस्मि तव सांप्रतमधुना मामुपेत्य ममसमीपमागत्य मोक्तुं
न सांप्रतं न युक्तम् । कोऽर्थ द्यो शब्द स्त्रीलिङ्ग स्वर्गाकाशवाची अतो संग्याह ।
त्वं दिवस्पतिः अहं तु द्यौः एतावता त्वं स्वामी अहं च भार्या अतः कारणात
मम समीपमागत्य तव इत्थमेवोपेक्ष्य गन्तुं न युक्तमिति भावः ॥ २६ ॥

**पथि प्रथीयस्यपि लंघिते जवा-दवाप स द्वीपमथादिमं हरिः ।**
**विभाति यो द्वीपसरस्वदुत्करैः, परैः परीतः परिवेषिचन्द्रवत् ॥२७॥**

(व्या०) पथीति ॥ अथानन्तरं स हरि. इन्द्रः जवात् वेगात् प्रथीय-
स्यपि (गुणाङ्गाद्वेष्ठेयसू । ७ । ३ । ९ । इ. सू. पृथु शब्दात् ईयसुः । पृथु-
मृदुभृशकृशदृढपरिवृढस्य ऋतो र । ७ । ४ । ३९ । इ. सू. रः त्यन्त
स्वरादे. । ७ । ४ । ४३ । इ. सू अन्त्यस्योकारस्य लोप ) प्रचुरेऽपि पथि
मार्गे लंघिते सति आदिमं द्वीपं द्व्यन्तरनवर्णोपसर्गादप ईप् । ३ । २ । १०९
इ. सू. द्विशब्दात् उत्तरस्य अप् शब्दस्य ईप्) जम्बूद्वीपं अवाप प्राप यो द्वीप
परैरन्यै द्वीपसरस्वदुत्करै द्वीपानां सरस्वतां समुद्राणामुत्करै समूहैः परीतो
वेष्टितः सन् परिवेषिचन्द्रवत् (स्यादेरिवे । ७ । १ । ५२ । इ. सू. साद-
श्यैर्थे वत् ) परिधियुक्त चन्द्रवत् विभाति शोभते इति द्वीपशब्दः पुंनपुंसक-
लिङ्गोज्ञेय ॥ २७ ॥

**इहापि वर्षं समवाप्य भारतं, बभार तं हर्षभरं पुरन्दरः ।**
**घनोदयोऽलं घनवर्त्मलंघनं, श्रमं शमं प्रापयति स्म योऽद्भुतम् २८**

(व्या०) इहापीति । पुरन्दरः (पुरन्दर भगन्दरौ । ५ । १ । ११४ । इ. सू पुरन्दर निपातः । ) पुरः दारयतीति पुरन्दरः इन्द्रः इहापि जम्बूद्वीप-मध्येऽपि भारतं वर्षं भरतक्षेत्रं समवाप्य प्राप्य तं हर्षभरं प्रमोदसमूहं बभार धरति स्म । अद्भुतमाश्चर्यमस्ति यो हर्षभरः अलमत्यर्थं घनवर्त्मलंघनश्रमं घनानां मेघानां वर्त्म मार्गः घनवर्त्म आकाशं तस्य लंघने यः श्रमः तं शमं शान्ति प्रापयतिस्म । (स्मे च वर्तमाना । ५ । २ । १६ । इ. सू. स्म योगे भूते वर्तमाना) किं विशिष्टो हर्षभरः घनोदयः घनः (मूर्तिनिचिताभ्रे घनः । ५ । ३ । ३७ । इ. सू. मूर्त्यर्थे घन·) प्रचुरः उदयः उत्पत्तिर्यस्य स. । कोऽर्थः अन्यो भारः श्रममुत्पादयति अयं हर्षभरस्तु श्रमं शमयति स्म इत्याश्चर्यम् ॥ २८ ॥

**विनीलरोमालियुजो वनीघनो, गभीरनाभेर्बहुनिम्नपल्वलः ।**
**बभूव शच्याअपि मध्यदेशतो ऽस्य मध्यदेशः स्फुटमीक्षितोमुदे ॥२९**

**(व्या०)** विनीलेति ॥ यत्र जिनचक्री अर्द्धचक्रीमुख्यानां जन्म स्यात् स भरतक्षेत्रसत्को मध्यदेश. शच्या मध्यदेशतोऽपि इन्द्राण्या उदरप्रदेशादपि अधिकमस्य इन्द्रस्य मुदे (कृत्संपदादिभ्य· क्विप् । ५ । ३ । ११४ । इ. सू. स्त्रियां भावे क्विप्) हर्षाय बभूव (द्विर्धातुः परोक्षाडे । ४ । १ । १ । इ सू. भूधातोर्द्वित्वं द्वितीय तृतीययोः पूर्वौ । ४ । १ । ४२ । इ. सू. भूस्थाने बूः भूस्वपोरदुतौ । ४ । १ । ७० । इ. सू. पूर्व बूस्थाने अकारे ब. नामिनोऽकलिहले । ४ । ३ । ५१ । इ. सू. णवि परे भूधातोरुकारस्य वृद्धौ बभौ अ इति ओदौतो अव् आव् । १ । २ । २४ । इ. सू. आवादेशे बभाव अ भुवोवः परोक्षाद्यतन्यो. । ४ । २ । ४३ । इ. सू. उपान्त्यस्य ऊकारे बभूव इति) । हेतुमाह किं विशिष्टो मध्यदेश. स्फुटं प्रकटमीक्षितो दृष्ट· । शचीमध्य-देशस्तु नैवमीक्षितोऽस्ति अतो हर्षे विशेष । किं लक्षणात् शच्यामध्य

देशत विनीलरोमालियुजः विनीलाश्चता रोम्णां आलयश्च ताभिर्युज्यते तस्मात् कृष्णरोमराजियुक्तात् । किं लक्षणो मध्यदेशः घनीघन महद्घनं घनी तयाघनो (मूर्तिनिचिताऽभ्रे घन । ५ । ३ । ३७ । इ सू. मूर्त्यर्थे घन । ) बहुल । पुन किं विशिष्टात् शरीरमध्यदेशात् गभीरनाभे गभीरा नाभिर्यस्मिन् सः तस्मात् । कि वि० मध्यदेश बहुनिम्नपल्वल बहूनि निम्नानि गंभीराणि पल्वलानि अखातसरांसि यस्मिन् सः । यद्यपि देवानां शरीरे नखरोमादीनि न स्यु तथाप्युत्तर वैक्रियशरीरे घटन्ते इति विनीलरोमालियुजोन चार्य मिति ॥ २९ ॥

**ददर्श दूरादथ दीर्घदन्तकं, घनालिमाद्यत्कटकान्तमुन्नतम् ।**
**प्रलम्बकक्षायितनीरनिर्झरं, सुरेश्वरोऽष्टापदमद्रिकुञ्जरम् ॥ ३० ॥**

(व्या०) ददर्शेति ॥ अथानन्तरं सुरेश्वर (सुराणां ईश्वरः स्थेशभास पिसकसो वरः । ५ । २ । ८१ । इ. सू. ईश धातोर्वरः प्रत्ययः) इन्द्रः अष्टापदं पर्वतं अद्रिकुञ्जर पर्वतश्रेष्ठं कुञ्जरं हस्तिनं वा दूरात् ददर्श (दृश् धातोः कर्तरि परोक्षा) दृष्टवान् किं लक्षणमष्टापदं दीर्घदन्तकं दीर्घा दन्तकाः बहिर्निर्गताः प्रदेशा यस्य तं कुञ्जरपक्षे दीर्घौ दन्तौ यस्य स दीर्घदन्तस्त स्वार्थेक प्रत्ययः ॥ पुन किं लक्षणं अष्टापदं घनालिमाद्यत्कटकान्तं घनानां मेघानां आलय पंक्तयः घनाल्य घनालिभि माद्यन्त. स्थूलीभवन्तः कटकानां पर्वतमध्यभागानां अन्ता. यस्य स तं कुञ्जरपक्षे घना बहवोऽलयो भ्रमरा ययोस्ते घनालिनी माद्यती मदं किरन्ती कटे कपोलौ ताभ्यां कान्तं उन्नतं उच्चैस्तरं प्रलम्बकक्षायितनीरनिर्झरं प्रलम्बकक्षा वरत्रा तद्वदाचरितानि नीरस्य निर्झराणि यस्मिन् स तम् ॥ ३० ॥

**शिरो ममार्हत्प्रतिमानविंशति-श्चतुर्युताध्यास्यवतंसयिष्यति ।**
**इति प्रमोदानुगुणं तृणध्वज-व्रजस्य दंभात्पुलकं बभार यः ॥ ३१ ॥**

(व्या०) शिर इति ॥ योऽष्टापद. तृणध्वजानां वंशानां व्रज समूह स्तस्य दंभात् मिषात् पुलकं रोमाञ्चं बभार । (भृधातो कर्तरि परोक्षा) किं

लक्षणं पुलकं इति प्रमोदानुगुणं इति अमुना प्रकारेण प्रमोदो (भावाकर्त्रोः । ५ । ३ । १८ । इ. सू प्रपूर्वकमुद् धातोर्भावे घञ् । ) हर्षस्तस्य अनुगुणं योग्यं कः प्रमोदः इत्याह चतुर्भिर्युता युक्ता अर्हतां प्रतिमानानि (अनट् । ५ । ३ । १२४ । इ. सू प्रतिपूर्वक मिमीतेः नपुंसके भावे अनट् प्रत्ययः) बिम्बानि तेषां विंशतिः एतावता चतुर्विंशतिः मम शिरः मस्तकमध्यास्य आश्रित्य वतंसयिष्यति (वावाप्योस्तनिक्रीधाञ्नहोर्वपी । ३ । २ । १५६ । इ. सू तन् धातौ परे अव उपसर्गस्य वः) अवतंसयुक्तं मुकुटसंयुक्तं करिष्यति ३१

**यदुच्चशृङ्गाग्रजुषोऽपि खेचरी-गृहीतशिम्बाफलपुष्पपल्लवाः ।**
**न सेहिरे स्वानुपभोगदुर्यशो, द्रुमा मरुत्प्रेरितमौलिधूननैः ॥ ३२ ॥**

(व्या०) यदुच्चेति ॥ द्रुमाः वृक्षाः मरुता वायुना प्रेरिताश्चते मौलयश्च शिरांसि तेषां धूननानि तैः पवनप्रेरित शिरः कम्पन मिषेण स्वानुपभोगदुर्यशः स्वस्यात्मनोऽनुपभोगः उपभोगाभावः तस्य दुर्यशः अपकीर्तिः तत् न सेहिरे सहधातोः कर्तरि परोक्षा न सोढवन्तः । किं लक्षणाः द्रुमाः यदुच्चशृंगाग्रजुषोऽपि (क्विप् । ५ । १ । १४८ । इ. सू. जुष् धातोः कर्तरि क्विप् । ) यस्य गिरेः उच्चशृङ्गाणि उन्नतशिखराणि तेषामग्रं जुषन्ते सेवन्ते एवंविधा अपि पुनः कि० खेचरीगृहीतशिम्बाफलपुष्पपल्लवाः खेचरीभिः (चरेष्टः । ५ । १ । १३८ इ. सू. चरेष्टः खेचरन्तीति खेचर्यः अद्व्यञ्जनात्सप्तम्या बहुलम् । ३ । २ । १८ इ. सू. सप्तम्या अलुप् । अणञेयेकण् नञ् स्नञ् टिताम् । २ । ४ । २० । इ. सू. टित्वात् स्त्रियांडी विद्याधरीभिः गृहीताः शिम्बाश्च फलिका फलानि च पुष्पाणि च पल्लवाश्च येषां ते ॥ ३२ ॥

**निवासभूमीमनवाप्य कन्दरे-ष्वपि स्फुटस्फाटिकभित्तिभानुषु ।**
**तले तमस्तिष्ठति यन्महीरुहां, शितिच्छविच्छायनिभान्निशात्यये ३३**

(व्या०) निवासेति ॥ तमः अन्धकारं निशात्यये प्रभाते यन्महीरुहां

(क्विप् । ५ । १ । १४८ । इ. सू. रुह् धातोः कर्तरि क्विप् ) यस्य पर्वतस्य महीरुहो वृक्षा तेषां तले शितिच्छविच्छायानिभात् शितिः कृष्णा च्छविः कान्तिर्यस्याः सा एवं विधायाच्छाया तस्याः निभात् मिषात् तिष्ठति । (स्थाधातोः कर्तरि वर्तमाना) किं कृत्वा कन्दरेष्वपि गुहास्वपि निवासभूमी (व्यञ्जनाद् घञ् ५ । ३ । १३२ । इ. सू. निपूर्वक वस् धातोराधारे घञ् निवसति अस्मिन् इति निवासः) वासस्थान अनवाप्य अप्राप्य किं विशिष्टेषु कन्दरेषु स्फुटाः प्रकटाः स्फाटिकभित्तीनां (स्त्रियां क्तिः । ५ । ३ । ९१ । इ. सू स्त्रियां क्तिः) भानवः किरणाः येषु तानि तेषु । कोऽर्थ यत्र पर्वते मणिसत्कोद्योताग्रे प्रवेशं न लभते पश्चात् छायामिषेण वृक्षाणां तलेस्थितमिति भावः ॥ यथा छायाशब्द-स्तथा छायशब्दोऽपि वर्तते ॥ ३३ ॥

**प्रतिक्षिपं चन्द्रमरीचिरेचिता-मृतांशुकान्तामृतपूरजीवना ।**
**वनावली यत्र न जातु शीतगोः, पिधानमैच्छन्मलिनच्छविं घनम् ॥**

(**व्या०**) प्रतिक्षिपमिति ॥ यत्र यस्मिन् पर्वते वनानामावली वनपंक्ति जातु कदाचित् अपि मलिनच्छविं (मलादीमसश्च । ७ । २ । १४ । इ. सू. मलशब्दात् मत्वर्थे इन प्रत्ययः मलोऽस्ति अस्या इति मलिना) मलिना कृष्णा-च्छविः कान्तिर्यस्य स त घनं मेघं ऐच्छत् इष् धातोः कर्तरि ह्यस्तनी न वाञ्छति स्म । किं लक्षणं घनं शीतगो श्चन्द्रस्य पिधानमाच्छादनं ( वावाप्योस्तनिक्री-धाञ्नहोर्वपी । ३ । २ । १५६ । इ. सू. अपेः पिः । ) पक्षे शीता शीतला गौर्वाणी यस्य स शीतगु ( एकार्थंचानेकं च । ३ । १ । २२ । इ. सू. बहुव्रीहिः समासः गोश्चान्ते ह्रस्वोऽनंसि समासे यो बहुव्रीहौ । २ । ४ । ९६ । इ. सू. गोशब्दस्य ह्रस्वः । ) तस्य पिधानमपह्नवकरणात् य एवं विधो मलिन-च्छविश्च स्यात् स सर्वस्याप्यनिष्ट एव स्यादिति । अथ मेघं विना वनावली कथं जीविष्यतीत्याह वनावली प्रतिक्षिपं (योग्यतावीप्सार्थानति वृत्ति सादृश्ये । ३ । १ । ४० । इ. सू. वीप्सायामव्ययीभावः । ) क्षिपां क्षिपां प्रतिरात्रिं चन्द्रस्य

मरीचयः कीरणाः तैः रेचिताः श्राविताः ये अमृतांशुकान्ताः चन्द्रकान्तमणयस्तेभ्यो यः अमृतपूरः स एव जीवनं यस्याः सा ॥ ३४ ॥

**यदौषधिभिर्ज्वलिताभिरर्दितं, तमः सपत्नीभिरवेक्ष्य सर्वतः ।**
**तमस्विनी गच्छति लांछनच्छलात्, कलानिधिं किं दयितं स्थितेः कृते**

(व्या०) यदौषधीभिरिति ॥ तमस्विनी (अस्तपोमायामेधास्रजो विन् । ७ । २ । ४७ । इ. सू. तमस् शब्दात् मत्वर्थे विन् प्रत्ययः । स्त्रियां नृतोऽस्वस्रादेङी । २ । ४ । १ । इ. सू. ङीः) रात्रिः लांछनस्य कलंकस्य छलं मिषं तस्मात् किं स्थितेर्मर्यादाया (स्थो वा । ५ । ३ । ९६ । इ. सू. स्था धातोः स्त्रियां भावे क्तिः ।) कृते मर्यादार्थं कलानां निधिस्तं चन्द्रमसं दयितं भर्तारं गच्छति । किं कृत्वा ज्वलिताभि दीप्ताभि सपत्नीभि (समानः पतिर्यासां ता सपत्न्यः सपत्न्यादौ । २ । ४ । ५० । इ. सू. पतिशब्दात् ङीः अन्तस्य न् च । समानस्य धर्मादिषु । ३ । २ । १४९ । इ. सू. समानस्य सः ।) यदौषधीभिः यस्य पर्वतस्यौषध्यस्ताभि सर्वतः (किमद्व्यादिसर्वाद्यऽवैपुल्य बहो पित् तस् । ७ । २ । ८९ । इ. सू. सर्वशब्दात् तस् अधण्तस्वाद्याशसः । १ । १ । ३२ । इ. सू. तसन्तत्वात् अव्यय संज्ञा ।) अर्दितं पीडितं तम अन्धकारं अवेक्ष्य दृष्ट्वा । कोऽर्थः औषधीनां रात्रेश्च चन्द्र पति रात्रेश्च अपत्यमन्धकारं ज्वलिताभिरौषधीभि तमः सर्वत पीड्यमानं दृष्ट्वा उपालंभदानाय निजपतिं कलानिधिं (उपसर्गादः कि । ५ । ३ । ८७ । इ. सू. निपूर्वकधा धातो किः । इडेत् पुसि चातो लुक् । ४ । ३ । ९४ । इ. सू. आकारस्य लोपः) गता सा अद्यापि लाञ्छनच्छलेन चन्द्रे दृश्यते इति भाव ॥ ३५ ॥

**पतन्ति ये बालरवेः प्रगे करा, यदुल्लसद्गैरिक धातुसानुषु ।**
**क्रियेत तैरेव विसृत्य चापला-दिलाखिला गैरिकरंगिणी न किम् ॥**

(व्या०) पतन्तीति ॥ प्रगे प्रभाते बालरवेः बालार्कस्य ये कराः किरणाः यदुल्लसद्गैरिकधातुसानुषु यस्य पर्वतस्य उल्लसन्तश्चते गैरिकधातवश्च तेषां

सानुषु शिखरेषु पतन्ति । तैरेव करैः चापलात् (युवादेरण् । ७ । १ । ६७ । इ. सू. चपलशब्दात् भावेऽर्थे अण् ।) चपलभावात् विसृत्य (प्राक् काले । ५ । ४ । ४७ । इ. सू. विपूर्वक सृधातोः प्राक् काले क्त्वा ऊर्यादि अनुकरण च्विडाचश्च गतिः । ३ । १ । २ । इ. सू. वेर्गतिसंज्ञा गतिक्वन्यस्तत्पुरुषः । ३ । १ । ४२ । इ. सू. तत्पुरुषः ।) विस्तारं प्राप्य अखिला समस्ता इला पृथ्वी गैरिकरंगिणी गैरिकरंगभाक् किं न क्रियते अपितु क्रियते एव । कोऽर्थः वालः प्रायः क्रीडासक्त इति स्थिरभावं त्यक्त्वा बालार्ककिरणैः समस्तापि पृथ्वी रक्ताकृतेति भावः ॥ ३६ ॥

**यदीयगारुत्मतभित्तिजन्मभिः, करैरवंच्यन्त तथा हरित्प्रभैः ।**
**न चिक्षिपु र्मुग्धमृगा मुखं क्वचि-द्यथाऽनलीकेषु तृणांकुरेष्वपि ३७**

(व्या०) यदीयेति ॥ मुग्धमृगाः सरलहरिणाः यदीयगारुत्मतभित्तिजन्मभिः (तस्येदम् । ६ । ३ । १६० । यच्छब्दात् इदमर्थे ईय प्रत्ययः) गारुत्मतरत्नानां भित्तेः (स्त्रियां क्तिः । ५ । ३ । ९१ । इ. सू. स्त्रियां भावेक्तिः ।) यस्य पर्वतस्य (द्विर्धातुरिति क्षिप् धातोर्द्वित्वं व्यञ्जनस्यानादेर्लुक् । ४ । १ । ४४ । इ. सू. आदिवर्जव्यञ्जनयोर्लुक् कङश्चञ् । ४ । १ । ४६ । इ. सू. कस्य चः कर्तरि परोक्षा) चिक्षिपुः न वाहयन्ति स्म ॥ ३७ ॥

**शरन्निशोन्मुद्रितसान्द्रकौमुदी-समुन्मदिष्णुस्फटिकांशुडंबरे ।**
**निविश्य यन्मूर्द्धनि साधकैरसा-वधिकैर्महोऽतर्बहिरप्यदृश्यत ॥ ३८ ॥**

(व्या०) शरन् इति ॥ शरदः शरत्कालस्य निशाः रजन्यः तासु उन्मुद्रिता या सान्द्रा कौमुदी (तस्येदम् । ६ । ३ । १६० । इ. सू. कुमुदशब्दात् अण् । अणेजेये इ. सू. ङी) चन्द्रज्योत्स्ना तया समुन्मदिष्णवः (उदः पचिपतिपदिमदेः । ५ । २ । २९ । इ. सू. उत्पूर्वकमद्धातोः इष्णु प्रत्ययः) वर्धनशीला ये स्फटिकमणीनामंशवः किरणास्तेषामाडंबरो यस्मिन् तस्मिन् ।

यन्मूर्द्धनि यस्य गिरेर्मूर्धा शिखरं तस्मिन् निविश्य उपविश्य रसेनाधिकारस्तैः साधकैर्योगिभिर्महः अध्यात्मतेजः वहिः अन्तरपि अदृश्यत दृश्यते स्म ॥३८॥

**तरुक्षरत्सूनमृदूत्तरच्छदा, व्यधत्त यत्तारशिला विलासिनाम् ।**
**रतिक्षणालम्बितरोषमानिनी,-स्मयग्रहग्रन्थिभिदे सहायताम् ॥ ३९ ॥**

व्याख्या तरुक्षरदिति ॥ यत्तारशिला यस्य गिरेः तार शिला रौप्यशिला विलासिनां ( वेर्विचकत्थस्रम्भ कषकसलसहन । ५–२–५९ । इ. सू. विपूर्व-कलस्धातो. शीलादिसदर्थे विनण् प्रत्ययः विलसन्तीत्येवं शीला विलासिनः ) भोगिनां रते भोगस्य क्षणोऽवसरः भोगावसर तस्मिन् आलम्बित रोषो याभिस्ताः ताश्चता मानिन्यश्च तासां मानिनीनां स्मयग्रहोऽहंकारग्रह स एव ग्रन्थि तस्या भिदे (भ्यादिभ्यो वा । ५–३–११५ । इ, सू. भावे स्त्रियां क्विप्भिद् धातो.) संभोगसमयकृतक्रोधस्त्रीजनाहंकारग्रहरूपग्रंथिभेदजां सहायतां साहाय्यं व्यधत्त अकरोत् । कीदृशी तारशिला तरोर्वृक्षात् क्षरन्ति यानि सूनानि पुष्पाणि तैर्मृदुः श्लिष्ट उत्तरच्छद उत्तरपटो यस्यां सा । कोऽर्थ पुष्पशय्यातुल्यां शिलां दृष्ट्वा वनितानामभिमानः स्वयमेव विलीन अत शिलया पत्युः साहाय्यं कृतमेवेति भावः ॥ ३९ ॥

**यदुच्चवृक्षाग्रनिवासिनीं फला-वलीमविन्दन्नुपलैः पुलिन्द्रकः ।**
**कपीनदःस्थानभिवृष्य तान् सुखं, समश्नुते तैः प्रतिशस्त्रितांरुषा ॥**

**(व्या०)** यदुच्चेति । पुलिन्द्रक भिल्ल यदुच्चवृक्षाग्रनिवासिनी यस्य गिरेः उच्चाश्चते वृक्षाश्च तेषां अग्रे शिखरे निवासिनी (व्यञ्जनाद्घञ् । ५ । ३ । १३२ । इ. सू. निपूर्वक वस् धातोराधारे घञ् अतोऽनेक स्वरात् । ७ । २ । ६ । इ. सू. मत्वर्थे इन् स्त्रियां नृतोऽस्वस्रादे रिति सू. ङीः विपूर्वक धा धातो आत्मने पदे कर्तरि ह्यस्तनी) तां फलानामावली फलश्रेणी मविन्दन् अलभमानः अपि सुखं समश्नुते प्राप्नोति किं कृत्वा अदःस्थान् (स्थापपास्नात्र

कः । ५ । १ । १४२ । इ. सू. स्थाधातो. क । इडेत् पुसिचातो लुक् । ४ । ३ । ९४ । इ सू. आतो लुक्) अमीषु वृक्षेषु स्थितान् कपीन् वानरान् उपलैः पाषाणै अभिमृष्य सम्मुखमाहत्य । किं लक्षणां तैः कपिभिः रुषा रोषेण प्रतिशल्लितां प्रतिशल्लीकृतामिति ॥ ४० ॥

**इमाः सुवर्णैस्तुलिता इति क्षिपा-मुखे रविःस्वं प्रवसन् वसुन्यधात् ।**
**तदीयगुंजासु किमन्यथा हिम-व्यथां हरीणां सहिता हरन्ति ताः ॥**

(व्या०) इमा इति ॥ रवि सूर्य. क्षिपाया (भिदादयः । ५ । ३ । १०८ । इ. सू. क्षिपा इति अङ् प्रत्ययान्तो निपात) निशाया मुखं प्रारंभः तस्मिन् प्रवसन् परद्वीपं गच्छन् स्ववसु आत्मीयं तेजोद्रव्यं वा इति वक्ष्यमाण-कारणात् तदीयगुंजासु न्यधात् । सर्वोजनः उत्तमस्यैव हस्ते निजद्रव्यं समर्पयति अत आह इतोति किम् । इमा गुंजाः सुवर्णैः (तुल्यार्थैस्तृतीयाषष्ठ्यौ । २ । २ ११६ । इ. सू. सुवर्णैरित्यत्र तुल्यार्थयोगे वा तृतीया) काञ्चनैरुत्तमजातीयैर्वा तुलिताः सदृशीकृता वा । अथ रवितेजोनिवेशफलमाह । अन्यथा (प्रकारे था । ७ । २ । १०२ । इ. सू. अन्यशब्दात् था प्रत्यय) ता गुंजाः सहिता मिलिताः सत्यः हरीणां वानराणां हिमस्य व्यथा (षितोऽङ् । ५ । ३ । १०७ इ. सू. व्यथिष् धातोः षित्वात् स्त्रियामङ्) पीडा तां किं हरन्ति कथं हरन्ति । कोऽर्थः सूर्येण संध्यासमये स्वीयं तेजो गुंजासु क्षिप्तं तेन हेतुना वानरा एकत्र संभूय गुंजाभिस्तापयन्ति तेषां चेत्थं शीतं यात्येवेति भावः ॥ ४१ ॥

**जिनेशितुर्जन्मभुवः समीपगं, नगं तमाधाय मुदाद्दगध्वगम् ।**
**स गोत्रपक्षक्षतिजातपातकै, र्विमुक्तमात्मानममंस्त वासवः ॥ ४२ ॥**

(व्या०) जिनेशितुरिति ॥ स इन्द्रः गोत्रपक्षक्षति स्त्रियां क्तिः । ५ । ३ । ९१ । इ. सू. क्षण् धातोः स्त्रियां भावेक्ति यमिरमिनमिगमि-ति । ४ । २ । ५५ । इ. सू. क्तौपरे अन्त्य लुक्) जातपातकैः गोत्राणां पर्वतानां पक्षा-

स्तेपा क्षति छेदनं तेन जातानि समुत्पन्नानि यानि पातकानि पापानि तैः आत्मानं निज विमुक्तं रहितममंस्त मन्यते स्म । किं कृत्वा जिनेशितुः श्रीऋषभदेवस्य जन्मनो भूस्तस्याः इक्ष्वाकुभूमेः समीपगं (नाम्नो गमः खड्डौ च विहायसस्तु विहः । ५ । १ । १३१ । इ सू. गम् धातोर्डः ।) समीपस्थितं पूर्ववर्णितं नगं (नाम्नो गमः खड्डो च विहायसस्तु विहः । ५ । १ । १३१ । इ. सू. संज्ञायां गम् धातोर्ड प्रत्यये । नञ् । ३ । १ । ५१ । इ. सू. नञ् तत्पुरुषे नगोऽप्राणिनि वा । ३ । २ । १२७ । इ. सू. नगो वा निपात्यते) अष्टापदपर्वतं मुदा (क्रुत् सम्पदादिभ्यः क्विप् । ५ । ३ । ११४ । इ. सू. मुद्धातो स्त्रियां क्विप्) हर्षेण दृग (भ्यादिभ्यो वा । ५ । ३ । ११५ । इ. सू. स्त्रियां वा क्विप्) ध्वगं (नाम्नो गमः खड्डौ च । इ. सू. गम् धातोर्डः) दृष्टिमार्गगोचरं आध्याय कृत्वा । कोऽर्थः पुरा पर्वताः पक्षाभ्यामुत्पत्य उत्पत्य एव ग्रामनगरासूपरि पतन्त आसन् । इतश्चेन्द्रेण वज्रेण पर्वतपक्षाः छिन्नाः इति लोकरूढिः । इन्द्रो जिनस्य जन्मभूमि प्रत्यासनमष्टापदपर्वतं दृष्ट्वा पर्वतपक्षच्छेदनपातकात् छुटितः । अन्योऽपि महातीर्थं दृष्ट्वा स्वगोत्राणां गोत्रिणां पक्षक्षतिर्वंशोच्छेद. तज्जातपातकैः विमुक्तः स्यात् यथा पांडवादयः शत्रुञ्जयतीर्थे सिद्धाः इति भाव ॥ ४२ ॥

**अथ प्रभोर्जन्मभुवं पुरन्दरो, ऽसरच्छरच्चन्द्रिकयेव दृष्टया ।**
**ययाचिरादुत्कलिकाभिराकुलं, प्रसादमासादयदस्य हृत्सरः ॥ ४३ ॥**

(व्या०) अथेति ॥ अथानन्तरं पुरन्दरः (पुरन्दर भगन्दरौ । ५ । १ । ११४ । इ सू. निपात) इन्द्रः प्रभोर्जिनस्य जन्मभुवं (भ्यादिभ्यो वा । ५ ३ । ११५ । इ सू. भूधातोः स्त्रियां वा क्विप्) जन्मनो भूस्तां असरत् अगमत् । यया जन्मभुवा दृष्टया अस्य इन्द्रस्य हृदेवसरः हृत्सरः प्रसादं हृदयरूपसरोवरं प्रसादं (भावाकर्त्रोः । ५ । ३ । १८ । इ सू. सद् धातोर्घञ्) निर्मलतां आसादयत् प्राप्नोति स्म । कया इव शरच्चन्द्रिकया यथा शरज्ज्योत्स्नया

सरः सरोवरं प्रसादमासादयति । किं लक्षणं हृत्सरः चिरात् चिरकालात् उत्कलिकाभिरुत्कंठाभिः पक्षे लहरीभिराकुलं व्याप्तम् ॥ ४३ ॥

**स तत्र मन्दारमणीवकस्रवन्–मधुच्छटासौरभभाजने वने ।**
**अमुक्तपूर्वाचलहेलिलीलया, निविष्टमष्टापदसिंहविष्टरे ॥ ४४ ॥**
**दृशोरशेषामृतसत्रमंगिना, मनङ्गनाटचोचितमाश्रितं वयः ।**
**वयस्यतापन्नसुपर्वसंगतं, रसंगतं तत्कृतनर्मकर्मसु ॥ ४५ ॥**
**शिरःस्फुरच्छत्रमखंडमंडन–द्युमद्वधूधूनितचारुचामरम् ।**
**विशारदैर्वन्दितपादमादरा–ददर्शातिरद्रेर्जगदीशमैक्षत ॥ ४६ ॥**

**त्रिभिर्विशेषकम्**

(व्या०) स तत्रेति ॥ स अद्रेररातिः पर्वतस्यारिः इन्द्रस्तत्रवने जगदीशं श्रीयुगादिनाथमैक्षत पश्यति स्म । किं लक्षणे वने मन्दारमणीवकस्रवन्मधुच्छटासौरभभाजने मन्दराणां मणीवकानि पुष्पाणि तेभ्यः स्रवन् मधुर्मकरन्दरसः तस्य छटाभिर्यत्सौरभं सौगन्ध्यं तस्य भाजनं स्थानं तस्मिन् अन्यानि सर्वाणि विशेषणानि जगदीशसत्कानि किं विशिष्टं जगदीशं अंगिनां (अतोऽनेकस्वरात् । ७ । २ । ६ इ. सू. अङ्गशब्दात् मत्वर्थे इन् प्रत्ययः ।) प्राणिनां दृशोः नेत्रयोः अशेषामृतसत्रं शेषरहितामृतसत्रागारं अनंगनाट्योचितं अनंगस्य कामस्य नाट्यं तत्र उचितं योग्यं कंदर्पसत्कनाटकयोग्यं यौवनमाश्रितं पुनः किं वयस्यतापन्नसुपर्वसंगतं वयस्यतां मित्रत्वमापन्नाः प्राप्ता ये सुपर्वाणो देवास्तैः सह संगतो मिलितस्तं तत्कृतनर्मकर्मसु तैः सुरैः कृतानि चतानि नर्मणा कर्माणि तेषु रसं गतं रसं प्राप्तं अमुक्तः पूर्वाचलो येन स चासौ हेलिश्च सूर्य. तस्य लीलया अष्टापदसिंहविष्टरे (सुवर्णवृद्वशरणगमृद्ग्रहः । ५ । ३ । २८ । इ. सू. विपूर्वक स्तृधातो रल् प्रत्ययः । वेः स्त्रः । २ । ३ । २३ । इ. सू. षत्वं ) सुवर्णसिंहासने निविष्टमुपविष्टं पुनः किं शिरसि स्फुरत् छत्रं यस्य सः तं शीर्षप्रसरत्श्वेतातपत्रं पुनः किं अखंडीनि मंडनानि मुकुटकुंडलहारार्धहारकेयूराद्याभरणानि यासां

ताः ताश्चता द्युसदां (क्विप् । ५ । १ । १४८ । इ. सू. सदधातोः क्विप् । उः पदान्तेऽनूत् । २ । १ । ११८ । इ. सू. दिवोवकारस्य उ. दिविसीदन्तीति द्युसदः) वध्वश्च ताभिर्धूनितानि चारुणि मनोहराणि चामराणि यस्य स' तं तथा विशारदैश्चतुरैः आदरात् (पुंनाम्नि घ. । ५ । ३ । १३० । इ. सू. आङ् पूर्वक दृधातोर्घः नामिनो गुणोऽक्ङिति । ४ । ३ । १ । इ. सू. गुणः ।) वन्दितौ पादौ यस्य सः तं नमस्कृतचरणम् ॥ त्रिभिर्विशेषकम् ॥ ४४–४५–४६ ॥

**कनीनिकादंभमधुव्रतस्पृशां, दृशां शतैर्बिभ्रदिवाम्बुजस्रजम् ।**
**ततस्त्रिलोकीपतिमेनमर्चितु–रयादुपातिष्ठत निर्जरेश्वरः ॥ ४७ ॥**

(व्या०) कनीनिकेति ॥ ततोऽनन्तरं निर्जराणां (प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्थाः प्रथमाद्यन्तैः । ३ । १ । ४७ । इ. सू. क्रान्ताद्यर्थे पञ्चमीतत्पुरुषः जराया' निष्क्रान्ताः निर्जराः) देवानामीश्वरः (स्थेशभासपिसकसोवर' । ५ । २ । ८१ । इ. सू. ईश् धातोर्वर प्रत्यय') स्वामी सुरेश्वरः एनं त्रयाणां लोकानां समाहारः त्रिलोकी त्रिलोक्याः पतिस्तं श्रीयुगादीश मर्चितुं पूजयितुं रयात् वेगात् उपातिष्ठत (वा लीप्सायाम् । ३ । ३ । ६१ । इ. सू. उपपूर्वक स्थाधातो' कर्तरि आत्मनेपदम् ) आगच्छत । किं लक्षणः इन्द्रः कनीनिकादंभमधुव्रतस्पृशां कनीनिकानां ताराणां दंभ' मिषस्तेन मधुव्रतान् मधुव्रतयन्तीति मधुव्रता' (कर्मणोऽण् । ५ । १ । ७२ । इ. सू. व्रतधातोः अण् प्रत्यय' ङस्युक्तं कृता । ३ । १ । ४९ । इ. सू. तत्पुरुषः । ) भ्रमरान् स्पृशन्तीति तासां दृशां नेत्राणां शतैरम्बुजानां कमलानां स्रजं मालां बिभ्रदिव धरन्निव । नयनानां कमलोपमा दीयते अतः सहस्रलोचनत्वात् मूर्तिमतीं कमलमालां बिभ्राणो भगवन्तं पूजयितुमिव हरि' समेत इति भावः ॥ ४७ ॥

**शिरः स्वमिन्दिदरयन् विनम्य तत्–पदाब्जयुग्मे लसदंगुलीदले ।**
**इति स्फुरद्भक्तिरसोर्मिनिर्मलं, शचीपतिः स्तोत्रवचः प्रचक्रमे ॥४८॥**

(व्या०) शिर इति ॥ शचीपति शच्याः पति रिंद्रः इत्यमुना प्रकारेण स्फुरंश्चासौ भक्तिरसश्च (स्त्रियां क्तिः । ५ । ३ । ९१ । इ. सू. भज्धातो स्त्रियां भावे क्तिः ।) तस्योर्मय कल्लोलास्तै निर्मलं स्तोत्रस्य (नीदांव् शस् युयुजस्तु तुद सिसि च मिहपतपानहस्त्रट् । ५ । २ । ८८ । इ. सू. स्तुधातोः करणेत्रट् ।) वच तत् स्तुतिवचः प्रचक्रमे प्रारेभे । किं कुर्वन् लसदंगुलीदले लसन्तिअंगुलय एव दलानि यस्मिन् तत् तस्मिन् तत्पदाब्जयुगे तस्य भगवतः पदाब्जयोश्चरणकमलयोर्युग्मे विनम्य नत्वा स्वं शिरं मस्तकं इन्दिदरयन् भ्रमरवत् कुर्वन् ॥ ४८ ॥

## अथस्तोत्रवचः प्राह

**महामुनीनामपि गीरगोचरा-खिलस्वरूपास्तसमस्तदूषण ।**
**जयादिदेव त्वमसत्तमस्तम-प्रभाप्रभावाल्पितभानुवैभव ॥ ४९ ॥**

(व्या०) महामुनीनामिति ॥ मन्यते त्रिकालावस्थामिति मुनयः महान्तश्चते मुनयश्च (विशेषण विशेष्येणैकार्थं कर्मधारयश्च । ३ । १ । ९६ । इ. सू. विशेषण पूर्व पद कर्मधारय ।) तेषा मपि गिरा वाणीनां अगोचरं अखिलं समस्तं स्वरूपं यस्य तस्य संबोधने । हे अस्तसमस्तदूषण अस्तानि अपाकृतानि समस्तानि सर्वाणि दूषणानि येन स तस्य संबोधने । हे आदिदेव । असदविद्यमानं तमः पापं यस्याः सा असत्तमा प्रकृष्टा अतिशयेन असत्तमाः असत्तमस्तमा अतीव निष्पापा चासौ प्रभा च (उपसर्गा दातः । ५ । ३ । ११० । इ. सू. प्रपूर्वक भाधातोः स्त्रियामङ् आत् इ. सू. आप् ।) तस्याः प्रभावेण (भावाऽकर्त्रोः । ५ । ३ । १८ । इ. सू. प्रपूर्वक भूधातोर्भावे घञ् ।) अल्पितमल्पीकृतं भानो रवेः वैभवं प्रभुत्वं येन स तस्य संबोधने एवं विधस्त्वं जय सर्वोत्कर्षेण वर्तस्व । जयः परैरनभिभूयमानता प्रतापदृष्टिश्चेत्यर्थः ॥ ४९ ॥

**गुणास्तवांकोदधिपारवर्तिनो, मतिःपुनस्तच्छफरीव मामकी ।**
**अहो महाधाष्टर्यमियं यदीहते, जडाशया तत् क्रमणं कदाशया ॥५०**

(व्या०) गुणा इति ॥ हे नाथ तव गुणाः अंकानामुदधिः अंकसमुद्रः तस्य पारवर्तिनः परिवर्तन्त इत्येवंशीलः (अजातेः शीले । ५ । १ । १५४ । इ. सू. शीलेऽर्थेणिन् ) पारगामिनः वर्तन्ते । पुनः मामकी मम इयं मति तस्य शफरी इव अंकोदधेः मत्सीवद् वर्तते । 'वा युष्मदस्मदोऽञीनञौ युष्माकास्माकं चास्यैकत्वे तु तवकममकम्' इति सूत्रेण ममकादेशो अहो इत्याश्चर्ये महत् च तत् धृष्टस्य भावो धाष्टर्यं (पतिराजान्त गुणाङ्गराजादिभ्यः कर्म्मणि च । ७ । १ । ६० । इ. सू. व्यण् ) च महाधाष्टर्यं (जातीयैकार्थेच्वेः । ३ । २ । ७० । इ. सू. महत् शब्दात् डाः डित्यन्त्यस्वरादेः । २ । १ । ११४ । इ. सू. अत् लुप् । ) यत् यस्मात् कारणात् इयं मतिः जडः आशयो यस्याः सा मूर्खाभिप्राया सती तेषां गुणानां क्रमणं तत् कदाशया कुत्सिता आशा (गति-कन्यस्तत्पुरुष. । ३ । १ । ४२ । इ. सू. तत्पुरुषः कोः कत्तत्पुरुषे । ३ । २ । १३० । इ. सू. कौ कत् ) कदाशा तया ईहते वाञ्छति । यदि जल-स्थिता मत्सी जलबहिर्गतं वस्तु ग्रहीतु मिच्छति तदा सा मूर्खैवेति भावः ॥५०

**मनोऽणु धर्तुं न गुणांस्तवाखिला, न तद्धृतान्वक्तु मलं वचोऽपिमे ।**
**स्तुतेर्वरं मौन मतो न मन्यते, परं रसज्ञैव गुणामृतार्थिनी ॥ ५१ ॥**

(व्या०) मन इति ॥ हे नाथ मे मम मन तव अखिलान् समस्तान् गुणान् धर्तुं (शक धृषज्ञा रभ लभ सहार्हग्ला घटास्ति समर्थार्थे च तुम् । ५ । ४ । ९० । इ. सू. समर्थार्थे अलमुपपदे धृग् धातोस्तुम् अस्मिन् श्लोके वक्तु मित्यत्रापि अलमुपपदे तुम् ) नालं न समर्थम् । किं लक्षणं मन अणु सूक्ष्मं तद्धृतान् तेन मनसा धृतान् गुणान् वक्तुं मे मम वचोऽपि नालं न शक्तम् । अत कारणात् स्तुते (श्वादिभ्य । ५ । ३ । ९२ । इ. सू. स्तु धातोः स्त्रियां भावेक्तिः ।) मौनं ( य्वृवर्णाल्लघ्वादेः । ७ । १ । ६९ । इ. सू. मुनिशब्दात् भावेऽण् अवर्णे वर्णस्य । ७ । ४ । ६८ । इ. सू. इकारस्य लोपः वृद्धिः स्वरेष्वादे रिति सूत्रेण आदि स्वरवृद्धिः मुनेर्भावो मौनं ) वरं भव्यम् । परं रसं जानाति इति रसज्ञा (आतो डोऽह्वावामः । ५ । १ । ७६ । इ. सू. ज्ञाधा-

तोर्डः । इडेत् पुसि चातो लुक् । इ. सू. आलोपः) एव जिह्वा एव न मन्यते । किं लक्षणा रसज्ञा गुणामृतार्थिनी गुणा औदार्यज्ञानादय एव अमृत मर्थयतीति वाञ्छतीति गुणा० ॥ ५१ ॥

**सुरद्रुमाद्यामुपमां स्मरन्ति यां, जनाः स्तुतौ ते भुवनातिशायिनः ।**
**अवैमि तां न्यक्कृतिमेव वस्तुत, स्तथापि भक्तिर्मुखरीकरोति माम् ५२**

(व्या०) सुरद्रुमेति ॥ हे नाथ जनालोकाः ते तव स्तुतौ सुरद्रुमाद्यां सुराणां देवानां द्रुमा वृक्षाः कल्पवृक्षाः ते आद्या यस्यां सा तामुपमां स्मरन्ति कथयन्ति । किं विशिष्टस्य ते भुवनातिशायिन. भुवनानि अतिशेते इति भुवनातिशायी (अजातेः शीले । ५ । १ । १५४ । इ. सू. अति पूर्वक शीङ्धातोर्णिन्) तस्य त्रिभुवनाधिकस्य । अहं तां स्तुतिः वस्तुतः परमार्थतः न्यक्कृतिं निन्दामेव अवैमि जानामि । तथापि भक्तिर्मां मुखरीकरोति वाचालं कुरुते न मुखरः अमुखरः अमुखरं मुखरं करोतीति ॥ (कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्त्वे च्विः । ७ । २ । १२६ । इ. सू मुखर शब्दात् च्विः । ईश्चवाव वर्णस्याऽन व्ययस्य । ४ । ३ । १११ । इ. स. मुखर शब्दस्य अवर्णस्य ई ) ॥ ५२ ॥

**अनङ्गरूपोऽप्यखिलाङ्गसुन्दरो, रवेरदभ्रांशुभरोऽपि तारकः ।**
**अपि क्षमाभृन्न सकूटतां वह–स्यपारिजातोऽपि सुरद्रुमायसे ॥ ५३ ॥**

(व्या०) अनङ्गेति ॥ हे नाथ त्वं अनङ्गरूपोऽपि अखिलांगसुन्दरः सर्वाङ्ग सुन्दरो वर्तसे योऽनंगरूपः स्यात् स अखिलांगसुन्दरः कथं स्यात् । अत्र विरोध-परिहारमाह अनङ्गरूप कंदर्परूपः कंदर्पवत् रूपं यस्य सः अखिलांग सुन्दरः अखिलानि च तानि अंगानि च समस्तांगानि तेषु सुन्दरः । हे नाथ त्वं रवेः अदभ्रांशुभरोऽपि सूर्यादधिकतेज. पटलोऽपि तारकोऽसि यो रवेः अदभ्रांशुभरः स्यात् स तारक कथ स्यात् अत्र विरोधपरिहारमाह अदभ्रोऽधिक अंशूनां किरणानां भरः समूहो यस्य स तारकः (णक तृचौ । ५ । १ । ४८ । इ.

सू. ण्यन्त तारे अक णेरनिटि । ४ । ३ । ८३ । इ. सू. णेर्लोपः ।) तारयसि जीवान् संसार सागरात् इति तारकः । हे नाथ त्वं क्षमाभृदपि पर्वतोऽपि सकूटतां सशिखरतां न वहसि य. क्षमाभृत् पर्वतोऽस्ति स सशिखरतां वहति अत्र विरोधपरिहारमाह क्षमा ( क्विप् । ५ । १ । १४८ । इ. सू. कर्तरि क्विप् । ह्रस्वस्य त. पित्कृति । ४ । ४ । ११३ । इ. सू तोन्तः ।) गुणं बिभर्तीति क्षमाभृत क्षमागुणधारकोऽसि सकूटतां सालीकतां सकपटत्वं न वहसि न धारयसि अपारिजातोऽपि सुरद्रुमायसे य अपारिजातः स्यात् स सुरद्रुमवत् कथमाचरति । अत्र विरोधपरिहारमाह अपगतं अरीणां रिपूणां जातं समूहो यस्य सः अपारिजातः ।

**इदं हि पट्खंडमवाप्य भारतं, भवन्तमूर्जस्वलमेकदैवतम् ।**
**बिभर्ति षट्कोणकयन्त्रसूत्रणां, नृणां स्फुरत्पातकभूतनिग्रहे ॥ ५४ ॥**

(व्या०) इद मिति ॥ हे नाथ इदं षट्खंडा यस्मिन् तत् षट्खंडं तत् भारतं भरतक्षेत्रं कर्तृपदं । ऊर्जस्वलं (ऊर्जो विन् वलावश्चान्तः । ७ । २ । ५१ । इ. सू ऊर्ज शब्दात् वल प्रत्ययः ऊर्ज शब्दस्य ऊर्जस् ) ऊर्जो बलमस्यास्तीति तं बलवन्तं एकदैवतं भवन्तमवाप्य प्राप्य नृणां मनुष्याणां स्फुरत्पातकभूतनिग्रहे स्फुरन्ति च तानि पातकानि च (णक तृचौ । ५ । १ । ४८ । इ सू. ण्यन्त पात् धातोर्णक प्रत्यय ) पापानि तान्येव भूतास्तेषां निग्रहो निर्धाटनं तस्मिन् षट् कोणकानि यस्मिन् सचासौ यंत्रश्च तस्य सूत्रणां रचनां बिभर्ति धारयति ॥ कोऽर्थः भरतक्षेत्रेण परमदैवतं भगवन्तमवाप्य प्राप्य मनुष्याणां लोकानां पापरूपभूतनिग्रहे पट्खंडरूप षट्कोणकयंत्र सूत्रणा समाश्रितेति भावः ॥ ५४ ॥

**तपोधनेभ्यश्चरता वनाध्वना, धनस्य भावे भवता धनीयता ।**
**अदीयताज्यं यदनेन कौतुकं, तवैव शिक्षाय वृषो वृषध्वज ॥ ५५ ॥**

(व्या०) तपोधनेभ्य इति ॥ हे नाथ भवता त्वया वनस्याध्वा वनाध्वा तेन वनाध्वना वनमार्गेण चरता गच्छता धनस्य भावे धनसार्थवाह भवे तपोधनेभ्य.

तप-एव-धनं येषां ते तपोधनास्तेभ्यः (चतुर्थी । २ । २ । ५३ । इ. सू. तपोधनेभ्यः इत्यत्र चतुर्थी ।) यतिभ्यो यदाज्यं घृत मदीयत दीयतेस्म । किं कुर्वता भवता धनीयता (अमाव्ययात् क्यन् च । ३ । ४ । २३ । इ. सू. धनशब्दात् इच्छायां क्यन् क्यनि । ४ । ३ । ११२ । इ. सू. क्यनिपरे अस्यईः शत्रान शावेष्यतितु सस्यौ । ५–२–२० । इ. सू. धनीय नामधातोः सदर्थे कर्तरि शतृ प्रत्ययः) धनमिच्छता । अनेन आज्येन हे वृषध्वज वृषः वृषभो लाञ्छनं यस्य स तस्य संबोधने हे वृषध्वज कौतुकमाश्चर्यं तवैव वृषः वृषभः पुण्यं वा शिश्वाय (श्विधातोः कर्तरिपरोक्षा) ववृधे ।.कोऽर्थः पात्रे दत्तेन दानेन धनसार्थवाहेन महत्पुण्यमर्जितम् । उक्तंच 'दानेन धन्यो धनसार्थवाहः कर्मोत्तमं तीर्थकरस्यनाम, बबंध कर्म्मक्षयहेतुभूतं दानं हि कल्याणकरं नराणाम् ॥ ५५ ॥

**भवे द्वितीये भुवनेश युग्मितां, कुरुष्ववाप्ते त्वयि किंकरायितम् ।**
**मनीषितार्थक्रियया सुरद्रुमै, र्जितैरिव प्राग् जननापवर्जनैः ॥ ५६ ॥**

(व्या०) भवे इति ॥ 'मत्तंगयाय १ भिंगा २ तुडियंगा ३ दीव ४ जोइ ५ चित्तंगा ६ चित्तरसा ७ मणियंगा ८ गेहागारा ९ अणियणाय १० ॥१॥ सरसमज्ञ १ मणिभाजन २ वाद्य ३ रत्नप्रदीप ४ तेजोमंडल ५ चित्रकारिसुरभिपुष्प ६ विचित्रखाद्यभोज्य ७ मणिभूषण ८ निश्रेणिसोपानकलितविविध धवलगृहादि ९ प्रधानवस्त्राणि १० एतैः पूर्णाये दशविधकल्पवृक्षाः तैः सुरद्रुमैः मनीषितार्थक्रियया मनीषिताश्चते अर्थाश्च तेषां क्रियया वाञ्छितार्थकरणेन हे भुवनेश द्वितीये (द्वेस्तीय । ७ । १ । १६५ । इ. सू. द्विशब्दात् तीय प्रत्ययः) भवे (युवर्ण वृदवशरण गमृद् ग्रहः । ५ । ३ । २८ । इ. सू. भावे अल् । नामिनो गुणोऽक्ङिति । ४ । ३ । १ । इ. सू. गुणः । ओदौतोऽवात् । १ । २ । २४ । इ. सू. अवादेशः ) कुरुषु उत्तरकुरुषु युग्मितां युगलिस्त्व मवाप्ते प्राप्ते सति त्वयि विषये किं करायितं (क्यङ् । ३ । ४ । २६ । इ. सू. आचारेऽर्थे किंकरशब्दात् क्यङ् क्लीबे क्तः । ५ । ३ । १२३ । इ. सू भावे नपुंसकेक्तः ।) किंकरवदाच-

रितम् । किंलक्षणैः सुरद्रुमैः उत्प्रेक्ष्यते प्राग्जननाथवर्जनैः पूर्वजन्मदानैः जितैरिव ॥

**सधर्म सौधर्मसुपर्वतां ततो,-ऽधिगत्यनित्यं स्थितिशालिनस्तव ।**
**सुरांगना कोटिकटाक्षलक्ष्यता,-जुषोऽपि नो धैर्यतनुत्रमत्रुटत् ॥५७॥**

(व्या०) सधर्म इति ॥ सधर्म सह धर्मेण वर्तते इति सधर्मस्तत्संबोधने ततः सौधर्म्मसुपर्वतां सौधर्मदेवत्वमधिगत्य (प्राक् काले । ५ । ४ । ४७ । इ. सू. अधिपूर्वक गम् धातोः क्त्वा प्रत्ययः । अनञः क्त्वो यप् । ३ । २ । १५४ । इ. सू. क्त्वो यबादेशः । यपि । ४ । २ । ५६ । इ. सू. गमो मस्य लुक् ह्रस्वस्य तः पित्कृति । ४ । ४ । ११३ । इ. सू. तोऽन्तः । ) प्राप्य तव धैर्यतनुत्रं (आतो डोऽह्वावामः । ५ । १ । ७६ । इ. सू. तनुपूर्वक त्राधातोर्ड प्रत्ययः । डित्यन्त्यस्वरादेः । इ. सू. त्राधातो राकार लोपः । ) धैर्यमेवकवचं न अत्रुटत् न त्रुटति स्म । किं विशिष्टस्य तव नित्यं निरंतरं स्थितिर्मर्यादा तया शालते इति स्थितिशाली (अजातेः शीले । ५ । १ । १५४ । इ. सू. शीलेऽर्थे शाल् धातोः णिन् प्रत्ययः ।) तस्य मर्यादाशोभमानस्य सुराणां देवाना मंगनाः स्त्रियः तासां कोटयः तासां कटाक्षा तेषां लक्ष्यतां वेध्यतां जुषते इति तस्य सेवमानस्यापि ॥ ५७ ॥

**महाबलक्ष्मापभवे यथार्थकीं, चकर्थ बोधैकबलान्निजाभिधाम् ।**
**अखर्व चार्वाकवचांसि चूर्णय-न्नयोधनानक्षरकोटकुट्टने ॥ ५८ ॥**

(व्या०) महाबल इति ॥ हे नाथ त्वं महाबलक्ष्मापभवे (क्ष्मा पातीती क्ष्मापः आतो डोऽह्वावामः । ५ । १ । ७६ । इ. सू. क्ष्मापूर्वक पाधातोर्ड प्रत्ययः । डित्यन्त्यस्वरादेः इ. सू. पाधातोराकारलोपः) महाबलाख्यनृपस्य भवे बोधैकबलात बोधस्य प्रबोधस्य एकबलं तस्मात् निजाभिधां निजस्य अभिधातां (उपसर्गादातः । ५ । ३ । ११० । इ. सू. अभिपूर्वक धाधातोः भावे स्त्रियामङ् । आत् । २ । ४ । १८ । इ. सू. स्त्रियामाप् ।) आत्मीयंनाम यथार्थकीं सत्यार्थां

चकर्थ कृतवान् किं कुर्वन् अखर्वाणि प्रौढानि चतानि चार्वाकस्य वचांसि तानि चूर्णयन् अक्षरकोट्टकुट्टने मोक्ष दुर्गकुट्टने अयोधनान् (अयो द्रोः करणे । ५ । ३ । ३८ । इ. सू. अयः परात् हन्ते: करणे अल् घनादेशश्च ।) लोह मुद्गरान् ॥

**द्वितीय कल्पे ललितांगतां त्वया, गतेन वध्वा विरहे व्यलापि यत् ।**
**दरिद्रपुत्र्यै ददितं तपः फलं, तदन्यदर्थां हि सतां क्रियाखिला ॥५९॥**

(व्या०) द्वितीय इति ॥ हे नाथ त्वया द्वितीये कल्पे ईशानदेवलोके ललितं सुन्दरं अंगं यस्य स ललितांगस्तस्य भावः तां ललितांगाख्यदेवत्वं गतेन प्राप्तेन वध्वा विरहे यत् व्यलापि विलाप: कृतः । तत् दरिद्रस्य पुत्री दरिद्रपुत्री तस्यै निर्नामिकायै तपस. फलं तपः फल तत् ददितुं दातुं ज्ञेयम् । हि यस्मात् कारणात् सतां साधूनां अखिला समस्ता क्रिया (कृगः शच वा । ५ । ३ । १०० । इ. सू. कृग् धातोः स्त्रियां भावे शः । रिः शक्या शीर्ये । ४ । ३ । ११० । इ. सू. शेपरे कृधातोः रि संयोगात् । २ । १ । ५२ । इ. सू. इयादेशे आत् । २ । ४ । १८ । इ. सू. स्त्रियामापि क्रिया इति) अन्यदर्थां अन्येषा मुपकारहेतुर्वर्तते । अत्र 'अषष्ठीतृतीयादन्यादो अर्थे' इति सूत्रेण अन्यदर्थां इति सिद्धम् ॥ ५९ ॥

**स वज्रजंघो नृपति र्भवन् भवा,-नवाप हालाहलधूमपायिताम् ॥**
**यदंगजादंगजतस्ततस्तवा-धुनापि विश्वासबहिर्मुखं मनः ॥ ६० ॥**

(व्या०) स इति । हे भगवन् हे नाथ स भवान् वज्रजंघोनृपतिर्भवन् सन् यत् अंगजात् (अजातेः पञ्चम्याः । ५ । १ । १७० । इ. सू. अङ्ग पुर्वकजने ड्: । डित्यन्त्यस्वरादे: इ. सू. जनधातो रन्त्यस्वरादि लोपः) पुत्रात् हालाहलधूमपायितां धूमं पिबतीति धूमपायी तस्य भावो हलधूमपायिता (अजातेः शीले । ५ । १ । १५४ । इ. सू. धूमात् परात् पिबतेः धातोः शीलेऽर्थेणिन् प्रत्ययः । आत ऐः कृञ्जौ । ४ । ३ । ५३ । इ. स. ऐः एदैतोऽयाय् । १ । 

२ । २३ । इ. सू आयादेशः भावेत्व तल् । ७ । १ । ५५ । इ. सू. भावेऽर्थे तल् । नाम्नो नोऽनह्नः । २ । १ । ९१ । इ. सू. नस्य लुक्) हालाहलस्य धूमपायिता हालाहलधूमपायिता तां विषसत्कधूमपत्वं अवाप प्राप्तः ॥ ततस्तस्मात् कारणात् अधुनापि (सदाऽधुनेदानीं तदानी मेतर्हि । ७ । २ । ९६ । इ. सू. अधुना निपात्यते ॥) तव मनः अंगजतः कंदर्पात् विश्वासबहिर्मुखं विश्वासात् बहिर्मुखं यस्य तत् विश्वासरहितं वर्तते । कोऽर्थः—अंगजशब्देन कंदर्पः पुत्रोऽपि भण्यते । भवता वज्रजंघनृपभवे अंगजान्मरणं प्रापि । पश्चात् तीर्थकृद्भवे भगवन्मनोंऽगजस्य कामस्योपरि विश्वासरहितं जातमिति भावः ॥ ६० ॥

**उपास्य युग्मित्वमथाद्यकल्पग–सुधाशनीभूय भिषग् भवान भूत् ।**
**मुनेः किलासं व्यपनीय यः स्वकं, कलाविलासं फलितं व्यलोकत ॥**

(व्या०) उपास्येति । हे नाथ अथ अनन्तरं भवान् युग्मित्वमुपास्यसंसेव्य आद्यकल्पगसुधाशनी भूय प्रथमदेवलोके देवो भूत्वा भिषग् वैद्योऽभूत् । यो भिषग् वैद्यो मुनेः किलासं कुष्टरोगं व्यपनीय स्फेटयित्वा स्वकं स्वकीय मात्मीयं कलानां विलासस्तं (भावाऽकर्त्रोः । ५ । ३ । १८ । इ. सू. विपूर्वक लस् धातोः भावे घञ् ञ्णिति । ४ । ३ । ५० । इ. सू. लस धातो रुपान्त्यस्य अस्य वृद्धिः) फलितं सफलं व्यलोकत अपश्यत् ॥ ६१ ॥

**अथे यिवान च्युतनाकिधाम चे–दवातरस्तत्किमिह प्रभोऽथवा ।**
**लयं लभन्ते विबुधाहि नाभिधा–गुणेषु यत्ते परमार्थदृष्टयः ॥ ६२ ॥**

(व्या०) अथेति ॥ अथानंतरं हे प्रभो चेत् यदित्वं अच्युतनाकिधाम अच्युताभिधे स्थिता ये नाकिनो देवा स्तेषां धाम तत् अच्युतनामानं देवलोकं ईयिवान् (वेयिवदनाश्वदनूचानम् । ५ । २ । ३ । इ. सू. भूतोऽर्थे इ धातोः कर्तरि क्वसु प्रत्ययो निपात्यते इयाय इति ईयिवान् ) गतः । ततस्तस्मात् देवलोका दिह पृथिव्यां किमवातरः अवतीर्णः अथवा विबुधा ( नाम्युपान्त्य प्रीक

गृह्णः कः । ५ । १ । ५४ । इ. सू. विपूर्वक बुध् धातोः कर्तरि कः ।) देवाः विद्वांसो वा अभिधा (उपसर्गादात । ५ । ३ । ११० । इ. सू. अभिपूर्वक धाधातो. स्त्रियां अङ् । आत् । २ । ४ । १८ । इ. सू. स्त्रियामाप् ।) नाम तस्या गुणेषु लयं विश्रामं न लभन्ते । यत् यस्मात् कारणात् ते विबुधाः परमार्थे तत्त्वार्थे दृष्टि येषां ते दीर्घदर्शिनो वर्तन्ते । कोऽर्थः न विद्यते च्युतं च्यवनं यस्मिन् तत् नाकिधाम स्वर्गं गतः स कथमत्रावतीर्णः । परमिन्द्रगोपवत् तन्नाममात्रमेवेतित्वं त्यक्तवानिति भावः ॥ ६२ ॥

**निरीक्ष्यतां तीर्थकृतः पितुः श्रियं, न चक्रिसंपद्यपि तोषमीयुषा ।**
**तदर्थ मेव प्रयतं ततस्त्वया, त्रपा हि तातोनतया सुसूनुषु ॥ ६३ ॥**

(०५।०) निरीक्षेति ॥ हे नाथ ततोऽनंतर त्वया तदर्थमेव तीर्थकर श्रीनिमित्तमेव प्रयत मुपक्रान्तं किं विशिष्टेन त्वया तीर्थकृतः (तीर्थंकरोतीति तीर्थकृत् । क्विप् । ५ । १ । १४८ । इ. सू. तीर्थपूर्वक कृञ् धातोः क्विप् । ह्रस्वस्य तः पित्कृति । इ. सू. तोऽन्त.) तीर्थकरस्य पितुः तां श्रियं लक्ष्मीं निरीक्ष्य दृष्ट्वा चक्रिणः (अतोऽनेक स्वरात् । ७ । २ । ६ । इ. सू. चक्र शब्दात् मत्वर्थे इन् ) संपद् (कुत्सम्पदादिभ्यः । ५ । ३ । ११४ । इ. सू. संपूर्वकपद् धातोः स्त्रियां भावे क्विप् ।) चक्रिसंपद् तस्यां चक्रवर्तिलक्ष्म्यामपि तोषं (भावाकर्त्रोः । ५ । ३ । १८ । इ. सू. तुष् धातोर्भावे घञ् । लघोरुपान्त्यस्य । ४ । ३ । ४ । इ. सू. उपान्त्यगुणः) हर्षं न ईयुषा न प्राप्तवता । हि निश्चितं सुसूनुषु सत्पुत्रेषु तातात् ऊनता हीनता तया तातहीनतया त्रपा लज्जा (षितोऽङ् ५ । ३ । १०७ । इ. सू. त्रपूष् धातो स्त्रियामङ् । आत् इ. सू आप् ) वर्तते ॥ कोऽर्थः वज्रसेनस्य तीर्थकरस्य वज्रनाभः पुत्रश्चक्रीजात तेन चक्रित्वं विहाय संयमं गृहीत्वा विंशतिस्थानकैस्तीर्थकरनामकर्म उपार्जितम् । अतश्चक्रिलक्ष्म्यास्तीर्थकरलक्ष्मीरधिकेति भावः ॥ ६३ ॥

**ससीमसर्वार्थ विमान वासिनः, शिवश्रियः संगमभिच्छतोऽपि ते ।**
**अभूद्विलम्बस्तदसंस्तुते जने, रिरंसयाकोनदधाति मन्दताम् ॥ ६४ ॥**

(व्या०) स इति ॥ हे नाथ ते तव ससीमासन्नं च तत् सर्वार्थविमानं च तस्मिन् वसति इति ससीमसर्वार्थ विमानवासी । (अजातेः शीले । ५ । १ । १५४ । इ. सू. वस् धातोः शीलेऽर्थे णिन् । ) तस्य सतः शिवस्य श्रीः तस्याः मोक्षलक्ष्म्याः संगमं मीलन मिच्छतोऽपि यद्विलंबोऽभूत् । तत् असंस्तुते अपरिचिते जने रिरंसिया (शंसि प्रत्ययात् । ५ । ३ । १०५ । इ. सू. रिरंस धातोः स्त्रियामः । आत् । इ. सू. स्त्रियामाप्) रन्तुमिच्छया मन्दतां जडतां को न दधाति अपि तु सर्वकोऽपि दधात्येव ॥ ६४ ॥

**ध्रुवं शिवश्रीस्त्वयि रागिणी यत–स्तटस्थितस्यापि भविष्यदीशितुः ।**
**असंस्पृशन्मारविकारजंरजः, स्वसौख्यसर्वस्वमदत्त ते चिरम् ॥ ६५ ॥**

(व्या०) ध्रुवमिति ॥ हे नाथ ध्रुवं निश्चितं शिवस्य श्रीः शिवश्रीः मोक्षलक्ष्मीः त्वयि रागिणी रागवती वर्तते । यतो यस्मात् कारणात् ते तव तटस्थितस्यापि आसन्नस्थितस्यापि चिरं चिरकालं स्वसौख्यसर्वस्व मात्मीय सुखसर्वस्व मदत्त । किं लक्षणस्य ते भविष्य (शत्रानशावेष्यति तु सस्यौ । ५ । २ । २० । इ. सू. भूधातोः भविष्यदर्थे स्य सहित शतृ प्रत्ययः विशेषणं विशेष्येणैकार्थे कर्मधारयश्च । ३ । १ । ९६ । इ. सू. विशेषण कर्मधारयसमासः) दिशितुः (तृन् शीलधर्म साधुषु । ५ । २ । २७ । इ. सू. शीलादि सदर्थे ईश् धातोः तृन् ।) भाविभर्तुः किं कुर्वत् स्वसौख्यसर्वस्वं मारस्य कामस्य विकारः तस्मात् जातं तत् विषयविकारजं रजः पाप धूलिं वा असंस्पृशत् नसंस्पृशतीति ॥६५॥

**अवाप्य सर्वार्थविमानमंतिकी–भवत्परब्रह्मपदस्त्वदध्वगः ।**
**यदागमस्त्वं पुनरत्र तद् ध्रुवं, हितेच्छया भारतवर्षदेहिनाम् ॥६६॥**

(व्या०) अवाप्येति ॥ हे नाथ त्वं सर्वार्थविमानमवाप्य प्राप्य यत्पुनरत्रागमः अत्रागतः किं विशिष्टस्त्वं अंतिकीभवत् ( कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्वे च्विः । ७ । २ । १२६ । इ. सू. अन्तिक शब्दात् च्विः । ईश्चाव

वर्णस्याऽनव्ययस्य । ४ । ३ । १११ । इ. सू. च्वौपरे अन्तशब्दस्य अकारस्य । ई: ) समीपीभवत् परब्रह्मणः पदं यस्य स समीपीभवन्मोक्षपदः तदध्वगः (नाम्नो गमः खड्डौ च विहायसस्तु विहः । ५ । १ । १३१ । इ. सू. गम् धातोर्डः । ) तस्य मोक्षस्य अध्वानं गच्छतीति मोक्षपथिकः ततः ध्रुवं निश्चितं भारतवर्षस्य भरतक्षेत्रस्य देहिनः प्राणिनस्तेषां भरतक्षेत्रदेहिनां हितस्येच्छा तया भुक्तिमुक्तिदानार्थं मित्यर्थः त्वं सर्वार्थविमानादेव आसन्नत्वेऽपि मुक्तिं न गतः किन्तु लोकहितेच्छया एव अत्रावतीर्णः इति भाव ॥ ६६ ॥

**तदेव भूयात् प्रमदाकुलं कुलं, मही महीनत्व मुपासिषीष्ट ताम् ।**
**क्रियाज्जनं स्वस्तुतिवादिनं दिनं, तदेव देवाऽजनि यत्र ते जनिः ॥**

(व्या०) तदेवेति । हे नाथ तदेव कुलं प्रमदेन (संमदप्रमदौ हर्षे । ५ । ३ । ३३ । इ. सू. हर्षेऽर्थे प्रमद शब्दोऽलन्तो निपात्यते । ) हर्षेणाकुलं व्याप्तं भूयात् हीनस्य भावो हीनत्वं न हीनत्व महीनत्वं संपूर्णत्वं कर्तृपदं तां महींपृथ्वीमुपासिषीष्ट सेविषीष्ट तदेव दिनं जनं लोकं स्वस्तुतिवादिनं स्वस्य निजस्य स्तुतिः श्लाघा तां वदतीति तं स्वकीयश्लाघाकर्तारं क्रियात् (रिः शक्या शीर्ये । ४ । ३ । ११० । इ. सू. कृग् धातोः ऋकारस्य आशीर्येपरे रिः ।) तद्दिनस्य महामहोत्सवमयत्वात् । हे देव हे स्वामिन् यत्र कुले यत्र मह्यां यत्र दिने तव जनिर्जन्म अजनि (जन् धातोः कर्तरि अद्यतनी । दीप जनबुधिपूरि-तायिप्यायो वा । ३ । ४ । ६७ । इ. सू जन् धातो र्ञिच् वा तल्लुक् च ।) जातम् ॥ ६७ ॥

**अमी धृताः किं पविचक्रवारिजा—सयः शये लक्षणकोश दक्षिणे ।**
**शचीशचक्र्यच्युतभूपसंपदु, स्त्वया निजोपासकसाच्चिकीर्षता ॥६८॥**

(व्या०) अमीति । हे लक्षणकोश लक्षणानां प्रासादपर्वत शुकांकुश पद्माभिषेक यव दर्प्पण चामराणीत्यादि अष्टोत्तरसहस्रानां लक्षणानां कोशः तत्सं-

बोधने हे भांडागार त्वया शचीशः इन्द्र चक्री चक्रवर्ती अच्युतो वासुदेवः भूपो राजा तेषां संपदो लक्ष्मीः निजोपासक सात् (तत्राधीने । ७ । २ । १३२ । इ. सू. निजोपासक शब्दात् अधीनेऽर्थे सात् निजस्यात्मनो ये उपासकाः सेवकाः तेषा मधीनाः स्वकीय सेवकायत्ताः चिकीर्षता (शत्रान शावेष्यति तु सस्यौ । ५ । २ । २० । इ. सू. सन्नान्तात् कृग् धातोः वर्तमाने शतृ प्रत्ययः) कर्तुमिच्छता सता दक्षिणे शये (पुन्नाम्नि घः । ५ । ३ । १३० । इ. सू. शीङ् धातोर्घः ।) हस्ते पविचक्र वारिजासयः पविश्चवज्रं चक्रं च वारिजश्च शंखः असिश्च खड्गः अमी किं धृताः त्वया इन्द्रपदवीदानायेत्यादि भाव. ॥ ६८ ॥

**सदंभलोभादिभटव्रजस्त्वया, स्वसंविदा मोहमहीपतौ हते ।**
**स्वयं विलाता घनवारिवारिते, दवे न हि स्थेमभृतः स्फुलिंगकाः ॥**

(व्या०) सदंभ इति । हे नाथ त्वया स्वस्य संविद (क्रुत्सम्पदादिभ्यः क्विप् । ५ । ३ । ११४ । इ. सू. संपूर्वक विद्धातोः क्विप् ।) ज्ञानं तया स्वकीयज्ञानेन मोह एव महपति र्भूपस्तस्मिन् मोह भूपे हते सति सदंभलोभादिभटव्रजः दंभेन मायया सह वर्तन्ते लोभादयश्च भटाश्च सुभटास्तेषां व्रजः) गोचर संचर वह व्रज व्यज खलापण निगम बक भग कपाकषनिकषम् । ५ । ३ । १३१ । इ. सू. व्रजशब्दः धान्तो निपात्यते ।) समूहः स्वयमात्मनैव विलाता विलयं यास्यति । 'लीङ्' विश्लेषणे धातोः विपूर्वस्य 'लीङ्लिनोर्वा' इति सूत्रेणात्वम् । हि यस्मात् कारणात् दवे दावानले घनस्य (मूर्ति निचिताभ्रे घनः । ५ । ३ । ३७ । इ. सू हन् धातोरल् घनादे शश्च) मेघस्य वारिजलं तेन वारिते सति स्फुलिंगकाः स्थेम (वर्णदढादिभ्यष्टयण् च वा । ७ । १ । ५९ । स्थिर शब्दात् इमन् । प्रियस्थिर स्फिरोरु—द्रम् । ७ । ४ । ३८ । इ. सू. स्थिरस्य इमनिपरे स्थादेशः ।) स्थैर्यं बिभ्रतीति स्थैर्यधारिणो न वर्तन्ते इति ॥

**इषुः सुखव्यासनिरासदा सदा, सदानवान् यस्य दुनोति नाकिनः ।**
**स्मरो भवद्ध्यानमये निमात्रसा—त्रसात्रसारेऽमदशां गमिष्यति ॥७०॥**

(व्या०) इषुरिति ॥ यस्य स्मरस्य कंदर्पस्य इषुर्बाणः सदा निरंतरं दानवैः सह वर्तन्ते इति तान् दानवसहितान् नाकः स्वर्गोऽस्ति एषामिति तान् देवान् दुनोति पीडयति । इषु शब्द स्त्रीलिंगो ज्ञेयः किंलक्षणा इषु सुखस्य व्यासो विस्तारस्तस्य निरासं (भावाऽकर्त्रोः । ५ । ३ । १८ । इ. सू. विपूर्वकात् च निर पूर्वकात असधातोः भावे घञ् । ञ्णिति । ४ । ३ । ५० । इ. सू. वृद्धिः ।) निराकरणं ददातिसुख व्यास निरासदा (आतोडोऽह्वा वामः । ५ । १ । ७६ । इ. सू. दाधातो डः) हे नाथ असौ स्मरः काम भवतो ध्यानं तन्मये 'ध्यानं निर्विषयं मनः'—इत्येवंरूपे ध्यानमये विभावसौ वैश्वानरेऽनले असारं तुच्छं च तत्—इध्म च काष्ठं तस्य दशामवस्थां गमिष्यति यास्यति ॥ ७० ॥

**परं नहि त्वत् किमपीह दैवतं, तवाभिधातो न परं जपाक्षरम् ।**
**न पुण्यराशिस्त्वदुपासनात्पर—स्तवोपलंभान्न परास्ति निर्वृतिः ॥७१॥**

(व्या०) परमिति ॥ हे नाथ त्वत् परं त्वत् अन्यत् इह जगति किमपि दैवतं नास्ति त्रिभुवनजनपूज्यत्वात् इह जगति तव अभिधातः तव नामतः परं जपाक्षरं नास्ति सर्वोत्कृष्टत्वात् । इह जगति तवउपासनात्सेवनात् (अनट् । ५ । ३ । १२४ । इ. सू. उपपूर्वक आसधातो० नपुंसके भावे अनट् ) परोऽन्यः पुण्यानां राशिः समूहो नास्ति । तथा च इह जगति तव उपलंभात् (भावाऽकर्त्रोः । ५ । ३ । १८ । इ. सू. उपपूर्वक लभ्धातो घञ् । लभ. । ४ । ४ । १०३ । इ. सू. उपान्त्येन् ) साक्षात्कारात् पराऽन्या निर्वृति मुक्तिर्नास्ति वीतरागं विना नैव मुक्ति रित्यर्थः ॥ ७१ ॥

**तव हृदि निवसामीत्युक्तिरीशे न योग्या,**
**मम हृदि निवस त्वं नेति नेता नियम्यः ।**
**न विभुरुभयथाहं भाषितुं तद्यथार्हं,**
**मयिकुरुकरुणार्हे स्वात्मनैव प्रसादम् ॥ ७२ ॥**

(व्या०) तवेति । हे नाथ अहं तव हृदि हृदये निवसामि इत्युक्तिजेल्पन मीशे स्वामिनि न योग्या । त्वं मम हृदि निवस निवासं कुरु इत्यमुना प्रकारेण नेता स्वामी न नियम्यः (यमुमद गदोऽनुपसर्गात् । ५ । १ । ३० ।

इ. सू. उपसर्गपूर्वकयम्धातोर्य प्रत्ययोनिषिद्धोऽपि निपूर्वात् भवति) न नियंत्रणीयः। यो नेता स्यात्–असौ परं सेवकादि नियंत्रयति न तु सेवका नेतारं नियंत्रयन्ति। अह मुभयथापि द्वाभ्यामपि प्रकाराभ्यां भाषितुं जल्पितुं न समर्थः। तेन तस्मात्कारणात् हे स्वामिन् परदुःखनिवारक करुणार्हे कृपायोग्ये मपि स्वात्मनैव स्वयमेव यथार्हं यथायोग्यं प्रसादं कुरु ॥ ७२ ॥

**इति स्तुतिभिरांतरं विनयमानयन् वैबुधे,**
**प्रतीतिविषयंगणेऽनणुधियां धुरीणो हरिः।**
**प्रसन्न नयनेक्षणै भंगवता सुधासोदरै,**
**रसिच्यत सुधाशनैरपि च साधुवादोर्मिभिः ॥ ७३ ॥**

**सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि।**
**र्धम्मिलादिमहाकवित्वकलनाकल्लोलिनीसानुमान् ॥**
**वाणीदत्तवरश्चिरं विजयते तेन स्वयं निर्मिते।**
**सर्गो जैनकुमारसंभवमहाकाव्येऽयमाद्योऽभवत् ॥ १ ॥**

(व्या०) इतीति ॥ हरिरिन्द्रः भगवता श्रीऋषभस्वामिना प्रसन्ननयनेक्षणैः सप्रसादलोचनावलोकनैरसिच्यत सिक्तः। सुधाया अमृतस्य सोदराणि तैरमृतसदृशैः। च अन्यत् सुधा अमृतमशनं येषां तैः देवैरपि साधुवादोर्मिभिः श्लाघारूपकल्लोलैरसिच्यत सिक्तः। किंकुर्वन् हरिः इति पूर्वोक्तमुनीनामपि गीरगोचरेत्यादि चतुर्विंशतिकाव्यरूपस्तुतिभि–(श्वादिभ्यः। ५। ३। ९२। इ. सू. स्तुधातोः करणे क्तिः स्तूयते आभिरिति स्तुतयः।) रांतरमंतरंगं विनयं वैबुधे गणे देवसमूहे प्रतीतिविषयं आनयन्–प्रत्ययगोचरं प्रापयन् पुनः किं० अनणुः गुर्वी धीर्येषां तेषां गुरुबुद्धीनां धुरीणः (वामाद्यादेरीनः। ७। १। ४। इ. सू. वामादिपूर्वात् धुरशब्दात् ईन प्रत्य यो भवति अन्ये केवलादपीच्छन्ति तेनात्र केवलधुर शब्दात् ईन प्रत्य यो ज्ञेयः) धुर्यः ॥ ७३ ॥

**इतिश्रीमद् अञ्चलगच्छे कविचक्रवर्त्तिश्रीजयशेखरसूरिविरचित श्रीजैनकुमारसंभवमहाकाव्ये तच्छिष्य श्रीधर्मशेखर महोउपाध्यायविरचितायां टीकायां श्रीमाणिक्यसुन्दरशोधितायां द्वितीयसर्गव्याख्या समाप्ता ॥ २ ॥**

## ॥ अथ तृतीयः सर्गः प्रारभ्यते ॥

**अथ प्रासादाभिमुखं त्रिलोका-धिपस्य पश्यन् मुख मुग्रधन्वा ।**
**अवाप्तवारोचितरोचितश्रि, वचः पुनः प्रास्तुत वक्तुमेवम् ॥ १ ॥**

(व्या०) अथेति ॥ अथानंतरं उग्रं धनुर्यस्य स उग्रधन्वा इन्द्रः (धनुषो धन्वन् । ७ । ३ । १५८ । इ. सू. धनुषो धन्वन्नादेशः ।) एवं प्रकारेण वचः पुनर्वक्तुं जल्पितुं प्रास्तुत प्रारब्धवान् । किं कुर्वन् त्रयः अवयवा यस्य सत्र्यवयवः सचासौ लोकश्च मयूरव्यंसकादिषु पाठात् मध्यमपदलोपी कर्मधारयसमासः त्रिलोकस्य अधिप (उपसर्गा दातोडोऽश्वः । ५ । १ । ५६ । इ. सू. अधिपूर्वक पाधातोर्ड ।) स्वामी तस्य श्रीआदिदेवस्य प्रभोः मुखं वदनं प्रसादाभिमुखं प्रसादस्य ( भावाऽकर्त्रो । ५ । ३ । १८ । इ. सू प्रपूर्वक सद्धातोर्घञ् । ञ्णिति । ४ । ३ । ५० । इ. सू. उपान्त्यवृद्धिः ।) अभिमुखं प्रसादं कर्तुकाममिव पश्यन् । (शत्रानशावेष्यति तु सस्यौ । ५ । २ । २० । इ. सू. दशधातोर्वर्तमाने शतृ प्रत्ययः । श्रौति कृवु धिवु पाघ्राध्मा-सीदम् । ४ । २ । १०८ । इ. सू. दशधातोः पश्यादेशः ।) कीदृशं वचः अवाप्तः वारो यस्य तत् प्राप्तावसरं । अत एव उचितं युक्तं रोचितारुचिं प्राप्ता श्रीः शोभा यस्य तत् ॥१॥

**स्वयं समस्तान्न न वेत्सि भावां, स्तथाप्यसौ त्वां प्रति मे प्रजल्पः ।**
**इयर्तु मेघंकरमारुतत्वं, मुदेऽप्यतः कालबलाद् घनस्य ॥ २ ॥**

(व्या०) स्वयमिति ॥ हे नाथ त्वं स्वयं समस्तान् सकलान् भावान् न वेत्सिन नजानासिन अपितु जानास्येव । तथापि असौ त्वां प्रति मे मम प्रजल्पः । ( भावाऽकर्त्रोः । ५ । ३ । १८ । इ. सू. प्रपूर्वकजल्पधातो घञ् ।) घनस्य मेघस्य मेघंकरमारुतत्वं इयर्तु गच्छतु । मेघं करोतीति मेघंकरः 'मेघर्ति

भया भयात् खः' इति सूत्रेण खप्रत्यये 'खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च' इति सूत्रेण म आगमेकृते मेघंकर इति सिद्धम् । किं करिष्यतो घनस्य कालस्य वर्ष तस्मात् उदेष्यतीति उदेष्यन् (शत्रान शावेष्यति तु सस्यौ । ५ । २ । २० । इ. सू. उद्पूर्वकइ धातोर्भविष्यदर्थेस्यसहित शतृ प्रत्यय) तस्य उदयं प्राप्स्यतः ॥

**साधारणस्ते जगतां प्रसादः स्वहेतु मूहे तमहं तु हन्त ।**
**हृद्यो न कस्येन्दुकलाकलापः, स्वात्मार्थमभ्यूहति तं चकोरः ॥ ३ ॥**

(व्या०) साधारण इति ॥ हे नाथ ते तव प्रसाद जगतां विश्वानां साधारणः सदृशोवर्तते । तु पुनः अहं हन्त इति वितर्के त्वत्प्रसादः स्वहेतुमात्मनिमित्त मूहे विचारयामि । अत्र दृष्टान्तमाह–इन्दोश्चन्दोश्चन्द्रस्य कलास्तासां कलापः समूहः कस्य न हृद्य (हृद्य पद्य तुल्य मूल्य वश्य पथ्य वयस्य ग्येम् । ७ । १ । ११ । इ. सू. हृदयशब्दात् यः प्रत्ययः हृदयस्य हृल्लासलेखाण्ये । ३ । २ । ९४ । इ. सू. हृदयस्य हृदादेशः ।) नाभीष्ट अपितु सर्वस्याभीष्ट स्तथापि चकोरस्तमिन्दुकलाकलापं स्वात्मार्थमभ्यूहति विचारयति ॥ ३ ॥

**भवन्तु मुग्धा अपि भक्तिदिग्धा, वाचो विदग्धाग्र्य भवन्मुदे मे ।**
**अश्मापि विस्मापयते जनं किं, न स्वर्णसंवर्मित सर्वकायः ॥ ४ ॥**

(व्या०) भवन्तु ॥ हे विदग्धाग्र्य विदग्धेषु अग्र्यः तत्संबोधने हे विद्वन्मुख्य मे मम वाचे मुग्धा अपि भवन्मुदे तव हर्षाय भवन्तु । किंलक्षणा वाचः भक्त्या दिग्धा (क्तक्तवतू । ५ । १ । १७४ । इ. सू. दिह् धातो कर्मणि क्त । भ्वादे र्दादेर्घः । २ । १ । ८३ । इ. सू. हस्य घ । अधश्चतुर्थात् तथो र्धः २ । १ । ७९ । इ. सू. तस्य धकारः । तृतीय स्तृतीय चतुर्थे । १ । ३ । ४९ । इ. सू. पूर्व घस्य गः) लिप्ता. भक्तिदिग्धाः । अश्मापि पाषाणोऽपि स्वर्णसंवर्मि तसर्वकायः स्वर्णेन संवर्मित वेष्टितः सर्वकायो यस्य स सन् जनं लोकं किं न विस्मापयते सविस्मयं किं नकरोति अपितु करोत्येव ॥ ४ ॥

**जडाशया गा इव गोचरेषु, प्रजानिजाचारपरम्परासु ।**
**प्रवर्तयन्नक्षतदंडशाली, भविष्यसि त्वं स्वयमेव गोपः ॥ ५ ॥**

**(व्या०)** जडाशया इति ॥ हे नाथ त्वं गोपो (आतोडोऽह्वावामः । ५ । १ । ७६ । इ. सू. गोपूर्वकपाधातोर्ड । डित्यन्त्यस्वरादे इ. सू आकारस्य लोप· ।) राजा गोपालो वा स्वयमेव भविष्यसि । किं कुर्वन् प्रजा लोकान् निजस्य स्वस्याचारास्तेषां परम्परास्तासु प्रवर्तयन् । का इव गा इव यथा गोपो धेनू· गोचरेषु (गाव· चरन्ति अस्मिन् इति गोचर गोचर संचर वह व्रज—कषम् । ५ । ३ । १३१ । इ सू. घान्तो निपातः ।) प्रवर्तयति । किं लक्षणा· प्रजाः जड· आशयः अभिप्रायोयासांताः मूर्खाभिप्रयोगा· किं लक्षणो गोपः अक्षतदंड· शाली अक्षतश्चासौ दंडश्च सैन्यं पक्षे लकुटो वा तेन शालते इत्येवं शीलः अक्षत दण्डशाली (अजाते· शीले । ५ । १ । १५४ । इ. सू. अक्षत दण्डशब्दात् शाल् धातो· शीलेऽर्थे णिन् । ) ॥ ५ ॥

**कलाः समं शिल्पकुलेन देव, त्वदेव लब्धप्रभवा जगत्याम् ।**
**क्वनो भविष्यन्त्युपकारशीलाः, शैलात्सरत्ना इव निर्झरिण्यः ॥ ६ ॥**

**(व्या०)** कला. इति ॥ हे स्वामिन् कला· गीतनृत्यवादित्राह्वया द्वासप्तति संख्या· कुंभकार १ लोहकार २ चित्रकार ३ वानकार ४ नापित ५ शिल्पानां पञ्चानामपि पृथक् पृथक् विंशति विंशतिभेदा· स्युरेवं शिल्पशतं स्यात् ईदृक् शिल्पकुलेन समं जगत्यां पृथिव्यां क्वं कस्मिन् स्थाने उपकारशीलाः उपकार· शीलं स्वभावो यासां ता उपकारस्वभावा· न भविष्यन्ति अपि तु सर्वत्र भविष्यन्ति । किं विशिष्टा· कला· त्वदेव तव सकाशादेव लब्ध· प्रभव उत्पत्ति र्याभिस्ता· । का इव सरत्ना रत्नै· सह वर्तन्ते इति निर्झरिण्य नद्य (अतोऽनेकस्वरात् । ७ । २ । ६ । इ. सू. निर्झरशब्दात मत्वर्थे इन् प्रत्ययः । स्त्रियां नृतोऽस्वस्रादेर्डीः । इ. सू. डी प्रत्यय ।) इव यथा शैलात् पर्वतात् लब्धप्रभवा· सरत्नाः नद्यः क्व उपकारशीला न भवन्ति अर्थात् सर्वत्र भवन्त्येव ॥ ६ ॥

सहश्च । ५–१–१११ । इ. सू. सर्वपूर्वकसहधातो खः । खित्यनव्ययाऽरु-षोर्मोऽन्तोह्रस्वश्च । ३–२–१११ । इ. सू. मोऽन्तः । ) त्वयि विषये स्वहेतीः ( सातिहेतियूतिजूतिज्ञप्तिकीर्ति । ५–३–९४ । इ. सू. हेतिर्निपात्यते । ) स्वप्रहरणानि मोघाः निष्फला दृष्ट्वा । किं लक्षणा जगतां विश्वजनानां प्राणान् जीविता हरन्तीति ता ॥ ११ ॥

**मधुर्वयस्यो मदनस्य मूर्च्छां, मत्वा ममत्वाद्विषमां विषण्णः ।**
**तनोत्यपाचीपवनानखंड–श्रीखंडखंडप्लवनाप्तशैत्यान् ॥ १२ ॥**

(व्या०) मधुरिति ॥ वयस्यो (वयसातुल्यो वयस्यः । हृद्यपद्यतुल्यमूल्य-वश्यपथ्यवयस्य धेनुष्यागार्हपत्यजन्यधर्म्यम् । ७–१–११ । इ. सू. यप्रत्यया-न्तो वयस्यो निपात्यते ) मित्रं मधुर्वसन्तः मदनस्य ( नन्द्यादिभ्योऽनः । ५–१–५२ । इ. सू. मद्धातोः अनः मदयतीति मदनः ) कामस्य विषमां मूर्च्छां मत्वा ज्ञात्वा ममत्वात् मोहात् अपाच्याः दक्षिणदिशः पवनान् तनोति विस्तारयति । किं लक्षणो मधुः विषण्णः (गत्यर्थाऽकर्मक पिबभुजेः ५-१-११ । इ. सू. विपूर्वकसद्धातोः कर्तरिक्तः । सदोऽप्रतेः परोक्षायां त्वादेः । २–३–४४ । इ. सू. वेः परस्य सद्धातोः सस्य षः रदाऽमूर्च्छमदःक्तयोर्दस्य च । ४–२–६९ । इ. सू. तस्य दस्य च नकारः । रषृवर्णान्नोण एकपदेऽनन्त्य-स्यालचटतवर्गशसान्तरे । २–३–६३ । इ. सू. नस्य णः । तवर्गस्यश्चवर्गष्ट-वर्गाभ्यां योगे चटवर्गौ । १–३–६० इ. सू. द्वितीयनस्य ण । ) ग्लानः । कीदृशान्—पवनान् अखंडश्रीखंडखंडप्लवनाप्तशैत्यान् अखंडानि अविच्छिन्नानि च तानि श्रीखंडानां चन्दनानां खंडानि वनानि च तेषु प्लवनं गमनं तेन आप्तं शैत्यं यैस्ते तान् ॥ १२ ॥

**मत्वा मघो र्मित्रशुचा प्रियस्या–मनस्यमाक्रन्दत यद्वनश्रीः ।**
**तदत्र किं कज्जलविज्जुलाश्रु–कणाः स्फुरन्त्युच्छलिवालिदंभात ॥१३॥**

(व्या०) मत्वेति ॥ यद्वनश्री यस्य वनं यद्वनं तस्यश्रीः लक्ष्मीः आक्रन्दत तारस्वरेण विललाप । किं कृत्वा प्रियस्य वल्लभस्य मधोर्वसन्तस्य मित्रस्य शुक् ( क्रुत्सम्पदादिभ्यः क्विप् । ६-३-११४ इ. सू. स्त्रियां भावे क्विप् ) शोकः तथा आमनस्यं दुःखं मत्वा ज्ञात्वा तत् तस्मात् कारणात् अत्र अस्यां लोचनश्रियां उल्ललिताश्चते अलयश्च भ्रमरास्तेषा दंभो मिषस्तस्मात् उच्छलद्भमरभिषात् किं कज्जलेन अञ्जनेन विञ्जुलानि कलुषितानि चतानि अश्रूणि च तेषां कणा बिन्दवः स्फुरन्ति प्रसरन्ति ॥ १३ ॥

**ये सेवकाश्चास्य पिकाः स्वभर्तु-र्दुःखाग्निनातेऽप्यलभन्तदाहम् ।**
**किमन्यथा पल्लवितेऽपि कक्षे, तदंगमंगारसमत्वमेति ॥ १४ ॥**

(व्या०) ये इति ॥ च अन्यत् अस्य मधोर्वसन्तस्य सेवका (णकतृचौ । ५-१-४८ । इ. सू. सेव् धातोः कर्तरिणकः ।) ये पिकाः कोकिलावर्तन्ते । तेऽपि स्वभर्तुः वसन्तस्य दुःखाग्निना दाह (भावाऽकर्त्रोः । ५-३-१८ । इ. सू दह्धातोर्भावे घञ्) मलभन्तप्राप्तवन्तः । अन्यथा (प्रकारे था । ७-२-१०२ । इ. सू. अन्यशब्दात् प्रकारेथा । अन्येन प्रकारेण इति अन्यथा ) पल्लवितेऽपि कक्षे वने तेषां कोकिलानां अंगं शरीरं अंगारस्य समत्वं तत् अंगारसादृश्यं किं कथमेति इण्धातोः कर्तरिवर्तमाना प्राप्नोति ॥ १४ ॥

**तनोषि तत्तेषु न किं प्रसादं, न सांयुगीनायदमीत्वयीश ।**
**स्याद्यत्र शक्तेरवकाशनाशः, श्रीयेत शूरैरपि तत्र साम ॥ १५ ॥**

(व्या०) तनोषि इति ॥ हे ईश तत् तस्मात कारणात् त्वं तेषु यौवनादिषु प्रसादं किं न तनोषि न करोषि । यत् यस्मात्कारणात् अमी यौवनादयस्त्वयि सांयुगीनाः (संयुगे साधवः सांयुगीनाः प्रतिजनादे रीनञ् ७-१-२० । इ. सू. संयुगशब्दात् साधौ अर्थे ईनञ् ) रणे साधवो न वर्तन्ते । यत्र शक्तेः सामर्थ्यस्य अवकाशस्य नाशः तत्र शूरैः सुभटैरपि साम साम्यगुणः श्रीयेत आश्रीयेत ॥ १५ ॥

**त्वदागमांभोनिधितः स्वशक्त्या-ऽऽदायोपदेशांबुलवान् गभीरात् ।**
**घना विधास्यन्त्यवनीवनीस्थान्, विनेयवृक्षानभिवृष्य साधून् ॥ ७ ॥**

(व्या०) त्वदागमेति ॥ घना लोका मेघा वा गभीरात् त्वदागमांभोनिधितः (उपसर्गाद्दः किः । ५ । ३ । ८७ । इ. सू. निपूर्वक धाधातोः किः । इडेत् पुसि चातोर्लुक् । ४ । ३ । ९४ । इ. सू. धाधातो राकारलोपः । अहीयरुहोऽपादाने । ७ । २ । ८८ । इ. सू. पञ्चम्यर्थे तसु प्रत्ययः । अधण् तस्वाद्याः शसः । १ । १ । ३२ । इ. सू. अव्ययसंज्ञा । नाम्न प्रथमैक द्विबहु । २ । २ । ३१ । इ. सू. स्यादिः । अव्ययस्य । ३ । २ । ७ । इ. सू. अव्ययात् स्यादेर्लुप् ) त्वदीयागमसमुद्रात् उपदेश एव अम्बुलवास्तान् स्वशक्त्या स्वस्य शक्तिस्तया स्वसामर्थ्येन आदाय गृहीत्वा विनेयाः शिष्या एव वृक्षास्तरवस्तान् अभिवृष्य सिक्त्वा साधून् निर्ग्रन्थान् मनोज्ञान् वा करिष्यन्ति । किं लक्षणान् अवनीवनीस्थान् अवनी पृथ्वी एव वनी महावनं तस्यां तिष्ठन्तीति तान् । मेघाः समुद्रात् जलं गृह्णन्ति इति लोकरूढिः ॥ ७ ॥

**भवद्वयेऽप्यक्षयसौख्यदाने, यो धर्मचिन्तामणिरस्त्यजिह्मः ।**
**प्रमादपाटच्चरलुंट्यमानं, त्वमेव तं रक्षितु मीशितासे ॥ ८ ॥**

(व्या०) भवद्वय इति । हे नाथ यो धर्मचिन्तामणिः धर्म एव चिन्तामणिः चिन्तारत्नं भवद्वये भवयोर्जन्मनोर्द्वयं (द्वित्रिभ्या मयट् वा । ७ । १ । १५२ । इ. सू. त्रिशब्दात् वा अयट् ।) तस्मिन् जन्मद्वयेऽपि अक्षयसौख्यदाने नास्ति क्षयो यस्य तत् तत् च तत् सौख्यं च तस्य दानं तस्मिन् अविनश्वर सुखप्रदाने अजिह्मः सोद्यमोऽस्ति । प्रमाद (भावाऽकर्त्रोः । ५ । ३ । १८ । इ. सू. प्रपूर्वक मद् धातोर्घञ् ञ्णिति । ४ । ३ । ५० । इ. सू. उपान्त्य वृद्धिः) एव पाटच्चर (पाटयन् चरतीति पाटच्चरः पृषोदरादित्वात् सिद्धः) श्चौरस्तेन लुंट्यमानं तं धर्मचिन्तामणिं रक्षितुं पालयितुं त्वमेव ईशितासे समर्थो भविष्यसि ॥

**तद्गेहि धर्मद्रुमदोहदस्य, पाणिग्रहस्यापि भवत्वमादिः ।**
**न युग्मिभावे तमसीव मग्नां, महीमुपेक्षस्व जगत्प्रदीप ॥ ९ ॥**

(व्या०) तदिति ॥ हे नाथ तत् तस्मात् कारणात् त्वं पाणिग्रहस्यापि (व्यञ्जनाद्घञ् । ५-३-१३२ । इ. सू. पाणिपूर्वकगृह्धातोराधरिघञ् पाणिर्गृह्यति अस्मिन् इति । ) विवाहस्यापि आदिः प्रथमो भव । किं विशिष्टस्य पाणिग्रहस्य गेहिधर्मद्रुमदोहदस्य गेहिनः गृहस्थस्य धर्मं स एव द्रुमः वृक्षः तस्य दोहदं तस्य वृक्षा यथा दाडिममुख्या. धूमपानादिदोहदेन पूरितेन सश्रीकाः सफलाः स्यु तथा अत्रापि ज्ञेयम् । हे जगत्प्रदीप (अच् । ५-१-४९ । इ. सू. पूर्वकदीपधातोरच्) तमसीव अंधकारे इव युग्मिभावे युगलिधर्मे मग्नां ब्रुडितां महीं पृथ्वीं न उपेक्षस्व मा उपेक्षां कुरु ॥ ९ ॥

**वितन्वता केलिकुतूहलानि, त्वया कृतार्थीकृतमेव बाल्यम् ।**
**विना विवाहेन कृपामपश्य-न्नवाद्य न ग्लायति यौवनं किम् ॥१९॥**

(व्या०) वितन्वतेति ॥ हे नाथ केलिकुतूहलानि केलिश्च जलक्रीडा कुतूहलानि च गीतनृत्यनाटकादीनि कुर्वता त्वया बाल्य (पतिराजान्तगुणाङ्गराजादिभ्य कर्मणि च । ७-१-६० । इ. सू. बालशब्दात् भावेऽर्थेव्यण्) बालत्वं कृतार्थीकृतमेव सफलीकृतमित्यर्थः । अद्य संप्रति यौवनं (युवादेरण् । ७-१-६७ इ. सू. युवन् शब्दात् भावेऽर्थेऽण्) यूनो भावः यौवनं किं न ग्लायति न दूयते अपि तु ग्लायत्येव किं कुर्वत् यौवनं विवाहेन विना तव कृपामपश्यत् ॥१०॥

**दृष्ट्वा जगत्प्राणहतोऽपि सर्व-सहे स्वदेतीस्त्वयि नाथ मोघाः ।**
**अनंगतां कामभटोऽस्य मुख्यः, सखा विषादानुगुणां दधाति ॥११॥**

(व्या०) दृष्ट्वेति ॥ हे नाथ कामभटोऽपि कंदर्पयोधोऽपि विषादानुगुणां विषादस्य अनुगुणां योग्यां अनंगतां अंगरहितत्वं दधाति किं विशिष्टः कामभटः अस्य यौवनस्य मुख्यः अग्रणी. सखामित्रं किं कृत्वा सर्वंसहे सर्वंसहति (सर्वात्

**शठौ समेतौ दृढसख्यमेतौ, तारुण्यमारौ कृतलोकमारौ ।**
**भेत्तुं यतेतां मम जातु चित्त–दुर्गं महात्मन्निति मास्म मंस्थाः ॥१६॥**

(व्या०) शठाविति ॥ हे महात्मन् त्वमिति मास्म मंस्था मा जानीहि इतीति किं एतौ तारुण्यमारौ तारुण्यं (पति राजान्तगुणाङ्गराजादिभ्यः कर्मणि च । ७–१–६० । इ. सू. तरुणशब्दात् भावे कर्मणि च ट्यण् तरुणस्य भावस्तारुण्यम् । ) च मारश्च यौवनकंदर्पौ जातु कदाचिदपि मम चित्तमेवदुर्ग- ( सुगदुर्गमाधारे । ५–१–१३२ । इ. सू. दुर्पूर्वकगम् धातो राधारे ड । डित्यन्त्यस्वरादेः इ. सू. टिलोप दुःखेन गम्यते अस्मिन् इति दुर्गः ।) स्तं भेत्तुं यतेतामुपक्रामत । किं लक्षणौ तारुण्यमारौ शठौ धूर्तौ दृढसख्यं ( सखिवणिग् दूताद्यः । ७–१–६३ । इ. सू. सखिशब्दान् भावे कर्मणि च यः अवर्णेवर्ण- स्य । ७–४–६८ । इ. सू. सखिशब्दस्येकारस्य लोपः ) गाढमैत्र्यं यथा भवति तथा समेतौ मीलितौ कृतलोकमारौ कृत लोकानां मारः संसारभ्रमणरूपः याभ्यां तौ ॥ १६ ॥

**हृत्वा विवेकांबकबोधमंधी–भूतं जगत्पातयदाधिगर्ते ।**
**तावत्तत्र ज्ञानविभाकरस्य, तन्वीत तारुण्यतमो न मोहम् ॥ १७ ॥**

(व्या०) हृत्वेति ॥ हे नाथ तावत् तारुण्यतम तारुण्यं यौवनमेव तमः अंधकारः यौवनांधकारः तव ज्ञानमेव विभाकरः (संख्याऽहर्दिवा विभानिशाप्रभा- भाश्चित्र–ट्टः । ५–१–१०२ । इ. सू. विभापूर्वककृग्धातोर्ट विभां करोतीति विभाकरः ) सूर्यः तस्य ज्ञानरूपसूर्यस्य मोहं ( भावाऽकर्त्रोः । ५–३–१८ । इ. सू. मुह्धातोः घञ् मोहनं मोह. ।) न तन्वीत न कुर्वीत । किं कुर्वत् तारु- ण्यतमः विवेकांबकबोधं विवेक एव अंबकं नेत्रं तस्य बोधं ज्ञानं विवेकलोचनज्ञानं हृत्वा अंधीभूतं जगद्विश्वं आधेः ( उपसर्गादः किः । ५–३–८७ । इ. सू. आपूर्वकधाधातोः कि प्रत्यय इडेत् पुसिचातोलुक् । ४–३–९४ । इ. सू. धाधातोराकारलोपः । ) असमाधेः गर्ते विवरे पातयत् यथा गर्ताशब्द तथा गर्तशब्दोऽपि ज्ञेयः ॥ १७ ॥

**ब्रह्मास्त्रभाजः कुसुमास्त्रयोधी, मारोऽपि किं ते घटते विरोधी ।**
**विरोत्स्यते वा खलु तद्वहुक्त्वा, भोक्ता बलिस्पर्धफलं स्वयं सः ॥१८॥**

(व्या०) ब्रह्मास्त्रेति ॥ हे नाथ मारोऽपि कंदर्पोऽपि ते तव विरोधी (अतोऽनेकस्वरात्। ७-२-६ इ. सू. विरोधशब्दात मत्वर्थे इन् प्रत्ययः विरोधोऽस्यातीति विरोधी । ) शत्रुः कथं घटते अपि तु न घटते । किं विशिष्टस्य तव ब्रह्म ब्रह्मज्ञानं तदेव अस्त्रं शस्त्रं तद् भजतीति तस्य (भजो विण्। ५-१-१४६ । इ. सू. भज्धातोः कर्तरि विण् । ञ्णिति । ४-३-५० । इ. सू. उपान्त्यवृद्धि । ) ब्रह्मास्त्रशब्देन अस्खलितं शस्त्र मुच्यते । उक्तं च 'केनापि स्खलयितुं यन्न, शक्यते क्वापि सर्वथा । तद्ब्रह्मास्त्रंपरिज्ञेयं यथा चक्रं हि चक्रिणः ॥ १ ॥ किं लक्षणो मारः कुसुमं पुष्पं तदेव अस्त्रं तेन युध्यते इति कुसुमास्त्रयोधी (अजाते शीले । ५-१-१५४ । इ. सू. शीलेऽर्थे युध् धातोः णिन् प्रत्ययः । ) वा अथवा विरोत्स्यते यदि विरोधं करिष्यति तद्बहु उक्त्वा खलु पूर्यताम् । स मारः बलिस्पर्धफलं बलवता सह स्पर्धायाः फलं स्वयं भोक्ता-भोक्ष्यति । यथास्पर्धाशब्दः तथा स्पर्धशब्दोऽपि ज्ञेयः ॥ १८ ॥

**यया दृशा पश्यसि देव रामा, इमा मनोभूतरवारिधाराः ।**
**तां पृच्छ पृथ्वीधरवंशवृद्धौ, नैताः किमंभोधरवारिधाराः ॥ १९ ॥**

(व्या०) ययेति ॥ हे देव यया दृशा (भ्यादिभ्यो न वा ५-३-११५ इ. सू. दृश्धातोः स्त्रियां भावे क्विप् ) अभिप्रायरूपया इमा रामाः स्त्रियः-मनसि हृदये भवतीति मनोभूः ( क्विप् ५-१-१४८ । इ. सू. भूधातोः क्विप् । ) कंदर्पस्तस्य तरवारिः खड्गः तस्य धारास्ताः कंदर्पखड्गधाराः पश्यसि । तां दृशं पृच्छ एताः स्त्रियः पृथ्वीधरवंशवृद्धौ पृथ्वीधराणां राज्ञां वंशाः अन्वयाः । पक्षे पर्वतानां वंशाः तेषां वृद्धौ वृद्ध्यर्थं किं अंभोधरवारिधाराः अंभोधराणां (आयुधादिभ्यो धृगोऽदंडादेः ५-१-९४ । इ. सू. धृग्धातोरच् नामिनोगुणोऽक्ङिति । ४-३-१ इ. सू. अन्त्यऋकारस्य गुणः । ) वारिणः धाराः मेघजलधारा न वर्तन्ते अपि तु वर्तन्ते एव ॥ १९ ॥

**नयस्य वश्यः किमु संग्रहस्य, स्त्रैणं चलं ध्यायसि सर्वमीश ।**
**कोशातकी कल्पलते लतासु, दृष्ट्वा च विश्वं व्यवहारसारम् ॥ २० ॥**

(व्या०) नयस्येति ॥ हे ईश त्वं संग्रहनयस्य वश्यः (हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्य धेनुष्यागार्हपत्यजन्यधर्म्यम् ७–१–११ इ. सू. वश्यशब्दोयान्तो निपातः वशं गतो वश्यः । ) सन् सर्वं स्त्रैणं ( षष्ठ्याः समूहे । ६–२–९ । इ. सू. समूहेऽर्थे स्त्रीशब्दात् प्राग्वतः स्त्रीपुंसान्नञ् स्नञ् । ६–१–२५ । इ. सू. नञ् । वृद्धिःस्वरेष्वादेर्ञ्णितितद्धिते । ७–४–१ । इ. सू. आदिस्वरस्य वृद्धिः) स्त्रीसमूहं चलं चंचलं किमु ध्यायसि कथं ध्यायसि यथा किं शब्दस्तथा किमुशब्दोऽप्यस्ति । नैगम १ संग्रह २ व्यवहार ३ ऋजुसूत्र ४ शब्द ५ समभिरूढ ६ एवंभूतेषु ७ सप्तसु नयेषु संग्रहनयलक्षणमिदमस्ति । सद्रूपतानतिक्रान्तं स्वस्वभावमिदं जगत् । सत्त्वरूपतया सर्वं संगृह्णन् संग्रहोमतः ॥१॥ यत् सर्वा अपि स्त्रियः चपलस्वभावा इति । त्वं लतासु वल्लीषु कौशातकी च कल्पता च कौशातकी कल्पलते सोटिकाकल्पवल्ल्यौ दृष्ट्वा विश्वं व्यवहारसारं (सर्तेः स्थिरव्याधिवलमत्स्ये । ५–३–१७ इ. सू. सृधातोः कर्तरि घञ् ) अत्र जानीहि 'अञ्चूगतौ' परं सर्वे गत्यर्था धातवो ज्ञानार्था ज्ञेयाः । एवं स्त्रियो हि काश्चिद्भव्याः काश्चिन्न भव्याः ॥ व्यवहारनयलक्षणमिदमस्ति—व्यवहारस्तु तामेव प्रतिवस्तुव्यवस्थिताम् । तथैव दृश्यमानत्वाद्व्यापरयति देहिनः ॥ १ ॥ २० ॥

**किं शंकसे दारपरिग्रहेण, विरागतां निर्वृतिनायिकायाः ।**
**प्रभुः प्रभुतेऽप्यवरोधने स्या—न्नागः पदं लुम्पति न क्रमं चेत् ॥२१॥**

(व्या०) किमिति ॥ हे नाथ त्वं दाराणां नारीणां परिग्रहस्तेन दारपरिग्रहेण कलत्रादरेण (न्यायावायाध्यायोद्यावसंहारावहाराधारदारजारम् । ५-३-१३४ इ. सू. दारशब्दो घञन्तो निपातः ।) निर्वृतिरेव (स्त्रियांक्तिः । ५–३–९१ । इ. सू. निरपूर्वकवृधातोः स्त्रियां भावेक्तिः ।) नायिका (नयतीति नायिका णक तृचौ । ५–१–४८ । इ. सू. नीधातोः णक प्रत्ययः आत् । २–४–१८ ।

इ. सू. आप् अस्या यत्तत् क्षिपकादीनाम् । २–४–१११ । इ. सू. अस्य इः । ) तस्याः मुक्तिस्त्रियाः विरागतां नीरागत्वं किं शंकसे । प्रभुः स्वामी प्रभुतेऽपि प्रचुरेऽपि अवरोधने अन्तःपुरे आगसामपराधानां पदं स्थानं अपराधस्थानं न भवति चेत् यदि क्रमं न लुम्पति । सांप्रतं पाणिग्रहणं कुरु क्रमेण पश्चात्तामपि भजेरिति भावः ॥ २१ ॥

**अद्यापि नाथः किमसौ कुमारो, निष्कन्यकं किं वरिवर्त्यवन्याम् ।**
**भृत्योऽतरंगोऽस्य हरिर्विचेता, यायावरं वेत्ति न यौवनं यः ॥ २२ ॥**
**इत्थं मिथः पार्षदनिर्जराणां, कथाप्रथाः कर्णकटूर्निपीय ।**
**तेषां प्रदाने प्रबलोत्तरस्य, दरिद्रितोऽहं त्वयि नायकेऽपि ॥ २३ ॥**
**युग्मम् ॥**

(व्या०) अद्यापीति । हे नाथ अहं त्वयि नायकेऽपि अधिपतौ सति तेषां सभ्यदेवानां प्रबलोत्तरस्य प्रदाने दरिद्रितः दरिद्रो जातः किं कृत्वा इत्थं अमुना प्रकारेण पार्षदाश्चते (पर्षदि साधवः पार्षदाः पर्षदोण्यणौ । ७-१-१८ । इ. सू. साधौ अण् वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते । ७–४–१ । इ. सू. आदिस्वरवृद्धिः ।) निर्जराश्च ( प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानकान्ताद्यर्थाः प्रथमाद्यन्तैः । ३–१–४७ । इ. सू. समासः जराया: निष्क्रान्ताः निर्जराः । पार्षदाश्चते निर्जराश्च विशेषणं विशेष्यणैकार्थं कर्मधारयश्च । ३–१–९६ । इ. सू. समासः कर्मधारयः ) तेषां पार्षदनिर्जराणां सभ्यदेवानां मिथः परस्परं कर्णयोः श्रोत्रयोः कटवस्ताः कर्णकटूः कथानां (भीषिभूषिचिन्तिपूजिकथिलुम्बिचर्चिस्पृहितोलिदोलिभ्यः । ५–३–१०९ । इ. सू. कथिधातोः अप्रत्ययः आत् इ. सू. आप् ) प्रथाः ( षितोऽङ् । ५–३–१०७ । इ. सू. प्रथधातोः अङ् आत् इ. सू. आप् ) कथाप्रथास्ताः निपीय पीत्वा इत्थमिति किं अद्यापि असौ नाथः स्वामी किं कुमारः अपरिणीतः किमवन्यां पृथिव्यां निष्कन्यकं कन्यकानाममावो वरिवर्ति । (व्यञ्जनादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ् वा । ३–४–९ । इ. सू. वृत्धातोर्यङ्प्रत्ययः सन्यङश्च । ४–१–३ । इ. सू. द्वित्वं बहुलं लुप् ।

३-४-१४। इ. सू. यङो लुप्। रिरौ च लुपि। ४-१-५६। इ. सू. पूर्वस्य रिः लघोरुपान्त्यस्य। ४-३-४। इ. सू. उपान्त्यगुणे वरिवर्तृति इति धुटो धुटिस्वे वा १-३-४८ इ सू. तलोपे वरिवर्ति इति जातम्) अस्य भगवतः अन्तरंगः भृत्यः (भृगोऽसंज्ञायाम्। ५-१-४५। इ. सू. भृगधातोः क्यप्। ह्रस्वस्य तः पित्कृति इ. सू. तोन्तः।) सेवकः हरिरिन्द्रः किं विचेताः अचेतनो वर्तते यो हरिरस्य स्वामिनो यायावरं गत्वरं यौवनं न वेत्ति न जानाति यायावरः। यातेर्यङन्तात् शीलादिसदर्थेवरप्रत्ययः इति सूत्रेण॥ यायावरमिति निपातः॥ २२॥ २३॥ युग्मम्॥

**वयस्यनंगस्य वयस्य भूते, भूतेश रूपेऽनुपमस्वरूपे।**
**पदींदिरायां कृतमंदिरायां, को नाम कामे विमनास्त्वदन्यः॥२४॥**

(व्या०) वयसीति॥ नाम इति कोमलामंत्रणे हे भूतेश भूतानां प्राणिनां इशः भूतेशः तस्य संबोधने हे भूतेश त्वदन्यः त्वत्तः परः कः पुमान् कामे कंदर्पे विमनाः विमुखो वर्तते। क सति वयसि यौवने अनंगस्य कामस्य वयस्य (हृद्यपद्यतुल्यमूल्यवश्य। ७-१-११। इ. सू. यान्तो निपातः) भूते मित्रसदृशे सति पुनः रूपे अनुपमं स्वरूपं यस्य तत् तस्मिन् सर्वोत्तमस्वरूपे सति पुनः इंदिरायां लक्ष्म्यां पदि चरणे कृतं मन्दिरं स्थानं यया सा तस्यां सत्यां त्वच्चरणयोर्लक्ष्मीः वसतीत्यर्थः॥ २४॥

**जाने न किं योगसमाधिलीन, विषायते वैषयिकं सुखं ते।**
**तथापि संप्रत्यनुषक्तलोक, लोकस्थितिं पालय लोकनाथ॥ २५॥**

(व्या०) जाने इति॥ हे योगसमाधिलीन अहं एवं किं न जाने अपि तु जाने। ते तव वैषयिकं विषयनिमित्तं सुखं विषायते (क्यङ्। ३-४-२६। इ. सू. विषशब्दात् आचारे क्यङ्। ङितः कर्तरि। ३-३-२२। इ. सू. क्यङो ङित्वात् आत्मनेपदम्) विषवदाचरति। तथापि संप्रति अधुना हे अनुषक्तः लोक अनुषक्तः आश्रितः लोको जनो येन सः तस्य संबोधने लोको विश्वं

तस्य नाथस्तस्य संबोधनं हे लोकनाथ लोकानां जनानां स्थितिः पाणिग्रहणादिरूपा लोकस्थितिः ( स्था वा । ५-३-९६ । इ. सू. स्थाःधातोः क्तिः दोषोमास्थ इः ४-४-११ । इ. सू. स्थाधातोः इः । ) तां मर्यादां पालय ॥ २५ ॥

**त्वयैव याऽभूत्सहभूरभूमि-स्तमोविलासस्य सुमंगलेति ।**
**राकेव सा केवलभास्वरस्य, कलाभृतस्ते भजतां प्रियात्वम् ॥ २६ ॥**

(व्या०) त्वयेति ॥ हे नाथ या सुमङ्गला त्वयैव सहभूः (सह भवतीति सहभू. क्विप् । ५-१-१४८ । इ. सू. भूधातोः क्विप् ) सहजन्मा अभूत् किं विशिष्टा सुमङ्गला तमसः पापस्य विलासो (भावाऽकर्त्रोः । ५-३-१८ । इ. सू. विपूर्वकलसधातोर्भावे घञ् ) विस्तारस्तस्य पापविस्तारस्य अभूमिरस्थानं निष्पापेत्यर्थः । सा सुमङ्गला ते तव प्रियात्वं कलत्रत्वं भजताम् । किं विशिष्टस्य ते केवलभास्वरस्य (स्थेशभासपिसकसो वरः । ५-२-८१ । इ. सू. भासधातोः वरप्रत्ययः ) सकलजगदुद्योतकस्य । का इव राका इव पूर्णिमा इव यथा राका पूर्णिमा कलाभृतः (कलां बिभर्तीति कलाभृत् क्विप् । ५-१-१४८ । इ. सू. क्विप् ) चन्द्रस्य प्रियात्वं भजते सोऽपि भास्वरोभवेत् राकापि तमोविलासस्य अभूमिर्भवति ॥ २६ ॥

**अवीवृधद्यां दधदंकमध्ये, नाभिः सनाभिर्जलधेर्महिम्ना ।**
**प्रिया सुनन्दापि तवास्तु सा श्री-र्हरेरिवारिष्टनिषूदनस्य ॥ २७ ॥**

(व्या०) अवीवृधदिति ॥ हे नाथ नाभिर्यां सुनन्दां अंकस्य मध्यं तस्मिन् अंकमध्ये उत्संगोपरि अवीवृधत् वर्धयति स्म । किं लक्षणो नाभिः महतो भावो महिमा तेन महिम्ना (पृथ्वादेरिमन् वा ३-१-५८ । इ. सू. महत् शब्दात् इमन् प्रत्ययः त्र्यन्तस्वरादेः । ७-४-४३ । इ. सू. इमनि परे महत् शब्दस्य अत् अंशस्य लोपः) विस्तारेण जलधेः (व्याप्यादाधारे । ५-३-८८ । इ. सू. जलपूर्वकधाधातोः किः इडेत् पुसिचातो लुक् । इ. सू. धाधातोराकारस्य लोपः । ) समुद्रस्य सनाभिः सदृशः । सा सुनन्दा तव प्रिया अस्तु । कस्येव हरेर्नारायणस्येव यथा हरेः श्रीः लक्ष्मीः प्रिया स्यात् । किं विशिष्टस्य तव हरेश्च

अरिष्टनिषूदनस्य ( नन्द्यादिभ्योऽनः ५-१-५२ । इ. सू. सूदिधातोः अनः ।) अरिष्टं विघ्नः पक्षे अरिष्टनामा दैत्यः तं निषूदयति विनाशयतीति तस्य। तस्मिन् समये हरिर्नास्तीति कथं तद्विशेषणं परं भाविनि भूतवदुपचारो भवति इति न्यायोऽत्र ज्ञेयः ॥ २७ ॥

**कन्ये इमे त्वय्युपयच्छमाने, जाने विमानैस्त्रिदिवेषु भाव्यम् ।**
**भूपीठसंक्रान्तसकान्तदेवै-रेकैकदौवारिकरक्षणीयैः ॥ २८ ॥**

(व्या०) कन्ये इति ॥ हे नाथ अहमेवं जाने त्वयि इमे सुमंगलासुनन्दे उपयच्छमाने परिणयति सति त्रिदिवेषु स्वर्गेषु विमानैः एकैकेन दौवारिकेण (स्त्रियां क्तिः ५-३-९१ । इ. सू. दिवूधातोः स्त्रियां भावे क्तिः ।) प्रतीहारेण रक्षणीयैः रक्षयितव्यैर्भाव्यम् । उपपूर्वो यमधातुः यमः स्वीकारे, इति सूत्रेणात्मनेपदी ज्ञेयः । किं विशिष्टैर्विमानैः भुवः पीठं भूपीठं महीतलं तस्मिन् संक्रान्ताः गताः सकान्ताः सकलत्राः देवा येषां तैः भूपीठसंक्रान्तसकान्तदेवैः ॥ २८ ॥

**अधौतपूतद्युतिवारिधौ ते, देहे सुरस्त्रीजनदक्शफर्यः ।**
**भ्रमन्तु लावण्यतरङ्गभंगि-प्रेङ्खोलनोद्वेलितकेलिरंगाः ॥ २९ ॥**

(व्या०) अधौत इति । हे नाथ तस्मिन्नवसरे सुराणां देवानां स्त्रियः तासां जनः समूहः तस्य दशो दृष्टयः ता एव शफर्यः मत्स्यः सुरस्त्रीजनदक्शफर्यः देवांगनादृष्टिरूपमत्स्यः ते तव देहे शरीरे भ्रमन्तु । शफर्यः समुद्रे भवन्तीत्याह किं विशिष्टे देहे अधौतपूतद्युतिवारिधौ अधौता पूता च द्युतिः ( तत्र नियुक्ते ६-४-७४ । इ. सू. द्वारशब्दात् नियुक्तेऽर्थे इकण् द्वारादेः ७-४-६ । इ. सू. द्वारशब्दे वकारात् औकारः अनुनासिके च छ्वः शूट् । ४-१-१०८ । इ. सू. दिवूधातोर्वकारस्य उट् इवर्णादेरस्वेस्वरे यवरेलम् । १-२-२१ इ. सू. इकारस्य यकारे । द्युतिरिति । ) तस्य वारिधिः ( व्याप्यादाधारे । ५-३-८८ । इ. सू. वारिपूर्वकधाधातोः क्तिप्रत्ययः इडेत् पुसि चातो लुक् ।

४ । ३ । ९४ । इ. सू. आकारलोपः) समुद्रस्तस्मिन् । किं लक्षणाः सुरस्त्री-जनदकृशफर्यः लावण्यतरङ्गभंगिप्रेंखोलनोद्वेलितकेलिरंगाः लावण्यस्य तरंगाः कल्लोलाः तेषां भंगयो विच्छित्तयः तासु प्रेंखोलनमान्दोलनं तेन उद्वेलिताः लक्षणया वर्द्धिताः केलिरंगा यासां ताः ॥ २९ ॥

**श्रीसार्व जन्यास्तव सार्वजन्या, देवा भवन्तः शुभलोभवन्तः ।**
**पुराकृत प्रौढतपः फलानां, विपक्त्रिमत्वं हृदि भावयन्तु ॥ ३० ॥**

(व्या०) श्रीसार्व ! इति । हे श्रीसार्व हे श्रीसर्वज्ञ ! देवाः तव जन्याः (हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्यधेनुष्यागार्हपत्यजन्यधर्म्यम् । ७ । १ । ११ । इ. सू. य प्रत्ययान्तो निपात्यते) जान्ययात्रिकाः भवन्तः सन्तः पुराकृतप्रौढतपः फलाना पुराकृतानि च तानि प्रौढतपांसि च तेषां फलानि तेषां विपक्त्रिमत्वं (ड्वितस्त्रिमक् तत्कृतम् । ५ । ३ । ८४ । इ. सू. विपूर्वक पच्धातोस्त्रिमक् प्रत्यय. विपाकेन निवृतं विपक्त्रिमं तस्य भावो) प्राप्तपरिपाकत्वं हृदि मनसि भावयन्तु चिन्तयन्तु । भूण् अवकल्कने[1] इति धातोः प्रयोगः । किं लक्षणाः देवाः सार्वजन्याः सर्वेषु जनेषु साधवः सार्वजन्याः (सर्वजनाण्ण्येन जौ । ७-१-१९ इ. सू. साध्वर्थे सर्वजन शब्दात् ण्य प्रत्ययः । वृद्धिः स्वरेष्वादेञ्णिति तद्धिते । ७ । ४ । १ ।) शुभलोभवन्तः शुभे मंगलादिकार्ये लोभसंयुक्ताः ॥ ३० ॥

**शचीमुखा अप्सरसो रसोर्मि-प्रक्षालनापास्तमलानतु त्वाम् ।**
**तदा ददाना धवलान्सुवाचा-माचार्यकं बिभ्रतु मानवीषु ॥ ३१ ॥**

(व्या०) शचीमुखा इति ॥ हे नाथ ! तदा तस्मिन्नवसरे शची मुखं प्रधानं यासां ता शचीमुखा अप्सरसः इन्द्राणी प्रमुखा देवांगना मानवीषु (मनोरिमाः मानव्यस्तासु तस्येदम् । ६ । ३ । १६० । इ. सू. मनु शब्दात् इदमर्थे अण् । अस्वयं भुवोऽव् । ७ । ४ । ७० । इ. सू. उकारस्यावा देशः । अणञेयेकण् नञ् स्नञ् टिताम् । २ । ४ । २० । इ. सू. ङी ।)

[1] अवकल्कन मिश्रीकरण इति श्रीमन्तो हेमचन्द्रसूरयः, चिन्तन इत्याह काश्यपः पुरुषकारे तन्मतानुसारेण इदम् ॥

ऽपु सुवाचां शोभनवाणीनां आचार्यकं आचार्यकर्म बिभ्रतु धारयन्तु । किं कुर्वाणाः शचीमुखाः त्वां अनु पश्चात् धवलान् धवलमङ्गलानि ददानाः (ददते इति ददानाः शत्रानशावेष्यति तु सस्यौ । ५ । २ । २० । इ. सू. दाधातो-रानश् हवः श्चिति । ४-१-१२ । इ. सू. दाधातोर्द्विर्भावः ह्रस्वः । ४-१-३९ इ. सू. पूर्वस्य ह्रस्वः) त्वामनु इति भागिनि च प्रतिपर्यनुभिः इ. सू. द्वितीया । किं लक्षणान् धवलान् रसः शृंगारादिः तस्य ऊर्मयः कल्लोलाः तैः प्रक्षालनं तेन अपास्तो मलो येषां तान् शृङ्गारादि रसकल्लोलप्रक्षालनेन निरस्तमलान् ॥३१॥

**स्वरंगणेऽकारि चिरं स्वरंगा-द्यो रंभया नृत्यपरिश्रमः प्राक् ।**
**अग्रे-भवत्संभविता तदानी-मभ्यासलभ्या फलसिद्धिरस्य ॥ ३२ ॥**

(व्या०) स्वरिति । रंभया रंभानाम्न्या देवांगनया स्वरंगणे स्वर्गांगणे स्वस्य रंगः स्वरंगस्तस्मात आत्मीयोल्लासात् यः नृत्यस्य नर्तितुं योग्यं (ऋदु-पान्त्यादकृपिचृदचः । ५ । १ । ४१ । इ. सू. नृत् धातोः क्यप् । ) परि-श्रमः प्राक् पूर्वं चिरं चिरकालमकारि कृतः । अस्य श्रमस्य फलस्य सिद्धिः फलसिद्धिः तदानीं ( सदाऽधुनेदानींतदानीमेतर्हि । ७ । २ । ९६ । इ. सू. तदानीं निपातः ) तस्मिन् पाणिग्रहणक्षणे अग्रेभवत् भवतः अग्रे अग्रेभवत् संभविता भविष्यति किं लक्षणा फलसिद्धिः अभ्यासेन लभ्या अभ्यासलभ्या अभ्यासप्राप्या ॥ ३२ ॥

**त्वत्तः प्रभोः स्वासहनात्पलाय्य, रागः श्रितस्तुंबरुनारदादीन् ।**
**गुणावलीगानमिषेण देव, तदा तदास्यात्तव संगसीष्ट ॥ ३३ ॥**

(व्या०) त्वत्तः इति । हे देव रागस्तदा तस्मिन्नवसरे तदास्यात् तेषा-मास्यं मुखं तस्मात् तुंबरुनारदादीनां मुखात् गुणावलीगानमिषेण गुणाना-मावल्यः पंक्तयः तासां गानं तस्य मिषेण निमित्तेन तव संगसीष्ट तव संगतो भूयात् । किं विशिष्टो रागः स्वासहनात् स्वस्य निजस्य असहनः शत्रुस्तस्मात् एवं विधात् प्रभोः समर्थत्वात् ततः पलाय्य (प्राक् काले । ५ । ४ । ४७ ।

इ. सू. परापूर्वक अय् धातोः क्त्वा प्रत्ययः । अनञः क्त्वो यप् । ३-२-१५४ इ. सू. क्त्वो यबादेशः । उपसर्गस्यायौ । २ । ३ । १०० । इ. सू. अय् धातौ परे परः उपसर्गस्य र लकार ) पलायनं कृत्वा तुंबरुनारदादीन् श्रितः आश्रित । अत्र शब्दच्छलं ज्ञेयम् । रागो द्वेषसहचारी श्रीरागादिर्वा तुंबरुनारदौ यदा त्वदग्रे गीतं गास्यतस्तदा सोऽपि रागस्तव गोचरो भविष्यति विवाहाद्युत्सवे परस्पर सान्निध्यं ते इति भावः ॥ ३३ ॥

**एवं विवाहे तव हेतवः स्यु-रन्येऽपि भावाभुवनप्रसत्तेः ।**
**यथोचितं तत्प्रविधेहि धीम-न्नितीरयित्वा विरराम वज्री ॥ ३४ ॥**

(व्या०) एवमिति ॥ हे नाथ! एवममुना प्रकारेण अन्येऽपि भावा विवाहसत्काः तव विवाहे भुवनप्रसत्तेः लक्षणया त्रिभुवने प्रसत्तिः सौख्यं तस्याः हेतवः कारणानि स्युः । तत् तस्मात् कारणात् हे धीमन् (तदस्यास्त्यस्मिन्निति मतुः । ७ । २ । १ । इ. सू. धीशब्दात् मतुः । ) धीरस्ति अस्येति धीमान् तत्संबोधने हे धीमन् यथोचितं यथायोग्यं प्रविधेहि कुरु । वज्री (अतोऽनेक स्वरात् । ७ । २ । ६ । इ. सू. मत्वर्थे वज्र शब्दात् इन् । ) इन्द्रः इति पूर्वोक्तं ईरयित्वा कथयित्वा विरराम निवृत्तः । रम् धातुः विपूर्वकः 'व्याङ्परे रमः' इति सूत्रेण परस्मैपदी स्यात् अन्यथा तु आत्मनेपदी ज्ञेयः ॥ ३४ ॥

**स्वं भोगकर्माथ विपाककाल्यं, जानन्नजोषिष्ठ जिनः स जोषम् ।**
**अतात्त्विके कर्मणि धीरचित्ताः, प्रायेण नोत्फुल्लमुखी भवन्ति ॥३५॥**

(व्या०) स्वमिति ॥ अथानन्तरं स भगवान् जोषं मौनमजोषिष्ठ असेविष्ठ किं कुर्वन् भगवान् स्वं भोगकर्म भोगस्य कर्म तत् विपाककाल्यं विपाककालप्राप्तं विपाककाले साधु तत्र साधौ इति सूत्रेण य प्रत्यये विपाक-काल्यमिति स्यात् । तत् कर्म जानन् । धीरं चित्तं येषां ते धीरचित्ताः गंभीरा नरा. अतात्त्विके परमार्थरहिते कर्मणि कार्ये प्रायेण न उत्फुल्लमुखी भवन्ति प्रहसितवदना न भवन्ति उत्फुल्लं मुखं येषां ते उत्फुल्लमुखाः न उत्फुल्लमुखाः

अनुत्फुल्लमुखाः अनुत्फुल्लमुखाः उत्फुल्लमुखाः यथा संपद्यमानाः भवन्तीतिच्व्यर्थे (कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्त्वे च्विः । ७ । २ । १२६ । इ. सू. उत्फुल्ल शब्दात् च्वि प्रत्ययः । इश्च्वाववर्णस्याऽनव्ययस्य । ४ । ३ । १११ इ. सू. अस्य ईः ।) ॥ ३५ ॥

**इन्द्रोऽवसाय व्यवसायसिद्धिं, स्वस्येंगितैर्भागवतैस्तुतोष ।**
**भृत्यो हि भर्तुः किल कालवेदी, नेदीयसीं वाक्फलसिद्धिमेति ॥३६॥**

(व्या०) इन्द्र इति ॥ इन्द्रः तुतोष हृष्टः किं कृत्वा भागवतैः भगवतः इमानि भागवतानि (तस्येदम् । ६–३–१५९ । इ. सू. भगवत् शब्दात् अण् । वृद्धिः स्वरे० । इति सूत्रे० वृद्धिः ।) तैः भगवत्संबंधिभिः इंगितैश्चेष्टितैः स्वस्यात्मनो व्यवसायस्य उपक्रमस्य सिद्धिस्तां उपक्रमसिद्धिमवसाय ज्ञात्वा अनिषिद्धमनुमतमिति न्यायात् । स्वामिनस्तदनुरूपचेष्टां दृष्ट्वेत्यर्थः । हि यस्मात् कारणात् किल इति सत्ये भृत्यः (भृगोऽसंज्ञायाम् । ५–१–४५ । इ. सू. भृग् धातोः क्यप् । ह्रस्वस्य तः पित्कृति । इ. सू. तः ।) सेवकः भर्तुः स्वामिनः कालमवसरं वेत्तीति कालवेदी (अजातेः शीले । ५–१–१५४ । इ. सू. कालपूर्वक विद् धातोः णिन् प्रत्ययः ।) अवसरज्ञो नेदीयसीं (गुणाङ्गाद्वेष्ठेयसू । ७–३–९ इ. सू. अन्तिकशब्दात् इष्ठ प्रत्ययः बाढान्तिकयोः साधनेदौ । ७ । ४ । ३७ । इ. सू. अन्तिक शब्दस्य नेदादेशः) प्रत्यासन्नां वाचां फलस्य सिद्धिस्तां वाक्फलसिद्धिमेति प्राप्नोति । समये कथितं सर्वः कोऽपि मन्यते इति भावः ॥३६॥

**जग्राह वीवाहमहाय मंक्षु, मुहूर्तमासन्नमथो महेन्द्रः ।**
**अवत्सरायन्त्यदन्तरस्था, लेखेषु हल्लेखिषु काललेशाः ॥ ३७ ॥**

(व्या०) जग्राहेति ॥ अथो अनन्तरं महेन्द्रो (जातिर्यैकार्थेऽच्वे । ३ । २ । ७० । इ. सू. महत् शब्दात् डा प्रत्ययः डित्यन्त्यस्वरादेः इ. सू. अन्त्यस्वरादेर्लुप् महांश्चासौ इन्द्रश्च महेन्द्रः) मंक्षु शीघ्रं वीवाहस्य महः वीवाहमहस्तस्मै वीवाहमहोत्सवाय आसन्नं मुहूर्तं जग्राह हल्लेखिषु (हृदयं लिखन्तीति

हल्लेखास्तेषु । 'हृदयस्य हृत्‌लासलेखाण्ये' ३-२-९४ । इ. सू. हृत् आदेशः) उत्कंठायुक्तेषु लेखेषु देवेषु यदन्तरस्था (स्थापास्नात्रः कः । ५-१-१४२ । इ. सू. अन्तरपूर्वक स्थाधातोः कप्रत्यय इडेत् पुसि चातोलुक् इ. सू. स्थाधातोराकार लोपः) यस्य मुहूर्तस्य-अन्तरस्थाः अन्तरालस्थाः कालस्य लेशाः काललेशा अवत्सरायन्त वर्षवदाचरन्ति स्म । वर्षसदशाजाता इति भावः ॥ ३७ ॥

**वैवाहिके कर्मणि विश्वभर्तुर्यदादिदेश त्रिदशानृभुक्षाः ।**
**बुभुक्षिताह्वानसमानमेत-दमानि तैः प्रागपि तन्मनोभिः ॥ ३८ ॥**

(व्या०) वैवाहिके इति ॥ ऋभुक्षा इन्द्रः विश्वभर्तुः स्वामिनो वैवाहिके कर्मणि त्रिदशान् देवान् यत् कार्यमादिदेश आदिष्टवान् । तैः त्रिदशैः देवैः एतत् कार्यं बुभुक्षिताह्वानसमानं बुभुक्षितानां (तदस्य संजातं तारकादिभ्य इत । ७ । १ । १३८ । इ सू. बुभुक्षाशब्दात् इत प्रत्यय अवर्णे वर्णस्य । ७-४-६८ । इ. सू. बुभुक्षाशब्दस्य आकारस्यलोप बुभुक्षासंजाता एषामिति बुभुक्षिताः तेषाम् ।) क्षुधितानां आह्वानस्य समानं सदृशममानि बुभुक्षाक्रान्तस्याकारणसदृशं मन्यते । किं विशिष्टैस्तै प्रागपि तन्मनोभि तस्मिन् मनो येषां ते तैः अग्रेऽपि तच्चित्तै ॥ ३८ ॥

**मनोभुवा कल्पनयैव जिष्णो-स्तत्र क्षणादाविरभावि शच्या ।**
**तदाद्भुतं सा हृदये स्वभर्तु-र्नित्यं वसन्ती खलु वेद सर्वम् ॥३९॥**

(व्या०) मनोभुवा इति ॥ शच्या इन्द्राण्या तत्र स्थाने जिष्णोः (भुजे ष्णुक् । ५ । २ । ३२ । इ. सू. जिधातो ष्णुक् प्रत्यय. जयतीत्येवंशील जिष्णुः तस्य) इन्द्रस्य मनसि भवतीति मनोभू (क्विप् । ५-१-१४८ । इ. सू. मनस् पूर्वक भूधातो क्विप् ।) स्तया चित्तोत्पन्नया कल्पनाया एव क्षणात् तत्कालमेव आविरभावि प्रकटीबभूवे । तत् न अद्भुतं नाश्चर्यम् । सा शची स्वस्य भर्ता स्वभर्ता तस्य स्वभर्तुः स्वस्वामिनो हृदये मनसि नित्यं वसन्ती खलु

निश्चितं वेद (तिवांणव: परस्मै । ४–२–११७ । इ. सू. विद् धातोः तिव् स्थाने णव् प्रत्ययः ।) जानाति हृदये वसन्ती (श्यशवः । २ । १ । ११६ । इ. सू. वसन्ती इत्यत्र अतुरन्तादेशः ।) इति लक्षणया ज्ञेयम् ॥ ३९ ॥

**स्वयं प्रभूपास्तिपरः शचीशः, शचीं शुचिप्राज्यपरिच्छदां सः ।**
**न्यदिक्षतोपस्करणे कुमार्यो र्नार्यो हि नारीष्वधिकारणीयाः ॥४०॥**

(व्या०) स्वयमिति ॥ शचीशः शच्या ईश. इन्द्रः शचीमिन्द्राणीं कुमार्योः सुमंगलासुनन्दयोः उपस्करणे अलंकरणे न्यदिक्षत आदिष्टवान् । किं लक्षणः इन्द्रः स्वयं आत्मना प्रभूपास्तिपरः प्रभोरादिनाथस्य उपास्तिः (श्वादिभ्यः । ५–३–९२ । इ. सू. उपपूर्वक आस्धातो स्त्रियां क्तिः) सेवा तस्यां परः तत्परः स्वामिसेवातत्परः । किं विशिष्टां शचीं शुचिः प्राज्यः परिच्छदः (परितः छाद्यते अनेन इति परिच्छदः पुंनाम्नि घ । ५–३–१३० । इ. सू. परिपूर्वकच्छादधातोः घः । एकोपसर्गस्य । ४ । २ । ३४ । इ. सू. ह्रस्वः ।) यस्याः सा शुचिप्राज्यपरिच्छदा तां पवित्रप्रभूतपरिवारां हि निश्चितं नार्यः स्त्रियः नारीषु स्त्रीषु अधिकारणीया. ॥ उक्तं च–सदा प्रमाणं पुरुषा नृपांगणे रणेवणिज्येषु विचारकर्म्मसु । विवाहकर्मण्यथ गेहकर्मणि प्रमाणभूमिं दधते पुनः स्त्रियः ॥

**तदाभियोग्या विबुधा वितेनुर्मणिमयं मंडपमिन्द्रवाचा ।**
**स्वं दास्यकर्मापि यशः सुगंधि, पुण्यानुबन्धीत्यनुमोदमानाः ॥४१॥**

(व्या०) तदेति ॥ तदा तस्मिन्नवसरे आभियोग्या विबुधाः आदेशकारिणोदेवाः इन्द्रस्य वाक् इन्द्रवाक् तया इन्द्रवाचा मणिमयं (अभक्ष्याच्छादने वा मयट् । ६ । २ । ४६ । इ. सू. मणिशब्दात् मयट् प्रत्ययः ।) मंडपं वितेनुः चक्रुः किं कुर्वाणाः विबुधाः स्वं दास्यकर्म अपि यशः सुगंधि यशसा सुगंधि किंच पुण्य मनुबध्नातीति पुण्यानुबंधि (अजातेः शीले । ५–१–१५४ इ. सू. शीलेऽर्थे बन्धधातोः णिन् प्रत्ययः ।) इत्यनुमोदमानाः दासत्वेऽपि प्रभोर्मंडपकरणेनास्माकं यशः पुण्यंचास्तीति हर्षवन्त इति भावः ॥ ४१ ॥

**रत्नैः सयत्नं जनितैः स्वशक्त्या तले यदीये त्रिदशैर्निबद्धे ।**
**रत्नप्रभेत्यागमिकी निजाख्या-नया पृथिव्या न वृथा प्रपेदे ॥४२॥**

(व्या०) रत्नैरिति ॥ अनया साक्षाद् दृश्यमानया पृथिव्या रत्नप्रभा रत्नानां प्रभा यस्याः सा रत्नप्रभा इति आगमिकी आगमसंबंधिनी निजस्य आख्या निजाख्या आत्मीयाभिधानं वृथा न प्रपेदे । क सति यदीये यस्य मंडपस्य इदं यदीयं तस्मिन् तले त्रिदशैः देवैः करणभूतैः रत्नैः निबद्धे सति । किं विशिष्टैः रत्नैः स्वस्य शक्तिः स्वशक्तिस्तया स्वसामर्थ्येन सयत्नं (यजिस्वपि-रक्षियतिप्रच्छो नः । ५ । ३ । ८५ । इ. सू. यतिधातोः न प्रत्ययः ।) यत्नेन सह यथा भवति तथा जनितैरुत्पादितैः ॥ ४२ ॥

**वैडूर्यवर्यद्युतिभाजि भूमौ वितानलंबी प्रतिबिंबितांगः ।**
**मुक्तागणो वारिधिवारिमध्य-निवासलीलां पुनराप यत्र ॥ ४३ ॥**

(व्या०) वैडूर्य इति ॥ यत्र यस्मिन् मंडपे मुक्तानां गणः मुक्तागणः मौक्तिकसमूहो वारिधेः समुद्रस्य वारीणि जलानि तेषां मध्य तस्मिन् समुद्रजलमध्ये निवासस्य (व्यञ्जनात् घञ् । ५-३-१३२ । इ. सू. निपूर्वक वस् धातोराधारे घञ् निवसेति अस्मिन् इति निवासः तस्य) लीला निवासलीला तां पुनर्द्वितीय-वेलं प्राप प्राप्तः । किं लक्षणो मुक्तागणः भूमौ पृथिव्यां प्रतिबिंबितमंगं यस्य सः प्रतिबिंबितांगः । किं लक्षणायां भूमौ वैडूर्याणां ( वैडूर्यः । ६-३-१५८ । इ. सू. विडुरशब्दात् प्रभवत्यर्थे ञ्य प्रत्ययः विडुरात् प्रभवन्ति इति वैडुर्याः ) रत्नानां वर्या चासौ द्युतिश्च तां भजतीति तस्यां वैडूर्यवर्यद्युतिभाजि (भजो विण् । ५ । १ । १४६ । इ. सू. भज्धातोर्विण् वैडुर्यवर्यद्युतिं भजतीति तस्यां ) वैडूर्यरत्नप्रधानकांति भजनशीलायाम् ॥ वितानलम्बी वितन्यते इति वितानं तस्मिन् लम्बते इत्येवं शीलः ॥ ४३ ॥

**संदर्शितस्वस्तिकवास्तुमुक्ता रदावलिः स्फाटिकभित्तिभाभिः ।**
**यद्भूरदूरप्रभुपादपाता, मुक्तां चिरात्ते दिवं जहास ॥ ४४ ॥**

(व्या०) संदर्शित-इति ॥ यद्भूः यस्य मंडपस्य भूः यद्भूः स्फाटिकानां भित्तयः तासां भासः ताभिः स्फटिकमणिसत्कभित्तिप्रभाभिः करणभूताभिः दिवं स्वर्गं जहास हसितवती । किं विशिष्टा यद्भूः संदर्शितस्वस्तिकवास्तुमुक्तारदावलिः (पदिपठिपचिस्थलिहलिकलिवलिवलिभ्यः । ६०७ । इ. उ. सू. आपूर्वक वल्धातोः इ प्रत्यय आवलतीति आवलिः) स्वस्तिकाः वास्तु (वसन्ति अत्र वास्तु पुंक्लीबलिङ्गः वसेर्णिद्वा । ७७४ । इ. उणादि सू. वस्धातोः तुन् प्रत्ययः स णित् वा) स्थानं यासां ताः स्वस्तिकवास्तव ताश्चता मुक्ताश्च ता एव रदाः तेषामावलिः संदर्शिता स्वस्तिकवास्तुमुक्तारदावलिः यया सा दन्तदर्शनेन विशेषतो हास्यं ज्ञायते । पुनः अदूरप्रभुपादपाता अदूर आसन्नः प्रभोः श्रीऋषभस्य पादपातः पादन्यासः पादयोश्चरणयोः न्यासः यस्यां सा पुनः किं विशिष्टां दिवं तेन भगवता चिरात् चिरकालान्मुक्तां अत एव हेतोः दिवं प्रति पृथिव्या हास इति भावः ॥ ४४ ॥

**विश्वामविश्वासमयीमधीत्य, नीतिं यदौपाधिकपुष्पपुंजात् ।**
**सत्येऽपि पुष्पप्रकरे पतद्भि-रालंबि रोलम्बगणैर्विलम्बः ॥ ४५ ॥**

(व्या०) विश्वामिति ॥ रोलम्बानां भ्रमराणां गणाः समूहास्तैः रोलम्बगणैः भ्रमरसमूहैः सत्येऽपि विद्यमानेऽपि पुष्पाणां प्रकरः समूहः पुष्पप्रकरः तस्मिन् पुष्पप्रकरे पतद्भिः सद्भिर्विलम्बः आलम्बि अवलम्बितः । किं कृत्वा यस्य मंडपस्य औपाधिकः कृत्रिमः स चासौ पुष्पाणां पुञ्ज (पूयते इति पुञ्जः पुवः पुन् च । १२८ । इ. उ. सू. पूङ् धातोर्जक् प्रत्ययः पू धातोः पुन् इत्यादेशः)श्च तस्मात् यदौपाधिकपुष्पपुञ्जात् विश्वां समग्रां अविश्वासमयीं (अस्मिन् । ७ । ३ । २ । इ. सू. अविश्वास शब्दात् मयट् अणजेये कण्-म् । २ । ४ । २० । इ. सू. ङीः । अविश्वासोऽस्ति अस्यामिति) नीतिं अधीत्य अभ्यस्य 'अविश्वास'श्रियोमूल' मिति नीतिः ॥ ४५ ॥

**जगज्जनो येन पुराखिलोऽपि, व्यलोपितं यत्र विकीर्णमन्तः ।**
**ममर्द पुष्पप्रकरापदेशं, पदैः स्मरेषुव्रजमेष युक्तम् ॥ ४६ ॥**

(व्या०) जगज्जन इति ॥ येन स्मरेषुव्रजेन स्मरस्य कामस्य इषवो (इष्यति गच्छति इति इषुः पृकाहृविधृषीषिकुहि–कित् । ७२९ । इ. उ. सू. इषत् धातोः किन् उः । ) बाणाः तेषां व्रजः समूहस्तेन पुरापूर्वं अखिलोऽपि समस्तोऽपि जगज्जनः जगतो जनः (गच्छति इत्येवंशीलं जगत् । दिद्युद्ददृत्जगत्-जुहूवाक्प्राड्धी–क्विप् । ५ । २ । ८३ । इ. सू. शीलार्थे क्विप् निपात्यते) जगज्जनः व्यलोपि लुप्त । एष जगज्जनस्तं स्मरेषुव्रजं यत्र मंडपे अन्तर्मध्ये विकीर्णं (क्तक्तवतू । ५–१–१३४ । इ. सू. विपूर्वक कृधातो भूते क्त ऋल्वादेरेषां तो नोऽप्रः । ४–२–६८ । इ. सू. तो न. ऋतांक्ङितीर् । ४ । ४ । ११६ । इ. सू. ऋकारस्येर् । भ्वादेर्नामिनो दीर्घोर्वोर्व्यंजने । २ । १ । ६३ । इ. सू. इकारस्य दीर्घत्वं । रषृवर्णान्नोण एकपदेऽनन्त्यस्यालचटतवर्गशसान्तरे । २ । ३ । ६३ । इ. सू. नस्य णत्वम्) सन्तं पदैर्युक्तं ममर्द । किं लक्षणं स्मरेषुव्रजं पुष्पप्रकरापदेशं पुष्पाणां प्रकरः समूहः अपदेशो मिषं यस्य तं कामस्य बाणा पुष्पाणीति प्रसिद्धिः ॥ ४६ ॥

**यत्रादृतस्तंभशिरोविभागा, बभासिरे काञ्चनशालभंज्यः ।**
**प्रागेव संन्यस्तभुवो भविष्य–ज्जनौघसंमर्दभियेव देव्यः ॥ ४७ ॥**

(व्या०) यत्रेति ॥ यत्रमंडपे काञ्चनस्य सुवर्णस्य शालभंज्यः पुत्तलिकाः काञ्चनशालभंज्यः सुवर्णपुत्रिकाः बभासिरे शोभिता किं लक्षणाः शालभंज्यः आदृतस्तंभशिरोविभागाः आदृतः स्तंभस्य शिरोऽग्रं तस्य विभागः याभिस्ताः स्तंभोपरिस्थिता उत्प्रेक्ष्यन्ते भविष्यज्जनौघसंमर्दभिया भविष्यन् यः जनानामोघः समूहस्तस्य संमर्द (संमृद्नन्ति अस्मिन् इति सम्मर्द । व्यञ्जनाद् घञ् । ५ । ३ १३२ । इ. सू. संपूर्वकमृद्धातो घञ् । ) तस्माद् (भ्यादिभ्यो वा । ५ । ३ ११५ । इ. सू. भीधातोः स्त्रियां क्विप् । ) भीस्तया भाविजनसमूहसंमर्दभयेन प्रागेव पूर्वमेव संन्यस्तभुवं त्यक्तभुवः देव्य देवांगना इव भुवि संमर्दो भविष्यति अत पूर्वमेव स्तंभशिरः स्थिताः इति भाव ॥ ४७ ॥

**सुचारुगारुत्मततोरणानि, द्वाराणि चत्वारि बभुर्यदग्रे ।**
**देवीषुरुद्धाग्रपथासु रोषाद्, भ्रूभंगभाञ्जीव दिशां मुखानि ॥ ४८ ॥**

(व्या०) सुचारु इति ॥ यदग्रे यस्य मंडपस्य अग्रे चत्वारि द्वाराणि बभुः शोभितानि । किं लक्षणानि द्वाराणि सुचारुगारुत्मततोरणानि सुचारूणि मनोज्ञानि गारुत्मतरत्नां तोरणानि येषु तानि । उत्प्रेक्ष्यते देवीषु रुद्धाग्रपथासु (ऋक्पूः पथ्यपोऽत् । ७ । ३ । ७६ । इ. सू. पथिन् शब्दात् अत् समासान्तः नोऽपदस्य तद्धिते । ७ । ४ । ६१ । इ. सू. इन् लोपः) रुद्धाग्रमार्गासु सतीषु रोषात् भ्रूभंगभाञ्जिभ्रूवोः (भ्राम्यतातो भ्रूः स्त्रीलिङ्गं भ्रमिगमितनिभ्योडित् । ८४३ । इ. उ. सू. भ्रमूचूधातोः डित् उप्रत्ययः डित्यन्त्यस्वरादेः इ. सू. अन्त्यस्वरादिलोपः) भंगस्तं भजन्ति उत्पादितभ्रकुटिसंयुक्तानि दिशां मुखानि इव ॥ ४८ ॥

**अलंभि यस्योपरि शातकुंभ-कुंभैरनुद्भिन्नसरोरुहाभा ।**
**नभःसरस्यां चपलैर्ध्वजौघैर्विसारिवैसारिणचारिमा च ॥ ४९ ॥**

(व्या०) अलंभीति । यस्य मंडपस्य उपरि शातकुंभकुंभैः शातकुंभस्य सुवर्णस्य कुंभास्तैः कलशैः नभःसरस्यां नभः एव सरसी तस्यां आकाशसरोवरे अनुद्भिन्नसरोरुहाभा सरसि रोहन्तीति सरोरुहाणि अनुद्भिनानि च तानि सरोरुहाणि च तेषामाभा अविकस्वरकमलशोभा अलंभि प्राप्ता । कमलकोशानां कलशानां च सादृश्यं स्यात् । च अन्यत् चपलैः ध्वजौघैः ध्वजानामोघास्तैः विसारिवैसारिणचारिमा विसरन्तीति विसारिणः (विपरिप्रात्सर्तेः । ५ । २ । ५५ । इ. सू. विपूर्वकात्सर्तेः । शीलादिसदर्थे घिनण् ।) विसारिणश्च ते वैसारिणाश्च (विसारिणो मत्स्ये । ७ । ३ । ५९ । इ. सू. मत्स्यार्थात् विसारिशब्दात् स्वार्थेऽण् । विसरन्ति इत्येवंशीलाः विसारिणः विसारिण एव वैसारिणाः) तेषां चारिमा (पृथ्वादेरिमन् वा । ७ । १ । ५८ । इ. सू. चारुशब्दात् भावे इमन् । त्र्यन्तस्वरादेः । ७ । २ । ४३ । इ. सू. चारुशब्दे उकारस्य लोपः) मनोज्ञता प्रसरणशीलमत्स्यमनोज्ञता अलंभि प्राप्ता ॥ ४९ ॥

**तथा कथाः पप्रथिरे सुरेभ्यस्त्रिविष्टपे तत्कमनीयतायाः ।**
**यथा यथार्थत्वमभाजि शोभाभिमानभंगादखिलैर्विमानैः ॥ ५० ॥**

(व्या०) तथेति ॥ त्रिविष्टपे त्रिभुवने सुरेभ्यः देवेभ्यः तत्कमनीयतायाः तस्य कमनीयता तस्याः मंडपमनोज्ञत्वस्य तथा कथाः (भीषिभूषिचिन्तिपूजिकथिकुम्बि–भ्यः । ५–३–१०९ । इ. सू. कथिधातोर्भावे अङ् आत् इ. सू. आप्) पप्रथिरे विस्तृताः । यथा अखिलैः समस्तैर्विमानैः शोभाभिमानभंगात् शोभायाः (भिदादयः । ५–३–१०८ । इ. सू. शुभिधातोः संज्ञायां अङ्प्रत्ययः गुणश्च ।) अभिमानस्य भंगः तस्मात् यथार्थत्वं सत्यार्थत्वमभाजि (भञ्जेर्ञौ वा । ४–२–४८ । इ. सू. भञ्ज्धातोरुपान्त्यनस्य ञौ लोप. ।) सेव्यते स्म कोऽर्थः यस्य मंडपस्य शोभया विमानानि निरभिमानानि जातानीति भावः ॥ ५० ॥

**श्रीदेवताहैमवतं वितन्द्रा, शच्याज्ञया चन्दनमानिनाय ।**
**निनिन्द स स्वं मलयाचलस्तु, द्विजिह्वबन्दीकृतचन्द्रनद्रुः ॥ ५१ ॥**

(व्या) श्रीदेवतेति ॥ श्रीर्नाम्नादेवता वितन्द्रा विगता तन्द्रा यस्याः सा वितन्द्रा आलस्यरहिता सती हैमवतं (हिमवत इदं हैमवतं तस्येदम् ९–३–१६० । इ. सू. इदमर्थेऽण् ।) हिमवत्संबंधिनं शच्याज्ञया शच्यादेशेन चन्दनमानिनाय । तु पुन. सः सर्वप्रसिद्धो मलयाचलः स्वमात्मानं निनिन्द निन्दितवान् । किं लक्षणो मलयाचलः द्विजिह्वबंदीकृतचन्दनद्रुः द्वे जिह्वे येषां ते द्विजिह्वाः सर्पा दुर्जना वा तैः वन्दीकृताः चन्दनद्रवः चन्दनवृक्षाः यस्य सः द्विजि० दुर्जनहस्तगतं वस्तु पुण्यावसरे व्ययितुं न शक्यते इति भावः ॥५१॥

**उपाहरन्नन्दनपादपानां, पुष्पोत्करं तत्र दिशां कुमार्यः ।**
**शिरस्यपुष्पप्रकरस्य शेषै–र्वृक्षैर्वृथा वैवधिकी बभूवे ॥ ५२ ॥**

(व्या०) उपाहरन्निति ॥ तत्र मंडपे दिशां कुमार्यः नन्दनपादपानां (पादैः पिबन्ति इति पादपाः स्थापास्नात्रः कः । ५–१–१४२ । इ. सू.

पादपूर्वचरणधातोः क । इडेत पुसि इत्यालोपः ।) नन्दनवनवृक्षाणां पुष्पोत्करं पुष्पाणामुत्करः समूहस्तमुपाहरन् आनयन्ति स्म । शेषैः चंपकाशोकपुन्नागप्रियंगु-पाटलाप्रभृतिभिर्वृक्षैः शिरस्य पुष्पप्रकरस्य मस्तकसंबंधिपुष्पसमूहस्य वृथा वैव-धिकीबभूवे ( हस्त्युसज्ञादेः । ६–४–२३ इ. सू. हरत्यर्थे विवधशब्दादिकण् विविधं हरन्तीतिवैवधिका कृम्वस्तिभ्यां कर्मकर्तभ्यां प्रागतत्त्वे च्विः । ७ । २ । १२६ । इ. सू. वैवधिकशब्दात् च्विः । ईश्चावर्णस्याऽनव्ययस्य । ४ । ३ । १११ । इ. सू. ई ।) निरर्थकं भारवाहकैर्जातम् । अत्र भावे उक्तिर्ज्ञेया ॥५२॥

**वध्वोरलंकारसहं सहर्षा, मणीगणं पूरयति स्म लक्ष्मीः ।**
**वारांनिधेस्तद्धनिनश्चिरत्नो, रत्नोच्चयः फल्गुरभूच्चितोऽपि ॥ ५३ ॥**

(व्या०) वध्वोरिति ॥ लक्ष्मी सहर्षा हर्षेण सह वर्तते इति सहर्षा सति मणीगणं रत्नपुरं पूरयति स्म रत्नसमूहं पूरयति स्म । किं लक्षणं मणीगणं वध्वोः सुमंगलासुनन्दयो अलंकारस्य सहं अलंकारसमर्थं । तद्धनिनः कृपणस्य वारांनिधेः समुद्रस्य चिरत्नः (चिरपरुत्परारे त्नः । ६–३–८५ । इ. सू. चिरशब्दात् त्नः चिरम्भवः चिरत्नः ।) चिरकाली निश्चितोऽपि संचितोऽपि रत्नोच्चयः रत्नसमूहः फल्गुः निष्फलोऽभूत ॥ ५३ ॥

**मंदाकिनी रोधसिरूढपूर्वा, दूर्वा वरार्थाय समानिनाय ।**
**पराभिराभिर्नवरं जिजीवे, वालेयदंतक्रकचार्तिहेतोः ॥ ५४ ॥**

(व्या०) मंदाकिनी इति ॥ मंदाकिनी गंगानदी वरार्थाय वरस्य अर्थकृते दूर्वाः समानिनाय । किं लक्षणा दूर्वा रोधसि तटे रूढपूर्वाः पूर्वं रूढाः रूढपूर्वाः अग्रेप्युद्गता । पराभिराभिः अन्याभिर्दूर्वाभिः न वरं केवलं वालेयदंत-क्रकचार्तिहेतोः वालेयानां रासभानां दन्ता एव क्रकचं करपत्रं तस्य अर्तिः पीडा तस्याः हेतोः तत्पीडानिमित्तं जिजीवे ॥ ५४ ॥

**कश्मीरवासा भगवत्यदत्त, काश्मीरमालेप्यमनाकुलैव ।**
**यत्रापि तत्रापि भवन्न हीदं, महेशनाम त्यजतीतिबुद्धया ॥ ५५ ॥**

(व्या०) कश्मीरवासा इति ॥ कश्मीर वासः यस्याः सा कश्मीरवासा भगवती सरस्वती आलेप्यमालेपनयोग्यं काश्मीर कुंकुमं इति बुद्धया अनाकुला एव अदत्त ददौ । इतीति किं हि निश्चितं इदं काश्मीरं कुंकुमं यत्रापि तत्रापि भवत् विद्यमानं सत् ममदेशस्यनाम तत् मद्देशनाम न त्यजति यत् तत् कुंकुमं काश्मीरमेवोच्यते ॥ ५५ ॥

**करोषि तन्वंगि किमंगभंगं, त्वमर्धनिद्राभरबोधितेव ।**
**न सांप्रतं संप्रति तेऽलसत्वं, कल्याणि कार्पण्यमिवोत्सवान्तः ॥५६॥**
**आलम्बितस्तंभमत्रस्थितासि, बाले जरार्तेव किमेवमेव ।**
**अलक्ष्यमन्विष्यसि किं सलक्ष्ये, साधोः समाधिस्तिमितेव दृष्टिः ॥५७॥**
**मनोरमे मुञ्चसि किं न लीलामद्याप्यविद्यामिव साधुसंगे ।**
**इतस्ततः पश्यसि किं चलाक्षि, निष्यातयूनी पुरि पामरीव ॥५८॥**
**भूषां वधव्यां द्रुतमानयध्वं, धृत्वा वरार्थं धवलान् ददध्वम् ।**
**शच्येरितानामिति निर्जरीणां, कोलाहलस्तत्र बभूव भूयान् ॥५९॥**

**चतुर्भिः कलापकम्**

(व्या०) करोषीति । तत्र तस्मिन् मंडपे निर्जरीणां देवीनां भूयान् बहुः कोलाहलो कोलं वराहं आवहतीति त्रासयतीति कोलाहलः बभूव । किं विशिष्टानां निर्जरीणां शच्या इन्द्राण्या इति अमुना प्रकारेण ईरितानां प्रेरितानां इतीति किं हे तन्वंगि अंगभंगं किं करोषि केव अर्द्धनिद्राभरबोधितेव अर्द्ध निद्रायाः अर्द्धनिद्रा तस्या भरेण बोधिता जागरिता अंगभंगमालस्यं करोति हे कल्याणि ते तव अधुना अलसत्वं न सांप्रतं (सम्प्रति युज्यते इति साम्प्रतं । क्वचित् । ६ । २ १४५ । इ. सू. अण् ।) युक्तं किमिव कार्पण्यमिव यथा उत्सवान्तः उत्सवमध्ये कार्पण्यं (कृपणस्य भावः कार्पण्यं पतिराजान्त गुणाङ्गराजादिभ्यः कर्मणि च । ७–१–६० । इ सू. कृपणशब्दात् भावे ट्यण् ।) न सांप्रतं युक्तम् ॥५६॥ हे बाले त्वं आलम्बितश्चासौ स्तंभश्च आलम्बितस्तंभः तं एवमेव किमवस्थितासि

या बाला स्यात् सावष्टभं नैव गृह्णाति । केव जरार्तेव यथा जरार्ता जरया पीडिता एवमेव आलम्बितस्तंभं तिष्ठति हे सलक्षे हे सुज्ञाने त्वमलक्ष्यं किमन्विष्यति आलोकयसि केव साधोः दृष्टिरिव यथा साधोः समाधिस्तिमिता समाधिना योगेन स्तिमिता निश्चला दृष्टिः अलक्ष्यमन्वेषयति ॥ ५७ ॥ हे मनोरमे त्वं अद्यापि लीलां किं न मुञ्चति कामिव अविद्यामिव यथा साधुसंगे कोऽपि अविद्यामज्ञानं न मुञ्चति । हे चलाक्षि त्वं (इतोऽतः कुतः । ७ । २ । ९० । इ. सू. इतः तसन्तो निपात्यते ) इतस्ततः ( किमद्व्यादिसर्वाद्यऽवैपुल्यबहोः पित् तस् । ७ । २ । ८९ । इ. सू. ततः तसन्तो निपातः ।) किं पश्यसि केव पामरी इव यथा पामरी ग्रामीणा स्त्री पुरि नगरे निध्याताः दृष्टाः युवानः तरुणवयसो यया सा निध्यातयूनी इतस्ततः पश्यसि ॥५८॥ हे हले वधव्यां (तस्मै हिते । ७ । १ । ३५ । इ. सू. वधूशब्दात् हितेऽर्थे यः प्रत्ययः) वधूभ्यो हितां भूषां (भीषिभूषिचिन्तिपूजिकथिकुम्बिचर्चि स्पृहिभ्यः । ५ । ३ । १०९ । इ. सू. भूषिधातोः अङ्, आत् इ. सू. आप्) शृंगारादिकां द्रुतं शीघ्रं आनयध्वं यूयं वरार्थं धृत्वा धवलान् ददध्वम् ॥ ५९ ॥ चतुर्भिः कलापकम् ॥

**अथालयः शैलभिदः प्रियायाः, संस्कर्तुकामा वसुधैकरत्ने ।**
**निवेश्य कन्ये कनकस्य पीठे, रत्नासनाख्यां ददुरस्य दक्षाः ॥६०॥**

(०५१०) अथेति । अथ अनंतरं शैलभिदः शैलान् भिनत्तीति शैलभित् (क्विप् । ५ । १ । १४८ । इ. सू. शैलपूर्वकस्य भिद्धातोः कर्तरि क्विप् ।) तस्य शैलभिदः इन्द्रस्य प्रियाया भार्याया शच्या आलयः सख्यः संस्कर्तुं कामो यासां ताः संस्कर्तुकामाः (तुमश्च मनःकामे । ३ । २ । १४० । इ. सू. तुमो मस्य लोपः ।) अलंकारं कर्तुमिच्छवः सख्यः कन्ये सुमंगलासुनन्दे कनकस्य पीठे सुवर्णस्यासने निवेश्य उपवेश्य अस्य कनकपीठस्य रत्नासनाख्यां ददुः । किं विशिष्टे कन्ये वसुधैकरत्ने वसुधायां पृथिव्यां एकरत्नप्राये । किं विशिष्टाः आलयः दक्षाश्चतुराः । यत्र रत्नं स्थाप्यते तदपि रत्नासनं कथ्यते । रत्नप्राये कन्ये तयोरासनमेतत् अतो रत्नासनमिदं वक्तव्यमिति दक्षत्वमिति भावः ॥६०॥

**उभे प्रभौ स्नेहरसानुविद्धे, स्नेहैः समभ्यज्य च संस्नपय्य ।**
**लावण्यपूण्ये अपि भक्तितस्ता, न स्वश्रमेऽमंसत पौनरुक्त्यम् ॥६१॥**

(व्या०) उभे इति ॥ ताः सख्यः भक्तितः स्वश्रमे स्वस्य श्रमस्तस्मिन् आत्मीयप्रयासे पौनरुक्त्यं (पतिराजान्तगुणाङ्ग च । ७ । १ । ६० । इ. सू. पुनरुक्तेः भावे व्यण्) पुनरुक्तदोषं नामंसत न मन्यन्ते स्म । किं कृत्वा उभे कन्ये स्नेहैस्तैलैः समभ्यज्य अभ्यंग्य च अन्यत् संस्नपय्य स्नानं कारयित्वा । किं विशिष्टे कन्ये प्रभौ श्रीऋषभदेवे स्नेहरसानुविद्धे स्नेहस्य रसस्तेन अनुविद्धे प्रेमरसव्याप्ते ते पुनः लावण्यपुण्ये (वर्णादढादिभ्यष्टचण् च वा । ७ । १ । ५९ इ. सू. लवणशब्दात् व्यण्) अपि लावण्येन पुण्ये लावण्यपुण्ये ते लावण्यपवित्रे अपि । कोऽर्थः ते कन्ये पूर्वमेव स्नेहरसेन प्रभौ प्रेमरसेन तैलेन वानुविद्धे लावण्येन च पवित्रे वर्तेते पुनरपि तत्करणेन पुनरुक्तत्वं स्यात् परं भक्तिभावात् तन्नजातमिति भावः ॥ ६१ ॥

**तृषातुरेणेव पटेन चान्त-स्नानीयपानीयलवे जवेन ।**
**स्फुरन्मयूखे निभृते क्षणं ते, सुवर्णपुत्र्योः श्रियमन्वभूताम् ॥ ६२ ॥**

(व्या०) तृषातुरेणेति ॥ ते कन्ये सुमंगलासुनन्दे क्षणं एकं क्षणं सुवर्णपुत्र्योः सुवर्णस्य पुत्र्यौ सुवर्णपुत्र्यौ तयोः सुवर्णपुत्रिकयोः श्रियं शोभां अन्वभूताम् । किं विशिष्टे जवेन वेगेन तृषया आतुरस्तेन तृषातुरेणेव पटेन वस्त्रेण चान्तस्नानीयपानीयलवे चान्तः ग्रस्तः स्नानीयस्य (स्नातुं योग्यं स्नानीयं तव्यानीयौ । ५–१–२७ इ. सू. स्नाधातोरनीयः ।) पानीयस्य (पातुं योग्यं पानीयं तव्यानीयौ । ५ । १ । २७ । इ. सू. पिबतेरनीयः) लवः ययोस्ते पुनः किं० निभृते निश्चले पुनः स्फुरन्मयूखे स्फुरन्तो देदीप्यमानाः मयूखाः किरणाः ययोस्ते ॥ ६२ ॥

**सगोत्रयोर्मूर्ध्नि तयोरुदीय, नितम्बचुम्बी चिकुरौघमेघः ।**
**वर्षन् गलन्नीरमिषान्मुखाब्जा-न्यरोगयच्चित्रमवेक्षकाणाम् ॥ ६३ ॥**

(व्या०) सगोत्रयोरिति ॥ चित्रमाश्चर्यं चिकुरौघमेघः चिकुराणां केशानामोघः कलापः स एव मेघः केशकलापरूपजलदः गलन्नीरमिषात् गलत् च तत् नीरं च गलन्नीरं तस्य मिषस्तस्मात् क्षरज्जलापदेशात् वर्षतीति वर्षन् सन् अवेक्षकाणां अवलोककानां मुखाब्जानि मुखरूपकमलानि अस्मेरयत् विकाशयति स्म । अन्यान्यब्जानि वर्षाकाले शटित्वा पतन्ति । परमत्र वैपरीत्यमतस्तच्चित्रम् । किं कृत्वा तयोः सुमंगलासुनन्दयोः सद्गोत्रयोः सत्प्रधानं गोत्रं ययोस्ते सद्गोत्रे तयोः पक्षे प्रधानपर्वतयोर्मूर्ध्नि मस्तके उदीय उदयं प्राप्य किं विशिष्टः चिकुरौघमेघः नितम्बचुम्बी (अजातेः शीले । ५ । १ । १५४ । इ. सू. नितम्बपूर्वक चुम्बधातोः शीलादिसदर्थे णिन् प्रत्यय.।) नितम्बः कटीतटं पक्षे कटकं तं चुम्बतीति स्पृशतीति भावः ॥ ६३ ॥

**धम्मिल्लमल्लोऽधिगतस्मरास्त्र–मालोऽन्तरालोल्लसितप्रसूनैः ।**
**तन्मौलिवासाद् बलवान्न कस्य, बलीयसोऽप्येजयति स्म चेतः ॥६४॥**

(व्या०) धम्मिल्ल इति । धम्मिल्लः बद्धकेशकलापः एव मल्लः धम्मिल्लमल्लः कस्य बलीयसोऽपि (गुणाङ्गाद्वेष्ठेयसू । ७–३–९ । इ. सू. बलशब्दात् इयसु प्रत्ययः) बलवतः चेतः स्वान्तं न एजयति स्म न कंपयति स्म अपि तु सर्वस्यापि । किं लक्षणो धम्मिल्लमल्लः अन्तरालोल्लसितप्रसूनैः अन्तराले मध्ये उल्लसितानि च तानि प्रसूनानि च पुष्पाणि तैः अधिगता प्राप्ता स्मरस्य कामस्य अस्त्राणां (अस्यते इति अस्त्रं त्रट् । इ. उ. सू. असूच् धातोः त्रट् ।) शस्त्राणां माला श्रेणीर्येन सः अधिगतस्मरास्त्रमालः । तन्मौलिवासात् तयोः कन्ययोः मौलिर्मस्तकं तस्मिन् वासस्तस्मात् बलमस्यास्तीति बलवान् ॥ (तदस्याऽस्त्यस्मिन्निति मतुः । ७ । २ । १ । इ. सू. बलशब्दात् अस्त्यर्थे मतुः । मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मो व. । २ । १ । ९४ । इ. सू. मतोर्मस्य वः ।) यतश्चोक्तं–'स्थानं प्रधानं न बलं प्रधानं, स्थानस्थितो गर्जति कातरोऽपि । हे वासुके वेद्मि तव प्रमाणं, कंठस्थितो गर्जसि शंकरस्य' ॥ १ ॥ इति स्थानबलं कामस्य पुष्पबाणत्वात् । प्राप्तपुष्पैः शस्त्रबलं च ततो धम्मिल्लमल्लः कानकं पद्मम् इति भावः ॥ ६४ ॥

**सारांगरागैः सुरभि सुवर्ण-मेवेतयोः कायमहो विधाय ।**
**जहे सुवर्णस्य सुरांगनाभिः, सौगन्ध्यवंध्यत्वकलंकपंकः ॥ ६५ ॥**

(व्या०) सारांगरागैरिति ॥ सुरांगनाभिः सुराणामंगना सुरांगना (नोऽङ्गादेः । ७ । २ । २९ । इ. सू. अङ्गशब्दात् मत्वर्थे न प्रत्ययः अङ्गं अस्ति आसामिति अङ्गना ।) ताभिः सुरांगनाभिः देवांगनाभिः सुवर्णस्य कनकस्य सौगन्ध्यवन्ध्यत्वकलङ्कपङ्कः सौगन्ध्येन वन्ध्यत्वं रहितत्वं तदेव कलङ्कस्य पङ्कः सौरभ्यरहितत्वरूपकलङ्कपङ्को जहे स्फेटितः । किं कृत्वा एतयोः सुमंगला सुनन्दयोः कायं (चितिदेहावासोपसमाधाने कश्चादेः । ५ । ३ । ७९ । इ. सू. चिधातोर्भावे घञ् आदेश्चस्य कः चीयते इति कायः ।) शरीरं सारांगरागैः प्रशस्य विलेपनैः अहो इत्याश्चर्ये सुरभिं परिमलबहुलं विधाय कृत्वा किं विशिष्टं कायं सुवर्णमेव गौरवर्णत्वात् ॥ ६५ ॥

**तयोः कपोले मकरीः स्फुटांगी-र्यद्गन्धधूल्या लिलिखुस्त्रिदश्यः ।**
**स्मरं स्वधार्यं मकरः पुरंध्री-स्नेहेन धावंस्तदिहानिनाय ॥ ६६ ॥**

(व्या०) तयोरिति ॥ त्रिदश्य (तिस्रः दशाः अवस्था. येषां ते त्रिदशाः त्रिदशानां स्त्रियः त्रिदश्यः) देवांगनाः तयोः कन्ययोः कपोले यत् यस्मात् कारणात् गन्धधूल्या कस्तुर्या स्फुटांगीः प्रकटरूपाः मकरी लिलिखु लिखन्ति स्म तत् तस्मात् कारणात् मकरः पुरंध्रीस्नेहेन कलत्रप्रीत्या धावन् स्वधार्यं स्ववाह्यं स्वामिनं स्मरं (स्मरन्ति अनेन इति स्मरः पुंनाम्नि घ । ५-३-१३० इ. सू. स्मृधातो र्घञ् ।) कंदर्प्पं इह आनिनाय । कामो मकरध्वज उच्यते । मकरमकरीस्नेहेन कामोऽपि तत्रागतः इति भावः ॥ ६६ ॥

**बभार मारः कुचकुंभयुग्म, क्रीडन् ध्रुवं कान्तिनदे तदंगे ।**
**यत्पत्रवल्ल्यो मृगनाभिनीला, निरीक्षितास्तत्परितोऽनुषक्ताः ॥६७॥**

(व्या०) बभार इति ॥ मारः (मारयतीति मार ) कंदर्प्पं कान्तिनदे प्रभाह्रदे तदंगे तयो कन्ययो अंगं तदंगं तस्मिन् तयोः कन्ययो शरीरे क्रीडन् सन्

ध्रुवं निश्चितं कुचकुंभयुग्मं कुचौ स्तनौ एव कुंभौ घटौ तयोः युग्मं द्वन्द्वं वभार धरति स्म अन्योऽपि कुंभाधारेण ह्रदादिकं तरति । तत्र हेतुमाह यत् यस्मात् कारणात् तत् कुंभयुग्मं (सर्वोभयाभिपरिणा तसा । २ । २ । ३५ । इ. सू. परित· योगे तत् इत्यत्र द्वितीया पर्यभेः सर्वोभये । ७ । २ । ८३ । इ. सू. परे. सर्वार्थे तसु ।) परित समन्तत· अनुपक्ता· लग्ना मृगनाभिनीला: मृगनाभिभि कस्तुरिकाभि· नीला: नीलवर्णा: पत्रवल्यो निरीक्षिता ॥ ६७ ॥

**तनूस्तदीयाद दृशेऽमरीभिः, संवीतशुभ्रामलमञ्जुवासा ।**
**परिस्फुटस्फाटिककोशवासा, हैमीकृपाणीव मनोभवस्य ॥ ६८ ॥**

(व्या०) तनूरिति ॥ अमरीभिर्देवाङ्गनाभि: तदीया तयोरियं तदीया तनू: शरीरं ददृशे (दृशूधातोः कर्मणि परोक्षा) दृष्टा । तनूशब्दो देहवाचक स्त्रीलिङ्गो ज्ञेय· । कन्याद्वये सत्यपि तनूरित्यत्र जातावेकवचनं ज्ञेयम् । किं विशिष्टा तनू: संवीतशुभ्रामलमञ्जुवासा संवीतानि परिहितानि शुभ्राणि उज्ज्वलानि अमलानि निर्मलानि मञ्जूनि मनोज्ञानि वासांसि वस्त्राणि यया सा संवीत० । उत्प्रेक्ष्यते परिस्फुटस्फाटिककोशवासा परिस्फुटो यो स्फाटिककोश तस्मिन् वासो यस्या· सा प्रकटस्फाटिकमणिमयप्रत्याकारकृतवासा मनोभवस्य कामस्य हेम्नोविकारो हैमी (हेमादिभ्योऽञ् । ६ । २ । ४५ । इ. सू. हेमन् शब्दात् विकारे अञ् प्रत्यय· ।) सुवर्णमयी कृपाणीव क्षुरिकेव ॥ ६८ ॥

**द्वारेण वां चेतसि भर्तुरेष, संश्लेषमाप्स्यामि मुमुक्षितोऽपि ।**
**इतीव लाक्षारसरूपधारी, रागस्तयोरंह्रितलं सिषेवे ॥ ६९ ॥**

(व्या०) द्वारेणेति ॥ लाक्षारसरूपधारी लाक्षाया: रस· तस्य रूपं धरतीति अलक्तरसरूपधारी (अजाते· शीले । ५-१-१५४ । इ. सू. धृधातोः शीलेऽर्थे णिन्) राग. (भावाऽकर्त्रो । ५ । ३ । १८ । इ. सू. रञ्जूधातोर्भावे घञ्) तयोः कन्ययो अंह्रितलं चरणतलं सिषेवे सेवते स्म । उत्प्रेक्ष्यते इतीव एषोऽहं वां युवयोर्द्वारेण भर्तु· श्रीऋषभदेवस्य चेतसि हृदये संश्लेषं संबंधं आप्स्यामि प्राप्स्यामि । किं विशिष्टोऽहं मुमुक्षितोऽपि मोक्तुमिष्टोऽपि ॥ ६९ ॥

**मन्दारमालामकरन्दबिन्दु–सन्दोहरोहत्प्रमदाश्रुपूरा ।
दूरागता शैत्यमृदुत्वसारा, सखीव शिश्लेष तदीयकंठम् ॥ ७० ॥**

(व्या०) मन्दारेति ॥ मन्दारमाला मन्दारपुष्पाणां माला दूरागता दूरादागता सखीव तदीयकंठं तयोः सुमंगलासुनन्दयोः अयं तदीयः स चासौ कंठश्च तदीयकंठस्तं शिश्लेष आलिंगति स्म । किं लक्षणा मन्दारमाला मकरन्दबिन्दु-सन्दोहरोहत्प्रमदाश्रुधारा मकरन्दानां बिन्दवः तेषां सन्दोहः समूहः स एव रोहन् प्रवर्द्धमान प्रमदाश्रूणां पूरः हर्षाश्रुपूरो यस्याः सा मकरन्द० शैत्यमृदुत्वसारा शैत्यं (शीतस्य भाव शैत्यं पतिराजान्त गुणाङ्गराजादिभ्यः कर्मणि च । ७ । १ । ६० । इ. सू. गुणवाचकशीतशब्दात् भावे ट्यण्) च मृदुत्वं च शैत्यमृदुत्वे ताभ्यां सारा मनोज्ञा ॥ ७० ॥

**न्यस्तानि वध्वोर्वदनेऽमरीभि–राभाभरं भेजुरभंगरंगम् ।
उद्वेगयोगेऽपि भुजङ्गवल्ले–र्दलानि सुस्थानगुणः स कोऽपि ॥ ७१ ॥**

(व्या०) न्यस्तानीति ॥ भुजङ्गवल्लेर्नागवल्लेः दलानि पत्राणि उद्वेगयोगेऽपि उद्वेगः संताप. पक्षे पूगीफलं तस्य योगस्तस्मिन्नपि आभाभरं आभानां भरस्तं शोभासमूहं भेजुः (तृत्रपफलभजाम् । ४ । १ । २५ । इ. सू. भज्धातोः उसि परे एत्वम् न च द्विर्भावः ) भजन्ते स्म । किं विशिष्टमाभाभरं अभंगरंगं अभंगो रंगश्चूर्णो रंग एव वा यस्मिन् तं । स कोऽपि सुस्थानगुणो ज्ञेयः । किं विशिष्टानि दलानि अमरीभिर्देवांगनाभिः वध्वो. कन्ययोर्वदने न्यस्तानि क्षिप्तानि । एकं भुजंगवल्लेर्दलानि द्वितीयमुद्वेगयोगः परमीदृशेऽपि सति यद् रंगो जातः स तयोः कन्ययोर्वदनस्थानकगुणो ज्ञेय इति भावः ॥ ७१ ॥

**मास्म स्मरान्धं त्वरया पुरान्तः, संचारिचेतः पतदत्र यूनाम् ।
इतीव काप्युत्पलकर्णपूरै–स्तत्कर्णकूपौ त्वरितं न्यधत्त ॥ ७२ ॥**

(व्या०) मास्मेति ॥ कापि देवांगना उत्पलकर्णपूरैः उत्पलानि एव कर्णपूरास्तैः कमलरूपकर्णाभूषणैः तत्कर्णकूपौ तयोः सुमंगलासुनन्दयोः कर्णौ

एव कूपौ तौ त्वरितं शीघ्रं व्यधत्त (वावाप्योस्तनिक्रीधाग्नहोर्वपी । ३-२-१५६ इ सू. अपि स्थाने पिः) आच्छादयति स्म । उत्प्रेक्ष्यते-इतीव अत्र गतयोः कर्णकूपयोः यूनां यौवनप्राप्तानां चेतः स्वान्तं स्मरान्धं स्मरेण अन्धं कामान्धं सत् मा पतत् स्म (सस्मे ह्यस्तनीच । ५ । ४ । ४० । इ. सू. ह्यस्तनी) मा पततु किं लक्षणं चेतः त्वरया औत्सुक्येन पुरान्तः संचारि (समत्यपाभिव्यभेश्चरः । ५ । २ । ६२ । इ. सू. संपूर्वक चरधातोः शीलादिसदर्थे घिनण् प्रत्ययः ।) पुरं शरीरं पक्षे नगरं तस्यान्तर्मध्ये संचरणशीलम् ॥ ७२ ॥

**भोगीदमीयः किलकेशहस्त-स्ततान यूनां हृदि यं विमोहम् ।**
**सोऽवर्धि चूडामणिनापि तेषा-मथो गतिः केत्यवदन्मघोनी ॥ ७३ ॥**

(व्या०) भोगीति ॥ मघोनी (स्त्रियां नृतोऽस्वस्रादेर्डीः । २ । ४ । १ । इ. सू. मघवन् शब्दात् स्त्रियां डीः । श्वन् युवन् मघोनो डीस्याद्यघुट्स्वरे व उः । २ । १ । १०६ । इ. सू. मघवन्शब्दे वकारस्य ङ्यां परे उः । अवर्णस्येवर्णादिनैदोदरल् । १ । २ । ६ । इ. सू. ओकारे मघोनी ।) इन्द्राणी इत्यवदत् इतीति किं इदमीयः (तस्येदम् । ६ । ३ । १६० । इ. सू. इदमर्थे इदम् शब्दात् दोरीय । ६-३-३२ । इ. सू. ईय प्रत्ययः । त्यदादि । ६-१-७ । इ. सू. इदम् शब्दस्य दुसंज्ञकत्वात्) अनयोरयमिदमीयः किल इति सत्ये केशहस्तः केशानां हस्तः कलापः केशहस्तः हस्तः पक्षः कलापश्चेति नाममालोक्तं ज्ञेयम् । यूनां हृदि यं विमोहं ततान । किं विशिष्ट केशहस्तः भोगी भोगः कुसुमकस्तूरिकादीनां विद्यते यत्रासौ भोगवान् । पक्षे सर्पे स विमोहः चूडामणिनापि अवर्धि वर्द्धितः । तेषां यूनामथो कागतिर्भविष्यति ॥ कोऽर्थः सर्प्पमणे विषमुत्तरति इति रूढिः तयोः कन्ययोः शीर्षे केशकलापसर्प्पोपरिचूडामणि दृष्ट्वा युवानो विशेषतो व्यामोहिताः ॥ ७३ ॥

**हस्ते शिलाकावदने च तिष्ठ-दनिष्ठुरं तन्नयनप्रविष्टम् ।**
**धिक्कज्जलं भस्मयति स्म यूनः, को विश्वसेत्तापकरप्रसूतेः ॥ ७४ ॥**

(व्या०) हस्त इति । कज्जलं धिक् धिग् योगे (गौणात्समयानिकषाहाधिक अन्तरान्तरेणातियेनतेनैर्द्वितीया । २ । २ । ३३ । इ. सू. कज्जलमित्यत्र द्वितीया यत् कज्जलं तन्नयनप्रविष्टं सत् तयो. कन्ययोः नयनानि तन्नयनानि तन्नयनेषु प्रविष्टं सत् यूनो भस्मयति स्म (णिज् बहुलं नाम्न कृगादिषु । ३ । ४ । ४२ । इ. सू भस्मन् शब्दा करोत्सर्थे णिच् । त्र्यन्तस्वरादे· । ७ । ४ । ४३ । इ. सू. अन्त्यस्वरादेर्लोप· भस्म करोति इति भस्मयति) अत्र लक्षणा ज्ञेया व्यामोहयति स्मेति भाव । किं विशिष्टं कज्जलं हस्ते च अन्यत् शिलाकावदने शिलाकाया वदनं तस्मिन् तिष्ठत् (शत्रानशावेष्यति तु सस्यौ । ५ । २ । २० । इ सू. स्थाधातो वर्तमाने शतृ प्रत्ययः श्रौतिकृवु धिवु–दम् । ४ । २ । १०८ । इ. सू. स्थाधातोः तिष्ठादेशः) सत् न निष्ठुरं अनिष्ठुरं कोमलं लक्षणया शांतं वा । तापकरप्रसूतेः तापकरः ( हेतु तच्छी· लानुकूलेऽशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात् । ५ । १ । १०३ । इ. सू. तापपूर्वक कृग्धातोः शीलेऽर्थे ट·, तापं करोति इत्येवंशील· । ) अग्निः दुर्जनादिर्वा तस्मात् प्रसूतिर्यस्य सः तस्य अग्निदुर्जनादिजातस्य अन्यस्यापि को विश्वसेत् इति अनश्वरकृ प्राणने इति धातोर्नप्रयोग· किन्त्वन्यः कोऽपि धातुर्घटते 'न विश्वसेदमित्रस्य, मित्रस्यापि न विश्वसेत् इति लोकेऽप्यस्ति । कोऽर्थः कज्जलं पूर्वं हस्ते ध्रियते ततः शिलाकामुखे स्थाप्यते अस्मिन्नवसरे न कमपि व्यामोहयति किन्तु नयनप्रविष्टमेव अत कज्जलेन विश्वासघातः कृतः । अथ तापकरजातस्य न विश्वसेदिति भावः ॥ ७४ ॥

**शची स्वहस्तेन निवेश्य मौलौ, मौलिं मणीनां किरणैर्जटालम् ।**
**तयोर्गुणाधिक्यभवं प्रभुत्वमशेषयोषित्सु दढीचकार ॥ ७५ ॥**

(व्या०) शचीति । शची इन्द्राणी स्वहस्तेन स्वस्य हस्तः तेन तयो· कन्ययो· मौलौ मस्तके मौलिं मुकुटं निवेश्य अशेषयोषित्सु अशेषाश्च ता योषितश्च तासु सर्वस्त्रीषु, गुणाधिक्यभवं गुणानामौदार्यगांभीर्यादिगुणानामाधिक्यात् भवं प्रभुत्वं दढीचकार न दढमदढं अदढं दढं संपद्यमानं यथा चकार इति दढी-

चकार । किं विशिष्टं मौलिं मणीनां किरणैर्जटालं (कालजटाघाटात् क्षेपे । ७ । २ । २३ । इ. सू. जटाशब्दात् मत्वर्थे ल ।) व्याप्तम् । अत्रापि लक्षणा ज्ञेया ॥

**पारे शिरोजतमसामुदियाय भाले, लक्ष्म्या घनावसथतां गमिते तदीये ।**
**विक्षिप्तनागजरजोव्रजसांध्यराग–संकीर्णसिम्नि तरणिस्तिलकच्छलेन ॥**

(व्या०) पारे इति ॥ तरणिः सूर्य तदीये तयो कन्ययो इदं तदीयं तस्मिन् भाले शिरोजतमसां शिरसिजाता. शिरोजा. (सप्तम्याः । ५–१–१६९ इ. सू. शिरसि उपपदे जनेर्ड. । डित्यन्त्यस्वरादेः इ. सू. अन्त्यस्वरादेलोपः ।) केशाः ते एव तमांसि तेषां केशरूपांधकाराणां पारे उदियाय उदयं प्राप्तः । किं विशिष्टे भाले लक्ष्म्याः श्रिय शोभाया वा घनावसथता दृढस्थानकतां पक्षे घनावसथतामाकाशतां गमिते प्रापिते विक्षिप्तनागजरजोव्रजसांध्यरागसंकीर्णसीम्नि विक्षिप्तं विस्तारितं च तत् नागजरजश्च तस्य व्रज समूहः स एव सांध्यरागः तेन संकीर्णा सीमा पर्यन्तदेशो यस्य तस्मिन् तरणि केन उदियाय तिलकच्छलेन तिलकस्यछलं तेन ॥ ७६ ॥

**यच्चाक्रिकभ्रमिदिनाधिपतापवन्हि–सेवापयोवहनमुख्यमसोढ कष्टम् ।**
**पुण्येन तेन तदुरोरुहतामवाप्य, कुंभो बभाज मणिहारमयोपहारम् ॥७७॥**

(व्या०) यत् इति ॥ यत् यस्मात् कारणात् चाक्रिकः कुलालः तस्य चक्रोपरिभ्रम. चाक्रिकभ्रम दिनाधिपतापः दिनाधिपस्य (अधिकं पातीति अधिपः उपसर्गादातो डोऽश्यः । ५ । १ । ५६ । इ. सू. अधिपूर्वक पाधातोर्डः ।) सूर्यस्य ताप सूर्यकिरणताप वह्निसेवा वह्नेः सेवा पावकावस्थाभवा पयोवहनं जलहरणं चाक्रिक[श्च] भ्रमिश्च दिनाधिपतापश्च वह्निसेवा च पयोवहनं च तानि मुख्यानि यस्मिन् तत एवं विधं कष्टमसोढ वहते स्म तेन पुण्येन तदुरोरुहतां तयो. कन्ययो उरोरोहता तां तत्स्तनत्वं प्राप्य मणिहारमयोपहारं मणिहारमयमुपहारं पूजां बभाज भजति स्म । 'देहे दुःखं महाफल'मित्यागमः । अत्र वृत्ते अनुमानालंकारो ज्ञेय । कुंभेन किमपि पुण्यं कृतं तेन हारादिपूजा प्राप्तेति भावः ।

**ये तयोरशुभतां करणमूले, काममोहभटयोः कटके ते ।**
**अङ्गुलीषु सुषमामददुर्या, ऊर्मिका ननु भवाम्बुनिधेस्ताः ॥ ७८ ॥**

(व्या०) ये इति ॥ ये कटके तयो. कन्ययोः करमूले अशुभतां शोभिते ते काममोहभट्यो कटके सैन्ये ज्ञेये । या ऊर्मिका मुद्रिकाः तयो कन्ययोः अंगुलीषु सुषमां शोभामदद ददति स्म ननु निश्चितं ताः भवाम्बुनिधे भवः संसारः एव अंबुनिधिः (उपसर्गाद. किः । ५ । ३ । ८७ । इ. सू. निपूर्वक धाधातोः कि । इडेत् पुसीति सूत्रेण आकारलोप ।) समुद्रस्तस्य संसारसमुद्रस्योर्मिका लहर्यो ज्ञेया ॥ ७८ ॥

**त्रिभुवनविजिगीषोर्मारभूपस्य वाह्या-**
**ऽवनिरजनि विशाला तन्नितम्बस्थलीयम् ।**
**व्यरचि यदिह काञ्ची किंकिणीभिः प्रवल्ग,**
**च्चतुरतुरगभूषा घर्घरीघोषशंका ॥ ७९ ॥**

(व्या०) व्यरचीति [त्रिभुवनेति] ॥ इयं तन्नितम्बस्थली तयो कन्ययोः नितम्बस्थली कटीतटस्थली मारभूपस्य मार काम एव भूपो नृपस्तस्य कामराजस्य वाह्यावनि अश्ववाहनिका भूमि अजनि जाता । तत्र हेतुमाह—यत् यस्मात् इह कारणात् नितम्बस्थल्यां काञ्ची मेखला तस्या किंकिण्यः क्षुद्रघंटिकाः ताभिः प्रवल्गच्चतुरतुरगभूषाघर्घरीघोषशंका प्रवल्गन्तः उच्छलन्त चतुरा ये तुरगाः (नाम्नो गमः खड्डौ च विहायसस्तु विहः । ५–१–१३१ । इ. सू. तुरशब्दपूर्वक गमधातोः ड प्रत्ययः डित्यन्तस्वरादेरिति सूत्रेण अम् लोपः) तेषां भूषा (भीषिभूषिचिन्तिपूजि—भ्यः इ. सू. अङ् आत् इ सू. आप्) घर्घरीणां घोषशंका व्यरचि कृता । यत्र अश्वाः वाह्यन्ते तत्र घर्घरीघोष स्यादेवेति भावः । किं विशिष्टस्य मारभूपस्य त्रिभुवनविजिगीषोः त्रयाणां भुवनानां समाहारस्त्रिभुवनं (संख्या समाहारे च द्विगुश्चानाम्न्ययम् । ३ । १ । ९९ । इ. सू. समास) विजेतुमिच्छतीति विजिगीषति विजिगीषतीति विजिगीषुः त्रिभुवनस्य विजिगीषुः तस्य त्रिभुवनजेतुमिच्छोः ॥ ७९ ॥

**नखजितमणिजालौ स्वश्रियापास्तपद्मौ**
**गतिविधुरितहंसौ मार्दवातिप्रवालौ ।**
**तदुचितमिह साक्षीकृत्य देवीस्तदंह्री**
**सपदिदधतुराभां यत्तुलाकोटिवृत्ताम् ॥ ८० ॥**

(व्या०) नखजित इति ॥ इह देवी· साक्षीकृत्य (साक्षाद् द्रष्टा । ७ । १ । १९७ । इ. सू. साक्षात् शब्दात् द्रष्टरि अर्थे इन् प्रत्ययः प्रायोऽव्ययस्य । ७ । ४ । ६५ । इ. सू. अन्त्यस्वरादेर्लोप· कृभ्वस्तिभ्यां कर्मकर्तृभ्यां–च्विः । ७ । २ । १२६ । इ. सू. साक्षिशब्दात् च्वि· नाम्नो नोऽनह्नः । २–१–९१ इ. सू. न लोपः दीर्घश्च्वियङ्यक्येषु च । ४ । ३ । १०८ । इ. सू. इकारस्य दीर्घत्वं । उर्याद्यनुकरणच्विडाचश्च गतिः । ३ । १ । २ । इ. सू. गतिसंज्ञा गतिक्वन्यस्तत्पुरुषः । ६ । १ । ४२ । इ. सू. समासः । अनञः क्त्वो यप् । ३ । २ । १५४ । इ. सू. यबादेशः ) तदंह्री तयोः कन्ययोः अंह्री क्रमौ सपदि झटिति यत् तुलाकोटिवृत्तां तुलाकोटिशब्देन पुरं पक्षे तुला उपमा तस्याः कोटिः अग्रभागः तस्मात् वृत्तां निष्पन्नां आभां शोभां दधतुः तत् उचितं योग्य-मेतानि सर्वाणि तदंह्र्योर्विशेषणानि । किं विशिष्टौ तदंह्री नखजितमणिजालौ नखैः जितानि मणिजालानि याभ्यां तौ नखकिरणजितमणिसमूहौ । स्वश्रिया स्वस्य निजस्य श्रीः शोभा तया अपास्तपद्मौ अपास्तानि पद्मानि याभ्यां तौ स्वशोभया निराकृतकमलौ । गतिविधुरितहंसौ गत्या विधुरिताः लक्षणया जिताः हंसा याभ्यां तौ । मार्दवातिप्रवालौ मार्दवेन सौकुमार्येण अतिक्रान्ता· प्रवाला नवांकुरा याभ्यां तौ अत एव जितसर्वोपमानत्वात् तुलाकोटित्वमिति भावः ॥८०॥

**एवं स्नातविलिप्तभूषिततनू उध्दृत्य कन्ये उभे**
**मध्ये मातृगृहं निवेश्य दिविषद्योषा अदोषासने ।**
**गायन्त्यो धवलेषु तद्गुणगणं तद्वक्त्रवीक्षोत्सव–**
**च्छेदानाकुलनिर्निमेषनयनास्तस्थुः स्मरन्त्यो वरम् ॥८१॥**

(व्या०) एवमिति ॥ दिविषद्योषा॰ दिवि आकाशे सीदन्ति गच्छन्तीति दिविषदो (क्विप् । ५ । १ । १४८ । इ सू. दिव् उपपदे सद्धातो॰ क्विप् । अद् व्यञ्जनात् सप्तम्या वहुलम् । ३ । २ । १८ । इ. सू. सप्तम्या अलुप् ।) देवास्तेषां योषा॰ स्त्रिय॰ देवांगना॰ वरं स्मरन्त्य सत्य तस्थु॰ किं कृत्वा उभे सुमंगलासुनन्दे कन्ये उद्धृत्य स्नानस्थानात् उत्पाट्य मध्येमातृगृहं (पारे मध्येऽग्रेऽन्त॰ षष्ठ्या वा । ३ । १ । ३० । इ. सू अव्ययीभाव समास ) मातृगृहस्य मध्ये मध्येमातृगृहं अदोषासने अदोषं च तत् आसनं च अदोषासनं तस्मिन् निर्दोषासने निवेश्य उपवेश्य । किं विशिष्टे कन्ये एवममुना पूर्वोक्तप्रकारेण स्नातविलिप्तभूषिततनू (आदौ) स्नाता ( पश्चात् ) विलिप्ता (पूर्वकालैक सर्वजरत् पु–म् । ३–१–९७ इ. सू. समासः) भूषिता अलंकृता च तनू॰ शरीरं ययोस्ते ते । अत्र असन्धिः । किं कुर्वन्त्य॰ दिविषद्योषाः धवलेषु तद्गुणगणं तयोः कन्ययोर्गुणास्तेषां गणस्तं गुणसमूहं गायन्त्य॰ । पुन किं वि० तद्वक्त्रवीक्षोत्सवच्छेदानाकुलनिर्निमेषनयनाः तयो कन्ययो॰ वक्त्रस्य वदनस्य वीक्षा अवलोकनं सा एव उत्सवः तस्य छेदे छेदविषये अनाकुले अव्याकुले निर्निमेषे निमेषरहिते नयने लोचने यासां ताः । मेषोन्मेषकारिणां जनानां वीक्षोत्सवच्छेद॰ स्यात् परं तासां स्वभावनिर्निमेषत्वात् नेत्रयोरनाकुलत्वमिति भाव॰ ॥ ८१ ॥

**सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि– ।**
**धम्मिलादिमहाकवित्वकलनाकल्लोलिनीभानुमान् ॥**
**वाणीदत्तवरश्चिरं विजयते तेन स्वय निर्मिते ।**
**सर्गो जैनकुमारसंभवमहाकाव्ये तृतीयोऽभवत् ॥ ३ ॥**

**इतिश्रीमदञ्चलगच्छेकविचक्रवर्त्तिश्रीजयशेखरसूरिविरचितस्य श्रीजैनकुमारसंभवमहाकाव्यस्य तच्छिष्यश्रीधर्मशेखरमहोपाध्यायविरचितायां टीकायां श्रीमाणिक्यसुन्दरशोधितायां तृतीयसर्गव्याख्या समाप्ता ॥ ३ ॥**

# अथ चतुर्थसर्गः प्रारभ्यते ।

**अथात्र पाणिग्रहणक्षणे प्रति-क्षणं समेते सुरमंडलेऽखिले ।**
**इलातलस्यातिथितामिवागता-ममंस्त सौधर्मदिवं दिवःपतिः ॥ १ ॥**

(व्या०) अथेति ॥ अथानन्तरं दिवःपतिः इन्द्रः सौधर्मदिवं इलातलस्य इलायाः तलं तस्य पृथ्वीतलस्य अतिथितां प्राघूर्णतामिवागतामसंस्त मन्यते स्म । क सति अत्र अस्मिन् पाणिग्रहणक्षणे पाणिग्रहणस्य क्षणः तस्मिन् विवाहावसरे अखिले समग्रे सुरमंडले सुराणां मंडलं तस्मिन् देवसमूहे क्षणं क्षणं प्रति (योग्यता वीप्सार्थानतिवृत्तिसादृश्ये । ३-१-४० । इ. सू. वीप्सायां समासः । क्षणं क्षणं इति प्रतिक्षणम् ।) समेते समागते सति ॥ १ ॥

**नवापि वैमानिकनाकिनायका, अधस्त्यलोकाधिभुवश्च विंशिनः ।**
**शशी रविर्व्यन्तरवासिवासवा, द्विकाधिकात्रिंशदुपागमन्निह ॥ २ ॥**

(व्या०) नवापि । एकस्य पूर्वमागतत्वात् शेषे नवापि वैमानिकनाकिनायका वैमानिकानां (चरति । ६ । ४ । ११ । इ सू. विमानशब्दात् चरति अर्थे इकण् प्रत्यय विमानै चरन्ति इति वैमानिकाः ।) नाकिनां देवानां नायकाः (णक तृचौ । ५ । १ । ४८ । इ. सू. नीधातोः कर्तरि णकः नामिनोऽकलिहले । ४ । ३ । ५१ । इ. सू. ईकारस्य वृद्धिः एदैतोऽयाय् । १-२-२३ । इ. सू. आयादेशे नयन्तीति नायकाः) इन्द्राः च अन्यत् विंशिनः विंशतिर्मानमेषामिति विंशिनः डिन् इति सूत्रेण डिन् प्रत्ययः इनश्च विंशतेस्ते-र्डिनि इति सूत्रेण तिलोप डित्यन्तस्वरादेरन्त्यस्वरलोपे विंशिन इति विंशतिसंख्या अधस्त्यलोकाधिभुव अधो भवा अधस्त्या. ते च ते लोकाश्च अधस्त्यलोकाः तेषा-मधिभुः स्वामिन पाताललोकस्वामिनः शशी चन्द्रः रविः सूर्यः व्यन्तरवासिनां वासवा व्यन्तरवासिवासवा व्यन्तरेन्द्राः द्विकाधिका द्विकेन अधिका त्रिंशत् द्वात्रिंशत् इह मंडपे उपागमन् आगताः ॥ २ ॥

**तदा ह्रदालोडनशाखिदोलन–प्रियामुखालोकमुखोमखांशिनाम् ।**
**रसः प्रयाणस्य रसेन हस्तिनः, पदेन पादान्तरवद्व्यलुप्यत ॥ ३ ॥**

(व्या०) तदेति ॥ तदा तस्मिन्नवसरे मखांशिनां देवानां ह्रदे जलाशये आलोडनमवगाहनं ह्रदालोडनं ह्रदावगाहनं शाखिनो वृक्षास्तेषु दोलनं प्रेंखणं शाखिदोलनं प्रियाया मुखं तस्य आलोकः प्रियामुखालोकः एते प्रमुखाः मुखं प्रधानं यस्य स रसः प्रयाणस्य रसेन व्यलुप्यत लुप्तः । किं वत् पादान्तरवत् यथा हस्तिनः पदेन द्विपदचतुष्पदादीनां पादान्तरं लुप्यते 'सर्वेपदा हस्तिपदे प्रविष्टाः' इति न्यायात् ॥ ३ ॥

**विनिर्यतां स्वस्वदिवो दिवौकसां, स कोऽपि घोषः सुहृदादिहूतिभूः ।**
**अभूद्विहायस्यपि यत्र गोव्रजं, विमिश्रितं कः प्रविभक्तुमीश्वरः ॥४॥**

(व्या०) विनिर्यतामिति ॥ स्वस्वदिवः स्वस्य स्वस्य स्वर्गात् विनिर्यतां निर्गच्छतां दिवौकसां द्यौरोको येषां ते दिवौकसो देवास्तेषां सुहृदादीनां (शोभनं हृदयं येषां ते सुहृदो मित्राणि सुहृद् दुर्हृन् मित्रामित्रे । ७ । ३ । १५७ । इ सू. मित्रेऽर्थेसुपूर्वक हृदयस्य हृदादेशो निपात्यते सुहृद आदौ येषां ते सुहृदादयस्तेषां एकार्थं चानेकं च । ३ । १ । २२ । इ. सू. बहुव्रीहिः) मित्रादीनां हूतिराकारणं तस्या भवतीति सुहृदादिहूतिभूः स कोऽपि घोषः कलकलः गोकुलं वा अभूत् । यत्र घोषे गोव्रजं वाणीसमूहं धेनुसमूहं वा विमिश्रितं एकीभूतं सत् विहायस्यपि आकाशेऽपि प्रविभक्तुं पृथक् कर्तुं कः ईश्वरः समर्थः स्यात् अपि तु न कोऽपि ॥ ४ ॥

**अमीषु नीरंध्रचरेषु कस्यचि–न्निरीक्ष्य युग्यं हरिमन्यवाहनम् ।**
**इभो न भीतोऽप्यशकत्पलायितुं, प्रकोपनः सोऽपि न तं च धर्षितुम् ॥**

(व्या०) अमीष्विति ॥ अन्यवाहनं अन्यस्य देवस्य वाहनं (करणाधारे । ५ । ३ । १२९ । इ. सू. वहधातोः करणे अनट् उह्यते अनेन इति वहनं ततः प्रज्ञादिभ्योऽण् । ७ । २ । १६५ । इ. सू. स्वार्थे अण् वहनमेव

वाहनम् ।) इभो हस्ती कस्यचिद्देवस्य युग्यं (वहतिरथयुगप्रासङ्गात् । ७-१-२ इ. सू. युगशब्दात् वहति अर्थे य प्रत्ययः युगं वहतीति युग्य) यानभूतं हरिं सिंहं निरीक्ष्य दृष्ट्वा भीतोऽपि पलायितुं (क्रियायां क्रियार्थायां तुम् णक च् भविष्यन्ती । ५ । ३ । १३ । इ. सू. परापूर्वक अयूधातोः तुम् प्रत्ययः । स्ताद्यशितोऽत्रोणादेरिट् । ४ । ४ । ३२ । इ. सू. तुमः इट् ।) नाशकत् न शक्तः । सोऽपि सिंहोऽपि प्रकोपनः ईर्ष्यालुः सन् । तमिभं हस्तिनं धर्षितुं नाशकत् । केषु सत्सु अमीषु देवेषु नीरंध्रचरेषु नीरंध्रं यथा भवति तथा चरन्ति तेषु निश्छिद्रं चलत्सु । पतितोऽपि तिलो यत्र नाधो याति तन्नीरंध्रमुच्यते ॥५॥

**महातनुः स्थूलशिरा विलोहितेक्षणः परस्यासनकासरः पुरः ।**
**पलाययन् वाहनवाजिनो व्यधा-त्तुरंगिणां प्राजनविश्रमं क्षणम् ॥६॥**

(व्या०) महातनुरिति ॥ परस्यान्यदेवस्य आसनकासरः (करणाधारे । ५ । ३ । १२९ । इ. सू. आसूधातोः आधारे अनट् आस्यते अस्मिन् इति आसनम् ।) आसनसत्कः कासरः महिषः तुरंगिणामश्ववाराणां क्षणं प्राजनविश्रमं प्राजनस्य विश्रमस्तं तर्जनकविश्रमं व्यधात् । किं लक्षणः कासरः महातनुः (एकार्थं चानेकं च ३ । १ । २२ । इ. सू. बहुव्रीहिसमासः जातीयैकार्थेच्वेः । ३ । २ । ७० । इ. सू. महतः डाः, डित्यन्तस्वरादेः इ. सू. अन्त्यस्वरादेर्लोपः) महती तनुः शरीरं यस्य सः स्थूलशिराः स्थूलं शिरो मस्तकं यस्य सः बृहन्मस्तकः विलोहितेक्षणः विलोहिते ईक्षणे नेत्रे यस्य सः आरक्तलोचनः किं कुर्वन् कासरः वाहनवाजिनः वाहनीभूतान् वाजिनस्तुरगान् पलाययन् पलायनं कारयन् । पूर्ववृत्ते नीरंध्रचरत्वं प्रोक्तम् अत्र पलायनं प्रोक्तम् । इत्थं वचनविरोधः स्यात् परन्तु मार्गे चलतां क्वापि संकीर्णता क्वापि असंकीर्णता भवति ततो न विरोधः ॥६॥

**प्रभोर्विवाहाय रयाद्वियासतां, वितेनिरे प्रत्युत सादिनां श्रमम् ।**
**नभोनदीतीरतृणार्पिताननाः, कशाप्रहारैः पथि यानवाजिनः ॥ ७ ॥**

(व्या०) प्रभोरिति ॥ यानवाजिनः (यान्ति अनेन इति यानं करणाधारे ५ । ३ । १२९ । इ. सू याधातोः करणे अनट्) यानीभूततुरगाः पथि मार्गे

कशाप्रहारै कशानां प्रहारास्तैः प्रत्युत विशेषात् सादिनामश्ववाराणां श्रमं वितेनिरे (अनादेशादेरेकव्यञ्जनमध्येऽत । ४–१–२४ । इ सू परोक्षायां तन्धातोरत्वं न च द्वित्वम्) ददु । किं कुर्वतां सादिनां प्रभोः श्रीऋषभदेवस्य विवाहाय रयात् वेगात ययासतां गन्तुमिच्छताम् । किं लक्षणा वाजिन नभोनदीतीरतृणार्पिताननाः नभसो नदी आकाशगङ्गा तस्या तीरे तटे यानि तृणानि तेषु अर्पितं क्षिप्तं आननं मुखं यैस्ते । आकाशगङ्गाया तीरे तृणानि कथमुद्गच्छन्तीति केनापि पृष्टे प्रत्युत्तरमिदम् यादृशी आकाशगङ्गा तादृशानि तृणान्यपि ज्ञेयानि । परं लोके रूढचैव ज्ञेयम् । उक्तं च कविशिक्षायां 'जालभाद्यं नभोन्यमंभोजाद्यं नदीष्वपि' इति अग्रतोऽपि व्यावर्णनं न दोषाय ॥ ७ ॥

**मिथो निरुच्छ्वासविहारिणां सुधा–भुजां भुजालंकृतिघट्टनात्तदा ।**
**मणिव्रजो यत्र पपात ते पयः, क्षितिश्च रत्नाकरखानितां गते ॥ ८ ॥**

**(व्या०)** मिथ इति ॥ तदा तस्मिन्नवसरे मिथ परस्परं निरुच्छ्वासविहारिणां (अजाते शीले । ५ । १ । १५४ । इ. सू विपूर्वकहृधातोः शीलादि सदर्थे णिन्) निरुच्छ्वासं उच्छ्वासं विनापि यथा भवति तथा विहरन्ति इत्येवंशीलास्तेषां सुधाभुजां (क्विप् । ५–१–१४८ । इ सू सुधानामपूर्वकभुज्धातोः कर्तरि क्विप्) सुधां भुञ्जते इति सुधाभुजस्तेषां देवानां भुजालंकृतिघट्टनात् भुजानां अलंकृतिराभूषणं तस्याः घट्टनं तस्मात् भुजांगदघर्षणात् यत्र स्थाने मणिव्रज मणीनां रत्नानां व्रज समूह पपात । तत्र स्थाने ते पयः पानीयं क्षितिश्च पृथ्वी च रत्नाकरखानितां रत्नाकर (पुन्नाम्नि घ । ५ । ३ । १३० । इ. सू आङ्पूर्वककृधातो संज्ञाया घ आकुर्वन्ति अस्मिन्निति आकर रत्नानामाकर) समुद्रः रत्नखानिश्च तद्भावं गते । अत्रापि अनुमानालंकारो ज्ञेयः ॥

**भवेत् प्रयाणे भुवि विघ्नकृन्मृगी–दृशां नितम्बस्तनभारगौरवम् ।**
**अधोऽवतारे तु सुपर्वयौवतै–स्तदेव साहायककारि चिन्तितम् ॥ ९ ॥**

**(व्या०)** भवेदिति ॥ मृगीदृशां स्त्रीणां नितम्बस्तनभारगौरवं नितम्बश्च

कटीपश्चाद्भागः स्तनौ च एषां समाहारः नितम्बस्तनं ( प्राणितुर्याङ्गाणाम् । ३ । १ । १३७ । इ. सू. समाहार द्वन्द्वः । ) प्राण्यंगत्वादेकवद्भाव तस्य भारः तस्य गौरवं प्रयाणे मार्गे भुवि पृथ्व्यां विघ्नकृत् विघ्नं करोतीति भवेत् । तु पुनः सुपर्वयौवतैः युवतीनां समूहा यौवतानि (षष्ठ्याः समूहे । ६-२-९ । इ. सू. समूहेऽर्थे युवतिशब्दात् अण् ) सुपर्वणां यौवतानि तैः देवयुवतीसमूहैः अधोऽवतारे अध पतने । तदेव नितम्बादिगौरवं साहायककारि साहायकं करोतीति साहाय्यकारि चिन्तितम् ॥ ९ ॥

**उपात्तपाणिस्त्रिदशेन वल्लभा, श्रमाकुलाकाचिदुदंचिकंचुका ।**
**वृषस्यया चाटुशतानि तन्वती, जगाम तस्यैव गतस्य विघ्नताम् ॥१०॥**

(व्या०) उपात्तेति । काचिद् देववल्लभा देवांगना श्रमाकुला श्रमेण आकुला त्रिदशेन देवेन उपात्तपाणि उपात्त गृहीतः पाणिर्हस्तो यस्याः स गृहीतहस्ता सती तस्यैव त्रिदशस्य गतस्य (क्लीबे क्त । ५ । ३ । १२३ । इ. सू. गम् धातोर्भावे नपुंसके क्त गम्यते इति गतम् । ) गमनस्य विघ्नतां (विहन्यते अनेन इति विघ्नः । स्थादिभ्यः क. । ५ । ३ । ८२ । इ. सू. विपूर्वकहन्धातोः क, अनोऽस्य । २ । १ । १०८ । इ. सू. अनोऽस्य लुक् । हनो ह्नोघ्न. । २ । १ । ११२ । इ. सू घ्ने कृते । विघ्नः । भावे त्वतल् । ७ । १ । ५५ । इ. सू. विघ्न शब्दात् भावेऽर्थे तल् ) जगाम । किं कुर्वती सती वृषस्यया (अमाव्ययात् क्यन् च । ३ । ४ । २३ । इ. सू. वृषशब्दात् इच्छार्थे क्यन् प्रत्यय वृषाश्वान्मैथुनेस्सोऽन्तः । ४ । ३ । ११४ । इ. सू. वृषशब्दात् सोऽन्तः । शंसि प्रत्ययात् । ५ । ३ । १०५ । इ. सू. वृषस्यधातोः अप्रत्ययः लुगस्यादेत्यपदे । २ । १ । ११३ । इ. सू अकारलोपः । आत् । २ । ४ । १८ । इ. सू. आप् । मैथुनार्थं वृषेच्छा वृषस्या । ) मैथुनेच्छया चाटुशतानि तन्वती पुन उदंचिकंचुका उच्छसत् कञ्चुका ॥ १० ॥

**पुरस्सरीभूय मनाक् प्रमादिनं, क्वचित् कृषन्तीष्वमरीषु वल्लभम् ।**
**विशां वशाः स्युः पथि पादशृंखला, इति श्रुतिं केऽपि वृथैव मेनिरे ॥**

(व्या०) पुरस्सरीभूयेति ॥ केऽपि देवाः इति श्रुतिं वृथैव मेनिरे । इतीति- किं वशाः स्त्रियः पथि मार्गे विशां पुरुषाणां पादशृंखलाः पादबन्धनानि स्युः कासु सतीषु अमरीषु देवीषु मनाक् स्तोकं प्रमादिनं वल्लभं भर्तारं पुरस्सरीभूय (पुरोऽग्रतोऽग्रे सर्तेः । ५ । १ । १४१ । इ. सू. पुरस्पूर्वकसृधातोः टप्रत्ययः अणजेयेकण्नञ्स्नञ्टिताम् । २ । ४ । २० । इ. सू. ङी पुरः सरन्ति इति पुरःसर्यः ) अग्रे भूत्वा कृषन्तीषु बलादाकर्षन्तीषु सतीषु ॥ ११ ॥

**दिवो भुवश्चान्तरलंगतागतै-रवाहि योऽध्वा त्रिदशैरनेकशः ।**
**द्युदंडकत्वेन स एव विश्रुतः, प्रपद्यतेऽद्यापि नभोऽब्धिसेतुताम् ॥१२॥**

(व्या०) दिव इति ॥ त्रिदशैर्देवैः दिवः स्वर्गस्य भुवश्च पृथिव्याश्च अन्तर्मध्ये अलमत्यर्थं गतागतैः गतानि च आगतानि च तैः गमनागमनैः योऽध्वा मार्गोऽनेकशः ( संख्यैकार्थाद्वीप्सायां शस् । ७ । २ । १५१ । इ. सू. वीप्सार्थात् अनेकशब्दात् शस् प्रत्ययः ) अनेकवारान् अवाहि वाहितः स एव अध्वा मार्गः द्युदंडकत्वेन विश्रुतः विख्यातः सन् अद्यापि नभोऽब्धिसेतुतां नभः आकाशमेव अब्धिः (आपः धीयन्ते अस्मिन् इति अब्धिः, व्याप्यादाधारे । ५ । ३ । ८८ । इ. सू. अप्पूर्वकधाधातोः किः । इडेत् पुसि चातो लुक् । इ. सू. आलोपः ) समुद्रः तस्य सेतुतां आकाशसमुद्रसेतुबंधत्वं प्रपद्यते ॥ १२ ॥

**जनिर्जिनस्याजनि यत्र सा मही, महीयसी नः प्रतिभाति देवता ।**
**इतीव देवा भुवमागता अपि, क्रमैर्न संपस्पृशुरेव तां निजैः ॥ १३ ॥**

(व्या०) जनिरिति ॥ देवा भुवं पृथ्वीमागता अपि निजैः क्रमैः पदैः स्वां भुवं न संपस्पृशुरेव नैव स्पृष्टवन्तः । उत्प्रेक्षते इतीव इतीति किं यत्र यस्यां पृथिव्यां जिनस्य श्रीऋषभदेवस्य । जनिः ( पदिपठिपचिस्थलिहलिकलि- बलि-भ्यः । ६०७ । इ. उ. सू. जन्धातोरिप्रत्ययः । ) जन्म अजनि जाता । सा मही पृथ्वी नोऽस्माकं महीयसी (गुणाङ्गाद्वेष्ठेयसू । ७ । ३ । ९ । इ. सू. महत्शब्दात् ईयसु । त्र्यन्तस्वरादेः । ७ । ४ । ४३ । इ. सू. महत्शब्द-

स्य अन्त्यस्वरादेर्लोपः ।) अत्यंतं महती देवता प्रतिभाति देवतावन्मान्या देवता च कथं चरणैः स्पृश्या इति ॥ १३ ॥

**मुहूर्तमासीदति किं बिडौजसां, प्रमादितेत्युद्गिरि नाकिमंडले ।**
**विमानमानंज तमंजसावरं, वरेण्यतैलैः प्रथमः पुरन्दरः ॥ १४ ॥**

(व्या०) मुहूर्तमिति ॥ प्रथम पुरन्दर (पुरन्दरभगन्दरौ । ५ । १ । ११४ । इ. सू. निपात्यते) पुरः शत्रुपुराणि दारयतीति पुरन्दर इन्द्र वरेण्य-तैलैः वरेण्यानि (वृङ एण्यः । ३८२ । इ. उ. सू. वृङ्धातो एण्यप्रत्ययः) च तानि तैलानि च तैः प्रशस्य तैलैस्तं वरं श्रीऋषभं अंजसा सामस्त्येन विमानं निरहंकारं यथा भवति तथा आनञ्ज अभ्यनक्ति स्म । क सति नाकिमंडले नाकिनां मंडलं तस्मिन् देवसमूहे इति उद्गिरि उद्गतवाचि सति इतीति किं मुहूर्तमासीदति आसन्नं भवति । बिडौजसामिंद्राणां किं प्रमादिता प्रमादकारिता ॥ १४ ॥

**तनूस्तदीया पटवासकैरभा-द्विशेषतः शोषिततैलतांडवा ।**
**अकृत्रिमज्योतिरमित्रमत्र न, स्निहिक्रिया स्याद् बहिरंगगापि किम् ॥**

(व्या०) तनूरिति ॥ तदीया तस्य इयं तनू स्वामिनः शरीरं पटवास-कैः पिष्टातैः शोषिततैलतांडवा सती शोषितं तैलस्य तांडवं नृत्यं यस्यां सा एवं-विधा सती विशेषतः (अहीयरुहोऽपादाने । ७ । २ । ८८ । इ. सू. पञ्च-म्यर्थे विशेषशब्दात् तसुप्रत्ययः ।) अभात् दिदीपे । अत्र (ककुत्रात्रेह । ७ । २ । ९३ । इ सू. अत्र इति निपात्यते) अस्मिन् भगवति बहिरंगगापि (नाम्नो गमः खड्डौ च विहायसस्तु विह । ५ । १ । १३१ । इ. सू. बहिरंग-शब्दपूर्वक गम्धातोर्ड प्रत्ययः ।) बाह्यशरीरस्थापि स्निहिक्रिया (कृगः श च वा । ५ । ३ । १०० । इ. सू. कृधातो. भावे शप्रत्यये । रि शक्याशीर्ये । ४ । ३ । ११० । इ. सू ऋकारस्य रि । धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये । इ. सू. इयादेशः, आत् इ. सू आप् ।) किं अकृत्रिम-(ड्वितस्त्रिमक् तत्कृतम् । ५ । ३ ८४ । इ. सू. कृधातोः तेन कृतमित्यर्थे त्रिमक् प्रत्ययः ।) ज्योतिषः

अकृत्रिमं ज्योतिः यस्य सः तस्य सूर्यस्य अमित्रं विरोधिनी न स्यात् अपि तु स्यादेव कोऽर्थः भगवतः शरीरे यत् मुख्यं तेजः तत्तैलाभ्यंगेन आवृतमभूत् । पिष्टातैस्तैले शोषिते तत् प्रकटं ज्ञातमिति भावः ॥ १५ ॥

**जलानि यां स्नानविधौ प्रपेदिरे, पवित्रतां तद्विशदांगसंगतः ।**
**तयैव तैरादरसंगृहीतया-धुनापि विश्वं पवितुं प्रभूयते ॥ १६ ॥**

**(व्या०)** जलानीति ॥ जलानि पानीयानि स्नानविधौ स्नानस्य विधिः (विधीयते अनेन इति विधिः उपसर्गात् दः किः । ५ । ३ । ८७ । इ. सू. विपूर्वकधाधातो किः । इडेत् पुसि चातोलुक् इ. सू. आकारलोपः ) तस्मिन् स्नाने कार्यमाणे तद्विशदांगसंगतः तस्य भगवतो विशदं निर्मलं यदंगं तस्य संगतः भगवन्निर्मलांगसंसर्गात् पवित्रतां प्रपेदिरे प्रपन्नानि । आदरसंगृहीतया आदरेण (युवर्णवृदृवशरणगमृद्ग्रहः । ५-३-२८ । इ. सू. आपूर्वकदृधातोः अल् प्रत्ययः । नामिनोगुणोऽक्ङिति । ४ । ३ । १ । इ सू. गुणे आदरः ।) संगृहीतया तयैव पवित्रतया तैर्जलैरधुनापि विश्वं जगत् पवितुं पवित्रीकर्तुं प्रभूयते (शंसस्वयंविप्राद्भुवोडुः । ५ । २ । ८४ । इ. सू. प्रपूर्वकभूधातोःडुः डित्यन्त्यस्वरादेः । २-१-११४ । इ. सू. अन्त्यस्वरादेर्लोपः क्यङ् । ३-४-२६ । इ. सू. प्रभुशब्दात् आचारेऽर्थेक्यङ् दीर्घश्च्वियङ्यक्येषु च । ४ । ३ । १०८ । इ. सू. दीर्घः । इङितः कर्तरि । ३ । ३ । २२ । इ. सू. क्यङोङित्वात् आत्मनेपदम् । प्रभुरिव आचरति इति प्रभूयते) समर्थायते ॥ १६ ॥

**सुवस्त्रशान्तोदकलेपभासुरः, समंततः संगतदिव्यचन्दनः ।**
**घनात्ययोद्गतजलंमरुद्गिरेः, सिताभ्रलिप्तं कटकं व्यजैष्ट सः ॥१७॥**

**(व्या०)** सुवस्त्रेति ॥ स भगवान् मरुद्गिरेः मेरुपर्वतस्य सिताभ्रलिप्तं सितानि च तानि अभ्राणि च तैर्लिप्तं श्वेताभ्रलिप्तं शरत्काले मेघानां श्वेतत्वात् कटकं शिखरं व्यजैष्ट जितवान् । विपूर्वकजिधातोः 'परावेर्जेः' इति सूत्रेणा-

त्मनेपदम् । किं विशिष्टः सः, सुवस्त्रशान्तोदकलेपभासुरः शोभनं वस्त्रं सुवस्त्रं (सुः पूजायाम् । ३ । १ । ४४ । इ. सू. तत्पुरुषसमासः) तेन शान्तो य उदकस्य जलस्य लेपस्तेन भासुरो (भञ्जि भासिमिदोघुरः । ५-२-७४ । इ. सू. भास्धातोः शीलादिसदर्थे घुरप्रत्ययः ।) देदीप्यमानः । समंतत सर्वतः संगतं मिलितं दिव्यचन्दन गोशीर्षचन्दनं यस्य सः । किं विशिष्टं मेरोः कटकं घनात्ययोद्वान्तजलं घनात्यये शरत्काले उद्वान्तं शुष्कं जलं यस्य तत् ॥ १७ ॥

**अमुं पृथिव्यामुदितंसुरद्रुमं, निरीक्ष्यहृन्मूर्ध्नि सुमांचितंसुराः ।**
**जगत्प्रियं पुत्रफलोदयं वयः, क्रमादवोचन्नचिरेण भाविनम् ॥ १८ ॥**

**(व्या०)** अमुमिति ॥ सुराः देवाः अमुं भगवन्तं पृथिव्यां उदितं सुरद्रुमं कल्पवृक्षं निरीक्ष्य दृष्ट्वा वय.क्रमात् वयसः क्रमः तस्मात् षट्लक्षपूर्वानन्तरं अचिरेण स्तोककालेन भाविनं (वर्त्स्यति गम्यादि । ५ । ३ । १ । इ. सू. भूधातोर्भविष्यर्थे णिन् ।) भविष्यन्तं पुत्रफलोदयं पुत्र एव फलस्य उदयो यस्य तं अवोचन् । किं लक्षणममुं हृन्मूर्ध्नि हृदयं च मूर्धा च एतयोः समाहार हृन्मूर्ध तस्मिन् हृदये मस्तके सुमांचितं सुमैः (कारकं कृता । ३ । १ । ६८ । इ. सू. तृतीया तत्पुरुषः ।) मंदारहरिचन्दनपारिजातादिकुसुमैः अंचितं पूजितं हृन्मूर्ध्नि इति 'प्राणितूर्यांगाणां' इति सूत्रेण एकत्वं ज्ञेयम् । अत्र जगत्प्रियं जगतः प्रियस्तं विश्वाभीष्टम् ॥ १८ ॥

**अदःकचश्चोतनवारिविप्रुषो, निपीययैश्चातकितं तदामरैः ।**
**ततः परं तेषु गतं सुधावधि, स्वधिक्क्रियामेव ययौ रसान्तरम् ॥१९॥**

**(व्या०)** अद इति । तदा तस्मिन्नवसरे यैरमरैः देवैः अदः कचश्चोतनवारिविप्रुषः अमुष्य भगवतः कचाःकेशाः तेषां श्चोतनं क्षरणं तस्मिन् वारिणो विप्रुषः जलबिन्दून् निपीय पीत्वा चातकितं बप्पीहवदाचरितम् । तत.परं तेषु अमरेषु सुधावधि अमृतावधि रसान्तरमपरोरस स्वकीयां धिक्क्रियां निन्दामेव ययौ प्राप ॥ १९ ॥

**महेशितुः सद्गुणशालिनो वृष–ध्वजस्य मौलिस्थितितोऽधिकं बभुः ।**
**अमुष्य सर्वांगमुपेत्य संगमं, विशुद्धवस्त्रच्छलगाङ्गवीचयः ॥ २० ॥**

(व्या०) महेशितुः ॥ विशुद्धवस्त्रच्छलगाङ्गवीचयः विशुद्धं निर्मलं च तत् वस्त्रं च तस्यच्छलेन गंगाया इमे गांगागाः (तस्येदम् । ६–३–१६० । इ. सू. गङ्गाशब्दात् अण्) च ता वीचयश्च कल्लोलाः अमुष्य भगवतः सर्वांगं संगमं उपेत्य प्राप्य मौलिस्थितितः मौलौ स्थितितः मस्तकस्थिते. अधिकं बभु. शोभिता । किं लक्षणस्य भगवतः महेशितु महांश्चासौ ईशिता च महेशिता तस्य । (विशेषणं विशेष्येणैकार्थं कर्मधारयश्च । ३ । १ । ९६ । इ सू. कर्मधारयसमासः) सद्गुणशालिनः सतां गणाः समूहाः तैः शालते सद्गणशाली (अजाते शीले । ५ । १ । १५४ । इ. सू. शीलेऽर्थे शालधातोः णिन् प्रत्ययः ।) तस्य वृषध्वजस्य (उष्ट्रमुखादयः । ३–१–२३ । इ. सू व्यधिकरणबहुव्रीहिः वृषोध्वजे यस्य सः वृषध्वज ।) वृषलाञ्छनस्य पक्षे महेशितुः ईश्वरस्य सद्गणशालिनः सन्तोविद्यमाना नन्दिचन्दिप्रमुखागणास्तैः शालिनः ईश्वरगणाश्चामी । तद्यथा— 'महाकाल. पुनर्बाणो वनबाहु वृषाणकः वीरभद्रस्तु भीराजोहेरकस्तु कृतालकः ॥१॥ अथ चंडोमहाचंडः कुशांडीककणप्रियः । मज्जनोऽमज्जनो छागः छागमोघो महानसः ॥ २ ॥ महाकालकामपालौ संतापनविलेपनौ । महाकपोलः येलोजः शंखवर्णश्च शरस्तपः ॥ ३ ॥ उल्कामालीमहाजंभः श्वेतपादः खरांडकः गोपालोग्रामणीर्घंटाकर्णकर्णकराध्वमौ ॥ ४ ॥ एभिर्गणैः शोभमानस्य ईश्वरस्य शिरसि गङ्गाकल्लोलाः स्युः । अत्र तु सर्वांगे वस्त्रच्छलगङ्गाकल्लोला अभूवन्निति विशेषः ॥

**कचान् विभोर्वासयितुं सुगंधयः, प्रयेतिरे ये जलकेतकादयः ।**
**अभीषु ते प्रत्युत सौरभश्रियं, न्यधुर्नमोघा महतां हि सङ्गतिः ॥२१॥**

(व्या०) कचानिति ॥ जलशब्देन वालकः केतकादयश्च ये सुगंधयः शोभनोगन्धो येषां ते सुगन्धयः (सुपूत्युत्सुरभेर्गन्धादिद्गुणे । ७–३–१४४ । इ. सू. सुपूर्वकगन्धशब्दात् इत् ।) पदार्थाः विभोः स्वामिनः कचान् केशान्

वासयितुं प्रयेतिरे उपक्रान्ताः । ते कचाः अमीषु जलकेतकादिषु प्रत्युत विशेषतः सौरभश्रियं सौरभस्य श्रीस्तां न्यधुः (कर्तरि अद्यतनी ।) निक्षिप्तवन्तः । हि निश्चितं महतां महापुरुषाणां संगतिः मोघा निष्फला न वर्तते । भगवतो देहस्य जन्मप्रभृति स्वभावतः सुगंधत्वात् केशादिवासनं देवैर्व्यवहारार्थमेव कृतम् ॥ २१ ॥

**पिनद्धकोटीरकुटीरहीरक-प्रभास्य मौलेरुपरि प्रसृत्वरि ।**
**प्रतापमेदस्विमदां विवस्वतो-ऽभिषेणयन्तीवकरावलीं बभौ ॥ २२ ॥**

(व्या०) पिनद्धेति । पिनद्धो (वावाप्योस्तनिक्रीधाग्नहोर्वपी । ३–२ १५६ । इ. सू. अपि स्थाने पिः) बद्धः कोटीरोमुकुटः स एव कुटीरं स्थानं तस्मिन् ये हीरकास्तेषां प्रभा । अस्य भगवतो मौलेर्मस्तकस्य उपरि प्रसृत्वरी (सृजीण्नशष्ट्वरप् । ५ । २ । ७७ । इ. सू. प्रपूर्वकसृधातोः ट्वरप् । ह्रस्वस्य तः पित्कृति इ. सू. तोन्तः । अणञेयेकण्नञ्स्नञ्टिताम् । २ । ४ । २० । इ. सू. प्रसृत्वरशब्दात् ङीः ।) प्रसरणशीला सती बभौ शोभिता । किं कुर्वती उत्प्रेक्ष्यते । प्रतापमेदस्विमदां प्रतापेनमेदस्वीमदो यस्याः सा । तां प्रतापस्थूलमदां विवस्तः सूर्यस्य करावलीं कराणामावली तां किरणश्रेणिं अभिषेणयन्ती इव सेनया अभि सन्मुखं यान्तीव ॥ २२ ॥

**सनिष्कलंकानुचरः प्रभार्णवं, विगाह्य नावेव दृशा तदाननम् ।**
**शिरःपदं पुण्यजनोचितं जनो, ददर्श दूरान्मुकुटं त्रिकूटवत् ॥ २३ ॥**

(व्या०) स इति ॥ जनोलोकः त्रिकूटवत् शिखरत्रययुक्तं पक्षे त्रिकूट-नामा पर्वतस्तद्वत् त्रीणि कूटानि शिखराणि यस्य स तमिव मुकुटं दूरात् ददर्श । किं विशिष्टोजनः स निष्कलंकानुचरः निर्गतः कलंकः येभ्यस्ते निष्कलंकाः ते च ते अनुचराश्च निष्कलंकानुचराः निर्दोषानुचरास्तैः सहवर्तते इति सनि-ष्कलंकानुचरः पक्षे निष्कं सुवर्णं तेन सह वर्तते यथा यां तां लंकामनुचरतीति । किं कृत्वा प्रभार्णवं प्रभायाः अर्णवं समुद्रं तदाननं तस्य भगवतः आननं मुखं तत नावा इव वेडिकया इव दृशा दृष्ट्या विगाह्य किं विशिष्टं मुकुटं शिरःपदं शिरसि

मस्तकेपदं स्थानं यस्य तं पुनः पुण्यजनोचितं पुण्याः पवित्राः ये जनास्तेषामुचितं योग्यं पक्षे पुण्यजना राक्षसास्तेषामुचितं योग्यम् । यथा प्रवाहणिको लोको लंका-समीपे त्रिकूटं पर्वतं पश्यति तथा भगवतः शिरसि मुकुटं दृष्टवान् । अत्र मुकुटः त्रिकूटयोः साम्यं मुकुटशब्दो नपुंसकेऽप्यस्ति ॥ २३ ॥

**ललाटपट्टेऽस्य पृथौ ललाटिका-निविष्टमुक्तामिषतोऽक्षराणि किम् ।**
**पतिंवरे पाठयितुं रतिश्रुतिं, लिलेख लेखप्रभुपंडितः स्वयम् ॥ २४ ॥**

(व्या०) ललाट इति ॥ लेखप्रभुपंडितः लेखाः देवाः तेषां प्रभुः स्वामी इन्द्रः स एव पंडितः इन्द्रः । पक्षे लिखनं लेखः तद्विषये प्रभुः समर्थः एवंविध-पंडितः पृथौ विस्तीर्णे ललाटपट्टे भाले ललाटिकानिविष्टमुक्तामिषतः ललाटिका (कर्णललाटात् कन् । ६ । ३ । ४१ । इ. सू. ललाटशब्दात् भवार्थे कल् । अस्या यत्तत् क्षिपकादीनाम् । २ । ४ । १११ । इ. सू. अस्य इः । ललाटे भवति ललाटिका) ललाटाभरणं तस्यां निविष्टाः स्थापिताः मुक्ताः मौक्तिकानि तासां मिपात् स्वयं किं अक्षराणि लिलेख । अन्योऽपि पंडितः पट्टके लिखित्वा । पाठयति किं कर्तुं पतिंवरे (भृवृजितृतपदमेश्च नाम्नि । ५–१–११२ । इ. सू. पतिकर्मपूर्वकवृधातोः खप्रत्ययः खित्यनव्ययाऽरुषोर्मोऽन्तोह्रस्वश्च । ३ । २ । १११ । इ. सू. मोन्तः पतिं वृणीतः इति पतिंवरे ।) सुमंगलासुनन्दे रतिश्रुतिं पाठयितुम् ॥ २४ ॥

**उदित्वरं कुंडलकैतवाद्रवि-द्वयं विदित्वा परितस्तदाननम् ।**
**क्षतेक्षिते श्रीरिह वज्रिणामपी-त्यजन्यजन्यं विबुधैः फलंजगे ॥ २५ ॥**

(व्या०) उदित्वरमिति ॥ विबुधैर्देवैर्दक्षैर्वा तदाननं तस्य भगवत आननं मुखं परितः कुंडलकैतवात् कुंडलयोः कैतवं तस्मात् कुंडलमिषात् उदित्वरं (सृजीण्नशष्ट्वरप् । ५ । २ । ७७ । इ. सू. उत्पूर्वकइधातोः ट्वरप् प्रत्ययः ह्रस्वस्य तः पित्कृति इ. सू. तः । उदेति इत्येवंशीलं उदित्वरम्) उदयनशीलं रविद्वयं सूर्यद्वयं विदित्वा ज्ञात्वा इति अजन्यजन्यं अजन्येन उत्पातेन जन्यं जनितं

फलं जने लोके उक्तं कथितम् । इतीति किं इहलोके रविद्वये सूर्यद्विके ईक्षिते दृष्टे सति वज्रिणामपि इन्द्राणामपि श्रीः लक्ष्मीः क्षता क्षयगता । सूर्यद्वये चन्द्रद्वये च दृष्टे राज्ञां नृपाणामुत्पातः स्यादितिभाव ॥ २५ ॥

**उदारमुक्तास्पदमुल्लसद्गुणा, समुज्ज्वला ज्योतिरुपेयुषीपरम् ।**
**तदा तदीये हृदि वासमासदद्, व्रतेऽक्षरश्रीरिव हारवल्लरी ॥ २६ ॥**

(व्या०) उदार इति ॥ तदा तस्मिन्नवसरे हारवल्लरी तदीये तस्य भगवत इदं तस्मिन् हृदि हृदये वासमासदत् प्राप्ता । केव अक्षरश्रीरिव मोक्षलक्ष्मीरिव । यथा अक्षरश्रीः व्रते दीक्षायां सत्यां तदीये हृदि वासमासादयति । सिद्धिमिच्छन्ति योगिनः इति भाव. । किं विशिष्टा हारवल्लरी उदारमुक्तास्पदं उदाराश्च ताः मुक्ताश्च मौक्तिकानि तासामास्पदं स्थानं उल्लसद् गुणा उल्लसन् गुणो दवरको यस्या' सा। समुज्ज्वला निर्मला परं प्रकृष्टं ज्योति' तेज उपेयुषी (वेयिवदनाश्वदनूचानम् । ५ । २ । ३ । इ. सू. उपपूर्वक इधातोः परोक्षाविषये क्वसु प्रत्ययः । अधातूदृदित' । २ । ४ । २ । इ सू डी' । क्वसुष्मतौ च । २ । १ । १०५ । इ. सू. क्वस उष् । उपेयाय इति उपेयुषी ) प्राप्ता । अक्षरश्रीः किं लक्षणा उत् उर्ध्वं आरोगमनं येषां ते उदाराः सिद्धाः उदाराश्च ते मुक्ताश्च सिद्धाः तेषामास्पदं स्थानं । उल्लसन्तः गुणा ज्ञानदर्शनादयो यस्यां सा । परंज्योतिः परब्रह्मसत्कं तेजः प्राप्ता समुज्वला च ॥ २६ ॥

**जगत्त्रयीरक्षणदीक्षितौ क्षितौ, भुजौ तदीयाविति केन नेष्यते ।**
**अवाप हेमाऽपद्दसंज्ञमप्यहो, यदंगदत्वं तदुपासनाफलम् ॥ २७ ॥**

(व्या०) जगदिति ॥ केन पुंसा इति न इष्यते न मन्यते अपि सर्वेणापि इतीति किं क्षितौ पृथिव्यां तदीयौ तस्य भगवतः इमौ भुजौ हस्तौ जगत्त्रयीरक्षणदीक्षितौ जगतां त्रयी तस्या रक्षणं तस्मिन् दीक्षितौ (तदस्य सञ्जातं तारकादिभ्य इत. । ७ । १ । १३८ । इ. सू. दीक्षाशब्दात् संजातेऽर्थे इतप्रत्यय अवर्णेवर्णस्य । ७ । ४ । ६८ । इ. सू. आलोपः ।) लक्षणया रक्ष-

णाय समर्थौ वर्तेते हेतुमाह—यत् यस्मात् कारणात् हेम सुवर्ण अपटुसंज्ञमपि अहो इत्याश्चर्ये अंगदत्वं बाहुरक्षत्वं पक्षे देहदाहकत्वमवाप । किं विशिष्टं अंगदत्व तदुपासनाफलं तयोः भुजयोः उपासनायाः (णिवेत्त्यासश्रन्थघट्टवन्देरनः । ५ । ३ । १११ । इ. सू. उपपूर्वक आस्धातोः स्त्रियां भावे अनः । आत् इ. सू. आप्) सेवाया फलम् ॥ २७ ॥

**प्रकोष्ठकंदं कटकेनवेष्टितं, विधायमन्येऽस्य ररक्ष वासवः ।**
**स पञ्चशाखोऽमरभूरुहो यदु—द्भवंस्त्रिलोकीमदरिद्रितुं क्षमः ॥ २८ ॥**

(व्या०) प्रकोष्ठ इति ॥ अहं एव मन्ये वासवः (वसति स्वर्गे इति वासवः मणिवसेर्णित् । ५१६ । इ. उ. सू. वस्धातोर्णित् अवः । ञ्णिति । ४ । ३ । ५० । इ. सू. उपान्त्यवृद्धिः) पंच अंगुलयः शाखाः यस्य सः । पक्षे स पंचशाख पंचशाखासहित अमरभूरुहः कल्पवृक्षः अमराणां देवानां भूरुहो वृक्षः त्रिलोकीं त्रयाणां लोकानां समाहारः त्रिलोकी (संख्या समाहारे च द्विगुश्चानाम्न्ययम् । ३ । १ । ९९ । इ. सू. समाहार द्विगु द्विगोः समाहारात् । २—४—२२ । इ. सू. स्त्रियां ङीः) तां त्रिभुवनमदरिद्रितुमदरिद्रीकर्तुं समर्थो वर्तते । यस्मात् कंदात् एवंविधः कल्पद्रुमः स्यात् स कथं न रक्ष्यते इति भावः ॥ २८ ॥

**तलं करस्यास्य परं परिष्कृता—खिलांगसाधोर्यदभूदभूषितम् ।**
**अवैमि देव्या वसनाय तच्छ्रियो, रतिं न भूम्ना भुवि यन्ति देवताः ॥**

(व्या०) तलमिति ॥ यत् यस्मात् कारणात् अस्य भगवतः करस्य (कार्यते अनेन इति करः पुन्नाम्नि घः । ५ । ३ । १३० । इ सू संज्ञायां करणे घः ।) हस्तस्य तलं परं केवलं अभूषितमनलंकृतं पक्षे न भुवि उषितं अभूषितमभूत् । किं विशि० भगवतः परिष्कृताखिलांगसाधोः परिष्कृतेन अलंकृतेन अखिलेन समस्तेन अंगेन शरीरेण साधुः मनोज्ञस्तस्य अखिलं च तत्त अंगं च अखिलांगं परिष्कृताखिलांगं परिष्कृताखिलांगेन साधुस्तस्य । तस्य श्रीः

तस्याः देव्याः वसनाय अवैमि जानामि । देवता (देवात् तल् । ७-२-१६२ इ. सू. देवशब्दात् स्वार्थे तल् देवा एव देवताः) भुवि पृथिव्यां भूम्ना बाहुल्येन रतिं (स्त्रियां क्तिः । ५ । ३ । ९१ । इ. सू. रम्धातोर्भावे स्त्रियां क्तिः । यमिरमिनमिगमिहनिमनिवनतितनादेर्धुड् क्डिति । ४ । २ । ५५ । इ. सू. रम्धातोर्मकारस्य लोपः) प्रीतिं न यन्ति नाप्नुवन्ति । एतावता लक्ष्मीः प्रभोः करतले वसतीति भावः ॥ २९ ॥

**सुवर्णमुक्तामणिभासि वासवै-र्न्यवेशि तस्यापघनेषु येषु यत् ।**
**तदीयमुख्यद्युतिभंगभीषणं, विभूषणं तैस्तदमानि दूषणम् ॥ ३० ॥**

(व्या०) सुवर्णेति । वासवैरिन्द्रैः तस्य भगवतो येषु अपघनेषु (अप हन्यते अनेन इति अपघनः निघोद्घसङ्घोद्घनाऽपघनोपघ्नं निमितप्रशस्त-गणाऽत्याधानाऽङ्गाऽऽसन्नम् । ५ । ३ । ३६ । इ. सू. अलन्तो निपात्यते) अवयवेषु यत् सुवर्णमुक्तामणिभासि (अजातेः शीले । ५ । १ । १५४ । इ. सू. भास्धातोः शीलेऽर्थे णिन्) सुवर्णानि च मुक्ताश्च मणयश्च तैर्भासते इत्येवं शीलं देदीप्यमानं भूषणं न्यवेशि निवेशितम् । तैर्वासवैः तदीयमुख्यद्युतिभंगभीषणं तस्य प्रभोः इयं तदीया चासौ मुख्यद्युतिश्च तस्याः भंगेन भीषणं रौद्रं तत् विभूषणं (विभूष्यते अनेन इति विभूषणं करणाधारे । ५ । ३ । १२९ । इ. सू. करणे अनट्) दूषणममानि येषु प्रभोः अवयवेषु भूषणं निवेश्यते तेन भूषणेन तेषामवयवानां काचिल्लिहपमा कान्तिराच्छाद्यते ततो भूषणानां दूषणत्वमितिभावः ॥

**यथा भ्रमर्यः कमले विकस्वरे, यथा विहंग्यः फलिते महीरुहे ।**
**उपर्युपर्यात्तविभूषणे विभौ, तथा निपेतुस्त्रिदशांगनादृशः ॥ ३१ ॥**

(व्या०) यथेति । त्रिदशांगनादृशः त्रिदशानां देवानां अंगनाः स्त्रियः तासां दृशः देवांगनादृष्टयः आत्तविभूषणे आत्तानि गृहीतानि विभूषणानि अलंकरणानि येन तस्मिन् गृहीतभूषणे विभौ स्वामिनि उपरि उपरि तथा निपेतुः पतिताः यथा भ्रमर्यो विकस्वरे (स्थेशभासपिसकसोवरः । ५ । २ । ८१ । इ. सू.

विपूर्वककसुधातो. । शीलेऽर्थे वर·) कमले यथा विहंग्यः (नाम्नो गमः खड्डौ च विहायसस्तु विहः । ५-१-१३१ । इ. सू. गम्धातोः खड् विहायसस्तु विहः डित्यन्त्यस्वरादेः इ. सू. अम्लोप· । धवाद्योगादपालकान्तात् । २ । ४ । ५९ । इ. सू. पुंयोगात् स्त्रियां ङी· विहायसा गच्छन्तीति विहङ्गाः विहङ्गानां भार्याः विहङ्ग्य· पक्षिण्य· फलिते महीरुहे वृक्षे निपतन्ति । पूर्ववृत्ते भूषणानां दूषणत्वमारोपितम्, अत्र तु भूषणकृता शोभा आरोपिता । परं विचित्रा कविव्यावर्णना । यथा **भक्तामरस्तवे** 'वक्त्रं क्व ते' इति वृत्ते चन्द्रबिंबस्य निन्दाकृता । 'नित्योदयम्' इति वृत्ते पुनरपि चन्द्रबिम्बोपमा आरोपिता ॥ ३१ ॥

**हिरण्यमुक्तामणिभिर्निजश्रिय–श्चिराच्चितायाः फलिनत्वमाप्यत ।**
**अलंकृते नेतरि नाकिनां करैः, प्रसाधनाकर्मणि कौशलस्य च ॥३२॥**

(व्या०) हिरण्येति ॥ नेतरि (णकतृचौ । ५ । १ । ४८ । इ. सू. नीधातो· कर्तरि तृच् प्रत्ययः, नामिनो गुणोऽक्ङिति । ४ । ३ । १ । इ. सू. गुणः) स्वामिनि अलंकृते सति हिरण्यमुक्तामणिभिः हिरण्यानि सुवर्णानि मुक्ताश्च मणयश्च (चार्थे द्वन्द्व. सहोक्तौ । ३ । १ । ११७ । इ. सू. इतरेतरद्वन्द्व·) तै· चिरात् चितायाः संचितायाः निजस्य श्रीः तस्याः निजश्रियः फलिनत्वं सफलत्वमाप्यत प्राप्तम् । यद्गृहे सुवर्णमुक्तामणयः स्यु· तत्रैव लक्ष्मीर्वसतीति प्रसिद्धि· तेषु एव लक्ष्मीवास इति भाव· । च अन्यत् नाकिनां नाकोऽस्ति एषामिति तेषां 'नखादयः' इति सूत्रेण नाक इत्यत्र नकारो निपात्यते नखादित्वात्, नाकिनां देवानां करैर्हस्तैः प्रसाधनाकर्मणि प्रसाधनायाः (णिवेत्त्यासश्रन्थघट्टवन्देरन· । ५ । ३ । १११ । इ. सू. साधि धातोरन· आत् इ सू. आप्) कर्म तस्मिन् मंडनविधौ कौशलस्य (युवादेरण् । ७ । १ । ६७ । इ. सू. कुशल शब्दात् भावे अण् कुशलस्य भावः कौशलम्) फलिनत्वं फलवत्वं प्राप्तम् ॥३२॥

**अथानयत्तस्य पुरः पुरन्दरः, कृताचलेन्द्रभ्रममभ्रमुपतिम् ।**
**व्यसिस्मयद्यत्कटकान्मदाम्बुभिः क्षरद्भिरावद्धजवा यमी न कम् ३३॥**

(व्या०) अथेति । अथानन्तरं पुरन्दरः (पुरन्दरभगन्दरौ । ५ । १ । ११४ । इ. सू. खान्तो निपातः ।) इन्द्रः तस्य भगवतः पुरः अग्रे अभ्रमूपतिं अभ्रम्वाः पतिस्तं ऐरावणं हस्तिनमानयत् । किं विशिष्टं अभ्रमूपतिं कृताचलेन्द्रभ्रमं कृतः अचलेन्द्रस्य हिमाचलस्य भ्रमो येन स कृताचलेन्द्रभ्रमस्तं श्वेतवर्णत्वात् । यमी यमुनानदी कं पुरुषं न व्यसिस्मयत् कं न विस्मापयति स्म अपि तु सर्वमेव । किं विशिष्टा यमी यत्कटकात् यस्य कटकं यत्कटकं तस्मात् यत्कपोलात् । पक्षे कटकात् पर्वतमध्यप्रदेशात् क्षरद्भिः मदाम्बुभिः मदस्य अम्बूनि तैः मदजलैः आ सामस्त्येन बद्धः जवो यया सा आबद्धजवा । हिमवतो गंगा प्रभवति न तु यमुना इत्याश्चर्यम् ॥ ३३ ॥

**अगुप्तसप्तांगतया प्रतिष्ठित–स्तरोनिधिर्दानविधिस्फुरत्करः ।**
**प्रगूढचारः सकलेभराजतां, दधौ य आत्मन्यपरापराजिताम् ॥३४॥**

(व्या०) अगुप्तेति । य ऐरावणः आत्मनि विषये अपरापराजितां अपरैः अन्यैः अपराजितां अनर्जितां सकलेभराजतां सकलाश्च ते इभाश्च सकलेभाः तेषु राजतां समस्तहस्तिराजत्वं दधौ । किं लक्षणो राजा च अगुप्तसप्तांगतया अगुप्तानि प्रकटानि शुंडा पुच्छं मेढ्रं पादाश्च सप्तांगानि पक्षे स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि चेति सप्तराज्यांगानि तद्भावेन प्रतिष्ठितः । पुनः तरोनिधिः तरसः निधिः तरोनिधिः तरो वेगः पक्षे बलं । पुनः किं वि० दानविधिस्फुरत्करः दानं मदजलं तस्य विधौ स्फुरन् करः शुंडादंडो यस्य सः पक्षे दानं वितरणं तस्य विधौ स्फुरन् करो हस्तो यस्य सः । पुनः किं वि० प्रगूढचारः प्रगूढः चारो गतिर्यस्य सः पक्षे प्रगूढाः चाराः चरपुरुषा यस्य स ॥ ३४ ॥

**क्रमोन्नतस्तंभचतुष्टयांचितः, शुभंयुकुंभद्वितयं वहन् पुरः ।**
**गवाक्षकल्पश्रुतिरग्र्यदन्तको, जगाम यो जंगमसौधतां श्रिया ॥३५॥**

(व्या०) क्रमोन्न इति । य ऐरावणः श्रिया लक्ष्म्या जंगमसौधतां जंगमं च तत् सौधं च जंगमसौधं तस्य भावो जगमसौधता तां चलदावासत्वं जगाम । किं विशिष्ट ऐरावणः सौधं च क्रमोन्नतस्तंभचतुष्टयांचितः क्रमाश्चरणाः एव

उन्नताश्च ते स्तंभाश्च क्रमोन्नतस्तंभास्तेषां चतुष्टयेन अंचितो युक्तः। किं कुर्वन् पुरोऽग्रे शुभंयुकुंभद्वितयं शुभंयु (ऊर्णाहंशुभमो युस्।७।२।१७।इ. सू. शुभम् अव्ययात् युस् प्रत्ययः।) शुभसंयुक्तं च तत् कुंभयोर्द्वितयं कुंभस्थलद्वितयं वहन्। गवाक्षकल्पश्रुतिः इषदसमाप्तौ गवाक्षौ इति गवाक्षकल्पे गवाक्ष-(गोर्नाम्न्यवोऽक्षे। १-२-२८। इ सू. गोशब्दस्य ओकारस्य अक्षे परे अव इत्यादेशे गवाक्षः।) कल्पे (अतमबादेरीषदसमाप्ते कल्पप् देश्यप् देशीयर्।७।३।११।इ. सू. गवाक्षशब्दात् इषदसमाप्तेऽर्थे कल्पप् प्रत्ययः) श्रुती कर्णौ यस्य सः गवाक्ष-सदृशकर्णः। अग्र्यदन्तकः अग्र्याः दंता एव दन्तका यस्य सः। सौधमपि क्रमेण उन्नतचतुष्टयांचितं स्यात्। पुरः कुंभद्वितयं कलशद्वितयं वहति च गवाक्षयुक्तं स्यात्। अग्र्याः प्रधाना दंतकाः घोटकाकारकाष्ठानि यस्मिन् तत् एवंविधं च स्यात्। एवं हस्तिसौधयोः सादृश्यं ज्ञेयम् ॥ ३५ ॥

**वृषध्वजेशानविभोः पवित्र्यते, सदासनं किं मम नो मनागपि।**
**चटूक्तिमाद्यस्य हरेः प्रमाणय-न्निवेति तं वारणमारुरोह सः ॥३६॥**

(व्या०) वृषध्वजेति ॥ सः भगवान् वारणं गजं आरुरोह चटितः किं कुर्वन् उत्प्रेक्ष्यते आद्यस्य हरेः सौधर्मेन्द्रस्य इति चटूक्तिं चाटुवचनं प्रमाणयन् इव प्रमाणं कुर्वन् इव। इतीति किं हे वृषध्वज वृषलांछन त्वया ईशानविभोः ईशानस्य विभुः स्वामी तस्य ईशानेन्द्रस्य आसनं सदा निरंतरं पवित्र्यते पवित्री क्रियते। ममासनं मनागपि स्तोकमपि किं नो पवित्र्यते। ईशानेन्द्रस्य वाहनं वृषभः भगवानपि वृषध्व(ज) इति भावः ॥ ३६ ॥

**शरद्घनः काञ्चनदंडपांडुरा-तपत्रदंभाचडिता कृताश्रयः।**
**जनैरदातेति जुगुप्सितो जिनं, न्यषेवताध्येतुमुदारतामिव ॥ ३७ ॥**

(व्या०) शरद्घन इति ॥ काञ्चनदंडपांडुरातपत्रदंभात् काञ्चनस्य दंडो यस्य तत् काञ्चनदंडं एवंविधं पांडुरं च तत् आतपत्रं (आतपात् त्रायते इति आतपत्रं स्थापास्नात्रः कः।५-१-१४२।इ. सू. आतपपूर्वकत्राधातोः कः) च श्वेतच्छत्रं तस्य दंभात् मिषात् तडिता विद्युता कृताश्रयः कृतः आश्रयो यस्य सः

सन् शरद्घनः (मूर्तिनिचिताभ्रे घनः । ५ । ३ । ३७ । इ. सू. हन्धातोः अल् प्रत्ययः घनादेशश्च निपात्यते) शरदः घनः शरत्कालमेघो यं भगवन्तं न्यषेवत सेवते स्म । सुवर्णदंडो विद्युत्सदृशः छत्रं च मेघसदृशमिति । किं कर्तुं उत्प्रेक्ष्यते उदार्यतां उदार्यगुणमध्येतु शिक्षितुमिव । किं लक्षणः शरद्घनः जनैर्लोकैः अदाता न दाता अदाता कृपण इति जुगुप्सितो निन्दितो गर्हितः । 'गर्जति शरदि न वर्षति' इति वाक्यात् ॥ ३७ ॥

**विहाय नूनं शशिनं कलंकिनं, प्रकीर्णकच्छद्मधरः करोत्करः ।**
**शुचिं बभाजोभयतस्तदाननं, विधुं विधाय प्रणतिं मुहुर्मुहुः ॥ ३८ ॥**

(व्या०) विहायेति ॥ नूनं निश्चितं कलंकिनं (अतोऽनेकस्वरात् । ७ । २ । ६ । इ. सू. कलङ्कशब्दात् मत्वर्थे इन्) कलङ्कोऽस्यास्तीति कलङ्की तं कलंकयुक्तं शशिनं चन्द्रं विहाय त्यक्त्वा करोत्करः कराणां किरणानामुत्करः समूहः किरणसमूहः मुहुर्मुहुः वारं वारं उभयतः (किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस् । ७ । २ । ८९ । इ. सू. उभयशब्दात् पञ्चम्यर्थे तस्) द्वयोः पार्श्वयोः प्रणतिं (स्त्रियां क्तिः । ५ । ३ । ९१ । इ. सू. प्रपूर्वकनम्धातोर्भावे स्त्रियां क्तिः । यमिरमिनमिगमिहनिमनिवनतितनादेर्धुटि क्ङिति । ४-२-५५ इ. सू. अनुनासिकलोपः । अदुरुपसर्गान्तरोणहिनुमीनाने । २ । ३ । ७७ । इ. सू. प्रपूर्वकनम्धातोर्नकारस्य णत्वम्) प्रणामं विधाय कृत्वा शुचिं पवित्रं तदाननं तस्य भगवतः आननं वदनं विधुं चन्द्रं भगवन्मुखचन्द्रं बभाज सेवते स्म । किं विशिष्टः करोत्करः प्रकीर्णकच्छद्मधरः प्रकीर्णकयोः चामरयोः छद्म मिष धरतीति प्रकीर्णकच्छद्मधरः ॥ ३८ ॥

**विमुक्तवैरा मृदुतिग्मताजुषः, सुरासुराः स्वोचितचिन्हभासुराः ।**
**प्रभुं पर्युः शशिभास्वतोरिवां-शवो दिवो गोत्रमुदारनन्दनम् ॥३९॥**

(व्या०) विमुक्तवैरा इति ॥ सुरासुराः सुराश्च असुराश्च सुरासुराः (चार्थे द्वन्द्वः सहोक्तौ । ३ । १ । ११७ । इ. सू इतरेतरद्वन्द्वः) देवदानवाः प्रभुं (शंसंस्वयंविप्राद् भुवो डुः । ५ । २ । ८४ । इ. सू. प्रपूर्वकभूधातोः डुः ।)

स्वामिन परीयु' परिव्रवु: । किं लक्षणा' सुरासुरा' विमुक्तवैराः विमुक्तं वैरं यैस्ते परस्परं प्रीतिभाज' । मृदुतिग्मताजुष' मृदु च तिग्मता च मृदुतिग्मते ते जुषन्ते सेवन्ते इति मृदुतिग्मताजुष सौकुमार्यतीव्रत्वसेविन' । स्वोचितचिन्हभासुराः स्वस्य आत्मन' उचितानि योग्यानि च तानि चिह्नानि च 'चूडामणि फणिगारुडे वज्जे तह कलस सीह अस्सेय' इत्यादि चिह्नानि लाञ्छनानि तैर्भासुराः (भञ्जि भासिमिदोधुरः । ५ । २ । ७ । इ सू भासूधातो. शीलादिसदर्थे धुरप्रत्यय ) देदीप्यमाना' । के इव शशिभास्वतो' शशी च भास्वांश्च शशिभास्वन्तौ (तद-स्यास्त्यस्मिन्निति मतु' । ७ । २ । १ । इ. सू. भास् शब्दात् अस्त्यर्थे मतु' मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मोव' । २ । १ । ९४ । इ. सू. भासूशब्दात् मतोर्मस्य वः ।) तयोः चन्द्रसूर्ययोः अंशव' किरणाः इव । शशिभास्वतोः किरणाः दिवो गोत्रं मेरुपर्वतं परियन्ति परिवृण्वन्ति किं विशिष्टं प्रभुं मेरुं च उदारनन्दनं उदारं नन्दनं समृद्धिकरं च मेरुपक्षे उदारं नंदनं वनं यस्य सः तं । शशिभास्वतोः कराअपि मृदुतिग्मताजुषो भवन्ति ॥ ३९ ॥

**प्रभुः प्रतस्थेऽथ बुधे स्वधैर्यतः, समेधयन् रक्तिविरक्तिसंशयम् ।**
**न मारतारुण्यविभुत्वयोगजा–भिमानघोरासवघूर्णितेक्षणः ॥ ४० ॥**

(व्या०) प्रभुरिति ॥ अथानंतरं प्रभु' श्रीऋषभदेव' प्रतस्थे परिणेतुं चलित' किं कुर्वन् प्रभु' बुधे विदुषि स्वधैर्यत' स्वस्य धैर्यत' आत्मीयधीरत्वात् रक्तिविरक्तिसंशयं रक्तिश्च विरक्तिश्च रक्तिविरक्ती तयोः पुन्नाम्नि घः । ५–३–१३० इ. सू. संपूर्वकशीधातो' आधारे घः समन्तः शेते आत्मा अस्मिन् इति संशय' । (नामिनो गुणोऽक्डिति । ४–३–१ । इ. सू. गुण' । एदैतोऽयाय् । १–२–२३ इ. सू. अयादेशः ।) रागवैराग्यसंदेहं समेधयन् ( प्रयोक्तृव्यापारे णिग् । ३ । ४ । २० । इ. सू. संपूर्वकएधधातो प्रयोक्तृव्यापारे णिग् शत्रानशावेष्यति तु सस्यौ । ५ । २ । २० । इ. सू. शतृप्रत्यय') सामस्त्येन वर्द्धयन् । पुनश्च नमारतारुण्यविभुत्वयोगजाभिमानघोरासवघूर्णितेक्षण' मारश्च तारुण्य च (पतिरा-जान्तगुणाङ्गराजादिभ्यः कर्मणि च । ७ । १ । ६० । इ. सू. तरुणशब्दात्

व्यण् तरुणस्य भावः तारुण्यम्) विभुत्वं च प्रभुता मारतारुण्यविभुत्वानि तेषां योगात् जातः उत्पन्नः स चासौ अभिमानश्च स एव घोरः आसवः मदिरा तेन घूर्णिते चपले ईक्षणे नेत्रे यस्य सः स नभवतीति न घूर्णितलोचन इत्यर्थः ॥४०॥

**अमाति लावण्यभरे स्वभावतोऽप्यमुष्यदेहे किमुतोत्सवे तदा ।**
**स्थितानुपृष्ठं लवणं सुरांगनो–चितं समुत्तारयति स्म काचन ॥ ४१ ॥**

(व्या०) अमातीति ॥ काचन सुरांगना अनुपृष्ठं पृष्ठस्य पश्चात् अनुपृष्ठं पश्चादर्थे विभक्तिसमीपेतिसूत्रेण अव्ययी भावः समासः भगवतोऽनुपश्चात् स्थिता सती लवणमुचितं योग्यं समुत्तारयति स्म । (स्मेचवर्तमाना । ५ । २ । १६ । इ. सू. स्मयोगे भूते वर्तमाना ) क्व सति अमुष्य भगवतोदेहे स्वभावतोऽपि (अहीयरुहोऽपादाने । ७ । २ । ८८ । इ. सू. स्वभावशब्दात् पञ्चम्यर्थे तस्) स्वभावादपि लावण्यभरे लावण्यस्य भरः समूहः लावण्यभरस्तस्मिन् अमाति सति नमातीति अमान् तस्मिन् । तदा उत्सवे किमुत किमुच्यते ॥ ४१ ॥

**वरस्य दृष्टान्तयुतं पुरस्सरी, सुरीषु यं यं धवलै र्गुणं जगौ ।**
**न तत्र तत्र स्वमवेत्य किं शची, शुशोच हीनोपमयापराधिनम् ॥४२॥**

(व्या०) वरस्येति ॥ शची इन्द्राणी सुरीषु देवीषु पुरस्सरी पुरः सरति इति पुरस्सरि (पुरोऽग्रतोऽग्रेसर्तेः । ५ । १ । १४० । इ. सू. पुरः पूर्वक सरतेः टः । अणञेयेकण् नञ् स्नञ्टिताम् । २ । ४ । २० । इ. सू. स्त्रियां ङीः ।) अग्रेसरी सती वरस्य श्रीऋषभदेवस्य धवलैः धवलमङ्गलैः कल्पद्रुमकामधेनु-चिन्तामणिकामकुंभप्रमृतिदृष्टान्तयुतं दृष्टान्तैर्युतः तं यं यं औदार्यधैर्यगांभीर्य-माधुर्यादिगुणं जगौ गायति स्म । तत्र तत्र हीनोपमया हीना चासौ उपमा च तया स्वं अपराधिनं अवेत्य ज्ञात्वा किं न शुशोच अपि तु शुशोच शोचति स्म ॥४२॥

**फलानि यासामशनं द्युभूरुहां, सुधारसैः पानविधिस्तदुद्भवैः ।**
**उलूलगानैः प्रमदः सुधाभुजां, भुजान्तरीयोऽपि मुमूर्छ कौतुकम् ।४३।**

(व्या०) फलानीति ॥ यासां देवांगनानां द्युभूरुहाणां दिवः भूरुहाः तेषां कल्पवृक्षाणां फलानि अशनं भोजनं वर्तते । यासां सुधारसैः अमृतरसैः

पानविधि स्यात् । तदुद्भवै' ताभ्यो देवांगनाभ्यः उद्भवानि जातानि तदुद्भवानितैः देवांगनाजातैः उज्ज्वलगानै' धवलगानैः सुधाभुजां (क्विप् । ५ । १ । १४८ । इ. सू. सुधापूर्वकभुज्धातोः क्विप् ।) भुजान्तरं हृदयं तत्र भव' भुजान्तरीय' (भवे । ६ । ३ । १२३ । इ. सू. भुजान्तरशब्दात् भवेऽर्थे ईयः) हृदयसंबंधी अपि प्रमदो हर्षो (संमदप्रमदौ हर्षे । ५ । ३ । ३३ । इ. सू. अलन्तो निपातः) मुमूर्छमूर्छां प्राप । तत् कौतुकं ज्ञेयम् । भुजान्तरं हृदयं दढं वर्ण्यते । तज्जात प्रमदोऽपि दढवस्तु दढस्य च मूर्छा कथमिति अर्थशब्दोद्योतयति । कोऽर्थः अमृतरसभोजिनीभ्यः अमृतरसपायिनीभ्यो देवांगनाभ्यो जाता धवला अपि अमृतमयाः स्युः । सुधाभोजिनां अमृतभोजिना प्रमदोऽपि मूर्छां कथमाप्नोति । परमे च विधौ सत्यपि धवलैर्यत्प्रमदो हर्षो मुमूर्छ तत् कौतुकं ज्ञेयम् । पक्षे मुमूर्छे वृद्धिं प्राप्त इति भावः । देवानां फलाशनं अमृतपानं देवानामपि सुधाभोजित्वं लोकरूढ्या ज्ञेयम् । अन्यथा कावलिकाहारस्य निषिद्धत्वात् ॥ ४३ ॥

**हरौ पदातित्वमिते जगत्त्रयी–पतौ सितेभोपगते सुरैः क्षणम् ।**
**किमेष एव द्युसदीशितेत्यहो, वितर्कितं च क्षमितं च तत्क्षणम् ॥४४॥**

(०या०) हराविति ॥ हरौ इन्द्रे पदातित्वं (पादाभ्यामततीतिपदातिः पदातेर्भावः पदातित्वं । पादाच्चात्यजिभ्यामित्युणादि सू० ६२० । पादपूर्वक अत् धातोः णिदिः । पदः पादस्याज्यातिगोपहते । ३ । २ । ९५ । इ. सू. पादस्यपदादेशः ।) पादाभ्यामतति गच्छतीति पदातिः तस्य भावः पदातित्वं पादचारित्वं इते गते प्राप्ते सति जगत्त्रयीपतौ जगतांत्रयी जगत्त्रयी तस्याः पतिः स्वामी तस्मिन् श्रीऋषभदेवे सितेभोपगते सितश्चासौ इभश्च सितेभः तं उपगतः सितेभोपगतः तस्मिन् ऐरावणाधिरूढे सति सुरैः देवैः अहोइत्याश्चर्ये क्षणं इति तर्कितं ईदृशं विचारितम् । इतीति किं किं एष एव ऐरावणाधिरूढो द्युसदीशिता इन्द्रः पुनश्च तत्क्षणं क्षमितं क्षाम्यते स्म । कोऽर्थ इन्द्रः स्वर्लोकस्यस्वामी श्रीऋषभदेवस्तु त्रिलोकाधिपतौ इन्द्रस्त्राति ज्ञात्वा देवैः क्षामितमितिभावः ॥ ४४ ॥

**समप्रवांगैभवधस्मरः स्मर–ध्वजव्रजस्यध्वनिरंबराध्वनि ।**
**अवाप्तमूर्छः स्वयमस्तु मूर्च्छितं, क्षमः किमुज्जीवयितुं प्रभौ स्मरम् ॥**

(व्या०) समग्रेति ॥ लालनालतांतिफूलपडह इति । लोकोक्तपञ्चशब्द-रूपस्य स्मरध्वजव्रजस्य स्मरध्वजानां वादित्राणां व्रजः समूहः तस्य वादित्रसमूहस्य ध्वनिः शब्दः अम्बराध्वनि अम्बरस्य अध्वा तस्मिन् आकाशमार्गे स्वयं अवाप्तमूर्च्छः अवाप्ता प्राप्ता मूर्च्छना येन सः सन् प्रभौ श्रीऋषभदेवे मूर्छितं कंदर्पं उत्प्राबल्येन जीवयितुं किं क्षमः समर्थोऽस्तु अपि तु नैव । स्वयं प्राप्तमूर्छ' कथमन्यं मूर्छितं जीवयितुं समर्थ स्यात् । परं वादित्रविशेषणे मूर्छाशब्देन वृद्धिर्ज्ञेया । मूर्छितं अचेतनं प्राप्तमिति एतावता वाद्यरवं श्रुत्वा भगवतो हृदि कामो नोत्पन्न इति भावः । किं लक्षणो ध्वनिः समग्रवाग्वैभवघस्मरः वाचां वैभवः वाग्वैभवः सर्वश्चासौ 'वाग्वैभवश्च समग्रवाग्वैभवः तस्य घस्मरः (सृघस्यदोभरक् । ५ । २ । ७३ । इ. सू. घस्धातोर्भरक् ) सर्ववचनविलासभक्षकः स्मरध्वजव्रजः स्मरस्य ध्वजाश्चिह्नानि वा तेषां व्रजः समूहः स्मरं जीवयितुमुपक्रमते परं स एव प्राप्तमूर्छोऽभूत् ततो मूर्छितं स्मरं कथं जीवयितुं क्षमः स्यादिति व्यंग्यम् ॥ ४५ ॥

**सुपर्वगंधर्वगणाद्गुणावलीं, पिबन्निजामेव न सोऽतुषत्तराम् ।**
**अभूत्पुनर्न्यङ्मुख एव दोष्मतां, त्रपा स्वकोशे परहस्तगे न किम् ॥**

(व्या०) सुपर्व इति ॥ स भगवान् सुपर्वगंधर्वगणात् सुपर्वाणश्चगंधर्वाश्च सुपर्वगंधर्वाः तेषां गण' समूहस्तस्मात् देवगन्धर्वसमूहात् निजां एव स्वीयां गुणा-वलीं गुणानामावली तामात्मीयामेव गुणश्रेणिं पिबन् सन् न अतुषत्तराम् (क्रिन्त्याद्येऽव्ययादसत्वे तपोरन्तस्याम् । ७ । ३ । ८ । इ. सू. अतुषत् क्रिया पदात् तरप् । ततः तस्यः आमि अतुषत्तराम् वत्तस्याम् । १ । १ । ३४ । इ. सू. अतुषत्तरामित्यस्य अव्ययसंज्ञा ।) न अतिशयेन संतुष्टः । पिबन्निति अत्यादरात् श्रवणपानमुच्यते । पुनः परं न्यग्मुख एव अधोमुखएव अभूत् । दोष्मतां बलवतां स्वकोशे स्वस्य कोशस्तस्मिन् आत्मीयभांडागारे परहस्तगे (नाम्नोगमः खड्डौ च विहायसस्तुविहः । ५ । १ । १३१ । इ. सू. गम्धातोः डः । डित्यन्त्यस्वरादे' इति अन्त्यस्वरादिलोपः ।) परस्यहस्तः परहस्तस्तं गच्छतीति तस्मिन् अन्यहस्तगते सति किं त्रपा (षितोऽङ् । ५ । ३ । १०७ । इ. सू. त्रपूधातोः अङ् आत् इः सू.

स्त्रियां आपि त्रपा इति) लज्जा न अपि तु स्यादेव । स्वकीयाः सारभूताः गुणाः यदि परहस्तगताः स्युः तदा कथं त्रपा न स्यादिति कवेर्भावः ॥ ४६ ॥

**मुदश्रुधारानिकरैर्घनायिते, द्युसच्चये कांचनरोचिरुर्वशी ।**
**प्रणीतनृत्याकरणैरपप्रथ-तडिल्लताविभ्रममभ्रमंडले ॥ ४७ ॥**

(व्या०) मुदश्रु इति । कांचनरोचि कांचनस्य रोचिरिव रोचिर्यस्याः सा कांचनरोचि स्वर्णरुक् । उर्वशी देवनर्तकी अभ्रमंडले अभ्राणां मंडलं तस्मिन् आकाशमंडले तडिल्लताविभ्रमं तडित् एव लता तडिल्लता तस्या विभ्रमस्तं विद्युद्वल्लीभ्रमं अपप्रथत् विस्तारयति स्म । किं लक्षणा उर्वशी करणैः प्रणीतनृत्या प्रणीतं रचितं नृत्यं (ऋदुपान्त्यादकृपिचृदृच । ५ । १ । ४१ । इ सू क्यपि नर्तितुं योग्यं नृत्यं) नाटकं यया सा कृतनाटका । क सति अभ्रमंडले आकाशे द्युसच्चये (क्विप् । ५ । १ । १४८ । इ. सू. दिव्शब्दे उपपदे सद्धातोः क्विप्) दिवि सीदन्तीति द्युसदो देवास्तेषां चय समूहस्तस्मिन् देवसमूहे मुदश्रुधारानिकरैः मुदो हर्षस्य अश्रूणि तेषा धारास्तासां निकरा समूहा. हर्षाश्रुजलधारासमूहैः घनायिते मेघवदाचरिते सति ॥ ४७ ॥

**विलग्नदेशस्तनुरुन्नतस्तन-द्वयातिभारव्यथितोऽस्य भाजि मा ।**
**घनांगहारौघविघूर्णितं वपु, र्विलोक्य रांभं त्रिदशा इदं जगुः ॥४८॥**

(व्या०) विलग्नदेश इति ॥ त्रिदशा देवा रांभं (तस्येदम् । ६ । ३ । १६० । इ सू रंभाशब्दात् इदमर्थेऽण् ।) रंभाया इदं रांभं तत् वपु शरीरं घनांगहारौघविघूर्णितं घनैर्बहुभि अंगहाराणा अंगविक्षेपाणां ओघै समूहैर्विघूर्णितं भ्रामितं विलोक्य दृष्ट्वा इदं जगु । इदमिति किं अस्य वपुषो विलग्नदेश उदरप्रदेश तनु कृश सन् उन्नतस्तनद्वयातिभारव्यथित स्तनयोर्द्वयं युगलं स्तनद्वयं उन्नतं च तत् स्तनद्वयं च तस्यातिभारेण व्यथित उच्चैस्तनयुग्मातिभारपीडितः मा भाजि मा भज्यताम् ॥ ४८ ॥

**प्रकाशमुक्तास्रगसंकुचत्स्तन-द्वय घृताच्यानटने निरीक्ष्य कः ।**
**कृती न कुंभावतिगूढमौक्तिका-वभरसंयज्जं भनिशुंभिकुंभिनः ॥४९॥**

(व्या०) प्रकाशइति ॥ कः कृती कृतमनेनेति कृती (इष्टादेः । ७ । १ १६८ । इ. सू. कृतशब्दात् कर्तरि इनि ) कुशलः वृताच्यादेवनर्तक्या नटने नृत्ये प्रकाशमुक्तास्रगसंकुचत् मुक्तानां स्रजः मुक्तास्रज. प्रकाशाश्चताः मुक्तास्रजश्च ताभिरसंकुचत् प्रकटमुक्तामणिमालाभिरसंकुचत् । स्तनयोर्द्वयं युग्मं स्तनयुग्मं निरीक्ष्य दृष्ट्वा । जंभनिशुंभी इन्द्रस्तस्यकुंभिनो (अतोऽनेकस्वरात । ७ । २ । ६ । इ. सू. कुंभशब्दात मत्वर्थे इन् । ) हस्तिन अतिगूढानि मौक्तिकानि ययोस्तौ तौ कुंभौ न अमर्षयत् न निन्दति स्म अपितु सर्व कोऽपि ॥ ४९ ॥

**तिलोत्तमा निर्जरपुंजरंजनार्थिनी कलाकेलीगृहं ननर्त यत् ।**
**सुरैस्तदंगद्युतिरुद्धदृष्टिभिः, प्रभूबभूवे तदवेक्षणेऽपि न ॥ ५० ॥**

(व्या०) तिलोत्तमेति ॥ तिलोत्तमा यत् ननर्त यत् नृत्यं चकार किं लक्षणा तिलोत्तमा निर्जरपुंजरंजनार्थिनी निर्जराणा देवानां पुजः समूहः तस्य रंजने अर्थिनी कलानां केलीगृहं कलाकेलीगृहं क्रीडास्थानं अत्र रूपकात् गृह-शब्दस्य न क्लीबत्वं । तदंगद्युतिरुद्धदृष्टिभिः तस्यास्तिलोत्तमायाः अंगद्युति अंग-कान्तिः तया रुद्धा दृष्टयो लोचनानि येषां ते तैः सुरैर्देवै. तदवेक्षणेऽपि तस्य नृत्यस्य अवेक्षणमालोकनं तस्मिन्नपि न प्रभूबभूवे (कृभ्वस्तिभ्यांकर्मकर्तृभ्यांप्रागतत्तत्वे च्वि । ७ । २ । १२६ । इ. सू. भूधातुयोगे प्रभुशब्दात् प्रागभूत तद्भावे च्विः । दीर्घश्च्वियङ्यक्क्येषु च । ४ । ३ । १०८ । इ. सू. च्वौपरे प्रभु-शब्दस्योकारस्य दीर्घ. ।) न समर्थीभूयते स्म ॥ ५० ॥

**अचालिषुः केऽपि पदातयः प्रभोः, पुरो विकोशीकृतशस्त्रपाणयः ।**
**अमूमुहत्किं विबुधानपि भ्रमः, सजन्ययात्रेत्यभिधासमुद्भवः ॥५१॥**

(व्या०) अचालिषुरिति ॥ केऽपि देवाः प्रभोः स्वामिनः पुरोऽग्रे अचालिषुश्चलिताः किं लक्षणाः सुराः विकोशीकृतशस्त्रपाणयः विगतः कोशो येषां तानि विकोशानि न विकोशानि अविकोशानि अविकोशानि विकोशानि यथा संपद्यमानानि इति विकोशीकृतानि तानि चतानि शस्त्राणि च पाणौ येषां ते ('उष्ट्रमुखादयः' । ३ । १ । २३ । इ. सू. व्यधिकरणबहुव्रीहिः) प्रत्याकार-

रहितशस्त्रहस्ताः । सः सर्वप्रसिद्धो जन्ययात्रेत्यभिधासमुद्भव (अभिधीयते अनया इति अभिधा उपसर्गादातः । ५ । ३ । ११० । इ सू अभिपूर्वकधाधातोः भावाकर्त्रोरङ् । 'आत्' इ सू. आप्) विवाहयात्रोत्पन्न पक्षे संग्रामयात्रोत्पन्नो भ्रम कि विबुधान् देवान् विदुषोऽपिवा किं अमूमुहत् मोहयति स्म । किमिति संशये ॥ ५१ ॥

**प्रसिद्धः एकः किल मंगलाख्यया, ग्रहाः परेऽष्टावपि मंगलाय ते ।**
**इतीरयन्तीव सुरैः करे घृता, पुरोगतामस्य गताष्टमंगली ॥ ५२ ॥**

(व्या०) प्रसिद्ध इति ॥ सुरैर्देवैः करे घृता दप्पण १ भद्दासण २ वद्धमाण ३ वरकलस ४ मच्छ ५ सिरिवछ ६ सच्छिय ७ नंदावत्ता ८ कहिया अठ्ठमंगलगा' एवंविधा आगमोक्ता अष्टमंगली अस्य भगवतः पुरोगतामग्रेसरत्वं गताप्राप्ता । उत्प्रेक्ष्यते—इतीरयन्ती ईदृक् कथयन्तीव । इतीति किं किल इति सत्ये मङ्गलाख्यया एकोग्रह. प्रसिद्धो वर्तते परे आदित्याद्या अष्टावपि (वाष्टन आः स्यादौ १ । ४ । ५२ । इ. सू अष्टन् शब्दस्य जसि परे आत्वं अष्टा जस् । अष्ट और्जस् शसोः । १ । ४ । ५३ । इ. सू जस औत्वे एदौत् सन्ध्यक्षरैः । १ । २ । १२ इ. सू औत्वे अष्टौ) ग्रहास्ते (युवर्णवृदृवशरणगमदृग्रहः । ५ । ३ । २८ । इ. सू. ग्रह्धातोर्भावाकर्त्रोरलि ग्रहः) तव मंगलाय भवन्तु ॥ ५२ ॥

**प्रबुद्धपद्मा न न नादिषट्पदा, उदारवृत्ताः सुरसार्थतोषिणः ।**
**पुरोऽस्य कल्याणगिरिस्थिता स्तुति-व्रतादधुर्नाकतटाकसौहृदम् ॥५३॥**

(व्या०) प्रबुद्ध इति ॥ स्तुतिव्रता भट्टा अस्य जिनस्य पुरोऽग्रे नाकतटाकसौहृदं नाकस्य तटाकानि सरोवराणि तेषां सौहृदं (शोभनं हृदयं यस्य सः सुहृत् सुहृद् दुर्हृन् मित्रामित्रे । ७ । ३ । १५७ । इ. सू. बहुव्रीहौ सुहृत् सुहृदः कर्म सौहृदं युवादेरण् । ७ । १ । ६७ । इ. सू. कर्मणि अण् ।) सादृश्यं तत्स्वर्गसत्कसरोवरसादृश्यं दधुर्धरन्ति स्म । किं लक्षणाः स्तुतिव्रताः प्रबुद्धपद्मानननादिषट्पदाः प्रबुद्धेषु पद्मवत् आननेषु वदनेषु नदन्ति इत्येवं शीलाः शब्दायमानाः षट्पदाः छंदोविशेषा येषां ते । उदारवृत्ताः उदाराणि वृत्तानि कवित्वानि येषां

ते । सुरसार्थतोषिण शोभनोरसो येषां ते सुरसाः ते च ते अर्थाश्च सुरसार्थास्तैः तोषयन्ति हर्षयन्तीत्येवं शीलाः कल्याणगिरि कल्याणा चासौ गीश्च तस्यां शुभवाण्यां स्थिता । अथ नाकतटाकानां विशेषणानि किं लक्षणा नाकतटाकाः प्रबुद्धपद्माः प्रबुद्धानि विकसितानि पद्मानि कमलानि येषु ते विकसितकमला न न नादिषट्पदा नादिन षट्पदा भ्रमरायेषु ते एवं विधा न इति न अपि तु नादिपट्पदा गुंजद्भ्रमरा 'द्वौ नञौ प्रकृत्यर्थं गमयतः' इति नियमात् उदारवृताश्च वृत्ताकाराः । सुराणां देवानां सार्थाः समूहास्तान् तोषयन्तीयेवंशीलाः कल्यास्य सुवर्णस्य गिरि पर्वतस्तस्मिन् मेरुपर्वते स्थिताः ॥ ५३ ॥

**अमर्मभृत्यश्चलितेऽर्हतिप्रभाः, प्रभाकरः स्वा विनियुक्तवांस्तथा ।**
**यथा वृथाभावमवापनोदिवा, न तापमापत्सत जान्यिका अपि ॥५४॥**

(व्या०) अमर्म इति । प्रभाकरः (संङ्ख्याऽहर्दिवाविभानिशाप्रभा–टः । ५ । १ । १०२ । इ. सू. प्रभापूर्वक कृग्धातोः टः प्रभां करोतीति प्रभाकरः ।) सूर्य अर्हति श्रीऋषभदेवे चलिते सति स्वा आत्मीयाः प्रभाः तथा विनियुक्तवान् व्यापारितवान् । किं लक्षणः प्रभाकर अमर्मभृत्य अमर्मणा (म्रियते अनेनेति मर्म । मन् इ. उ. सू. मृधातोः मन् । न मर्म अमर्म ।) भृत्य (भृगोऽसंज्ञायाम् । ५ । १ । ४५ । इ. सू. भृधातो असंज्ञायां क्यप् । ह्रस्वस्य त पित्कृति । इ. सू. तोन्त ।) ग्रासं विना सेवक । यथा दिवा दिनं वृथाभावं न अवाप न प्राप । जान्यिका (हृद्यपद्यतुल्यमूल्यवश्यम् । ७ । १ । ११ । इ. सू. जन्यशब्दो निपात्यते । विनयादिभ्यः । ७ । २ । १६९ । इ. सू. स्वार्थे इकण् । जवर्णे वर्णस्य । ७ । ४ । ६८ । इ. सू. अलोपः जन्या एव जान्यिका ) अपि तापं न आपत्सत न प्राप्तवन्त ॥ ५४ ॥

**तथा प्रसन्नत्वमभाजिमार्गगे, जगन्नयत्रातरि मातरिश्वना ।**
**यथा हगांध्यं न रजस्तनूमतां, चकार घर्माम्बु च चिक्लिदं वपुः ॥**

(व्या०) तथेति ॥ मातरिश्वना (श्वन् मातरिश्वन्--ति । ९०२ । इ. उ. सू अन् प्रत्ययान्तो मातरिश्वन् शब्दो निपात्यते । मातरि आकाशेश्वयति गच्छ

तीतिमातरिश्वा । तत्पुरुषे कृति । ३ । २ । २० । इ. सू. सप्तम्या अलुप् ।) वायुना जगत्त्रयत्रातरि जगतां त्रयस्य त्रातरि जगत्त्रयरक्षके मार्गगे मार्गं गच्छतीति मार्गगस्तस्मिन् सति तथा प्रसन्नत्वं निर्मलत्वमभाजि । (भञ्जेर्नोवा । ४-२-८ । इ. सू. भञ्ज्धातोः उपान्त्यस्यलोपे । ञ्णिति । ४ । ३ । ५० । इ. सू. उपान्त्यस्य अस्य वृद्धि.) यथा रजोधूलिस्तनूमतां (तदस्यास्त्यस्मिन्निति मतुः । ७ । २ । १ । इ. सू. तनूशब्दात् मतुप्रत्ययः तनुरस्ति एषामिति तनूमन्तः) प्राणिनां दगांध्यं दशांआंध्यं (भ्यादिभ्योवा । ५ । ३ । ११५ । इ. सू. दश् धातोः स्त्रियां क्विप् ।) न चकार । च अन्यत् धर्माम्बु घर्मस्य अम्बु जलं वपुः शरीरं चिक्लिदं पिच्छिलं न चकार ॥ ५५ ॥

**क्वचिन्निषिक्ता द्विरदैर्मदाम्बुभिः, क्वचित्खुरैरुद्धतरेणुरर्वताम् ।**
**द्युसत्किरीटैः क्वचिदापिता मह-स्तमश्च नीलातपवारणैः क्वचित् ॥**
**क्वचित्खगानां न पदापि संगता, क्वचिद्रथैः क्षुण्णतलारि धारया ।**
**समाशया स्वंक्षितिरक्षतं जगौ, जगत्सुमाध्यस्थ्यगुणं जगत्प्रभोः ॥**

(व्या०) क्वचिदिति ॥ क्षितिः पृथ्वी जगत्सु स्वर्गपातालेषु मध्ये स्थितत्वात् माध्यस्थ्यगुणं (मध्ये तिष्ठतीति मध्यस्थः मध्यस्थस्य भावो माध्यस्थ्यं माध्यस्थ्यमेवगुणः । स्थापास्नात्रः कः । ५ । १ । १४२ । इ. सू. मध्यपूर्वकस्थाधातोः क प्रत्ययः पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च । ७ । १ । ६० । इ. सू. टयण् । वृद्धिः स्वरेष्वादे ञ्णिति तद्धिते । ७-४-१ । इ. सू. आदिस्वरवृद्धिः) पक्षे साम्यरूपमाध्यस्थ्यगुणं स्वमात्मीयं जगत्प्रभोः श्रीऋषभदेवस्य जगतां प्रभुः तस्य अक्षतं जगौ कथितवती । किं लक्षणा क्षितिः क्वचिद् द्विरदैः द्वौ रदौ दन्तौ येषां ते तैः गजैः मदाम्बुभिर्मदस्यअम्बूनि जलानि तैर्मदजलैः निषिक्ता सिक्ता । क्वचिदर्वतां तुरंगाणां खुरैः उद्धतरेणुः उद्धतारेणवो यस्याः सा उत्पाटितरजाः । क्वचिद् द्युसत्किरीटैः द्युसदां देवाना किरीटैर्मुकुटैर्महस्तेज आपिता प्रापिता । च अन्यत् क्वचित् नीलातपवारणैः नीलानि च तानि आतपवारणानि च तैः कृष्णच्छत्रैस्तमः अन्धकारं प्रापिता ॥ ५६ ॥ क्वचित् खगानां (नाम्नो गमः

हेतुमाह—स्वस्यगतौ आत्मनो गतौकलागुरुः कलाचार्यः । ऐरावणेन प्रभोः पार्श्वे गतिकला शिक्षिता । अत' प्रभुस्तस्य कलागुरु' । मुखश्रीमुखितेन्दुमंडलः मुखस्य श्रीः तया मुखितं लक्षणया जितं इन्दोश्चन्द्रस्य मंडलं येन सः । दुरापदर्शनः दुःखेन आप्यते इति दुरापं दुर्लभं दर्शनं यस्य सः ॥ ६१ ॥

**अथावतीर्येभविभोः ससंभ्रमं, प्रदत्तबाहुः पविपाणिना प्रभुः ।**
**मुहूर्त मालंब्य तमेव तस्थिवान्, श्रियः स्थिरस्येति वचः स्मरन्निव ।६२।**

(व्या०) अथेति ॥ अथानन्तरं प्रभुः श्रीऋषभदेवः पविपाणिना पविर्वज्रं पाणौ हस्ते यस्य स तेन इन्द्रेण प्रदत्तबाहुः प्रदत्तः बाहुर्यस्य सः सन् इभानां करिणां विभुः स्वामी तस्मात् ऐरावणात् अवतीर्य तमेव इन्द्रमालंब्य मुहूर्तं तस्थिवान् (तत्र क्वसुकानौ तद्वत् । ५ । २ । २ । इ. सू. स्थाधातोः परोक्षे क्वसुः तस्थौ इति तस्थिवान् ) स्थितः । उत्प्रेक्ष्यते—इति वचः स्मरन्निव इतीति किं स्थिरस्य श्रियः स्युरिति ॥ ६२ ॥

**न दिव्ययाऽरञ्जि स रंभया प्रभु, र्हरेर्नटैः शिक्षितनृत्यया तथा ।**
**नभस्वता नर्तितयाग्रतोरण—स्थया यथाऽरण्यनिवासया तथा ॥६३॥**

(व्या०) नेति ॥ स प्रभुर्दिव्यया देवलोकसत्कया रंभया तथा न अरञ्जि । किं लक्षया रंभया हरेरिन्द्रस्य नटैः शिक्षितनृत्यया शिक्षितं नृत्यं यस्याः सा । यथा नभस्वता (तदस्यास्त्यस्मिन्निति मतुः । ७—२—१ । इ. सू. नभस् शब्दात् मतुः । मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मोव' । २—१—९४ । इ. सू. मतोर्मस्य वः । नभः अस्यास्तीति नभस्वान् ) वायुना नर्तितया अग्रतोरणस्थया (स्थापास्नात्र कः । ५ । १ । १४२ । इ. सू. अग्रतोरणशब्दात् स्थाधातोः कः । सहस्तेन । ३—१—२४ । इ. सू. सहपूर्वपदबहुव्रीहिः) तोरणस्य अग्रं अग्रतोरणं तत्र तिष्ठति तया अरण्यनिवासया अरण्ये वने निवासो यस्याः सा तया रंभया कदल्या अरञ्जि ॥ ६३ ॥

**समानय स्थालमुरुस्तनस्थले, निधेहि दूर्वां दधि चात्र चित्रिणि ।**
**सुलोचने संचिनु चन्दनद्रवं शरावयुग्मं धर बुद्धिबंधुरे ॥ ६४ ॥**

गृहाण मंथं गतिमंथरे युगं, जगज्जनेष्टे मुशलं च पेशले ।
क्षणः समासीदति लग्नलक्षणः, कियच्चिरं द्वारि वरोऽवतिष्ठताम् ।६५।

इहोप्रशस्त्रे कुसुमव्रजे निजे, जनोष्मणा म्लानिमुपागते हलाः ।
महाबलेनापि मनोभुवा भवां-तकोऽत्रदेवे प्रभविष्यते कथम् ॥६६॥

घनत्वमापद्य मरुन्नचन्दन-द्रवस्य मुष्णाति किमेष सौरभम् ।
उल्लूलपूर्वाय वरार्घकर्मणे, विमुच्यतां तत्करकंठकुंठताम् ॥ ६७ ॥

इतीरयन्तीष्वितरेतरांद्युस-द्वधूषु काचित्करपाटवांचिता ।
विलोलकौसुंभनिचोलशालिनी, प्रभातसंध्येव समग्रकर्मणाम् ॥ ६९ ॥

मणिमयस्थालधृतार्घसाधना, वशोचितायाः न वशंवदा ह्रियः ।
वराभिमुख्यं भजति स्म सस्मया, न कोऽथवास्वेवसरे प्रभूयते ॥६९॥

षड्भिः कुलकम् ॥

(०५।०) समानयेति । काचित् स्त्री सस्मया स्मयेन सहवर्तते इतिसस्मया (सहस्तेन । ३ । १ । २४ । इ. सू. सहपूर्वपद बहुव्रीहि· ।) सगर्वा सती वराभिमुख्यं वरस्याभिमुख्य तत् वरस्य सन्मुखत्वं भजतिस्म सेवते स्म । अथवा स्वे आत्मीये अवसरे को न प्रभूयते समर्थो न भवति अपि तु सर्वः कोऽपि भवतीत्यर्थः । किं लक्षणा स्त्री करपाटवाञ्चिता करयो· पाटवेन अञ्चिता हस्त-लाघवेन युक्ता । विलोलकौसुंभनिचोलशालिनी विलोलेन चंचलेन कौसुंभेन (रागाद्गोरक्ते । ६ । २ । १ । इ. सू. कुसुम्भशब्दात् रक्तेऽर्थे अण् प्रत्ययः । वृद्धि· स्वरेष्वादेर्ञ्णिति तद्धिते । ७ । ४ । १ । इ. सू. आद्यस्वरस्यवृद्धि. ।) निचोलेन प्रच्छदपटेन शालते इति शालिनी शोभमाना । उत्प्रेक्ष्यते समग्रकर्मणां समग्राणि च तानि कर्माणि च तेषां प्रभातसंध्या इव प्रभातस्य संध्या इव । किं विशिष्टा स्त्री मणिमयस्थालधृतार्घसाधना मणीमयं च तत् स्थालं च तस्मिन् धृतानि अर्घस्य साधनानि यया सा । वशोचितायाः वशाया· स्त्रिया उचिता योग्या तस्या स्त्रीयोग्यायाः ह्रियः लज्जाया. न वशंवदा न वश्या वशं वदतीति वशंवदा । (प्रिय-वशाद्वद· ५ । १ । १०७ । इ. सू. वशपूर्वक वद्धातोः खप्रत्ययः । खित्य-

खड्डो च विहायसस्तुविहः । ५ । १ । १३९ । इ. सू. गम्धातोर्डः । डित्यन्त्यस्वरादेः इ. सू. अन्त्यस्वरादेर्लोपः । ) विद्याधराणां पदापि चरणेनापि न संगता न मिलिता । क्वचिद् रथैः अरिधारया वक्रधारया क्षुण्णं तलं यस्याः सा क्षुण्णतला । समाशया समः आशयः अभिप्रायो यस्याः सा समाभिप्राया ॥५७॥

**कृपापयःपुष्करिणीं दशंन्यधा-दसौ स्वभावादपि यत्र नाकिनि ।**
**स बाढमौष्मायत देवसंहतौ, मयि प्रसादाधिकता प्रभोरिति ॥५८॥**

(व्या०) कृपेति ॥ असौ भगवान् यत्र नाकिनि यस्मिन् देवे स्वभावादपि कृपापयः पुष्करिणीं कृपा एव पयः कृपापयः तदेव पुष्करिणी तां कृपाजलवापीं दशं न्यधात् । स देवो देवसंहतौ देवानां संहतिस्तस्यां (स्त्रियां क्तिः । ५–३–९१ इ. सू. संपूर्वकहन्धातोः क्तिः यमिरमिनमिगमिहनिमनिवनतितनादेर्धुटि क्ङिति । ४ । २ । ५५ । इ. सू. अनुनासिकलोपः) देवसमूहे इति अमुना प्रकारेण बाढं (क्षुब्धः विरिब्ध स्वान्तध्वान्तलग्नम्लिष्टफाणृबाढ परिवढं । ४ । ४ । ७० । इ. सू. भृशेऽर्थे बाढशब्दोऽनिटः क्तान्तो निपात्यते । औष्मायत गर्वमधत्त । प्रभोः स्वामिनो मयि विषये प्रसादाधिकता प्रसादस्य अधिकता वर्तते ॥ ५८ ॥

**विचित्र वाद्यध्वनिगर्जितो, यथायथासीददसौ गुणैर्घनः ।**
**तथा तथा नंदवने सुमंगला-सुनन्दयोरब्दसखायितं हृदा ॥ ५९ ॥**

(व्या०) विचित्रेति । असौ भगवान् विचित्रवाद्यध्वनिगर्जितोर्जितः विचित्राश्चते वाद्यानां ध्वनयश्च ते एव गर्जितानि तैः ऊर्जितः बलवान् सन् यथा यथा आसीत् आसन्न आगतः । किं विशिष्टोऽसौ गुणैर्घनः बहुलः मेघोवा । तथा तथा सुमंगलासुनन्दयोः सुमंगला च सुनन्दा च तयोर्हृदा आनन्दवने अब्दसखायितं (अब्दानां सखा अब्दसखः । क्यङ् । ३ । ४ । २६ । इ. सू. अब्दसखशब्दात् क्यङ् प्रत्ययः । दीर्घश्चिव य ङ् य क्येषु च । ४–३–१०८ इ. सू. दीर्घे अब्दसखाय इति नामधातुः । क्तक्तवतू । ५ । १ । १७४ । इ. सू. अब्दसखाय धातोर्भावे क्तः ।) स्ताद्यशितोऽत्रोणादे रिट् । ४ । ४ । ३२ । इ. सू. इडागमे अतः । ४ । ३ । ८२ । इ. सू अब्दसखायधातोः अकारस्यलोपे

अब्दसखायितमिति सिद्धम् अब्दसख इत्यत्र तत्पुरुषसमासत्वात् राजन् सखेः । ७ । ३ । १०६ । इ. सू. अट् समासान्तः) अब्दसखो मयूरस्तद्वदाचरितम् ५९

**तदाऽन्यबालावदुपेयिवत्प्रभो–र्दिदृक्षयोत्पिंजलचित्तयोस्तयोः ।**
**शची नियुक्तस्वसखीनियंत्रणा, बहिर्विहारेऽभवदर्गलायसी ॥ ६० ॥**

(व्या०) तदेति ॥ तदा तस्मिन्नवसरे तयोः सुमंगलासुनंदयो. अन्यबालावत् उपेयिवत्प्रभो' (वेयिवदनाश्वदनूचानम् । ५ । २ । ४ । इ. सू. इयिवस् इति कर्तरि निपात्यते ।) उपेयिवांश्चासौ प्रभुश्च तस्य आगतस्य स्वामिनो दिदृक्षया (तुमर्हादिच्छायां सन्नतत्सनः । ३ । ४ । २१ । इ. सू. दृश्धातोः सन् प्रत्ययः सन्यङश्च । ४ । १ । ३ । इ. सू. द्वित्वे ददृश् स । सन्यस्य । ४ । १ । ५९ इ. सू. सनिपरे पूर्वस्य अकारस्य इकारे दिदृश् स । यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः । २ । १ । ८७ । इ. सू. शस्यषत्वे । षढोः कस्सि । २ । १ । ६२ । इ. सू. षस्यकत्वे दिदृक् स । नाम्यन्तस्था । कवर्गात् पदान्तः कृतस्य सः शिड्नान्तरेऽपि । २ । ३ । १५ । इ. सू. सन. सस्य षत्वे कषयोः क्षे कृते दिदृक्ष् इति जाते क्रियार्थो धातुः इ. सू. दिदृक्ष इत्यस्य धातुसंज्ञा । शंसि प्रत्ययात् । ५ । ३ । १०५ । इ. सू. अप्रत्यये आत् इ. सू. आपिकृते दिदृक्षा इति सिद्धम् ।) द्रष्टुमिच्छया उत्पिंजलचित्तयोः उत्पिंजलं चित्तं ययोस्ते तयो' आकुलमनसोः सत्योः बहिर्विहारे बहिर्निसरणेः शचीनियुक्तस्वसखीनियंत्रणा शच्या इन्द्राण्या नियुक्ताः मुक्ताः याः स्वसख्यस्तासां नियंत्रणा आयसी लोहमयी अर्गला अभवत् ॥ ६० ॥

**कलागुरुः स्वस्य गतौ यथाशयं, समुह्यमान पुरुहूतदन्तिना ।**
**मुखं मुखश्रीमुखितेन्दुमंडलः, स मंडपस्याप दुरापदर्शनः ॥ ६१ ॥**

(व्या०) कलागुरुरिति ॥ स भगवान् मंडपस्य मुखं आप आप प्राप । किं विशिष्टो भगवान् पुरुहूतदन्तिना पुरुहूतस्य इन्द्रस्य दन्ती हस्ती तेन ऐरावणेन हस्तिना यथाशयं आशयमभिप्रायमनतिक्रम्य यथाशयं (योग्यतावीप्सार्थानतिवृत्तिसादृश्ये । ३ । १ । ४० । इ. सू. अव्ययीभावः) यथाभिप्रायं समुह्यमानो धार्यमाणः

नव्ययाऽरुषोर्मोऽन्तो ह्रस्वश्च । ३ । २ । १११ । इ. सू. वराशब्दस्यमोऽन्तः) कासु सतीषु द्युसद्वधूषु द्युसदां वध्वः तासु देवाङ्गनासु इतरेतरां (परस्पराऽन्योन्ये तरे तरस्याम् स्यादेर्वा पुंसि । ३ । २ । १ । इ. सू. इतरेतरशब्दात् स्यादे र्वाम् ।) परस्परं इति ईरयन्तीषु कथयन्तीषु सतीषु । इतीति किं हेउरुस्तनस्थले उरुणी गुरुणी स्तनस्थले यस्याः सा उरुस्तनस्थला तस्याः संबोधनं क्रियते त्वं स्थालं समानय । हे चित्रिणि चक्रदन्तत्वात् स्तनयो समत्वात् मधुगंधत्वात् चक्रकेशत्वात् चित्रिणि उच्यते चित्रिणी आश्चर्यकारिणी च तस्याः संबोधनं हे चित्रिणि अत्र स्थाले दूर्वा च अन्यद् दधि निधेहि निवेशय । हे सुलोचने शोभ-नानि लोचनानि यस्या सा तस्या संबोधनं हे सुलोचने त्वं चन्दनद्रवं चन्दनस्य द्रवस्तं संचिनु संचितं कुरु । हे बुद्धिबंधुरे (वाश्यसिवासिमसिमथ्युन्दिमन्दिचति-रः । इ. उ. सू. बन्धश्धातो उर । बध्नाति मनः इति बन्धुरा ।) बुद्ध्या बन्धुरा मनोज्ञा तस्याः संबोधनं त्वं शरावयोः युग्मं शरावयुग्मं तत् धर । हे गतिमन्थरे (ऋच्छिचटिवटिकुटिकठिवठि–र । इ. उ. सू. मन्थश्धातोः अर प्रत्ययः । मथ्नातिपादौ इति मन्थरा ।) गत्यामन्थरा अलसा तस्या संबोधनं त्वं मन्थं मन्थानकं गृहाण । हे जगज्जनेष्टे जगतो विश्वस्य जनाना मिष्टा अभीष्टा तस्याः संबोधनं त्वं युगं गृहाण हे पेशले मनोज्ञे त्वं मुशलं गृहाण । लग्नलक्षणः लग्नं लक्षणं यस्य स क्षण कालविशेषः समासीदति आसन्नः स्यात् । वरो द्वारि कियच्चिरं कियत्कालं अवतिष्ठताम् । (संविप्रावात् । ३ । ३ । ६३ । इ. सू. अवउपसर्गात् । परस्यस्थाधातोरात्मनेपदम्) अवयोगादात्मनेपदमत्र ज्ञेयम् । हे हलाः हे सख्यः इह जगति निजे आत्मीये उग्रशाखे उत्कटायुधे कुसुमव्रजे कुसु-मानां व्रजस्तस्मिन् पुष्पसमूहे जनोष्मणा जनानामुष्मा तेन लोकबाष्पेण ग्लानिं (ग्लाहाज्यः । ५ । ३ । ११८ । इ. सू. ग्लानिरित्यपि केचिदिच्छन्ति ।) शोष मुपागते सति प्राप्ते सति महाबलेनापि महत् बलं यस्य स तेन मनोभुवा कामेन अत्र देवे कथं प्रभविष्यते कथं समर्थीभविष्यते । किं विशिष्टे अत्र भवान्तके भवः संसारो महेशो वा तस्य अन्तके यमप्राये भवे कामो जितः भवस्यापि जेता अयं कामेन कथं जेष्यते इति व्यंग्यम् । एष मरुत् पवनश्चन्दनद्रवस्य घनत्वं

दढत्वमापाद्य सौरभं परिमळं किं न मुष्णाति अपितु मुष्णात्येव । तस्मात् कारणात् उछलपूर्वाय धवलध्वनिपूर्वकाय वराधेकर्मणे वरस्य अर्घकर्मणे । करकंठकुंठतां करौ च कंठश्च एषां समाहारः करकंठं (प्राणितुर्याङ्गाणाम् । ३ । १ । १३७ । इ. सू. करकंठशब्दस्य प्राण्यङ्गत्वात् एकवद्भावः । ) तस्य कुंठता जिह्मता विमुच्यताम् ॥ षड्भिः कुलकम् ॥ ६४ । ६५ । ६६ । ६७ । ६८ । ६९ ॥

**जगद्वरेऽत्रार्घमुपाहरद्वरे, यथेक्षिता सा हरिणा सकौतुकम्।**
**स्त्रियोऽतिकस्था धवलैस्तथा जगुः, क्वचिद्भवद्विस्मृतिशंकया किमु ॥**

(व्या०) जगद्वरे इति ॥ सा देवांगना जगद्वरे जगति वरस्तस्मिन् विश्वप्रशस्ये अत्र वरे यथा अर्धमुपाहरत् अढौकयत् । किं विशिष्टा सा हरिणा इन्द्रेण स कौतुक (कौतुकेन सह यथास्यात्तथा सकौतुकं । क्रिया विशेषणात् । २ । २ ४१ । इ. सू. सकौतुक मित्यत्र द्वितीया ।) मीक्षिता । अन्तिकस्थाः समीपस्थाः स्त्रियो धवलैस्तथा जगुर्गायन्ति स्म । किमु इति संशये क्वचिद् भवद्विस्मृतिशंकया भवन्ती चासौ विस्मृतिश्च तस्याः शङ्कया जगुः (गैधातोः कर्तरि परोक्षा) ॥७०॥

**स पस्पृशे हृद्यपि दुर्लभे पर–स्त्रिया तयाछेकधिया कृतस्मितम् ।**
**अमुं कथंचिद्दधिबिन्दुमर्घत–श्च्युतं विनज्मीति गृहीतदं भया ॥७१॥**

(व्या०) स इति ॥ छेकधिया छेकाधीर्यस्याः सा तया चतुरबुद्ध्या तया देवाङ्गनया कृतस्मितं यथा भवति तथा स भगवान् हृद्यपि पस्पृशे स्पृष्टः । किं लक्षणे हृदि दुर्लभे (दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् । २५ । ३ । १३९ । इ. सू. दुःपूर्वक लभधातोः खल् प्रत्ययः) दुःखेन लभ्यते इति तस्मिन् परस्त्रियः अर्घत श्च्युत ममुं दधिबिन्दुं दध्नोबिन्दुस्तं कथंचित् विनज्मि पृथक् करोमि इति गृहीतदंभया ॥ ७१ ॥

**अपि प्रवृत्तार्घविधिर्वधूद्वयी–दिदृक्षया नोदमनायत प्रभुः ।**
**समाधिनिर्धौतधियां न तादृशां, स्वभावभेदे विषयाः प्रभूष्णवः ॥७२॥**

(व्या०) अपीति ॥ प्रभुः स्वामी प्रवृत्तार्घविधिः अपि प्रवृत्तः अर्घविधिर्यस्य सः वधूद्वयीदिदृक्षया वध्वोः सुमंगलासुनन्दयोर्द्रष्टुमिच्छा तया विलोकनेच्छया

नोदमनायत (च्व्यर्थे भृशादेः स्तोः । ३ । ४ । २९ । इ. सू. उन्मनस् शब्दात् च्व्यर्थे वाक्यङ् सलोपश्च) उत्सुको नाभवत् । समाधिनिर्धौतधियां समाधिना संतोषादिसमाधिना निर्धौता धीर्बुद्धिर्येषां ते तेषां तादृशां पुरुषाणां स्वभावभेदे स्वभावस्य प्रकृतेर्भेदस्तस्मिन् विषया प्रभूष्णवः (पूर्वावराधरेभ्योऽसऽस्तातौ पुरवधश्चैषाम् । ७ । २ । ११५ । इ. सू. दिग्वाचिपूर्वशब्दात् अस् प्रत्ययः । पूर्वशब्दस्य च पुर् आदेशः ।) प्रभवन्ति इत्येवंशीला समर्था न स्युः ॥७२॥

**तदीयलावण्यरुचोरिवेर्ष्यया, शरावयुग्मं लवणाग्निगर्भितम् ।**
**पुरो विमुक्तं सुदृशाम्रदिष्ट सोऽनलोच्छ्वसत्पर्पटलीलयांह्रिणा ॥ ७३ ॥**

(व्या०) तदीयेति । स भगवान् सुदृशा स्त्रिया पुरोऽग्रे (पूर्वावराधरेभ्योऽसऽस्तातौ पुरवधश्चैषाम् । ७ । २ । ११५ । इ. सू. दिग्वाचिपूर्वशब्दात् अस् प्रत्ययः । पूर्वशब्दस्य च पुर् आदेशः ।) विमुक्तं शरावयुग्मं शरावयोर्युग्मं शरावसंपुटं अनलोच्छ्वसत्पर्पटलीलया अनलेन वैश्वानरेण उच्छ्वसन् यः पर्पटस्तस्य लीला तया अंह्रिणा चरणेन अम्रदिष्ट मृदितवान् । किं विशिष्टं शरावयुग्मं उत्प्रेक्ष्यते तदीयलावण्यरुचोः लावण्यं च रुक् च लावण्यरुचौ तस्य भगवतो लावण्यरुचौ तयोः लावण्यकान्त्योः ईर्ष्यया इव क्रोधेन इव लवणाग्निगर्भितं लवणं च अग्निश्च लवणाग्नी ताभ्यां गर्भितं सहितम् ॥ ७३ ॥

**प्रगृह्य कौसुंभसिचा गलेऽबला, बलात्कृषन्त्येनमनैष्ट मंडपम् ।**
**अवाप्तवारा प्रकृतिर्यथेच्छया, भवार्णवं चेतनमप्यधीश्वरम् ॥ ७४ ॥**

(व्या०) प्रगृह्य इति ॥ अबला स्त्री एनं भगवन्तं कौसुंभसिचा (रागाट्टो रक्ते । ६ । २ । १ । इ. सू. कुसुंभशब्दात् रक्तेऽर्थे अण् कुसुंभेनरक्तं कौसुंभम् ।) कौसुंभवस्त्रेण गले प्रगृह्य अबला कृषन्ती मंडप मनैष्ट नीतवती किं लक्षणा स्त्री अवाप्तवारा अवाप्तः वारो यया सा प्राप्तावसरा । केव प्रकृतिरिव यथार्थे इव यथा पापप्रकृतिः कर्मरूपा अवाप्तवारा प्राप्तावसरा सती चेतनमात्मानं इच्छया भवार्णवं संसारसमुद्रं नयति । किं लक्षणमेनं भगवन्तं आत्मानं च अधीश्वरमपि (स्थेशभासपिसकसोवरः । ५–२–८१ । इ. सू. ईश्धातोः शीलादिसदर्थे वरप्रत्ययः) अधिकेसमर्थमपि ॥ ७४ ॥

**शतमखस्तमखंडितपौरुषं, सपदि मातृगृहे विहिताग्रहः ।**
**अभिनिषण्णवरेन्दुमुखीद्वयं, जिनवरं नवरंगभृदासयत् ॥ ७५ ॥**

(व्या०) शतमखेति ॥ नवरंगभृत् (क्विप् । ५ । १ । १४८ । इ. सू. नवरङ्गपूर्वकभृधातो कर्तरि क्विप् । ह्रस्वस्य त· पित्कृति । इ सू. त) नवश्चासौ रंगश्च तं बिभर्तीति नवीनहर्षरूपरंगभृत् शतमखः शतं मखा यज्ञा यस्य स इन्द्र विहिताग्रह· विहित आग्रहो येन स· कृताग्रह· सन् तं जिनवरं सपदि शीघ्रं मातृगृहे निषण्णवरेन्दुमुखीद्वयं इन्दुवन्मुखं ययोस्ते इन्दुमुख्यौ तयोर्द्वयं वरं च तत् इन्दुमुखीद्वयं च निषण्णं च तत् वरेन्दुमुखीद्वयं च प्राग्निविष्टवधूद्वयं अभि संमुखं आसयत् उपवेशयति स्म । (लक्षणवीप्स्येत्थम्भूतेष्वभिना । २-२-३६ इ. सू. निषण्णवरेन्दुमुखीद्वयमित्यत्र अभियोगे द्वितीया ।) अभियोगे द्वितीया । किं लक्षणं भगवन्तं अखंडित पौरुष न खंडितं पौरुषं यस्य स तं अखंडितपराक्रमम् ॥ ७५ ॥

**दृष्ट्वाऽऽयान्तं नोदतिष्ठाव नाथं, नाथ स्वास्याविष्कृतिः संगता नौ ।**
**ध्यात्वेतीव स्वामिनोऽभ्यर्णभावे, ते नीरंगीगोपितास्ये अभूताम् ॥**

(व्या०) दृष्ट्वेति ॥ अथानन्तरं ते सुमंगलासुनन्दे स्वामिनोऽभ्यर्णभावे (क्तक्तवतू । ५ । १ । १७४ । इ. सू. अभिपूर्वक अर्दधातोर्भावे क्तः । अविदूरे अभेः । ४ । ४ । ६४ । इ. सू. इडभाव· । रदादमूर्च्छमद· क्तयोर्दस्य च । ४ । २ । ६९ । इ. सू. तस्य न· रषृवर्णान्नोण एकपदेऽनन्त्यस्यालचटतवर्गशसान्तरे । २ । ३ । ६३ । इ. सू. नस्य ण· धातोर्दस्य च) सामीप्ये नीरंगीगोपितास्ये नीरंग्या गोपितमाच्छादितमास्यं वदनं याभ्यां ते अभूताम् । किं कृत्वा उत्प्रेक्ष्यते-इति ध्यात्वाइव इतीति किं आवा नाथं स्वामिनमायान्तं दृष्ट्वा नोदतिष्ठाव नोत्थिते । नौ आवयो स्वास्याविष्कृति· स्वस्यात्मीयस्य आस्यस्य मुखस्य आविष्कृतिः प्रकटीकरणं न संगता न युक्ता ॥ ॥ ७६ ॥

**लावण्यवारिसरसोदयितादमुष्मात्, पातुं प्रकाशमनलंनयनद्वय नौ ।**
**पानेन तृप्तिरिह चौरिकया न काचि-देवं मिथोऽकथयतामपृथुस्वरं ते ॥**

(व्या०) लावण्य इति ॥ ते कन्ये अपृथुस्वरं मन्दस्वरं यथा भवति तथा मिथः परस्परमेवं अकथयताम् । एवमिति किं अमुष्मात् दयितात् भर्तुः सरसः सरोवरात् लावण्यवारि लावण्यमेव वारि जलं प्रकाशं प्रकटं पातुं नौ आवयोर्नयनद्वयं नयनयोर्द्वयं लोचनयुगलं समर्थं न । इह चौरिकया (चोरादेः । ७ । १ । ७३ । इ. सू. चोरशब्दात् भावे अकञ् चोरस्य भावः चौरिका । अस्यायत्तत् क्षिपकादीनाम् । २ । ४ । १११ । इ. सू. अस्य इः ।) च पानेन काचित् तृप्तिर्न ॥ ७७ ॥

**शैशवावधि वधूद्वयदृष्ट्यो–श्चापलं यदभवद्दुरपोहम् ।**
**तत्समग्रमुपभर्तु विलिल्ये, ऽध्यापकान्तिक इवान्तिषदीयम् ॥ ७८ ॥**

(व्या०) शैशव इति ॥ वधूद्वयदृष्ट्यो वध्वो द्वयस्य दृष्ट्योः शैशवावधि (वृवर्णाल्लघ्वादेः । ७ । १ । ६९ । इ. सू. शिशुशब्दात् भावे कर्मणि च अण् शिशोर्भावः शैशवं) बाल्यादारम्य यत् चापलं दुरपोहं दुस्त्यजं अभवत् तत् चापलं ( चपलस्य भावः चापलं युवादेरण् । ७ । १ । ६७ । इ. सू. चपलशब्दात् भावे कर्मणि अण् । ) समग्रं उपभर्तृ भर्तुः समीपे विलिल्ये विलयं गतम् । किमिव आन्तिषदीयं चापलमिव यथा छात्रसत्कं चापलं अध्यापकान्तिके अध्यापकस्य अन्तिकं तस्मिन् उपाध्यायसमीपे विलयं याति ॥ ७८ ॥

**तारुण्येन प्रतिपतिमुखं प्रेरितोन्मादभाजा,**
**बाल्येनेषत्परिचयजुषा जिह्मतां नीयमाना ।**
**दृष्टिर्वध्वोः समजनितरामेहिरेयाहिरातः,**
**श्रान्तेः पात्रं न हि सुखकरः सीमसंधौ निवासः ॥ ७९ ॥**

(व्या०) तारुण्येन इति ॥ वध्वोर्दृष्टि एहिरेयाहिरातः आगमनतः श्रान्ते. श्रमस्य पात्रं स्थानं समजनितराम् । किंलक्षणा दृष्टिः उन्मादभाजा ( भजो विण् । ५ । १ । १४६ । इ. सू. उन्मादपूर्वकभज् धातोः विण् । ञ्णिति । ४ । ३ । ५० । इ. सू. उपान्त्य अकारस्य वृद्धिः ) उन्मादं भजतीति तेन

तारुण्येन ( पतिराजान्त गुणाङ्ग राजादिभ्यः कर्मणि च । ७ । १ । ६० । इ. सू. तरुणशब्दात् भावे कर्मणि टयण् ) यौवनेन पतिमुखं पत्युर्मुखं तत् प्रति प्रेरिता । ईषत्परिचयजुषा ईषत् परिचय: ( ईषद्गुणवचनैः । ३ । १ । ६४ । इ. सू. समास. । ) ईषत् परिचयस्तंजुषतीति ( क्विप् । ५ । १ । १४८ । इ. सू. ईषत् परिचयपूर्वकजुषुधातो: कर्तरि क्विप् । ) तेन बाल्येन जिह्मतां मन्दतां नीयमाना । हेतुमाह–हि यस्मात् कारणात् सीमसंधौ सीम्नः संधिस्तस्मिन् निवासः सुखकरो न स्यात् सुखंकरोतीति सुखकरः ( हेतुतच्छीलानुकूलेऽशब्दश्लोक कलह गाथा वैरचाटु सूत्र मन्त्र पदात् । ५ । १ । १०३ । इ. सू. सुखपूर्वक कृधातोः शीलेऽर्थे टः । ) ॥ ७९ ॥

**जैनी सेवां यो निर्भरं निर्मिमीते, भोगाद्योगाद्वा तस्य वश्यैव सिद्धिः ।**
**हस्तालेपे त्वकृतं सिषेवे ययोः श्री-वृक्षोऽभूदेकोऽन्यस्तयोः किं शमी न ॥**

(८५।०) जैनीं सेवां इति । यः पुमान् जैनीं जिनस्येयं तां जिनसत्कां (तस्येदम् । ६ । ३ । १६० । इ. सू. जिनशब्दात् इदमर्थे अण् । अणञेयेकण् नञ् स्नञ् टितम् । २ । ४ । २० । इ. सू. जैनशब्दात् स्त्रियां ङीः ।) सेवां निर्भरं यथा भवति तथा निर्मिमीते करोति । तस्य पुंसः भोगात् वा योगात सिद्धिर्वश्यैव (हृद्यपद्यतुल्यमूल्य वश्य पथ्यवयस्य–म् । ७ । १ । १११ । इ. सू. यान्तो वश्यशब्दोनिपात्यते वशं गता वश्या) स्यात् । ययोर्वृक्षयोः त्वक् (क्रुत् सम्पदादिभ्यः क्विप् । ५ । ३ । ११४ । इ. सू. त्वच् धातोः स्त्रियां क्विपि त्वक् ।) हस्तालेपे हस्तस्य आलेपः तस्मिन् तं जिनं सिषेवे सेवते स्म तयोर्मध्ये एको वृक्षः श्रीवृक्षोऽभूत श्रियोलक्ष्म्या: वृक्षः पक्षे पिप्पलः अन्यो वृक्ष किं शमी न अभूत् अपितु अभूत् । एतावता श्रीवृक्षो भोगी ज्ञेय: यस्य गृहे–श्री स एव भोगी इति न्यायात् शमी च शमवान् योगी ज्ञेयः । एवं जिनसेवातो भोगात योगाच्च तयो. सिद्धिर्जातेति भाव. ॥ श्रीवृक्षः कुंजराशन इत्यादि पिप्पलनामानि । शमी शमयते पापमित्यादि लोकाअपि वदन्ति ॥ ८० ॥

सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि-,
धम्मिल्लादिमहाकवित्वकलनाकल्लोलिनीसानुमान् ।
वाणीदत्तवरश्चिरं विजयते तेन स्वयं निर्मिते,
सर्गो जैनकुमारसंभवमहाकाव्ये चतुर्थोऽभवत् ॥ ४ ॥

इतिश्रीमदञ्चलगच्छेकविचक्रवर्त्तिश्रीजयशेखरसूरिविरचितस्य श्रीजैनकुमार-
संभवमहाकाव्यस्य तच्छिष्यश्रीधर्मशेखरमहोपाध्यायविरचितायां
टीकायां श्रीमाणिक्यसुन्दरशोधितायां चतुर्थसर्गव्याख्या
समाप्ता ॥ ४ ॥

## अथ पञ्चमः सर्गः प्रारभ्यते ॥

**वज्रिणा द्रुतमयोजि कराभ्यं, कन्ययोरथ करः करुणाब्धेः ।**
**तस्य हृत्कलयितु सकलाङ्गा-लिंगनेऽपि किलकौतुकिनेव ॥ १ ॥**

(व्या०) वज्रिणा इति ॥ अथानन्तरं वज्रिणा (अतोऽनेकस्वरात् । ७ २ । ६ । इ. सू. मत्वर्थे वज्रशब्दात् इन् वज्रोस्यास्तीति वज्री ।) इन्द्रेण करुणाब्धे करुणाया अब्धि (उपसर्गाद्दः किः । ५ । ३ । ८७ । इ. सू. आप्पूर्वक धाधातोः किः । इडेत् पुंसि चातो लुक् इ. सू. आकारलोप धुट-स्तृतीयः । २ । १ । ७६ । इ. सू आप् शब्दस्यपकारस्य तृतीयो ब. आपो धीयन्तेऽस्मिन्निति अब्धि ।) तस्य परदुःखनिरासनी भवेत करुणा तस्याः समुद्रस्य भगवतः करो हस्तः कन्ययो. सुमंगलासुनन्दयोः कराभ्यां सह द्रुतं शीघ्रमयोजि योज्यते स्म । किं लक्षणेन वज्रिणा उत्प्रेक्ष्यते-सकलांगालिंगनेऽपि सकलं च तत् अंगं च सकलाङ्गं तस्य आलिंगनं तस्मिन् सत्यपि तस्य भगवतो हृत् हृदयं कलयितुं कौतुकिनेव कौतुकमस्यास्तीति तेन ॥ १ ॥

**धावता माभिमुखं समवेतुं, तत्करस्य च वधूकरयोश्च ।**
**अंगुलीयकमणिघृणिजालैः, प्रष्ठपत्तितुलया मिमिले प्राक् ॥ २ ॥**

(व्या०) धावतामिति । तत्करस्य तस्य स्वामिन. करो हस्तस्तस्य स्वामिकरस्य च वधूकरयो वध्वो करौ तयोः अभिमुखं सन्मुखं समवेतुं मिलितुं धावतां सतां प्राक् पूर्वं अंगुलीयकमणीघृणिजालै अंगुलीयकस्य (जिह्वामूलाङ्गु लेश्चे य । ६ । ३ । १२७ । इ. सू. अङ्गुलिशब्दात् भवे ईय अङ्गुल्यां भवानि अङ्गुलीयकानि । स्वार्थेके अङ्गुलीयकं) मुद्रिकाया मणयो रत्नानि तेषां घृणयो किरणास्तेषां जालानि समूहास्तै किरणसमूहै प्रष्ठपत्तितुलया (प्रष्ठोऽग्रगे २ । ३ । ३२ । इ. सू. प्रपूर्वक स्थाधातो सस्य षत्वं ।) प्रष्ठश्चासौ पत्तिश्च तस्य तुलया अग्रेसरपदातिसदृशतया मिमिले मिलितम् ॥

**वामनामनि करे स्फुरणं यत्, कन्ययोः शुभनिमित्तमुदीये ।**
**तत्फलं प्रभुकरग्रहमाप–दक्षिणः क्षणफलः क्व नु वामः ॥ ३ ॥**

(व्या०) वामनामनि इति ॥ कन्ययोः वामनामनि वामो नाम यस्य स तस्मिन् करे हस्ते स्फुरणं यत् शुभनिमित्तमुदीये उदितम् 'अङ्ग विस्फुरणं नृणां, दक्षिणं सर्वकामदम् । तदेव शस्यते सद्भिर्नारीणामप्रदक्षिणम्, इति निमित्तशास्त्रात् । दक्षिणः करोहस्तः तत्फलं तस्य शुभनिमित्तस्य फलं तत् प्रभुकरग्रहं प्रभोः स्वामिनः करोहस्तस्तस्यग्रहं स्वामिपाणिग्रहणं आपत् प्राप्तः । इति वितर्के वामः क्षणफलः उत्सवफलः क्व वर्तते । वामो वामोहस्तः प्रतिकूलो वा यः प्रतिकूलः स्यात् स उत्सवफलं क्व प्राप्नोति अपि तु न कापीत्यर्थः ॥ ३ ॥

**उत्तराधरतयादधदास्थां, तत्करेवरकरः स्फुटमूचे ।**
**अव्यवस्थमधरोत्तरभावं, योग्यभाजि पुरुषे प्रकृतौ च ॥ ४ ॥**

(व्या०) व्यवस्था उत्तरेति ॥ वरकरः वरस्य करो हस्तः स्वामिहस्तः तत्करे तयोः सुमंगलासुनन्दयोः करः तस्मिन् उत्तराधरतया आस्थां (उपसर्गादातः ५ । ३ । ११० । इ. सू. आपूर्वक स्थाधातो अङ् । आत् इ. सू. आप् ।) अवस्थितिं दधत् सन् अधरोत्तरभावं अध स्थोपरिस्थतया अवस्थानं पुरुषे आत्मनि च अन्यत् प्रकृतौ कर्मणि योगभाजि सति सत्यां च अव्यवस्थं व्यवस्थारहितं स्फुटं प्रकटमूचे वक्ति स्म । 'कत्थइ जीवो बलिओ कत्थवि कम्माइं हुंति बलियाइं' । इत्याद्यागमवचनात् ॥ ४ ॥

**तत्करे करशयेऽजनिजन्योः, संचरे सपदि सात्विकभावैः ।**
**सात्विको हि भगवान्निजभावं, स्वेषु संक्रमयतेऽत्र न चित्रम् ॥ ५ ॥**

(व्या०) तत्करे इति ॥ जन्योर्वध्वोः संचरे (गोचर संचरवहव्रज–म् । ५ । ३ । १३१ । इ. सू पुन्नाम्निघान्तोनिपातः । संचरति अनेनेति संचरः) शरीरे सपदि शीघ्रं तत्कालं सात्विकभावैः रजनि जातम् । सात्विकभावाश्चामी 'स्तंभः १ स्वेदो २ ऽथरोमाञ्च ३ स्वरभेदश्च ४ वेपथुः ५ ॥ वैवर्ण्यं ६ रोदनं ७ चैवा वेष्टातेत्यष्ट सात्विकाः' ॥ १ ॥ कसति तत्करे तस्य स्वामिन करस्त-

त्करस्तस्मिन् करशये करेशेते इति करशयस्तस्मिन् हस्तस्थिते सति हि निश्चितं सात्विको भगवान् निजभाव निजस्य भावस्तं स्वेषु आत्मीयेषु संक्रमयते । अत्र न चित्रं न आश्चर्यम् । सत्वेन धैर्येण चरतीति सात्विकः । (चरति । ६–४–११ । इ सू. सत्त्वशव्दात् चरत्यर्थे इकण् ।) पक्षे सात्विका भावाः पूर्वोक्ताः । सात्विकोहि सात्विकं भाव मन्यत्र संक्रमयतीति अत्र किं चित्रम् । शव्दच्छलमत्र ज्ञेयम् ॥५॥

**बाल्ययौवनवयो वियदन्त–र्वर्तिनं जगदिनं परितस्ते ।**
**रेजतु र्गतघनेऽहनि पूर्वा–पश्चिमे इव करोपगृहीते ॥ ६ ॥**

(व्या०) बाल्येति ॥ ते कन्ये करोपगृहीते करेण पाणिना उपगृहीते गृहीतहस्ते जगदिनं ( सर्वोभयाभि परिणा तसा । २ । २ । ३५ । इ. सू. परितो योगे जगदिनमित्यत्र द्वितीया) जगतामिन स्वामी तं जगन्नाथं परितो रेजतु शोभिते । किं लक्षणं जगदिनं वाल्ययौवनवयोवियदन्तर्वर्तिनं (ग्रहादिभ्यो णिन् । ५ । १ । ५३ । इ. सू वृत् धातोर्णिन् ।) बाल्यं च यौवनं च वयः एव वियत् आकाशं तन्मध्ये वर्तते तं । के इव पूर्वापश्चिमे इव पूर्वा च पश्चिमा च पूर्वापश्चिमे यथा पूर्वापश्चिमे दिशौ करोपगृहीते किरणोपगृहीते गतधने गताः धना यस्मिन् तत् तस्मिन् निरभ्रे अहनि दिवसे इनं सूर्यं परितो राजते ॥ ६ ॥

**पाणिपीडनरतोऽपि न पाणी–बालयोः समृदुलावपिपीडत् ।**
**कोऽथवा जगदलक्ष्य गुणस्या–मुष्य वृत्तमवबोद्धुमधीष्टे ॥ ७ ॥**

(व्या०) पाणिपीडनेति ॥ स भगवान् पाणिपीडनरतोऽपि पाणिपीडनं पाणे पीडनं पाणिग्रहणं तस्मिन् रतः आसक्तः अपि बालयोः सुमंगलासुनन्दयोः मृदुलौ सुकोमलौ पाणी हस्तौ न अपिपीडत् न पीडितवान् । अथवा कः पुमान् जगदलक्ष्यगुणस्य जगतां अलक्ष्या (यप् चात । ५–१–२८ । इ सू. लक्षधातोः य लक्षितुं योग्याः लक्ष्याः) गुणा यस्य स जगदलक्ष्यस्वरूपस्य अमुष्य भगवतो वृत्तं चरित्रं अवबोद्धुं ज्ञातुं अधीष्टे समर्थो भवति अपि तु न कोऽपि ॥ ७ ॥

**तत्यजुर्न समयागततारा–मेलपर्वणि वरस्य तयोश्च ।**
**धीरतां च चलतां न दृशः स्वां, देहिनां हि सहजं दुरपोहम् ॥ ८ ॥**

(व्या०) तत्यजुरिति । वरस्य श्रीऋषभस्य च तयोर्वध्वोः दृशोदृष्टयः स्वामात्मीयां धीरतां च चलतां समयागततारामेलपर्वणि समये अवसरे आगतं यत् ताराणां मेलनं कनीनिकामेलनं तस्य पर्व उत्सवस्तस्मिन् न तत्यजुः । हि निश्चितं देहिनां प्राणिनां सहजं (क्वचित् । ५ । १ । १७१ । इ. सू. जनधातोर्डः । सहजातं सहजम् ) दुरपोहं (दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् । ५-३-१३९ इ. सू. कृच्छ्रार्थे दु पूर्वक अपपूर्वक ऊहधातोः खल्) दुस्त्यजम् ॥ ८ ॥

**स्वर्वधूविहितकौतुकगानो-पज्ञमस्य वपुषि स्तिमितत्वम् ।**
**योगसिद्धिभवमेवमघोना-शंकि वेद चरितं महतां कः ॥ ९ ॥**

(व्या०) स्वर्वधू इति । मघोना इन्द्रेण अस्य भगवतो वपुषि शरीरे स्तिमितत्वं निश्चलत्वं योगसिद्धिभवमेव योगसिद्धेः समुत्पन्नमेव आशंकि शंकितम् । किं लक्षणं स्तिमितत्वं स्वर्वधूविहितगानोपज्ञं स्वर्वधूभिर्विहितं कृतं यत् कौतुकगानं तेन उपज्ञं प्रणीतं महतां चरितं को वेद को जानाति अपि तु न कोऽपि ॥

**बद्धवान् वरवधूसिचयाना-मंचलान् स्वयमथाशु शचीशः ।**
**एवमस्तु भवतामपि हार्दे ग्रन्थिरश्लथ इति प्रथितोक्तिः ॥ १० ॥**

(व्या०) बद्धवान् । अथानन्तरं शचीशः इन्द्रः वरवधूसिचयानां वरश्च वधू च वरवध्वः तासां सिचयानि वस्त्राणि तेषां अञ्चलान् आशु शीघ्रं स्वयं बद्धवान् । किं लक्षण इन्द्र इति प्रथितोक्तिः इति अमुना प्रकारेण प्रथिता विस्तारिता उक्तिर्वचनं येन स । इति किं एवममुना प्रकारेण भवतामपि हार्दग्रन्थिः हार्दस्य (पुरुषहृदयादसमासे । ७ । १ । ७० । इ. सू. हृदयस्य हृद् आदेश । वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते । ७-४-१ । इ. सू. आदि स्वरवृद्धिः हृदयस्यभावो हार्दं) स्नेहस्य ग्रन्थिः अश्लथः न श्लथ अश्लथः दृढोऽस्तु ॥१०॥

**एणदृग्द्वयमुदस्य मघोनी, वासवश्च वरमद्भुतरूपम् ।**
**वेदिका मनयतां हरिदुच्चै-र्वंशसंकलितकाञ्चनकुंभाम् ॥ ११ ॥**

(व्या०) एणदृग् इति ॥ मघोनी इन्द्राणी एणदृग्द्वयं दृशोर्नेत्रयोर्द्वयं युगलं एणस्य मृगस्य दृग्द्वयमिव दृग्द्वयं अस्य तत् वध्वोर्द्वयं वधूद्वयं कन्यायुग्मं

तत् च पुनर्वासव इन्द्रः अद्भुतरूपं अद्भुतं रूपं यस्य स तं वरं उदस्य उत्पाट्य वेदिकां चतुरिकामनयतां गृहीतवन्तौ । किं लक्षणां वेदिकां हरिदुच्चैर्वंशसंकलितकाचनकुंभां हरितो नीलाः एतावता आर्द्राश्च उच्चै उच्चाः ते च ते वंशाश्च तै संकलिता युक्ता काञ्चनस्य कुंभाः कलशा यस्यां सा ताम् ॥ ११ ॥

**कोऽपि भूधरविरोधिपुरोधा–स्तत्र नूतनमजिज्वलदग्निम् ।**
**यः समः सकलजंतुषु योग्यः, स प्रदक्षिणयितुं न हि नेतुः ॥१२॥**

(व्या०) क इति । कोऽपि भूधरविरोधिपुरोधा भूधरा (आयुधाऽऽदिभ्यो धृगोऽदण्डादे. । ५ । १ । ९४ । इ सू भूशब्दपूर्वकधृग्धातो अच्प्रत्ययः भुवं धरन्तीति भूधरा ।) पर्वता स्तेषां विरोधी (समनुव्यवाद्रुध । ५ । २ । ६३ । इ. सू. विपूर्वकरुधधातोः शीलादिसदर्थे घिनण् प्रत्ययः) शत्रु इन्द्रः स एव पुरोधा (पुरोधीयते इति पुरोधा वय पय पुरोरेतोभ्यो धाग । ९७४ । इ. उ. सू. पुरस् पूर्वक धाधातो अस् प्रत्यय ।) पुरोहित तत्र तस्यां वेद्यां नूतनं नवीनमग्निं मजिज्वलत् ज्वालयति स्म । योऽग्नि सकलजंतुषु सकलाश्चते जंतवश्च सर्वप्राणिनस्तेषु समः सदृशोऽस्ति सोऽग्नि र्नेतु स्वामिन प्रदक्षिणयितुं प्रदक्षिणां कारयितुं योग्यो नह्यस्ति ॥ १२ ॥

**मंत्रपूतहविषः परिषेका–दुत्तरोत्तरशिखः स बभासे ।**
**सूचयन् परमहःपदमस्मै, यावदायुरधिकाधिकदीप्तिम् ॥ १३ ॥**

(व्या०) मंत्रपूत इति । सोऽग्नि मंत्रपूतहविष मन्त्रेण पूतस्य पवित्रस्य हविषो होतव्यद्रव्यस्य परिषेकात् सेचनात् उत्तरोत्तरशिख उत्तरा उत्तरा शिखा यस्य स अधिकाधिकशिख सन् बभासे दीप्यते स्म । किं कुर्वन् अस्मै भगवते यावदायु (यावदियत्त्वे । ३ । १ । ३१ । इ स अव्ययी भाव ।) आयुर्यावत् अधिकाधिकदीप्तिं सूचयन् कथयन् । किं विशिष्टोऽग्नि परमह पद परं च तत् मह उत्कृष्टतेजः तस्य पदं स्थानम ॥ १३ ॥

**हेम्नि धाम मदुपाधि कथं ते, मां विना वपुरदीप्यत हैमम् ।**
**प्रष्टुमेवमनलः किमु धूमं, स्वांगजं प्रभुमभिप्रजिघाय ॥ १४ ॥**

(व्या०) हेम्नि इति ॥ अनलो वैश्वानरः स्वांगजं स्वस्य अंगजः (अजातेः पञ्चम्याः । ५ । १ । १७० । इ. सू. अङ्गपूर्वक जनधातोर्डः । डित्यन्त्यस्वरादेः इ. सू. अन्त्यास्वरादेर्लोपः अङ्गात् जातः अङ्गजः ।) पुत्ररतं आत्मीयपुत्रं धूमं प्रभुं (लक्षणवीप्स्येत्थम्भूतेष्वभिना । २ । २ । ३६ । इ. सू. प्रभुमित्यत्र अभियोगेद्वितीया) अभि स्वामिसंमुखं किमु एवं प्रष्टुं प्रणिधाय प्रहिणोतिस्म । एवमिति किं हे स्वामिन् हेम्नि सुवर्णे धाम तेजो मदुपाधि मन्निमित्तं वर्तते । मां (विना ते तृतीया च । २ । २ । ११५ । इ. सू. मामित्यत्र विनायोगे द्वितीया) विना ते तव वपु हैमं सुवर्णमयं शरीरं कथमदीप्यत ॥ १४ ॥

**सोऽभितः प्रसृतधूमसमूहा–श्लिष्टकाञ्चनसमद्युतिदेहः ।**
**स्वां सखीमकृत सौरभलुभ्य–द्भृंगसंगमितचम्पकमालाम् ॥ १५ ॥**

(व्या०) स इति । स भगवान् अभित समंततः प्रसृतधूमसमूहाश्लिष्ट कांचनसमद्युतिदेह. प्रसृतेन धूमानां समूहेन आश्लिष्ट आलिंगित काञ्चनस्य समा द्युतिर्यस्य देहो यस्य स. एवंविधः सन् सौरभलुभ्यद्भृंगसंगमितचम्पकमालां सौरभेण (प्रज्ञादिभ्योऽण् । ७ । १६५ । इ. सू. सुरभिशब्दात् स्वार्थेऽण् ।) परिमलेन लुभ्यन्तश्चते भृंगाश्च तैः संगमिता मेलिता चम्पकपुष्पाणां माला तां स्वां सखीमकृत । एतावता गौरवर्णत्वात् चम्पकमालासदृशो भगवतो देहः तत्र लग्नो धूमश्च भ्रमरसमूहसदृश । एवं भगवतोदेहस्य चम्पकपुष्पमालायाश्च सखीत्वं सादृश्यं ज्ञेयमितिभाव ॥ १५ ॥

**धूमराशिरसितोऽपि चिरंथ्यो, र्लोहितत्वमतनोन्नयनानाम् ।**
**चूर्णकश्च धवलोऽपि रदानां, रागमेधयति रागिषु सर्वम् ॥ १६ ॥**

(व्या०) धूमराश्चिरिति ॥ असितोऽपि कृष्णोऽपि धूमराशि. धूमानां राशि समूहः चिरंथ्यो (टिण्टश्चर् च वा । १५० । इ. उ. सू. चिर्धातोः इण्ट प्रत्ययः ।) वधूट्योर्नयनानां लोचनानां लोहितत्वं आरक्तत्वमतनोत् तनोति स्म । च पुनर्धवलोऽपि चूर्णको रदानां दन्तानां लोहितत्वमारक्तत्वमतनोत् कृतवान् । रागिषु रागवत्सु सर्वं वस्तु रागमेधयति वर्द्धयति ॥ १६ ॥

**पद्मिनीसमवलम्बितहस्तो, बभ्रुमभ्रमदद्भ्रतरार्चिः ।**
**स प्रदक्षिणतया परितोऽग्निं, तं शुचिं विबुधवल्लभगोत्रम् ॥ १७ ॥**

(व्या०) पद्मिनी इति ॥ स भगवान् पद्मिनीसमवलम्बितहस्तः पद्मिनी-लक्षणाभ्यां पद्मिनीभ्यां सुमंगलासुनन्दाभ्यां समवलंबितो (कारकं कृता । ३ । १ । ६८ । इ. सू. तृतीयातत्पुरुष ।) हस्तो यस्य स. सन् बभ्रुं पीतवर्णं अग्निं (सर्वोभयाभिपरिणा तसा । २ । २ । ३५ । इ. सू. परितोयोगे अग्निमित्यत्र द्वितीया ।) परितः प्रदक्षिणतया अभ्रमत् इति । 'भ्रमूच् अनवस्थाने' इति दिवादिधातुः परं—'भ्रमक्लमक्रमत्रसि त्रुटिलषि यसि संयसे र्वा' इति सूत्रेण विकल्पत्वात् दिवादे श्यो न भवति । अत्र किं लक्षणो भगवान् अदभ्रतरार्चिः अदभ्रतरं बहुतरं अर्चिः तेजो यस्य स । शुचिं पवित्रं किं विशिष्टं अग्निं विबुधवल्लभगोत्रं विबुधानां देवानां वल्लभं प्रियं गोत्रं नाम यस्य स तं अग्निमुखा वै देवा इति वचनात् । द्वितीयेऽर्थे शुचिः सूर्यः विबुधानां देवानां वल्लभं गोत्रं पर्वतं मेरुं प्रदक्षिणतया भ्रमति । किं विशिष्टः सूर्यः पद्मिनीभिः कमलिनीभिः समवलंबिताः हस्ताः करा यस्य सः । शेषं पूर्ववत् ॥ १७ ॥

**यत्तदा भ्रमिरतः परितोऽग्निं, मङ्गलाष्टकरुचिर्विभुरासीत् ।**
**कुर्वतेऽस्य पुरतः किमजस्रं, मङ्गलाष्टकमतो मतिमन्तः ॥ १८ ॥**

(व्या०) यदिति ॥ विभुः (शंसंस्वयं विप्राद् भुवो डुः । ५ । २ ८४ । इ. सू. विपूर्वकभूधातोः डु प्रत्ययः) स्वामी तदा (किंयत्तत्सर्वैकान्यात्काले दा । ७ । २ । ९५ । इ. सू. कालेऽर्थे तत् शब्दात् दा प्रत्ययः) तस्मिन्नवसरे अग्नि-(सर्वोभयाभिपरिणा तसा । २ । २ । ३५ । इ. सू. परितो योगे अग्निमित्यत्र द्वितीया) मनलं परितः समन्तात् भ्रमिर्भ्रमणं तस्यां रतः आसक्तः सन् यत् मङ्गलाष्टकरुचिरासीत् । अतः कारणात् मतिरस्ति एषामिति मतिमन्तो विद्वांस अस्य भगवतः पुरोऽग्रे किमजस्रं (स्म्यजस हिंसदीपकम्पकमनमोरः । ५ । २ । ७९ । इ. सू शीलादि सदर्थे नञ्पूर्वकजसधातोः रप्रत्य) निरन्तरं मङ्गलाष्टकं कुर्वते ॥ १८ ॥

**श्यालकप्रतिकृतिः प्रभुपादां–गुष्ठमिष्ट विभवेच्छुरगृह्णात् ।**
**पूर्णमेष तमितोऽस्य निरूचे, श्रीगृहांघ्रिकमलाग्रदलत्वम् ॥ १९ ॥**

(व्या०) श्यालक इति । शालकप्रतिकृति शालकवत् प्रतिकृतिर्यस्य सः शालकसदृशः पुमान् इष्टमभीष्टं विभवं द्रव्यमिच्छतीति इष्टविभवेच्छु (विन्द्विच्छू । ५ । २ । ३४ । इ. सू. शीलादिसदर्थे इष्धातोः इच्छुरितिनिपातः ।) सन् प्रभुपादांगुष्ठ प्रभोः पादस्य अंगुष्ठ–(अङ्गौ शरीरावयवे तिष्टतीति अङ्गुष्ठः । स्थापास्नात्रः कः । ५ । १ । १४२ । इ. सू. अङ्गुपूर्वकस्थाधातो: कप्रत्ययः । इडेतपुसि इ. सू. आलोपः गोऽम्बाऽऽम्बसव्यापद्वित्रि भूम्यग्निशेकुशङ्कुकुङ्गु–स्थ । २ । ३ । ३० । इ. सू. षत्वम्) एतं स्वामिचरणांगुष्ठं अगृह्णात् गृहीतवान् । एष शालकप्रतिकृतिः पूर्ण संपूर्ण तं विभवं इतः प्राप्त. सन् अस्य प्रभुपादांगुष्ठस्य श्रीगृहांघ्रिकमलाग्रदलत्वं श्रिया लक्ष्म्या गृह यत् अंघ्रिकमलं चरणकमलं तस्य अग्रदलत्वं निरूचे निश्चितमूचे । कोऽर्थः स्वामिसत्कचरणकमले निश्चितं लक्ष्मीर्वसति । य एकोऽपि एकचित्तः सन् तत् सेवते सलक्ष्मीमवश्यं प्राप्नोत्येव ॥ १९ ॥

**पाणिमोचनविधावथ सार्ध–द्वादशास्य पुरतोऽर्जुनकोटीः ।**
**वासवः समकिरत् कियदेतत्, तस्य यः करवसच्छतकोटिः ॥ २० ॥**

(व्या०) पाणिमोचन इति ॥ अथानन्तरं वासव इन्द्र. पाणिमोचनविधौ पाणिमोचनं उद्वाहस्तस्य विधौ अस्य भगवत पुरतो–(आद्यादिभ्य । ७ । २ । ८४ । इ स् तसु । ) ऽग्रे द्वादश द्वाभ्यामधिका दश संख्याका अर्जुनस्य सुवर्णस्य कोटयस्ता सुवर्णकोटी समकिरत् । तस्य वासवस्य एतत् द्वादशसंख्याकं कियत् वर्तते । यो वासव करवसच्छतकोटि करे हस्ते वसन्ती शतसंख्या कोटिः वा शतकोटिर्वज्रं यस्य सः ईदृक् वर्तते ॥ २० ॥

**रोहणाद्रिविलवासितयान्योपक्रियाव्रतमहारि पुरा यैः ।**
**तैस्तदा गिरिभिदास्य वितीर्णैः, स्वीयसृष्टिफलमाप्यत रत्नैः ॥ २१ ॥**

(व्या०) रोहणाद्रिरिति ॥ यैः रत्नैः पुरा पूर्वं रोहणाद्रिबिलवासितया रोहण इति अद्रिः पर्वतस्तस्य बिलं गुहा तस्मिन् वासितया रोहणाचलसत्कगह्वरवासित्वेन अन्योपक्रियाव्रतं अन्येषां उपक्रियाया व्रतं परोपकारकरणव्रतं अहारि । तदा तस्मिन्नवसरे तैः रत्नैः गिरिभिदा ( गिरीन् भिनत्तीति गिरिभिद् क्विप् । ५ । १ । १४८ । इ सू. गिरिपूर्वकभिद्धातो कर्तरि क्विप् । ) इन्द्रेण अस्य भगवतो वितीर्णैः (क्तक्तवतू । ५ । १ । १७४ । इ सू. विपूर्वकतॄधातो कर्मणि क्त । ॠतां क्ङितीर् । ४ । ४ । ११५ । इ. सू ॠकारस्य इर् भ्वादेर्नामिनो दीर्घोर्वोर्व्यञ्जने । २ । १ । ६३ । इ सू. इकारस्य दीर्घत्वं । ॠल्वादेरेषांतोनोऽप्रः । ४ । २ । ६८ । इ. सू क्तस्य तस्य नत्वं । रषृवर्णान्नोण एकपदेऽनन्त्यस्यालचटतवर्गशसान्तरे । २ । ३ । ६३ । इ. सू. नस्य णत्वम् । ) दत्तैः सद्भिः स्वीयसृष्टिफलमाप्यत प्राप्यते स्म ॥ २१ ॥

**याः पुरो मघवतास्य विमुक्ता, स्ता वदामि विशदा भुवि मुक्ताः ।**
**क्षारपङ्कवसनादितरासां, क्षीण एव खलु शुक्तिमगर्वः ॥ २२ ॥**

(व्या०) याः इति ॥ मघवता ( मघः देवसभा सौख्यं वा अस्यास्तीति मघवान् । तदस्याऽस्त्यस्मिन्निति मतुः । ७ । २ । १ । इ सू. मघशब्दात् मतुः । मावर्णान्तोपान्त–वः । २ । १ । ९४ । इ. सू. मतोर्मस्य वः ) इन्द्रेण अस्य भगवतः पुरोऽग्रे या मुक्ताः विमुक्ताः । अहं भुवि पृथिव्यां ता मुक्ताः मौक्तिकानि विशदा उज्ज्वला वदामि ॥ तद्यथा–तारवृत्तगुरुस्निग्धं कोमलं निर्मलं तथा, षड्भिर्गुणैः समायुक्तं मौक्तिकं गुणवत् स्मृतम् ॥ १ ॥ ईदृग्गुणयुक्ता दोषमुक्ता मुक्ता विशदा उच्यन्ते ॥ इतरासां मुक्तानां क्षारपङ्कवसनात् क्षारश्च पङ्कश्च तयोर्वसनात् ॥ खलु निश्चितं शुक्तिमगर्वः–धवलतागुण क्षीण एव ॥ २२ ॥

**दीपिकाः सदसि यन्मणिजालैः, क्रोधिताः स्वमहसा परिभूय ।**
**क्रुत्फलं शलभकेषु वितेनु–स्ता अढौकयदमुष्य स भूषाः ॥ २३ ॥**

(व्या०) दीपिका इति । स इन्द्र अमुष्य भगवतो हारार्धहारकटककेयूरनक्षत्रमालाद्यास्ता भूषा ( भीषिभूषिचिन्ति–म्य. । ५ । ३ । १०९ । इ. सू

भूषिधातोर्भावाकर्त्रोरङ्आत् इ सू. आप्) आभरणान्यढौकयत् ढौकितवान्। सदसि सभायां दीपिकाः (दीपयन्तीति दीपिकाः णकतृचौ । ५ । १ । ४८ । इ. सू. दीपधातोः कर्तरि णकप्रत्ययः । अस्या यत्तत् क्षिपकादीनाम् । २ । ४ । ११ । इ. सू. अकारस्यइकार ।) यन्मणिजालैः यासां भूषाणां मणयो रत्नानि तेषां जालानि समूहास्तै भूषणसत्कमणिकिरणसमूहै । स्वमहसा स्वस्यात्मनो महस्तेजस्तेन आत्मीयतेजसा परिभूय पराभवस्थानं कृत्वा क्रोधिता (क्रोधः संजातः आसामिति क्रोधिता तदस्य संजातं तारकादिभ्यः इत । ७ । १ । १३८ । इ. सू. क्रोधशब्दात् इत ) ईर्ष्यां प्रापिता सत्यः क्रुध (क्रुत्संपदादिभ्यः क्विप् । ५ । ३ । ११४ । इ. सू. क्रुधधातो स्त्रियां भावे क्विप् ) फलं क्रुत्फलं तत् शलभकेषु पतंगेषु वितेनुश्चक्रुः ॥ २३ ॥

**श्लक्ष्णशुभ्रमृदुरादित रंभा, स्तंभभंगभवतंतुसमूहः ।**
**यद्गुणोपमितिलेशमृभुक्षा–स्तानि तस्य सिचयान्युपनिन्ये ॥ २४ ॥**

(व्या०) श्लक्ष्ण इति । ऋभुक्षा इन्द्रः तानि सिचयानि वानांशुकपट्टांशुक गोर्जिनेम्मिनीलनेत्र हीरागर इव इरागरजादरमेघाडंबरप्रभृतिवस्त्राणि तस्य स्वामिन उपनिन्ये ढौकयामास । सिचयशब्द पुंनपुंसकलिंगो ज्ञेय । शुभ्रश्चासौ मृदुश्च शुभ्रमृदु श्लक्ष्णश्चासौ शुभ्रमृदुश्च श्लक्ष्णशुभ्रमृदु सूक्ष्मधवलसुकुमालः रंभस्तंभभंगभवतंतुसमूहः रंभाया कदल्याः स्तंभः तस्य भंगास्तस्माद् भवस्तंतूनां समूह यद्गुणोप मितिलेशं येषां वस्त्राणां गुणास्तेषामुपतितेर्लेश मादित गृह्णातिस्म ॥ २४ ॥

**यन्मरीचिनिकरे ननु विष्वक्–द्वीचिवीचिसदृशेजलराशेः ।**
**पोततिस्मसुयुवापि निविष्टो, रत्नविष्टरमदात् स तमस्मै ॥ २५ ॥**

(व्या०) यन्मरीचि इति ॥ स इन्द्रः अस्मै भगवते तं रत्नविष्टरं रत्नैः निर्मितं विष्टरं रत्नमयसिंहासनमदात दत्तवान् । स भगवान् युवापि तरुणोऽपि यत्र रत्नसिंहासने निविष्ट उपविष्ट सन् यन्मरीचिनिकरे यस्य सिंहासनस्य मरीचय किरणाः तेषां निकर समूहस्तस्मिन् पोतति (कर्तुः क्विप् गल्भक्लीबहोडात्तु

डित् । ३ । ४ । २५ । इ. सू. पोतनाम्नः आचारे क्विप् ।) स्म पोतो बालः प्रवहणं वा तद्वदाचरतिस्म । किंविशिष्टे यन्मरीचिनिकरे ननु निश्चितं विष्वद्रीचि विष्वक् समंततः अञ्चतीति विष्वद्र्यङ् तस्मिन् समंततः प्रसृत्वरे 'सर्वादि विष्वग् देवा' इति सूत्रेण विष्वद्रीचिरूपनिष्पत्तिः । पुनः जलानांराशिः तस्य जलराशेः समुद्रस्य । वोचिसदृशे वीचीनां सदृशस्तस्मिन् कल्लोलसदृशे ॥ २५ ॥

**छत्रमत्रुटितचारिम चोक्षे, चामरे शयनमुच्चविशालम् ।**
**यन्मनोऽभिमतमन्यदपीन्द्रा–द्वस्तु स स्तुतिपदं तदवाप ॥ २६ ॥**

**(व्या०)** छत्रमिति । अत्रुटितचारिम न त्रुटितं अत्रुटितं अत्रुटितमच्छिन्नं चारिम (पृथ्वादेरिमन् वा । ७ । १ । ५८ । इ. सू. चारुशब्दात् भावे वा इमन् । त्र्यन्तस्वरादेः । ७ । ४ । ४३ । इ. सू अन्त्यस्वरलोपः) रमणीयत्वं यस्य तत् छत्रं चोक्षे पवित्रे चामरे उच्चविशालं उच्चं च तत् विशालं च शयनं अन्यद- (पञ्चतोऽन्यादेरनेकतरस्य दः । १ । ४ । ५८ । इ. सू. अन्यशब्दात् सेर्दः ।) पि यद्वस्तु मनोभिमतं मनसः अभिमतं मनोहारि तद्वस्तु स भगवान् इन्द्रात् अवाप प्राप । किं विशिष्टं वस्तु स्तुतिपदं स्तुतेः श्लाघाया पदं स्थानम् ॥२६॥

**नायकस्त्रिभुवनस्य न चार्थी, दायकश्च कथमस्य दिवीशः ।**
**किंतु वाहितमुवाच विवाह–प्रांतरं तनुभृतामयमेव ॥ २७ ॥**

**(व्या०)** नायक इति । त्रयाणां भुवनानां समाहारः त्रिभुवनं ( संख्या समाहारे च द्विगुश्चानाम्न्ययम् । ३ । १ । ९९ । इ. सू समाहारद्विगुः ।) तस्य नायकः ( णकतृचौ । ५ । १ । ४८ । इ. सू. नीधातोः कर्तरि णक प्रत्ययः । नामिनोऽकलिहलेः । ४ । ३ । ५१ । इ. सू. वृद्धिः । एदैतोऽयाय् । १ । २ । २३ । इ. सू. आयादेशः ।) स्वामी अर्थी याचको न स्यात् । च अन्यत् दिवीश इन्द्रः अस्य भगवतो दायको दाता कथंस्यात् । किन्तु अयं भगवान् तनुभृतां तनुं शरीरं बिभ्रतीति तनुभृतस्तेषां देहिनां विवाहप्रांतरं विवाहस्य दूरशून्यस्य प्रांतरं मार्गं एवममुना प्रकारेण वाहितमुवाच उक्तवान् ॥ २७ ॥

**वल्भनावसरपाणिगृहीती–वक्त्रसंगमितपाणिरराजत् ।
जातयत्न इव जातिविरोधं, सोमतामरसयोः स निहन्तुम् ॥ २८ ॥**

(व्या०) वल्भनावसर इति ॥ स भगवान् वल्भनावसरपाणिगृहीतीवक्त्रसंगमितपाणिः वल्भनस्य भोजनस्य अवसरे पाणिगृहीत्योः ( पाणिगृहीतीति । २ । ४ । ५२ । इ. सू. ऊढायां स्त्रियां पाणिगृहीती शब्दोऽयन्तोनिपात्यते । पाणि गृहीतो ययोस्ते पाणिगृहीत्यौ । ) पत्न्यो वक्त्रे मुखे संगमितो मेलितः पाणिर्हस्तो येन स एवंविध–सन् अराजत् शोभितः । उत्प्रेक्षते–सोमश्च तामरसं च सोमतामरसे तयोः सोमतामरसयोः चन्द्रकमलयो जातिविरोधं जात्याविरोधस्तं निहंतुं विनाशयितुं जातयत्न इव जातः यत्नो यस्य सः कृतोपक्रमइव एतावता पत्न्योः मुखं चन्द्रः प्रभोर्हस्तः कमलमितिभावः ॥ २८ ॥

**भक्ष्यमादतुरिमे पतिपाणि–स्पर्शपोषितरसं मुदिते यत् ।
तज्जनेन युवतीजनवृत्तेः, पुंस्यवस्थितिरिति प्रतिपेदे ॥ २९ ॥**

(व्या०) भक्ष्यमिति ॥ इमे सुमंगलासुनन्दे मुदिते हर्षिते सत्यौ पतिपाणिस्पर्शपोषितरसं पत्युः पाणिः हस्तस्तस्य स्पर्शेन पोषितो रसः स्वादो यस्य तत् भक्ष्यं ( भक्षयितुं योग्यं । ऋवर्णव्यञ्जनान्ताद्घ्यण् । ५ । १ । १७ । इ. सू. भक्षण् धातोर्घ्यण् । ) आदतुः भुंजाते स्म । तत् तस्मात् कारणात् जनेन लोके इति प्रतिपेदे प्रतिपन्नमादतम् । इतीतिकिं युवती ( योः कित् । ६५८ । इ. सू. युकुमिश्रणेधातो कित् अतिप्रत्ययः । धातोरिवर्णोवर्णस्ये युव् स्वरे प्रत्यये । २ । १ । ५० । इ. सू. उवादेशः । इतोऽक्त्यर्थात् । २ । ४ । ३२ । इ सू. युवतिशब्दात् स्त्रियां ङी ) जनवृत्तेः स्त्रीजनस्य वृत्तेः निर्वाहस्य पुंसि पुरुषे अवस्थितिः अवस्थानं ज्ञेयम् । स्त्रीणां पुरुषान्निर्वाह इति भाव. ॥२९॥

**पाणिना प्रभुरथ प्रणयिन्यो–र्यत्तदा किमपि भक्ष्यमभुंक्त ।
प्राभवेऽपि नृपु योषिदधीनं, भोजनं तदिति को न जगाद ॥ ३० ॥**

(व्या०) पाणिना इति । अथानंतरं प्रभुः प्रणयिन्यो पत्न्योः पाणिना हस्तेन तदा तस्मिन्नवसरे यत् किमपि भक्ष्यं अभुंक्त तत् तस्मात् कारणात् इति

को न जगाद अपि तु सर्वः कोऽपि जगाद । इतीति किं नृषु पुरुषेषु प्राभवेऽपि (प्रभोर्भावः प्राभवं । वृवर्णाल्लघ्वादे । ७ । १ । ६९ । इ. सू. प्रभुशब्दात् भावे अण् ) प्रभुत्वेऽपि सति भोजनं योषिदधीनं योषितामधीनं स्त्रीणामधीन-मायत्तं ज्ञेयम् ॥ ३० ॥

**वासवोऽथ वसनांचलमोक्षं, निर्ममे विधिवदीशवधूनाम् ।**
**विश्वरक्षणपरस्य पुरोऽस्या-ऽचेतनेष्वपि चिरं नहि बंधः ॥ ३१ ॥**

(व्या०) वासव इति । अथानंतरं वासव (वसति स्वर्गे इति वासवः । मणिवसेर्णित् । ५१६ । इ. उ सू. वस् धातोर्णित् अव प्रत्ययः । ञ्णिति । ४-३-५० । इ. सू. उपान्त्यस्य अस्य वृद्धिः) इन्द्रः ईशवधूनां ईशश्च वध्वः च ईशवध्वस्तासां विधिवत् (तस्यार्हे क्रियायां वत् । ७ । १ । ५१ । इ. सू. विधिशब्दात् अर्हेऽर्थे वत् प्रत्ययः) लोकोक्तप्रकारेण वसनांचलमोक्षं वसनयो-र्वस्त्रयो अंचले अन्तौ तयोर्मोक्षं निर्ममे कृतवान् । विश्वरक्षणपरस्य विश्वस्य जगतो रक्षणे परस्य अस्य भगवतः पुरोऽग्रे अचेतनेष्वपि बंधश्चिरं नहि स्यात् । अजीवाणारंभं इत्यागमेऽपि वचनम् ॥ ३१ ॥

**ऊढवद्विधुमुखेन्दुनिरीक्षा-मेदुरप्रमदवारिधिवीच्यः ।**
**नाकिनां हृदयरोधसि लग्ना-स्तेनिरे तुमुलमम्बरपूरम् ॥ ३२ ॥**

(व्या०) ऊढवदिति ॥ ऊढवान् परिणीतप्रभुस्तस्य मुखं वदनमेवइन्दुश्चन्द्रः तस्य निरीक्षा निरीक्षणं दर्शनं तस्मात् मेदुरा (भञ्जिभासिमिदो घुरः । ५ । २ ७४ । इ. सू. मिद्धातोः शीलादिसदर्थे घुरप्रत्यय । लघो रुपान्त्यस्य । ४ । ३ ४ । इ सू. उपान्त्यस्वरगुण ) पुष्टा ये प्रमदो हर्षः स एव वारिधिः समुद्रस्तस्य वीच्यः कल्लोलाः । नाकिनां देवानां हृदयरोधसि हृदयमेव रोधस्तटं तस्मिन् लग्ना. सत्य अम्बरपूरं अम्बरस्य पूरं आकाशपूरणसमर्थं तुमुलं कोलाहलं तेनिरे कुर्वन्ति स्म ॥ ३२ ॥

**यन्ननर्त मघवानघवाक्त्वं, नात्र शंभुभरतौ बिभृतः स्मः ।**
**तद्विवाहविधिसिद्धनिजेच्छा-भूरभूत् प्रमद एव गुरुस्तु ॥ ३३ ॥**

(व्या०) यदिति ॥ मघवा (श्वन् मातरिश्वन् मूर्धन् प्लीहन् अर्यमन् विश्वप्सन् परिज्वन् महन्नहन् मघवन्नथर्वन्निति । ९०२ । इ. उ. नू. अन् प्रत्ययान्तो मघवन्शब्दो निपात्यते मह्यते इति मघवा) इन्द्रो यत् ननर्त नृत्यं चकार । अत्र नृत्ये शंभुभरतौ शंभुश्च महादेवो महानटत्वात् भरतश्च भरतशास्त्रकर्ता अनघवाक्त्वं अनघा (उष्ट्र मुखादयः । ३ । १ । २३ । इ. सू. समासः । अन् स्वरे । ३ । २ । १२९ । इ. सू. नञः अन् । न विद्यते अघं यस्यां सा अनघा ।) निर्दूषणा या वाक् वाणी तस्या भावः अनघवाक्त्वं एतावता उपदेशकत्वं न बिभृतः स्मः । तु पुनः तद्विवाहविधिसिद्धनिजेच्छाभूः तस्य स्वामिनो विवाहस्यविधिः तस्मात् सिद्धा निष्पन्ना या निजस्य इच्छा तस्या भवतीति उत्पन्नः प्रमदो हर्षे (संमद प्रमदौ हर्षे । ५ । ३ । ३३ । इ. सू. अलन्तः प्रमदशब्दः) एव गुरुरभूत् गुरुराचार्यः प्रौढो वा । गुरुहीना नृत्यादिकलान स्यात् ॥

**नृत्यतोऽस्य करयुग्ममलासी—न्मुक्तिमेवमुपरोद्धुमिवोर्ध्वम् ।**
**नात्र नेतरि विरक्तिवयस्यां, संप्रति प्रहिणुया वरणाय ॥ ३४ ॥**

(व्या०) नृत्यतः इति ॥ अस्य इन्द्रस्य नृत्यतीति नृत्यन् तस्य सतः करयोर्हस्तयोर्युग्मं द्वन्द्वं करयुग्मं ऊर्ध्वमलासीत् ऊर्ध्वमुच्छलति स्म । मुक्तिमेवं उपरोद्धुमिव । एवमिति किम् । अत्र अस्मिन् नेतरि स्वामिनि संप्रत्यधुना विरक्तिवयस्यां विरक्तेर्वैराग्यस्य वयस्यां (हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्यधेनुष्यागार्हपत्यजन्यधर्म्यम् । ७ । १ । ११ । इ. सू. वयस्यशब्दो यान्तो निपात्यते आत् इ. सू आप् वयसा तुल्या वयस्या ।) सखीं वरणाय न प्रहिणुयाः नैव प्रेषयेः ॥ ३४ ॥

**अंगहारभरभंगुरहार स्रस्तमौक्तिकमिषामृतबिन्दून् ।**
**अप्सरः सरसगानसमाने, नर्तनेऽतत शचीप्रमदाब्धिः ॥ ३५ ॥**

(व्या०) अंगहार इति ॥ शचीप्रमदाब्धिः शच्या इन्द्राण्याः प्रमदो हर्षः स एव अब्धिः समुद्रः । अप्सरः सरसगानसमाने अप्सरसां रसेन सह वर्तते इति सरसं यत् गानं (अनट् । ५ । ३ । १२४ । इ. सू. गैधातोः भावे अनट्

गीयते इति गानं) तस्य समानं सदृशं तस्मिन् नर्तने नृत्ये सति । अंगहारभर-भंगुरहारस्रस्तमौक्तिकमिषामृतबिंदून् अंगहारस्य अंगविक्षेपस्य भरः समूहस्तेन भंगुरस्त्रुटितोयो (भञ्जिभासिमिदोधुरः । ५ । २ । ७४ । इ. सू. भञ्ज्धातो घुर भज्यते इत्येवं शीलं भङ्गुरं ।) हारस्तस्मात् स्रस्तानि यानि मौक्तिकानि तेषां मिषेण अमृतस्य बिन्दवस्तान् अतत विस्तारयति स्म ॥ ३५ ॥

**गेयसारधवलः प्रमदौघैः, क्लीबदुर्वहकरग्रहचिह्नः ।**
**सोऽभ्यगाद्गृहमथो परदेशा-द्भूमिपाल इव लब्धमहेलः ॥ ३६ ॥**

(व्या०) गेयसार इति ॥ अथो अथानन्तरं स भगवान् गृहमभ्यगात् गृहं प्रतिययौ । किंविशिष्टो भगवान् प्रमदौघैः प्रमदानां स्त्रीणां ओघाः समूहास्तैः गेयसारधवल. गेयाः (आत्सन्ध्यक्षरस्य । ४ । १ । २ । इ. सू. गैधातोरात्वं यएच्चातः । ५ । १ । २८ । इ. सू. गाधातोर्यप्रत्ययः आकारस्य एकारश्च गातुं योग्याः गेयाः ।) सारधवला यस्य सः पुनः किं० क्लीबैः षंढै-र्दुर्वहं करग्रहचिह्नं पाणिग्रहणचिह्नं यस्य स क्लीबैः कातरैर्दुर्वहं करग्रहस्य सर्वदेशदंडग्रहणस्य चिह्नं यस्य सः पुनः किं० लब्धा महती इला पृथिवी इडा स्तुतिर्वा येन सः लब्धमहेलः (पुम्वत्कर्मधारये । ३-२-५७ । इ. सू. महती-शब्दस्य पुम्वद्भावः जातीयैकार्थेऽच्वेः । ३ । २ । ७० । इ. सू. डाः सन्म-हत्परमोत्तमोत्कृष्टं पूजायाम् । ३ । १ । १०७ । इ. सू. समासः ।) डलयोरै-क्यम् ॥ भूमिं पालयतीति भूमिपालो (कर्मणोऽण् । ५ । १ । ७२ । इ. सू. भूमिपूर्वकपालधातोः अण् प्रत्ययः । ङस्युक्तं कृता । ३ । १ । ४९ । इ. सू. समासः) यथा परदेशात् अन्यदेशात् स्वगृहं अभ्येति तद्वत् ॥ ३६ ॥

**स्वामिनः पथि यतः पुरतो य-स्तूरपूरनिनदः प्रससार ।**
**स स्वमन्दिरगतासु बभारा-कृष्टिमंत्रतुलनां ललनासु ॥ ३७ ॥**

(व्या०) स्वामिन इति ॥ स्वामिनः श्रीऋषभदेवस्य पथि मार्गे यतः-गच्छतः सतो य स्तत १ वितत २ घन ३ शुषिराणां च तूराणां पूरस्यनिनदो ध्वनिः प्रससार । स तूरपूरनिनदः स्वस्य मन्दिराणि गृहाणि तानि गताः प्राप्ता-

स्तासु आत्मीयावासस्थितासु ललनासु स्त्रीषु आकृष्टिमंत्रतुलनां आकृष्टेराकर्षणस्य यो मंत्रस्तस्य तुलनां (णिवेत्यासश्रन्थघट्टवन्देरनः । ५ । ३ । १११ । इ. सू. तुलधातोः अनप्रत्ययः । आत् इ. सू. स्त्रियामाप् ।) समतां बभार । कोऽर्थ. तूरपूरनिनदेन (नेनंदगदपठस्वनक्कणः । ५ । ३ । २६ । इ. सू. निपूर्वकनदधातो. भावाकर्त्रोर्वाल् ।) स्वामिनं नवपरिणीतं सवधूकमागच्छन्तं श्रुत्वा स्त्रियः स्वव्यापारं विमुच्य गता विलोकनायेति भावः ॥ ३७ ॥

**पंक्तिमौक्तिकनिवेशनिमित्तं, स्वक्रमांगुलिकया धृतसूत्राम् ।**
**हारयष्टिमवधूयदधावे, वीरुधं करिवधूरिव काचित् ॥ ३८ ॥**

(व्या०) पंक्ति इति ॥ काचित् स्त्री हारयष्टिं अवधूय अवगणय्य दधावे धाविता । केव करिवधूरिव करिणोवधूः यथा करिवधूर्हस्तिनी वीरुधं वल्लीं अवधूय धावति । किं वि० हारयष्टिं पंक्तिमौक्तिकनिवेशनिमित्तं पंक्त्या मौक्तिकानां निवेशनं स्थापनं तन्निमित्तं स्वस्य क्रमः पादस्तस्य अंगुलिका तया आत्मीयचरणांगुलिकया धृतं सूत्रं यस्याः सा तां धृतसूत्राम् ॥ ३८ ॥

**कापि नार्धयमितश्लथनीवी, प्रक्षरन्निवसनापि ललज्जे ।**
**नायकाननिवेशितनेत्रे, जन्यलोकनिकरेऽपि समेता ॥ ३९ ॥**

(व्या०) कापि । कापि स्त्री अर्धयमितश्लथनीवीप्रक्षरन्निवसना अर्धयमिता अर्धनिबद्धा अत एव श्लथा या नीवी मेखला तस्याः प्रक्षरत् पतत् निवसनं वस्त्रं यस्याः सा अपि सती न ललज्जे न लज्जिता । लज्जाया अभावे हेतुमाह किंलक्षणा काचित् जन्यलोकनिकरे लोकानां निकरः समूहः जन्यो यो लोकनिकरस्तस्मिन् समेता आगता नायकस्य स्वामिनः आननं वदनं तस्मिन् निवेशिते नेत्रे येन स तस्मिन् ॥ ३९ ॥

**तत्समित्निशमनोच्छ्वसितान्या, कंचुकत्रुटिपटूकृतवक्षाः ।**
**यौवनोत्कटकटाक्षितकुंतैः, पाटितापिसुभटीव पुरोऽभूत् ॥ ४० ॥**

(व्या०) तदिति ॥ अन्या स्त्री यौवनोत्कटकटाक्षितकुंतैः यूनो भावो यौवनं तारुण्यं तेन उत्कटा ये तरुणपुरुषास्तेषां ये कटाक्षिता ) सङ्कटाभ्याम् ।

७ । ३ । ८६ । इ. सू. कटपूर्वक अक्षिशब्दात् अ । तदस्य संजातं) ते एव कुंता भल्लास्तैः पाटितापि विदारितापि सुभटीव पुरोऽग्रे अभूत् । किं लक्षणा अन्या तस्य भगवत. समित् (क्रुत्सम्पदादिभ्यः क्विप् । ५ । ३ । ११४ । इ. सू. संपूर्वक इण्धातो क्विप् । ह्रस्वस्य त इ. सू. तोन्त संयन्ति अत्र इति समित् ।) सभासंग्रामो वा तस्य निगमनेन निरीक्षणेन उच्छ्वसिता तत्समिन्निगमनोच्छ्वसिता । कंचुकत्रुटिपट्टकृतवक्षा कंचुकः कंचुलिका तस्य त्रुट्या त्रोटनेन पट्टकृतं वक्षो हृदयं यस्याः सा ॥ ४० ॥

**तूर्णिमूढदृगपास्य रुदन्तं, पोतमोतुमधिरोप्य कटीरे ।**
**कापि धावितवती नहि जज्ञे, हस्यमानमपि जन्यजनैः स्वम् ॥४१॥**

**(व्या०)** तूर्णि इति ॥ कापि स्त्री जन्यजनैर्लोकैः स्वं हस्यमानमपि नहि जज्ञे नहि ज्ञातवती । किं कृतवती पोतं बालं रुदन्तं अपास्य त्यक्त्वा ओतुं विडालं कटीरे (कृशपृपृमश्चिकुटिकटि–रः । ४१८ । इ. उ सू. कटेधातोः ईरः) कटीतटे अधिरोप्य धावितवती (क्तक्तवतू । ५ । १ । १७४ । इ. सू. धाव्धातोः भूते क्तवतुः । स्ताद्यशितोऽत्रोणादेरिट् । ४ । ४ । ३२ । इ सू. इट् । अधातूदृदितः । २ । ४ । २ । इ सू. धावितवत् शब्दात् स्त्रियां ङीः) कि लक्षणा स्त्री तूर्णिमूढदृक् तूर्ण्या (कावावीक्रीश्रिश्रुक्षुज्वरितूरि–णिः । ६३४ । इ. उ. सू. तूरिधातोर्णि) औत्सुक्येन मूढा दृष्टिर्यस्याः सा ॥ ४१ ॥

**कज्जलं नखशिखासु निवेश्या–लक्तमक्षणि च वीक्षणलोला ।**
**कंठिकां पदि पदांगदमुच्चैः, कंठपीठलुठितं रचयन्ती ॥ ४२ ॥**
**मज्जनात्परमसंयतकेशी, वैपरीत्यविधृतांशुकयुग्मा ।**
**काचिदागतवती ग्रहिलेव, त्रासहेतुरजनिष्ट जनानाम् ॥ ४३ ॥**
**युग्मम् ॥**

**(व्या०)** कज्जलमिति । काचित् स्त्री ग्रहिला इव आगतवती आयाता सती जनानां लोकानां त्रासहेतु त्रासस्य हेतु अजनिष्ट जाता । किं लक्षणा स्त्री वीक्षणलोला वीक्षणेलोला विलोकनचपला । किं कुर्वती कज्जलं नखशिखासु नखानां शिखास्तासु निवेश्य च पुन अलक्तं अक्षणि लोचने निवेश्य कंठिकां

कंठाभरणं पदि चरणे निवेश्य पदांगदं नूपुरं उच्चैः कंठ एव पीठं तस्मिन् लुठितं कंठपीठलुठितं रचयन्ती। पुनः किंलक्षणा स्त्री मज्जनात् स्नानात परं अनंतरं असंयतकेशी (असहनञ्विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः। २–४–३८। इ. सू. स्वाङ्गवाचिकेशशब्दात् वा डीः।) न संयताः असंयताः केशा यया सा अबद्धकुन्तला। वैपरीत्यविधृतांशुकयुग्मा परिधानवस्त्रं शीर्षे शीर्षवस्त्रं परिधाने एवं वैपरीत्येन धृतं अंशुकयोर्वस्त्रयोर्युग्मं यया सा ॥ ४२–४३ ॥ युग्मम् ॥

**यौवतेन जविना वरवीक्षा-धाविना विधुरितप्रसरान्या।**
**पत्युरिष्टमपि मन्दितचारं, स्वं निनिन्द जघनस्तनभारम् ॥ ४४ ॥**

(व्या०) यौवतेन इति ॥ अन्या स्त्री पत्युरिष्टमपि भर्तुरभीष्टमपि मन्दितचारं मन्दितः चारो गमनं येन त मन्दीकृतगमनं स्वं आत्मीयं जघनस्तनभारं जघनं च स्तनौ च एषां समाहारस्तस्य भारस्तं निनिन्द। किंलक्षणा अन्या जवोऽस्यास्तीति जवि तेन वेगवता यौवतेन (षष्ठ्याः समूहे। ६। २। ९। इ. सू. युवतिशब्दात् समूहेऽर्थे अण्। वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते। ७। ४। १। इ. सू. आदिस्वरवृद्धिः।) युवतीनां समूहस्तेन विधुरितः प्रसरो यस्याः सामन्दीकृतत्वरितगमना। किंलक्षणेन यौवतेन वरस्य वीक्षा प्रेक्षणं तदर्थं धावतीति तेन ॥ ४४ ॥

**निर्निमेषनयनां नखचर्या–ऽस्पृष्टभूमिमपरामिह दृष्ट्वा।**
**को नु देव्यजनि पश्यत देव–ध्यानतोद्रुतमसाविति नोचे ॥ ४५ ॥**

**(व्या०)** निर्निमेषनयनामिति। इह समुदाये अपरां स्त्रियं निर्निमेषनयनां निर्निमेषे नयने यस्याः सा तां निमेषरहितलोचनां नखानां चर्यया (समजनिपन्निषद् शीङ्सुग्विदिचरिमनी णः। ५। ३। ९९। इ. सू. चर्धातोर्भावे क्यप् चरणं चर्या।) अस्पृष्टा भूमिर्यया सा तां दृष्ट्वा कः पुमान् इति न ऊचे। इतीति किं भो भो जना पश्यत असौ स्त्री नु इति वितर्के देवस्य प्रभोर्ध्यानात् इति देवध्यानतः द्रुतं शीघ्रं देवी अजनि। यतो देवतापि निर्निमेषनयना अस्पृष्टभूमिश्चस्यात्। 'चतुरंगुलेण भूमिं न छिवंति सुरा जिणाबिंति' इति वचनात् ॥

**प्रागपि प्रभुरभूद्रमणीयः, काधिकास्यविदधे विबुधैः श्रीः**
**यत्त एव परियंत्यमुमन्या, तद्दिदृक्षुरितिसेर्ष्यमुवाच ॥ ४६ ॥**

(व्या०) प्रागिति । अन्या स्त्री तस्य स्वामिनो द्रष्टु मिच्छुः दिदृक्षु (सन् भिक्षाशंसेरुः । ५ । २ । ३३ । इ. सू. सन्नन्तात् दिदृक्षधातोः प्रत्ययः) तं भगवन्तं द्रष्टु मिच्छु सती इति अमुना प्रकारेण सेर्ष्यं ईर्ष्या सहितं यथा भवति तथा उवाच । इतीति किं प्रभुः स्वामी प्रागपि अग्रेऽपि रमणीयोऽभूत् । (प्रवचनीयादय । ५ । १ । ८ । इ. सू रम्धातो कर्तरि अनीयः ।) विबुधैर्देवैरस्य भगवत. का अधिका श्री शोभा कृता । यत् यस्मात् कारणात् ते एव देवा एवं अमुं भगवन्तं परियंति परिवृण्वन्ति ॥ ४६ ॥

**मुञ्च वर्त्मसखि पृष्ठगतापि, त्वं निभालयसि नाथमकृच्छ्रम् ।**
**इत्युपात्तचटुवाक् पुरतोऽभूत्, कापिखर्ववपुरुच्चतरांग्याः ॥ ४७ ॥**

(व्या०) मुञ्च इति । कापि खर्व ह्रस्वं वपु शरीरं यस्याः सा वामनशरीरा स्त्री । उच्चतरं अंगं यस्या सा तस्या उच्चैस्तराङ्ग्याः) नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात् । २ । ४ । ३९ । इ. सू. अङ्गशब्दात् स्त्रियां ङीः) स्त्रियाः इति अमुना प्रकारेण उपात्तचटुवाक् उपात्ता गृहीता चाटुवाक् यया सा गृहीतचाटुवचनासती पुरतोऽग्रेअभूत् इतीति किं हे सखि त्वं वर्त्म मार्गं मुञ्च । त्वं पृष्ठंगता पृष्ठगतापि पृष्ठस्थितापि सती नाथं स्वामिनं अकृच्छ्रं सुखेन निभालयसि विलोकयसि ॥ ४७ ॥

**एवमद्भुतरसोंभितनारी-नेत्रनीलनलिनांचितकायः ।**
**तासु कांचनमुदं प्रददानः, स्वालयाग्रमगमज्जगदीशः ॥ ४८ ॥**

(व्या०) एवमिति । जगदीशः जगतामीशो जगन्नाथः स्वालयाग्रं स्वस्य आलयस्य अग्रं स्वीयावासद्वारं अगमत् । किंलक्षणो जगदीशः एवं पूर्वोक्त प्रकारेण अद्भुतरसोंभितनारीनेत्रनीलनलिनांचितकायः अद्भुतश्चासौ रसश्च तेन उंभिताः पूरिता ताश्चताः नार्यश्च तासां नारीणां नेत्राणि नीलानि नलिनानि कमलानि तैः कमलैः अंचितः पूजितः कायो देहो यस्य सः । तासु नारीषु कांचन अपूर्वां

मुदं हर्षं प्रदत्ते इति प्रददानः पक्षे कांचनं सुवर्णं प्रभुपूजायाः फलं देवचर्णेण रज्जं इति वचनात् ॥ ४८ ॥

**हस्तिनो हसितमेरुमहिम्नो, गांगपूरवदथावतरन्तम् ।**
**वासवः शमितपातकतापं, तं दधौ द्युगतमेव बलोग्रः ॥ ४९ ॥**

(व्या०) हस्तिन इति । अथानन्तरं वासव इन्द्रः तं भगवन्तं हस्तिन ऐरावणात् अवतरतीति अवतरन् तं द्युगततेव दिवंगतः तं आकाशस्थमेव दधौ धृतवान् । किं वि० इन्द्र. बलेन उग्रः बलोग्रः उत्कटः । अथवा उग्रः ईश्वरः । यथा उग्र ईश्वरः मेरो मेरुपर्वतात् अवतरन्तं गांगपूरं (गङ्गायाः इदं गाङ्गं तस्येदम् । ६ । ३ । १६० । इ. सू. गङ्गाशब्दात् इदमर्थे अण् । स्यादेरिवे ७ । १ । ५२ । इ. सू. गाङ्गपूरशब्दात् सादृश्येऽर्थे वत् गाङ्गपूरमिव गाङ्ग-पूरवत् ।) गंगायाः पूरं द्युगतमेव दधौ । किंविशिष्टात् हस्तिनः हसितः मेरो-र्महिमा येन स तस्मात् हसितमेरुमहिम्नः कीदृशं भगवन्तं शमितः पातकानां तापो येन तं शमितपातकतापम् ॥ ४९ ॥

**हेमकान्ति हरिणा हरिणाक्षी–यामलं पुनरदीयत शच्यै ।**
**पाणिभूषणतया क्षणमस्या–स्तत् सुवृत्तमभजद्वलयाभाम् ॥ ५० ॥**

(व्या०) हेमकान्ति ॥ हरिणा इन्द्रेण हेम सुवर्णं तद्वत् कान्तिर्यस्य तत् हेमकान्ति हरिणाक्षीयुगलं हरिणस्य मृगस्य अक्षिणी एव अक्षिणी ययोस्ते हरिणाक्ष्यौ (उष्ट्रमुखादयः । ३ । १ । २३ । इ. सू. व्यधिकरणबहुव्रीहिः । सक्थ्यक्ष्णः स्वाङ्गे । ७–३–१२६ । इ. सू. ट समासान्तः । अणञेयेकण्–म् २ । ४ । २० । इ. सू. स्त्रियां ङीः ।) तयोर्यामलं युगलं तत् हरिणाक्षीयामलं वधूयुगलं पुनः शच्यै इन्द्राण्यै अदीयत दत्तम् । तत् हरिणाक्षीयामलं क्षणं अस्याः शच्याः पाण्योर्भूषणता तया हस्ताभरणत्वेन वलययोराभां वलयाभां कंकणशोभा-मभजत् किंल॰णं हरिणाक्षीयामलं सुवृत्त शोभनंवृत्तं चरित्रं यस्य तत् सुष्ठु वृत्तं वृत्ताकारम् ॥ ५० ॥

**असंदेशमनयन्नयशाली, तं हरिः स्वमथ शच्यपि वध्वौ ।**
**शक्तिमत्त्वमखिलापघनेभ्यो, विश्रुतं किमुपरीक्षितुमस्य ॥ ५१ ॥**

(व्या०) अंसदेशमिति । अथानंतरं नयशाली नयेन शाजते इति नयशाली हरिरिन्द्रस्तं भगवन्तं स्वमात्मीयं अंसस्य देशस्तं स्कंधप्रदेशं अनयत् । शच्यपि इन्द्राणी अपि वध्वौ सुमंगलासुनन्दे स्वं असदेशमनयत् । किंकर्तुं अस्य अंसदेशस्य अखिलाधने अपघनाश्च (निघोद्घसङ्घोद्घनाऽपघनोपघ्नं निमित्त प्रशस्तगणाऽत्याधाङ्गाऽऽसन्नम् । ५ । ३ । ३६ । इ. सू. अपपूर्वक हन्धातो· अपघननिपातः) तेभ्यः समस्तावयवेभ्यो विश्रुतं दिख्यातं शक्तिरस्यास्तीति-शक्तिमत् तस्य भावः शक्तिमत्वं शक्तियुक्ततां किमु परीक्षितुम् ॥ ५१ ॥

**विश्वविश्वविभुना परिणद्धै-कांसभूरपि विभुः स ऋभूणाम् ।**
**संगतांसयुगलामबलाभ्यां, न स्वतः प्रणयिनीं बहु मेने ॥ ५२ ॥**

(व्या०) विश्व इति । ऋभूणां देवाना विभु स्वामी स इन्द्र· विश्वविश्वविभुना विश्वं च तत् विश्वं च तस्य विभु स्वामी तेन समग्रविश्वाधिपेन परिणद्धैकांसभूरपि परिणद्धा व्याप्ता एकस्यांसस्य भूः स्थानं यस्य स सन् उभाभ्यां सुमंगलासुनन्दाभ्यां अबलाभ्यां संगतांसयुगलां संगतं मिलितं अंसयोर्युगलं यस्याः सा तां मिलितस्कंधयुगलां अपि प्रणयिनीं इन्द्राणीं स्वत आत्मनो न बहु मेने । कोऽर्थः इन्द्रेण भगवान् एकस्मिन् स्कंधे आरोपितः इन्द्राण्या उभयो· स्कंधयोर्वधूयुग्ममारोपितम् । तेनात्मानं न्यूनत्वेन न मेने । भगवानेकोऽपि गुरु वध्वौ तु अबले इति भाव ॥ ५२ ॥

**तत्र तौ प्रमदनिर्मितनृत्यौ, तंच तेच परितोषयतः स्म ।**
**क्ष्मां तदङ्घ्रिकमलस्पृहयालुं, प्रक्षरत्सुमचयैः सुखयन्तौ ॥ ५३ ॥**

(व्या०) तत्र इति । तत्र तस्मिन्नवसरे तौ शचीन्द्रौ प्रमदनिर्मितनृत्यौ प्रमदेन हर्षेण निर्मितं नृत्यं (ऋदुपान्त्यादकृपिचृदच· । ५ । १ । ४१ । इ सू नृत्धातो· क्यप् ।) याभ्यां तौ तं च भगवन्तं ते च वध्वौ परितोषयत स्म· । किंकुर्वन्तौ तौ शचीन्द्रौ तदङ्घ्रिकमलस्पृहयालुं तस्य भगवतः अंह्री चरणौ एव कमले तयो· स्पृहयालु (शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालु । ५ । २ । ३७ । इ. सू. स्पृहिधातोरालु ।) स्पृहणशीलां क्ष्मां पृथ्वीं प्रक्षरन्तश्च ते सुमानां पुष्पाणां चयाश्चतैः पतद्भि· पुष्पसमूहै सुखयन्तौ सुखं कुर्वन्तौ ॥ ५३ ॥

**अप्सरोभिरिति कौतुकगाने, ऽप्यस्य न स्मरवशत्वमभाणि ।**
**मास्म लज्जिततरस्तरुणीना-मिष्टमेष कषदेकभटस्तम् ॥ ५४ ॥**

(व्या०) अप्सरोभिरिति । अप्सरोभिर्देवांगनाभिः (आप्यन्ते पुण्यैरिति-अप्सरस आपोऽपाप्साप्सराव्जाश्च । ९६४ । इ. उ. सू. आप्लृट् व्याप्तौ इति धातोः असू प्रत्ययः आप्धातो अप्सर् आदेशः ।)इत्यस्मात्कारणात् कौतुकेन गानं तस्मिन् कौतुकगाने कौतुकेनगीतगानमध्येऽपि अस्य भगवतः स्मरवशत्वं स्मरस्य कामस्य वशत्वमधीनत्वं न अभाणि न भणितम् । इतीति किं एकश्चासौ भटश्च एकभटः एष भगवान् लज्जिततरः लज्जितः सन् तरुणीनां स्त्रीणां इष्टं तं स्मरं कंदर्प्पं मा स्म कषत् (सस्मे ह्यस्तनी च । ५ । ४ । ४० । इ. सू. स्मयुक्ते माङि उपपदे कषूधातोः ह्यस्तनी । अड्धातोरादिर्ह्यस्तन्यां च माङा । ४ । ४ । २९ । इ. सू. माङ्योगे अडभाव ) मास्म हिंसीत् ॥ ५४ ॥

**नेत्रमंडलगलज्जलधारा-धिष्ण्यबंधुरिमधूर्वहदेहः ।**
**तं शतक्रतुरथोकृतकृत्यः, स्वर्यियासुरभिवन्द्य जगाद ॥ ५५ ॥**

(व्या०) नेत्र इति । अथो अथानंतरं शतं क्रतवो यस्य स शतक्रतुः इन्द्र कृतानि कृत्यानि येन स कृतकृत्यः निष्पादितसर्वकार्यः सन् स्वर्यियासुः) (सन् भिक्षासंशेरु । ५-२-३३ । इ. सू. सन्नन्तात् यियासूधातोः उप्रत्ययः।) स्वः स्वर्ग यातुमिच्छु स्वर्गगमनेच्छुः तं भगवन्तमभिवंद्य जगाद स्थाने मुक्त्वा इत्यूचिवान् । किंलक्षण इन्द्र नेत्रयोर्मंडलं तस्मात् गलत् यत् जलं तस्य धारायाः धिष्ण्यं (धृष्णुवन्ति अस्मिन् धिष्ण्यं । शिक्या स्याद्या । ३६४ । इ उ. सू. यप्रत्ययान्तोनिपातः) गृहं धारागृह तस्य बंधुरिमा मनोज्ञत्वं तस्य धूर्वहो भारवाहो देह शरीर यस्य स नेत्रमंडलगलज्जलधाराधिष्ण्यबंधुरिमधूर्वहदेहः ॥ ५५ ॥

**रूपसिद्धिमपिवर्णयितुं ते, लक्षणाकर न वाक्पतिरीशः ।**
**यच्चतुष्ककलनापि दुरापा, तद्धितप्रकरणं मनुते कः ॥ ५६ ॥**

(व्या०) रूपसिद्धि मिति । हे लक्षणाकर भृंगारचामरयुगध्वजयुग्मशंख मंजीर नीरधिसरित् पुष्करिण्य इत्याद्यष्टोत्तरसहस्रलक्षणानामाकरो यः पक्षे लक्षणानां

व्याकरणानां आकरस्तस्य संबोधनं । वाग्पतिः बृहस्पतिः ते तव रूपसिद्धिमपि रूपं शरीरस्य तस्य सिद्धिः पक्षेरूपसिद्धिः शब्दसिद्धिस्तामपि वर्णयितुं न ईश. न समर्थः । यच्चतुष्ककलनापि यस्य भगवतः चतुष्कात्रसरः समवसर तस्य कलनापि दुरापा दु खेन आप्यते इति दुरापा (दुःस्वीपतः कृच्छ्राकृच्छ्रार्थात खल् ५ । ३ । १३९ । इ. सू. दु पूर्वकआपधातो' खल् । आत् इ. सू. आप् ।) दुष्प्राया वर्तते । तद्धितप्रकरणं तस्य भगवतो हितप्रकरणं तदा को मनुते जानाति अपि न कोऽपि यस्य चतुष्के सभायामपि गन्तुं न शक्यते तस्य हितप्रकरणं हितचिन्ता कथं क्रियते । द्वितीयेऽर्थे तस्य लक्षणाकरस्य तद्धितप्रकरणं तद्धित-वृत्तिं को मनुते यस्य चतुष्कस्य आद्यवृत्ते. कलनापि दुरापा दुष्प्राया अस्तीति ॥

**यन्महः समुपजीव्य जडोऽपि, स्यात् कलाभृदिति विश्रुतिपात्रम् ।**
**यन्नये विनयनं तव तस्य, द्योतनं द्युतिपतेस्तदधीश ॥ ५७ ॥**

(व्या०) यन्महः इति । हे नाथ यस्य तव मह' यन्महस्तत् समुपजीव्य जडोऽपि मूर्खोऽपि कलाभृत् कला बिभर्तीति विश्रुतिपात्रं विश्रुतेः पात्रं (नीदाम्ब्-शसूयुयुजस्तुतुदसिसिचमिहपतपानहस्त्रट् । ५ । २ । ८८ । इ. सू पाधातो त्रट् पिबन्ति अनेनेति पात्रम् ।) स्थानं कलावान् इति विश्रुतिपात्रं ख्यातिस्थानं स्यात् । पक्षे यन्मह' यस्य द्युतिपते' सूर्यस्य महस्तेजः समुपजीव्य जडोऽपि चन्द्र' कलाभृत् स्यात् । अमावास्यायां सूर्याचन्द्रमसौ संगतौ स्याताम् । ततश्चन्द्र' सूर्यात्तेजः प्राप्य प्रतिपदि गोभिर्विलोक्यः स्यात् द्वितीयायां मानुषै' । एवं कला-धर इति प्रसिद्धः स्यात् तस्य तव नये न्यायविषये यद् विनयनं शिक्षणं हे अधीश तत् द्युतिपतेः सूर्यस्य द्योतनं प्रकाशन वर्तते ॥ ५७ ॥

**वच्मि किंचन पुनः प्रभुभक्त्या, ये इमे ऋजुमती कुलकन्ये ।**
**आदृते भगवता सुविनीते, प्रेम जातु न तयोः श्लथनीयम् ॥ ५८ ॥**

(व्या०) वच्मि इति । हे नाथ अहं पुन' किंचन प्रभोर्भक्तिस्तया प्रभु-भक्त्या वच्मि वदामि । ये इमे ऋजुमती विचक्षणे सुविनीते कुलकन्ये सुमंगला-सुनन्दे भगवता (तदस्यास्त्यस्मिन्निति मतु' । ७-२-१ । इ. सू. भगशब्दात

मतुः । मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मो वः । २ । १ । ९४ । इ. सू. मतोर्मस्य वः भगमैश्वर्यमस्यास्तीति भगवान् ।) आदते स्तः । अतोहेतोस्तयोः कन्ययोरुपरि प्रेम स्नेहो जातु कदाचिदपि नश्लथनीयं (तव्यानीयौ । ५–१–२७ इ. सू. श्लथ्धातोः अनीय ।) न न्यूनं कार्यं भवतेति शेषः ॥ ५८ ॥

**यः परोऽपि विभुमाश्रयतेऽसौ, तस्य पुण्यमनसः खलु पाल्यः ।**
**किं पुनः कुलवधूरवधूय, प्रेम पैतृकमुपान्तमुपेता ॥ ५९ ॥**

(व्या०) य इति । हे नाथ यः परोऽपि अन्योऽपि विभुं स्वामिनं आश्रयते । खलु निश्चितं असौ पुमान् पुण्यं मनो यस्य सः पुण्यमना तस्य विभोः स्वामिनः पाल्यः रक्षणीयः स्यादिति । किंपुनः कुलवधूः कुलवधूनां किमुच्यते । या कुलवधूः पैतृकं पितुरिदं तत् पितृसंबंधि प्रेम स्नेहमवधूय त्यक्त्वा उपांतं स्वामिसमीपं उपेता समेता ॥ ५९ ॥

**ये द्विषत्सु सहना इह गेहे–नर्दिनः प्रणयिनीं प्रति चंडाः ।**
**ते भवन्तु पुरुषाश्चरितार्थाः, श्मश्रुणैव न तु पौरुषभंग्या ॥ ६० ॥**

(व्या०) ये इति । हे नाथ ये पुरुषाः इह जगति द्विषत्सु वैरिषु सहन्ते इति सहना क्षमापरा वर्तन्ते । किंलक्षणा ये गेहे नर्दन्तीति गेहेनर्दिनः पात्रेसमितेत्यादयः । ३ । १ । ९१ । इ. सू. सप्तम्या अलुक्) गेहे शूराः । पुनः किंलक्षणाः प्रणयिनीं कलत्रं प्रति चंडारौद्रा सन्तीति शेषः । ते पुरुषाः श्मश्रुणैव (श्मनि मुखैकदेशे शेते इति श्मश्रु । श्मनः शीङोडित् । ८१० । इ. उ सू. श्मन्पूर्वकशीङ्धातोः डुप्रत्ययः) कूर्चेनैव चरितोऽर्थो येषां ते चरितार्थाः सत्यार्था भवन्तु सन्तु न तु पौरुषभंग्या पुरुषस्येदं कर्म पौरुषं तस्य भंगिः व्युत्पत्तिस्तया न तु पराक्रमव्युत्पत्त्या । उक्तं च–'पात्रे त्यागी गुणेरागी, भोगी परिजनैः सह । शास्त्रे बोद्धा रणे योद्धा, पुरुषः पञ्चलक्षणः ॥ १ ॥ इति पुरुषलक्षणहीनत्वात्तेषाम् ॥ ६० ॥

**अन्तरेण पुरुषं नहि नारी, तां विना न पुरुषोऽपि विभाति ।**
**पादपेन रुचिमञ्चति शाखा, शाखयैव सकलः किल सोऽपि ॥ ६१ ॥**

(व्या०) अन्तरेणेति । हे नाथ नारी स्त्री पुरुषं (गौणात् समयानिकषाहाधिगन्तरान्तरेणातियेनतेनैर्द्वितीया । २-२-३३ । इ. सू अन्तरेण योगे पुरुषमित्यत्रद्वितीयाः । ) अन्तरेण विना न विभाति न शोभते । पुरुषोऽपि तां नारीं विना (विना ते च तृतीया । २-२-११५ । इ. सू. विनायोगे नारीमित्यत्रद्वितीया ।) न विभाति न शोभते अत्र दृष्टान्तमाह शाखा पादपेन वृक्षेण रुचिं शोभां अञ्चति प्राप्नोति । सोऽपि पादपोऽपि पादपो वृक्षः शाखयैव सकल. संपूर्णो वर्तते संपूर्णशोभां प्राप्नोति ॥ ६१ ॥

**मुक्तिरिच्छति यदुज्झितदारं, स्त्री स्त्रियं नहि सहेत स हेतुः ।**
**कामयन्त इतरे तु महेला-युक्तमेव पुरुषं पुरुषार्थाः ॥ ६२ ॥**

(व्या०) मुक्तिरिति । मुक्तिर्मोक्षरूप पदार्थः यत् यस्मात्कारणात् उज्झिताः दारा येन स तमुज्झितदार त्यक्तकलत्रं 'दाराः पुंसि च भूम्नि च' इत्यमरः । इच्छति । स हेतुरयं ज्ञेय स्त्री नारी स्त्रियमन्यां नारीं नहि सहेत । इतरे धर्मार्थकामा पुरुषार्था. . महेलयायुक्तस्तं महेलायुक्तमेव स्त्रीसहितमेव पुरुषं कामयन्ते इच्छन्ति ॥ ६२ ॥

**योषितां रतिरलं न दुकूले, नापि हेम्नि न च सन्मणिजाले ।**
**अन्तरंग इह यः पतिरंगः, सोऽदसीयहृदि निश्चलकोशः ॥ ६३ ॥**

(व्या०) योषितामिति ॥ हे नाथ योषितां स्त्रीणां अलं अत्यर्थं दुकूले पट्टकूले न रति । नापि हेम्नि सुवर्णे च पुन सन्मणिजाले सन्तश्चते मणयश्च सन्मणयस्तेषां जालं तस्मिन् प्रशस्यमणिसमूहे न रतिः । इह जगति अन्तरंगो यः पतिरंग पत्युः रंग स पतिरंग अदसीयहृदि अमूषां (तस्येदम् । ६ । ३ । १६० । इ. सू. इदमर्थे दोरीय । ६ । ३ । ३२ । इ. सू ईय ।) इदं हृदयं तस्मिन् निश्चलकोशो भांडागारः ॥ ६३ ॥

**स्पष्टनैकगुणमुज्झति नैका-दीनवाज्जनमदीनमनस्कः ।**
**चंचलापि किमनल्पगुणाढ्या, धीयते न कुलमूर्ध्नि पताका ॥ ६४ ॥**

(व्या०) स्पष्ट इति । हे नाथ न दीनं अदीनं मनो यस्य स अदीनमनस्कः उदारहृदयः एकादीनवात् एकश्चासौ आदीनवश्च दोष तस्मात् एक-

दोषात् स्पष्टनैकगुणं स्पष्टाः प्रकटाः नैके अनेके गुणा यस्य तं प्रकटानेकगुणं जनं न उज्झति न त्यजति । अनल्पगुणाढ्या न अल्पाः अनल्पा बहव ते च ते गुणाश्च विनयादिगुणा. तन्तवो वा तैराढ्या समृद्धा चंचलापि पताका कुल-मूर्ध्नि कुलमावास गोत्रं वा तस्य मूर्ध्नि मस्तके न धीयते किं अपितु धीयते ॥६४॥

**मौग्ध्यहेतु रनयोरनयोऽपि, स्वामिना समुचितो ननु सोढुम् ।**
**कारिकासु सिकताधिकतायाः, किं प्रकुप्यति नदीषु नदीशः ॥६५॥**

(व्या०) मौग्ध्य इति ॥ हे नाथ अनयोर्वध्वोः अनयोऽपि अन्यायोऽपि स्वामिनो ननु निश्चितं सोढुं समुचितो योग्य । किं विशिष्टोऽनयः मौग्ध्यहेतुः मुग्धस्य भावो मौग्ध्यं मुग्धत्वं तदेव हेतु कारणं यस्य स । नदीनां ईशः नदीश समुद्र कि नदीषु प्रकुप्यति कोपं कुरुते अपि तु नैव । किं लक्षणासु नदीषु सिकतानां वालुकानां अधिकता आधिक्यं तस्याः कारिकासु (णकतृचौ । ५ । १ । ४८ । इ. सू. कृधातो कर्तरिणकः आत् इ सू आप् । अस्याय-त्तत्क्षिपकादीनाम् । २ । ४ । १११ । इ. सू, अस्य इकार ) कुर्वन्तीति-कारिकास्तासु कुर्वाणासु ॥ ६५ ॥

**मन्तुमन्तमपि भावविशुद्धं, शुद्धमेव गणयन्ति गुणज्ञाः ।**
**मान्य एव शुचिरन्तरिहेभ्य-स्त्रैणकंठरसिकोऽपि हि हारः ॥ ६६ ॥**

(व्या०) मन्तुमन्तमिति । हे नाथ गुणज्ञाः (आतोडोऽह्वावाम । ५ । १ । ७७ । इ. सू. गुणपूर्वकज्ञाधातोर्डे प्रत्यय । डित्यन्त्य इ. सू. अन्त्य-स्वरलोप ।) गुणान् जानन्ति इति गुणज्ञा पुरुषा मन्तुमन्तमपि मन्तुरपरा-धोऽस्यास्तीति (कृसिकम्यमिगमितनिमानिजन्यसिमसि–तुन् । ७७३ । इ. उ. सू. मन्धातो तुन् प्रत्यय. ।) मन्तुमान् तं अपराधिनमपि पुरुषं भावेन विशुद्धः भावविशुद्धस्तं शुद्धमेव गणयन्ति । इहैव दृष्टान्त हि निश्चितं इभ्यस्त्रैणकंठ-रसिकोऽपि स्त्रीणां समूह स्त्रैणं (षष्ठ्याः समूहे । ६ । २ । ९ । इ. सू. समूहेऽर्थे स्त्रीशब्दात् । प्राग्वतः स्त्रीपुंसान्नञ् स्नञ् । ६ । १ । २५ । इ. सू. नञ् प्रत्ययः ।) इभ्या धनवन्तः तेषां स्त्रैण स्त्रीसमूह तस्य कंठे रसिकोऽपि कंठासक्तोऽपि हार. अन्तर्मध्ये शुचि सन् मान्य एव ॥ ६६ ॥

**त्वं परां नृषु यथांचसि कोटिं, स्त्रीष्विमे अपि तथा प्रथिते तत् ।**
**प्रेम्णि वीक्ष्य घनतां जनता वः, स्थैर्यमावहतु दंपतिधर्मे ॥ ६७ ॥**

(व्या०) त्वमिति। हे नाथ त्वं नृषु पुरुषेषु यथा परां कोटीं अग्रविभागं अञ्चसि प्राप्नोषि । तथा इमे अपि सुमंगलासुनन्दे स्त्रीषु प्रथिते विख्याते तत् तस्मात् कारणात् जनता ( ग्रामजनबन्धुगजसहायात्तल् । ६ । २ । २८ । इ. सू. जनशब्दात् समूहेऽर्थे तल् । ) जनानां समूहो वो युष्माकं प्रेम्णि स्नेहे घनतां दृढतां वीक्ष्य दम्पतिधर्मे जाया च पतिश्च दंपती (राजदन्तादिषु । ३ । १ । १४९ । इ. सू. दम्पतीशब्दो निपात्यते) तयोर्धर्मस्तस्मिन् स्थैर्यं स्थिरत्वमावहतु ॥ ६७ ॥

**प्राप्तकालमिति वाक्यमुदित्वा, मोदभाजि विरते सुरराजे ।**
**आलपत् कुलवधूसमयज्ञा शच्यपि प्रथमनाथनवोढे ॥ ६८ ॥**

(व्या०) प्राप्तकालमिति। कुलवधूसमयज्ञा कुलवधूनां समया आचारास्तान् जानातीति शच्यपि इन्द्राणी अपि प्रथमनाथनवोढे प्रथमश्चासौ नाथश्च प्रथमनाथः श्रीआदिदेवः तस्य नवोढे कलत्रे ते सुमंगलासुनन्दे अलपत् उवाच । क सति प्राप्तकालं प्राप्तावसरं इति पूर्वोक्तं वाक्यं उदित्वा कथयित्वा मोदभाजि मोदं हर्षं भजतीति तस्मिन् सुरराजे सुराणां देवानां राजा सुरराजस्तस्मिन् इन्द्रे विरते निवृत्ते सति ॥ ६८ ॥

**यस्य दास्यमपि दुर्लभमन्यै-स्तत्प्रिये बत युवां यदभूतम् ।**
**भाग्यमेतदलमत्र भवत्योः, कः प्रवक्तुमलमत्रभवत्योः ॥ ६९ ॥**

(व्या०) यस्येति। हे कुलीने यस्य भगवतो दास्यमपि अन्यैर्दुर्लभं दुःखेन लभ्यते इति दुर्लभं वर्तते । बत इति वितर्के यत् यस्मात् युवां तत्प्रिये तस्य स्वामिनः प्रिये तत्प्रिये दयिते अभूतं जाते । एतत् अलं अत्यर्थं अत्रभवत्योः पूज्ययो र्भवत्योर्युवयोर्भाग्यमत्र जगति कः पुमान् प्रवक्तुं हर्षेण जल्पितुं अलं समर्थो भवेत् अपितु न कोऽपि ॥ ६९ ॥

**देवदेवहृदि ये निविशेथे, ते युवां न भवथोऽन्यविनेये ।**
**स्वान्तमेव मम धृष्टधुरीणं, यच्छिशिक्षयिषु वामपि कामम् ॥ ७० ॥**

(व्या०) देवदेव इति । हेसुमंगलासुनन्दे युवां ये देवदेवहृदि देवानां देवस्य हृदयं तस्मिन् श्रीयुगादीशस्य हृदि निविशेथे वसथः । ते युवां अन्यविनेये अन्यस्य विनेये अन्यशिक्षणीये न भवथ. । मम स्वान्तमेव चित्तं धृष्टेषु धुरीणं धृष्टधुरीणं वर्तते । यत् स्वान्तं (क्षुब्धविरिब्धस्वान्तलग्न–मौ । ४ । ४ । ७० । इ. सू. स्वान्तं निपात्यते ।) वामपि युवां द्वेअपि कामं अत्यर्थं शिक्षयितुमिच्छुर्शिशिक्षयिषु वर्तते ॥ ७० ॥

**श्रोत्रयोर्गुरुगिरां श्रुतिरास्ये, सूनृतं हृदि पुनः पतिभक्तिः ।**
**दानमर्थिषु करे रमणीना–मेष भूषणविधिर्विधिदत्तः ॥ ७१ ॥**

(व्या०) श्रोत्रयोरिति । रमणीनां (रम्यादिभ्यः कर्तरि । ५–३–१२६ इ. सू. रम्धातोः कर्तरि अनट् टीत्वात् ङीः ।) स्त्रीणां एष भूषणविधिः भूषणानां विधिः विधिदत्तो वर्तते । विधिना विधात्रा दत्तो विधिदत्तः । (दत् । ४ । ४ । १० । इ. सू. तादौ किति दासज्ञ कस्य दत् आदेश) एष कः श्रोत्रयोः (हुयामाश्रुवसिभसिगुविपचि–त्रः । ४५१ । इ. उ. सू. श्रुधातोः त्रप्रत्ययः । श्रूयते अनेनेति श्रोत्रम् ।) कर्णयोः गुरूणां गिरः तासां गुरुसत्कवाणीनां श्रुतिः श्रवणम् । आस्ये मुखे सूनृतं ( सुष्ठु नृत्यति सतामनोऽनेनेति सूनृतं स्थादिभ्यः कः । ५ । ३ । ८२ । इ. सू. सुपूर्वकनृत्धातोः कः । घञ्युपसर्गस्य । ३ । २ ८६ । इ सू. अघञि अपि सु उपसर्गस्य दीर्धता) सत्यं वचः पुनर्हृदि मनसि पतिभक्तिः पत्युः स्वामिनोभक्तिः करे हस्ते अर्थिषु याचकेषु दानम् ॥ ७१ ॥

**सुभ्रुवां सहजसिद्धमपास्यं, चापलं प्रसवसद्म विपत्तेः ।**
**येन कूलकठिनाश्मनिपाता–द्वीचयोऽम्बुधिभुवोऽपि विशीर्णाः ॥७२॥**

(व्या०) सुभ्रुवा इति । सुभ्रुवां शोभने भ्रुवौ यासां तास्तासां स्त्रीणां चपलस्य भावश्चापलं चपलत्वं सहजसिद्धं स्वभावसिद्धं त्यक्तुं योग्यं त्याज्यं त्यजनयोग्यं वर्तते । किंलक्षणं चापलं विपत्ते विनाशस्य प्रसवस्य जन्मनः सद्म गृहं जन्मस्थानमस्तीतिशेषः । येन चापलेन कूलकठिनाश्मनिपातात् कूले तटे तस्मिन् ये कठिनाश्चते अश्मानश्च पाषाणाः तेषु निपातः पतनं तस्मात् पतनात् अम्बुधि–

भुवोऽपि अम्बूनि धीयन्ते अस्मिन्निति अम्बुधि समुद्र तस्मात् भवन्तीति समुद्रजाता अपि वीचय कल्लोला विशीर्णा भग्ना ॥ ७२ ॥

**चापलेऽपि कूलमूर्ध्नि पताका, तिष्ठतीतिहृदि मास्म निधत्तम् ।**
**आप सापि वसतिं जनबाह्यां, दंडसंघटनया दृढबद्धा ॥ ७३ ॥**

(व्या०) चापल इति । हे कुलीने युवा हृदि हृदये इति मास्म निधत्तं चित्ते इति न चिन्तनीयम् । इतीति किं पताका चापलेऽपि चपलत्वेऽपि सति कुलं गृहं गोत्रं वा तस्य मूर्ध्नि मस्तके तिष्ठति । सापि पताकापि दंडसंघटनया दंडस्य संघटना तया दृढबद्धासती जनेभ्यो बाह्यां तां वसतिं ( वसन्ति अस्यामिति वसति । खल्यमिरमि वहिवस्यर्तेरति' । ६५३ । इ सू वस्धातो अतिप्रत्यय ।) वासं प्राप ॥ ७३ ॥

**अस्ति संवननमात्मवशं चे-दौचितीपरिचिता पतिभक्तिः ।**
**मूलमंत्रमणिभिर्मृगनेत्रा-स्तद् भ्रमन्ति किमु विभ्रमभाजः ॥ ७४ ॥**

(व्या०) अस्तीति । हे कुलीने स्त्रीणां चेत् यदि औचित्या परिचिता औचितिगुणयुक्ता पत्युर्भक्तिः पतिभक्ति' आत्मनो वशमधीनमात्मवशं संवननं वशीकरणमस्ति । तत तस्मात् कारणात् मृगस्य नेत्रे इव नेत्रे यासां ताः स्त्रिय मूलमंत्राश्च मणयश्च तैः किमु किमर्थं विभ्रमं (भजोविण । ५ । १ । १४६ । इ. सू. विभ्रमपूर्वकभज्धातोर्विण् । भजन्तीति भ्रमन्ति ॥ ७४ ॥

**भोजिते प्रियतमेऽहनि भुङ्क्ते, या च तत्र शयिते निशि शेते ।**
**प्रातरुज्झति ततः शयनं प्राक्, सैव तस्य सुतनुः सतनुः श्रीः ॥७५॥**

(व्या०) भोजित इति । यास्त्री प्रियतमे भर्तरि अहनि दिवसे भोजिते सति भुंक्ते । च पुनः या स्त्री तत्र प्रियतमे निशि रात्रौ शयिते सति शेते । प्रातः प्रभाते ततः प्रियतमात् प्राक् पूर्वं शयनमुज्झति त्यजति । प्रियतमस्य भर्तु सैव सुतनुः शोभना तनुर्यस्याः सा स्त्री सतनु तन्वा सह वर्तते इति सतनुः मूर्तिमती श्रीर्लक्ष्मीः स्यात् । उक्तं च–'अनुकूला सदा तुष्टा दक्षा साध्वी विचक्षणा । एभि. पंचगुणैर्युक्ता श्रीरिव स्त्री न संशय ॥ ७५ ॥

**नेत्रपद्ममिह मीलति यस्या, वीक्षिते परपुमाननचन्द्रे ।**
**श्रीगृहं सृजति पंकजिनीव, तामिनः स्वकरसंगमबुद्धाम् ॥ ७६ ॥**

(व्या०) नेत्रपद्ममिति ॥ यस्याः स्त्रियः नेत्रपद्मं नेत्र–(नीदाम्वृशसूयुयुजुस्तुतुदसिसिचमिहपतपानहस्त्रट् । ५ । २ । ८८ । इ सू. नी धातो करणे त्रट् ।) मेत्र पद्म परपुमाननचन्द्रे परपुंसः आननं परपुमाननं तदेव चन्द्रस्तस्मिन् परपुरुषमुखचन्द्रे वीक्षिते सति दृष्टे सति मीलति संकुचति । इनो (एतीति इनः । जीणशीदीबुध्यविमीभ्यः कित् । २६१ । इ. उ. सू. इंणक् धातो. कित् नः ।) भर्ता सूर्यो वा स्वकरसंगमबुद्धां स्वस्य करो हस्तः किरणो वा तस्य संगमेन बुद्धा तां आत्मीयकरस्पर्शेन विकसितां तां स्त्रियं पंकजिनी इव कमलिनीवत् श्रीगृहं सृजति आत्मीयगृहसत्कसर्वलक्ष्मीस्थानं करोतीति भावः ॥ ७६ ॥

**मास्म तप्यत तपः परितक्षीन्, मा तनूमतनुभिर्व्रतकष्टैः ।**
**इष्टसिद्धिमिह विन्दति योषि–च्चेन्न लुम्पति पतिव्रतमेकम् ॥ ७७ ॥**

(व्या०) मास्म इति ॥ तपो मास्म तप्यत (सस्मे ह्यस्तनी च । ५ । ४ । ४० । इ. सू. तप्धातो ह्यस्तनी अड्धातोरादिर्ह्यस्तन्यां–डा । ४ । ४ । २९ । इ. सू. अडभावः) । तनूं शरीरं अतनुभिः न तनूनि अतनूनि तैर्बहुभिः व्रतस्य कष्टानि तैर्व्रतकष्टैर्मा परितक्षीत् ( माङ्यद्यतनी । ५ । ४ । ३९ । इ. सू. स्मसहितमांङि उपपदे अद्यतनी । अड्धातोरादि र्ह्यस्तन्यां–डा । ४ । ४ । २९ । इ. सू. अडभावः ) मा कृशां कार्षीत् । योषित् स्त्री इह जगति चेत् यदि एकं पतिव्रतं शीलं न लुम्पति (तुदादेः शः । ३ । ४ । ८१ । इ. सू. लुप्लृंती मोक्षणे धातोः शः मुचादितृफदृफगुफशुभोभः शे । ४ । ४ । ९९ । इ. सू. शेपरे नोन्त ।) तदा इष्टसिद्धिं विन्दति लभते ॥ ७७ ॥

**उग्रदुर्ग्रहमभंगमयत्न–प्राप्यमाभरणमस्ति न शीलम् ।**
**चेत्तदा वहति काञ्चनरत्नै–र्विविधं मृदुपलैर्महिला किम् ॥ ७८ ॥**

(व्या०) उग्र इति । स्त्रीणां चेत् यदि उग्रदुर्ग्रहं उग्रैः उत्कटैर्दुःखेन ग्राह्यं अभंगं न विद्यते भंगो यस्य तत् अयत्नप्राप्यं न यत्नः अयत्नः अयत्नेन प्राप्यं

शीलमाभरणं नास्ति । तदा महिला (कल्यनिमहि–लः । ४८१ । इ. उ. सू. महधातोः इल. । आत् इ. सू. आप् मह्यते पूज्यते इति महिला ।) स्त्री मृदुपलैः– मृत् च मृत्तिका उपलाश्च पाषाणास्तैः काञ्चनरत्नैः कांचनं च रत्नानि च तै वीवधं (भावाकर्त्रोः । ५ । ३ । १८ । इ. सू. विपूर्वकवधधातोः भावेघञ् । न जन वधः । ४ । ३ । ५४ । इ. सू. वधधातोर्वृद्ध्यभावः । घञ्युपसर्गस्य बहुलम् । ३ । २ । ८६ । इ. सू. उपसर्गस्य दीर्घः । विवध्यते इति । वीवधः ।) भारं किं कथं वहति ॥ ७८ ॥

**मज्जितोऽपि घनकज्जलपङ्के, शुभ्र एव परिशीलितशीलः ।**
**स्वर्धुनीसलिलधौतशरीरो–ऽप्युच्यते शुचिरुचिर्न कुशीलः ॥ ७९ ॥**

(व्या०) मज्जित इति । परिशीलितं पालितं शीलं येन सः परिशीलितशीलः पालितशीलः पुमान् घनकज्जलपङ्के घनं च तत् कज्जलं च तदेव पङ्कस्तस्मिन् निचितकज्जलकर्दमे मज्जितोऽपि ब्रुडितोऽपि शुभ्र एव उज्ज्वल एव । कुशीलः कुत्सितं निन्दितं शीलं यस्य स. पुमान् स्वर्धुनीसलिलधौतशरीर स्वर्धुनी (धुनातितटतरून् इति धुनी । धूशाशीङो ह्रस्वश्च । ६७८ । इ उ. सू. धूधातोः नि धातोश्च ह्रस्वः ततो ङ्यां धुनी ।) गङ्गा तस्याः सलिलं जलं तेन धौतं क्षालित शरीरं येन स गंगाजलक्षालितदेहोऽपि शुचिः पवित्रा रुचिः कान्ति यस्य स शुचिरुचिर्नोच्यते ॥ ७९ ॥

**कष्टकर्म नहि निष्फलमेत–च्चेतनावदुदितं न वचो यत् ।**
**शीलशैलशिखरादवपातः, पातकापयशसोर्वनितानाम् ॥ ८० ॥**

(व्या०) कष्टकर्म इति । कष्टं च तत् कर्म च कष्टकर्म कृतं सत् निष्फलं निर्गतं फलं यस्य तत् नहि स्यात् । एतत् वचः चेतनावदुदितं चेतना बुद्धिरस्यास्तीति चेतनावान् चेतनावता सचेतनेन उदितं कथितं न नास्ति । यत् यस्मात् कारणात् वनितानां स्त्रीणां शीलशैलशिखरादवपातः शीलमेव शैल पर्वतस्तस्य शिखरं तस्मात् अवपातः पतनं पातकापयशसोः स स्यात् कोऽर्थ –ये केचन भृगुपातादि कष्टकर्म कृत्वा भवान्तरे राज्यादिसुखं वाञ्छन्ति एतत् मिथ्या

कथमिति चेत् शीलरूपपर्वतात् पतनत् स्त्रीणां पापापयशोदु खादीन्येव स्युर्नतु सुखमिति भाव ॥ ८० ॥

**या प्रभूष्णुरपि भर्तरि दासी-भावमावहति सा खलु कान्ता ।**
**कोपपङ्ककलुषा नृषु शेषा, योषितः क्षतजशोषजलूकाः ॥ ८१ ॥**

(व्या०) या इति । या स्त्री प्रभूष्णु (भूजे ष्णुक् । ५ । २ । ३० । ई. सू. प्रपूर्वकभूधातोः शीलादि सदर्थे ष्णुक् प्रत्ययः ।) अपि समर्थापि सती भर्तरि प्रियतमे दासीभावं दास्या भावस्तं आवहति । खलु निश्चितं सा कान्ता पत्नी ज्ञेया । शेषा योषित· कोपपङ्ककलुषा· कोप एव पङ्क· कर्दमस्तेन कलुषा सत्यो नृषु पुरुषेषु क्षतजं रुधिरं तस्य शोषाय जलूका (मृमन्यञ्जिजलि-कः । ५८ । इ. उ. सू. जल्धातोः ऊक प्रत्यय जलतिहन्ति इति जलूका) ज्ञेया. ॥ ८१ ॥

**रोषिताऽवगणिता निहताऽपि, प्रेमनेतरि न मुञ्चति कुल्या ।**
**मेघ एव परितुष्यति धारा-दंडघोरणिहतापि सुजातिः ॥ ८२ ॥**

(व्या०) रोषिता इति । कुल्या ( भवे । ६ । ३ । १२३ । इ. सू. कुलशब्दात्भवेऽर्थे य· । आत् इति सूत्रेण आप् । ) कुलीना स्त्री रोपिता अवगणिता निहतापि नेतरि स्वामिनि प्रेम स्नेहं न मुञ्चति । यथा सुजातिः शोभना जातिर्मालती कुलीना वा धारादंडघोरणिहतापि धारा एव दंडानां घोरणि. मेघसत्कधारादंडश्रेणिः तया हता अपि सती मेघे एव परितुष्यति ॥ ८२ ॥

**तद्युवामपि तथा प्रयतेथां, स्त्रैणभूषणगुणार्जनहेतोः ।**
**येन वां प्रति दधाति समस्तः, स्त्रीगणो गुणविधौ गुरुबुद्धिम् ॥८३॥**

(व्या०) तदिति ॥ हे कुलीने तत तस्मात कारणात् युवामपि भवत्यावपि स्त्रैणभूषणगुणार्जनहेतोः स्त्रीणां समूह· स्त्रैणं तस्य भूषणानि ये गुणास्तेषामर्जनहेतो स्त्रीसमूहयोग्यालंकारगुणोपार्जननिमित्तं तथा प्रयतेथां उपक्रमं कुर्वाथाम् । येन कारणेन समस्तः सकल स्त्रीणां गण· स्त्रीगणः स्त्रीसमूहो वां युवयो. गुणविधौ गुणानां विधिस्तस्मिन् गुरुबुद्धिं गुरोर्बुद्धिस्तां प्रतिदधाति धरति ॥८३॥

बुद्धिं शुद्धामिति मतिमतामुत्तमेभ्यः शचीन्द्रौ,
भक्तयावेशाद्विशदहृदयौ प्राभृतीकृत्य तेभ्यः ॥
स्वागस्त्यागं चरणलुठनैः क्लृप्तवन्तौ दिवं तौ,
द्राग् भेजाते चिरविरहतोऽत्याकुलस्थानपालाम् ॥ ८४ ॥

(व्या०) बुद्धिमिति । तौ शचीन्द्रौ शची च इन्द्रश्च मतिमतां मतिरस्ति एषामिति मतिमन्तस्तेषां बुद्धिमतां उत्तमेभ्यस्तेभ्यो वधूवरेभ्य इति पूर्वोक्तां शुद्धां बुद्धिं भक्तेरावेशस्तस्मात् भक्त्यावेशात् न प्राभृतं अप्राभृतं प्राभृतं कृत्वेति प्राभृतीकृत्योपदीकृत्य द्राक् शीघ्रं दिवं भेजाते स्वर्लोकं गतौ । किंलक्षणौ शचीन्द्रौ विशदं हृदयं ययोस्तौ विशदहृदयौ निर्मलमानसौ । स्वस्य आगः अपराधस्तस्य त्यागस्तं आत्मीयापराधपरिहारं चरणेषु पादेषु लुठनैः चरणनमस्कारैः क्लृप्तवन्तौ । किंलक्षणां दिवं चिरविरहतः दीर्घकालविरहात् अत्याकुलाः स्थानपालाः यस्यां सा ताम् ॥ ८४ ॥

अन्येऽपीन्द्राः सकलभगवत्कार्यभारे धुरीणं,
सौधर्मस्याधिपतिमधरमप्युत्तरं भावयन्तः ।
धन्यंमन्यास्त्रिभुवनगुरोर्दर्शनादेव देवैः,
साकं नाकं निजनिजमयुर्निर्भरानन्दपूर्णाः ॥ ८५ ॥

इतिश्रीसूरीश्वरश्रीजयशेखरसूरिविरचिते श्रीजैनकुमारसंभवमहाकाव्ये
पञ्चमः सर्गः

(व्या०) अन्य इति । अन्येऽपि इन्द्राः ईशानेन्द्राद्या निर्भरानन्दपूर्णाः निर्भरानन्देन अतिशयानन्देन पूर्णाः सन्त देवैः साकं सार्द्धं निजं निजं नाकं आत्मीयात्मीयं स्वर्लोकं अयुर्गताः किंकुर्वन्त सकलभगवत्कार्यभारे सकलानि समग्राणि च तानि भगवतः कार्याणि तेषां भारस्तस्मिन् धुरीणं (धुरं वहति इति धुरीणः । वामाद्यादेरीनः । ७ । १ । ४ । इ. सू. केवल धुरशब्दादपि ईनप्रत्ययो भवति इति पंक्ति. ।) धुर्यं सौधर्मस्य अधिपतिं सौधर्मेन्द्रं अधरमपि अधस्तनमपि उत्तरं उत्कृष्टं भावयन्तः । किंलक्षणा इन्द्राः त्रयाणां भुवनानां समाहारः त्रिभुवनं

तस्य गुरुस्तस्य दर्शनादेव धन्यंमन्याः (कर्तुः खश् । ५ । १ । ११७ । इ. सू. धन्यपूर्वकमन्धातोः खश् । शित्वात् दिवादेः श्यः । ३ । ४ । ७२ । इ. सू. श्यः खित्वात् खित्यनव्ययाऽरुषोर्मोऽन्तो ह्रस्वश्च । ३ । २ । १११ । इ. सू. मोऽन्तः । आत्मानं धन्यं मन्यन्ते इति धन्यंमन्याः ) आत्मानं धन्यं मन्यमानाः ॥

सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि-,
धम्मिल्लादिमहाकवित्वकलनाकल्लोलिनीसानुमान् ।
वाणीदत्तवरश्चिरं विजयते तेन स्वयं निर्मिते,
सर्गो जैनकुमारसंभवमहाकाव्ये ऽभवत् पञ्चमः ॥ ५ ॥

इतिश्रीमदञ्चलगच्छे कविचक्रवर्त्तिश्रीजयशेखरसूरिविरचितस्य श्रीजैनकुमारसंभवमहाकाव्यस्य तच्छिष्यश्रीधर्मशेखरमहोपाध्यायविरचितायां टीकायां श्रीमाणिक्यसुन्दरशोधितायां पञ्चमसर्गव्याख्या समाप्ता ॥ ५ ॥

# अथ षष्ठः सर्गः प्रारभ्यते ।

**अथाश्रयं स्वं सपरिच्छदेषु, सर्वेषु यातेषु नरामरेषु ।**
**नाथं नवोढं रजनिर्विविक्त इवेक्षितुं राजवधूरुपागात् ॥ १ ॥**

(व्या०) अथेति ॥ अथानन्तरं रजनि· राजवधू राज्ञ चन्द्रस्य पक्षे राज्ञो नृपस्य वधू राजवधू नवोढं नवपरिणीतं नाथं विविक्ते एकान्ते ईक्षितुमिव उपागात् (इणिकोर्गा । ४ । ४ । २३ । इ. सू. अद्यतन्यां इण् धातोर्गा । पिबैति दाभूस्थ· सिचो लुप् परस्मै न चेट् । ४ । ३ । ६६ । इ. सू. सिचो लुप् इण्धातो कर्तरि अद्यतनी ।) समेता । केषु सत्सु सपरिच्छदेषु परिच्छदेन सह वर्तन्ते इति सपरिच्छदास्तेषु सपरिवारेषु सर्वेषु नराश्च अमराश्च नरामरास्तेषु मनुष्यदेवेषु स्वमाश्रयं आत्मीयं गृहं यातेषु गतेषु सत्सु ॥ १ ॥

**निशा निशाभंगविशेषकान्ति-कान्तायुतस्यास्य वपुर्विलोक्य ।**
**स्थाने तमःश्यामिकया निरुद्धं, दधौ मुखं लब्धनवोदयापि ॥ २ ॥**

(व्या०) निशा इति । निशा रात्रि· लब्ध नवोदयापि नवश्चासौ उदयश्च नवोदयः लब्धो नवोदयो यया सा सती कान्ताभ्यां युत तस्य कलत्रयुतस्य अस्य भगवतो वपुः शरीरं विलोक्य दृष्ट्वा तमसः श्यामिका तया तम. श्यामिकया अंधकारकालिम्ना निरुद्धं व्याप्तं मुखं दधौ बभार । किंविशिष्टं वपुः निशाभंग-विशेषकान्ति निशा हरिद्रा तस्या भंगः छेद· तद्वत् विशेषा कान्तिर्यस्य तत् । पक्षे निशाया रात्रे. भंगे सति विशेषकान्ति । अत्र शब्दच्छलं ज्ञेयम् ॥ २ ॥

**अभुक्त भूतेशतनोर्विभूतिं, भौती तमोभिः स्फुटतारकौघा ।**
**विभिन्नकालच्छविदन्तिदैत्य-चर्मावृतेर्भूरिनरास्थिभाजः ॥ ३ ॥**

(व्या०) अभुक्त इति । भौती रात्रिः भूतेशतनोः भूतानां ईश· स्वामी शिवस्तस्य तनुः शरीरं तस्याः-ईश्वरस्य-मूर्तेर्विभूतिं अभुंक्त सेवते स्म । किंविशिष्टा रात्रिः तमोभिरंधकारैरुपलक्षिता 'हेतुकर्तृकरणेत्थंभूतलक्षणे' इति सूत्रेण इत्थं

भूतलक्षणे तृतीया पुनः किंवि० स्फुटाः प्रकटाः तारकाणां ओघाः समूहा यस्यां सा प्रकटतारासमूहा । किंविशिष्टायास्तनोः विभिन्नकालच्छविदन्तिदैत्यचर्मावृतेः विशेषेण भिन्ना कालच्छविः कृष्णकान्तिर्यस्य स एतादृशो यो दन्तिदैत्यो गजासुरस्तस्य चर्म्म कृत्ति तदेव आवृतिः आवरणं यस्याः सा तस्याः । भूरिनरास्थिभाज (भजो विण् । ५ । १ । १४६ । इ. सू. भजधातोर्विण् ।) नराणामस्थीनि नरास्थीनि भूरीणि च तानि नरास्थीनि च तानि भजतीति तस्याः कोऽर्थ रात्रेः अन्धकारमेव दैत्यसत्ककृष्णचर्मावृतिः । तारासमूहा मनुष्यास्थीनि । अतः कारणात् ईश्वरतनोरुपमानं रात्रेरितिभावः ॥ ३ ॥

**न्यास्थन्निशा तस्करपुंश्चलीनां, नेत्रेषु लोकाक्षिमहांसि हृत्वा ।**
**सूरे गते दुःसहमंडलाग्रे, तमस्विनां हि फलिता कदाशा ॥ ४ ॥**

(व्या०) न्यास्थत् इति ॥ निशारात्रिः लोकाक्षिमहांसि लोकानां अक्षीणि लोचनानि तेषां महांसि तेजांसि हृत्वा तस्कराश्च (किंयत्तद्बहोरः । ५–१–१०१ इ. सू. तद्शब्दपूर्वक कृधातोरः । वर्चस्कादिष्वस्करादयः । ३ । २ । ४८ । इ. सू. चौर्येऽर्थे तत् शब्दस्य तकारस्य सकारे तस्करः तत्करोतीति तस्करः) पुंश्चल्यश्च तासां चौरस्वैरिणीनां नेत्रेषु न्यास्थत् (शास्त्यसूवक्तिख्यातेरङ् । ३ । ४ ६० । इ. सू. अद्यतन्यांकर्तरि असूधातोः अङ्प्रत्यय । श्वयत्यसूवचपतः श्वास्थवोचपतम् । ४ । ३ । १०३ । इ. सू. अद्यतन्यां कर्तरि अङि परे असूधातोः अस्थादेशः ।) अस्यति स्म । कसति दुःसहमंडलाग्रे दुःखेन सह्यते इति दुःसहं मंडलस्य अग्रं मंडलाग्रं खड्गो वा यस्य स तस्मिन् सूरे सूर्ये सुभटे च गते सति तमस्विनां (अस्तपोमायामेधास्रजो विन् । ७ । २ । ४७ । इ. सू. तमस् शब्दात् मत्वर्थे विन्प्रत्यय ।) अन्धकारचारिणां पापिनां हि इति खेदे कदाशा ( कोः कत्तत्पुरुषे । ३ । २ । १३० । इ. सू. को कदादेशः ।) कुत्सिता आशा कदाशा फलिता ॥ ४ ॥

**कालीयमालीय गिरेर्गुहासु, भास्वद्भयेनाह्नि निशा तदस्ते ।**
**भूवद्धखेलाखिलवस्तु काली–चकार कालेन विना क शक्तिः ॥ ५ ॥**

(व्या०) काली इति । इयं काली कृष्णा निशा रात्रि अह्नि दिवसे भास्वतः सूर्याद् भयं भीतिस्तेन गिरेः पर्वतस्य गुहासु कंदरासु आलीय निलीय तदस्ते तस्य भानोरस्तः तस्मिन् सति भूबद्धखेला भुवि वसुधायां बद्धा कृता खेला क्रीडा यथा सा सती अखिलवस्तु सकलपदार्थं कालीचकार न कालमकालं अकालं कालं चकार इति कालीचकार । कालेन समयेन विना क शक्तिरस्ति कापि नास्तीत्यर्थः ॥

**कुमुद्वतीं चाकृत रोहिणीं च, प्रिये निशां वीक्ष्य शितिं सितांशुः ।**
**श्रियं च तेजश्च तयोर्ददाना, साधत्त साधु क्षणदेति नाम ॥ ६ ॥**

(व्या०) कुमुद्वतीमिति । सितांशुः सिताः श्वेताः अंशवः किरणा यस्य स चन्द्रः शितिं कृष्णां निशां रजनीं वीक्ष्य दृष्ट्वा कुमुद्वतीं (तदस्यास्त्यस्मिन्निति मतुः । ७ । २ । १ । इ. सू. कुमुदशब्दात् मतुः । मावर्णान्तोपान्ता पञ्चमवर्गान् मतोर्मोवः । २ । १ । ९४ । इ. सू. मतोर्मस्य वः । अधातूदृदितः । २ । ४ । २ । इ. सू. उदितत्वात् ङीः ।) कुमुदिनीं रोहिणीं च द्वे प्रिये अकृत कृतवान् । सा निशा तयोः कुमुद्वतीरोहिण्योः श्रियं शोभां च अन्यत् तेजो ददाना सती क्षणदा क्षणं उत्सवं ददातीति क्षणदा पक्षे रात्रिरिति नाम साधु युक्तमधत्त धरति स्म ॥ ६ ॥

**हरिद्रयेयं यदभिन्ननामा, बभूव गौर्येव निशा ततः प्राक् ।**
**सन्तापयन्ती तु सतीरनाथा-स्तच्छापदग्धाजनि कालकाया ॥ ७ ॥**

(व्या०) हरिद्रयेति । यत् यस्मात् कारणात् इयं निशा रात्रि हरिद्रया सह अभिन्नं नाम यस्याः सा अभिन्ननामा सदृशनामा वर्तते । यतो नाममालायां हरिद्रा कांचनी पीता निशाख्या वरवर्णिनी इत्यादि । तत् तस्मात् कारणात् प्राक् पूर्वं गौर्येव गौरवर्णा बभूव इति ज्ञायते । तु पुनः अनाथा न विद्यते नाथो यासां ताः सतीः संतापयतीति संतापयन्ती सती तासां शापेन दग्धा तच्छापदग्धा कालकाया कृष्णदेहा अजनि जाता ॥ ७ ॥

**किं योगिनीयं धृतनीलकंथा, तमस्विनी तारकशंखभूषा ।**
**वर्णव्यवस्थामवधूय सर्वा-मभेदवादं जगतस्ततान ॥ ८ ॥**

(व्या०) किमिति । इयं तमस्विनी (अस्तपोमायामेधास्रजो विन् । ७ । २ । ४७ । इ. सू. तमस् शब्दात् मत्वर्थे विन् । स्त्रियां नृतोऽस्वस्रादेर्डी. । २ । ४ । १ । इ. सू डीः) रजनिः किं योगिनी वर्तते किंलक्षणा तमस्विनी धृतनीलकंथा धृता नीला कंथा यया सा पुनः किंवि० तारकशंखभूषा तारका (तारकावर्णकाऽष्टकाज्योतिस्तान्तवपितृदैवत्ये । २-४-११३ । इ. सू. ज्योतिषि तारकाशब्दे इकाराभावो निपात्यते ।) एव शंखसत्काभरणानि यस्याः सा या जगतो विश्वस्य सर्वां निखिलां वर्णव्यवस्थां वर्णानां ब्राह्मणादीनां श्वेतकृष्णादीनां वा व्यवस्थां मर्यादामवधूय अभेदश्चासौ वादश्च तं एकाकारत्वं विस्तारयामास ॥

**तितांसति श्वैत्यमिहेन्दुरस्य, जाया निशा दित्सति कालिमानम् ।**
**अहो कलत्रं हृदयानुयायि, कलानिधीनामपि भाग्यलभ्यम् ॥ ९ ॥**

(व्या०) तितांसति इति ॥ इन्दुश्चन्द्रः इह जगति श्वैत्यं श्वेतस्य भावः श्वैत्यं तत् धवलतां तितांसति (तुमर्हादिच्छायां सन्नतत्सनः । ३ । ४ । २१ । इ. सू. तन् धातोरिच्छार्थे सन् । सन्यङश्च । ४ । १ । ३ । इ. सू. द्वित्वे ततन् सति । सन्यस्य । ४ । १ । ५९ । इ. सू. पूर्वस्यात इकारे तितन् सति । तनो वा । ४ । १ । १०५ । इ. सू. विकल्पेन दीर्घे तितांसति इति ।) तनितुमिच्छति विस्तारयितुमिच्छति । अस्य इन्दोर्जाया निशा कालिमानं कृष्णत्वं दित्सति (दा स ति इत्यत्र मिमीमादामित्स्वरस्य । ४-१-२० । इ. सू. सादौसनि दाधातोः स्वरस्य इत् न च द्विर्भावः । दित्सति ।) दातुमित्सति । अहो इति आश्चर्ये अनुयातीति अनुयायि हृदयस्य अनुयायि हृदयानुयायि मनोऽनुकूलं कलत्रं भार्या कलानिधीनामपि कलानां निधयस्तेषां कलावतामपि भाग्यलभ्यं लब्धुं योग्यं भाग्येन लभ्यं स्यात् । यतः चन्द्रस्य कलावतोऽपि निशा प्रियास्ति ॥९॥

**दत्त्वा पतङ्गः प्रवसन् वसु स्वं, तमो निरोद्धुं भुवि यान्न्ययुंक्त ।**
**तैर्दीपभृत्यैर्निजनाथनाम विडंबिनो-हन्त हताः पतङ्गाः ॥ १० ॥**

(व्या०) दत्त्वा । पतङ्गः सूर्यः प्रवसतीति प्रवसन् प्रवासं गच्छन् सन् स्वं वसु द्रव्यं तेजो वा दत्त्वा (दत् । ४ । ४ । १० । इ. सू. क्त्वापरे दाधातोः

दत् ।) तमो निरोद्धुं अन्धकारं स्फेटयितुं यान् दीपभृत्यान् भुवि पृथिव्यां न्ययुंक्त व्यापारितवान् । तैर्दीपभृत्यैः दीपा एव भृत्या किंकरास्तैः हन्त इति वितर्के निजनाथनामविडंबिनः निजस्यात्मनो नाथः स्वामी सूर्यः सूर्यस्य नाम पतङ्गोऽस्ति शलभस्यापि नाम पतङ्गोऽस्ति 'पतङ्गः पक्षिसूर्ययोरि'तिवचनात् अत्र पतङ्गशब्देन छलनास्ति निजनाथनाम पिडंबयन्ति अनुकुर्वन्ति इति । एवंविधा ये पतङ्गाः शलभा हताः ॥ १० ॥

**यत्कोकयुग्मस्य वियोगवह्नि-र्जज्वाल मित्रेऽस्तमिते निशादौ ।**
**सोद्योतखद्योतकुलस्फुलिङ्गं, तद्धूमराजिः किमिदं तमिस्रम् ॥ ११ ॥**

(व्या०) यत्कोकयुग्मस्य इति ॥ यत् कोकयुग्मस्य कोकयोः चक्रवाकयोः युग्मं मिथुनं तस्य चक्रवाकद्वन्द्वस्य निशादौ निशाया आदिस्तस्मिन् रजन्यादौ मित्रे सूर्ये सुहृदि वा अस्तमिते सति वियोगवह्निः वियोगस्य वह्निः जज्वाल । इदं तमिस्रमन्धकारं किं धूमराजिः धूमानां राजिः न वर्तते । किंलक्षणं तमिस्रं सोद्योतखद्योतकुलस्फुलिंगं खद्योतानां कुलं सोद्योतं च तत् खद्योतकुलं च तदेव स्फुलिंगा यस्मिन् तत् ॥ ११ ॥

**अवेत्य पाटच्चरपांसुलानां, तमोबलाद्दुर्ललितानि तानि ।**
**प्रभां दिशीन्द्रस्य तमोऽपनोदा-मदीदृशत् स्वोदय-चिह्नमिन्दुः ॥ १२ ॥**

(व्या०) अवेत्य इति । इन्दुश्चन्द्रः इन्द्रस्य दिशि पूर्वस्यां दिशि प्रभां कान्तिं अदीदृशत् दर्शितवान् । किंविशिष्टां प्रभां तमोपनोदां तमः अन्धकारं अपनोदयति स्फोटयति इति तमोऽपनोदा ताम् । स्वोदयचिह्नं स्वस्य उदयस्तस्य चिह्नं आविष्टलिङ्गमेतत् । किंकृत्वा पाटच्चरपांसुलानां पाटच्चराश्च (पाटयन्तः चरन्तीति पाटच्चराः पृषोदरादित्वात् साधुः) पांसुलाश्च (पांसवः आसां सन्तीति पांसुलाः) तासां तस्कराणां असतीनां च तमोबलात् तमसो बलं तस्मात् तानि दुर्ललितानि दुश्चेष्टितानि अवेत्य ज्ञात्वा ॥ १२ ॥

**धामेदमौत्पातिकमानलं वै-र्व्यूहं वितन्वत्यसतीसमूहे ।**
**उदीतमेवैक्षत चन्द्रबिम्बं, पूर्वाम्बुधेः कोकनदश्रि लोकः ॥ १३ ॥**

(व्या०) धामेति । पूर्वाम्बुधे पूर्वश्चासौ अंबुधिश्च तस्मात् पूर्वसमुद्रात् उदीतमेव उदयं प्राप्तं चन्द्रबिम्बं चन्द्रस्य बिम्बं चन्द्रमंडलं तत् लोकः ऐक्षत आलुलोके। किंविशिष्टं चन्द्रबिम्बं कोकनदश्रि कोकनदं रक्तोत्पलं तद्वत् श्रीः शोभा यस्य तत्। क सति असतीसमूहे असतीनां समूहस्तस्मिन् इति ऊहं विचारं वितन्वति वितनोतीति वितन्वन् तस्मिन् कुर्वति सति । इतीति किं इदं औत्पातिकं उत्पातकारि वा अथवा आनलं अनलोऽग्निस्तत्संबंधि धाम तेजो वर्तते ॥ १३ ॥

**सुधानिधानं मृगपत्रलेखं, शुभ्रांशुकुंभं शिरसा दधाना ।**
**कौसुंभवस्त्रायितचान्द्ररागा, प्राची जगन्मंगलदा तदाभूत् ॥ १४ ॥**

(व्या०) सुधानिधानमिति । प्राची (अञ्चः । २ । ४ । ३ । इ. सू. प्राच् शब्दात् स्त्रियां ङीः ।) पूर्वदिक् तदा तस्मिन्नवसरे जगन्मङ्गलदा मङ्गलं ददातीति मङ्गलदा जगतोमङ्गलदा जगन्मङ्गलदा जगतोमङ्गलदायिनी अभूत् । किंकुर्वाणा शुभ्रांशुकुंभं शुभ्रा अंशव किरणा यस्य सः शुभ्रांशुः चन्द्र स एव कुंभः कलशस्तं चन्द्रकलशं शिरसा मस्तकेन दधाना धत्ते इति दधाना शुभ्रांशुशब्देन रौप्यं तस्य कलशं दधाना । कौसुंभवस्त्रायितचान्द्ररागा कौसुभं (कुसुम्भेन रक्तं कौसुम्भं रागाट्टो रक्ते । ६ । २ । १ । इ सू. कुसुम्भशब्दात् रागेऽर्थे अण् ।) च तत् वस्त्रं च कौसुंभवस्त्रं तद्वदाचरितः चन्द्रसंबंधिरागो यस्या सा । किंलक्षणं शुभ्रांशुकुंभं सुधानिधानं सुधायाः अमृतस्य निधानं अमृतपूर्णं मृगपत्रलेखं मृगः पत्रलेखा यस्मिन् स तम् ॥ १४ ॥

**सांराविणं राजकरोपनीत–पीयूषपानैर्विहितं चकोरैः ।**
**भास्वद्विरोकापगमाप्तशोकाः, कोकाः क्षतक्षारमिवान्वभूवन् ॥ १५ ॥**

(व्या०) सांराविणमिति । चकोरैर्विहितं सांराविणं कोलाहलं कोकाश्चक्रवाकाः क्षतक्षारं क्षतेक्षारस्तं क्षते व्रणे क्षारक्षेपमिव अन्वभूवन् अनुभवन्ति स्म । किंविशिष्टैश्चकोरैः राजकरोपनीतपीयूषपानैः राजा चन्द्रो नृपो वा तस्य करेण हस्तेन किरणैर्वा उपनीतं पीयूषस्य पान अमृतपान येषां ते तैः । किंलक्षणाः कोका भास्वद्विरोकापगमाप्तशोका भास्वत सूर्यस्य विरोकाः किरणाः तेषां अपगमे विनाशे आप्त प्राप्त शोकोयैस्ते ॥ १५ ॥

**तमस्सु राज्ञा स्वमयूखदंडै-र्विखंड्यमानेष्वदयं तमो यत् ।**
**तमेव भेजे शरणं शरण्यं, लक्ष्माभिधां किं तदलंभि लोकैः ॥ १६ ॥**

(व्या०) तमस्सु इति । राज्ञा चन्द्रेण नृपेग वा स्वमयूखदंडै स्वस्य मयूखा, किरणा, ते एव दंडास्तै आत्मीयकिरणरूपदंडै तमस्सु अंधकारेषु अदयं निर्दयं यथा भवति तथा विखंड्यमानेषु सत्सु यत् तमस्तमेव चन्द्रं शरणं भेजे । किंलक्षणं शरणं शरण्यं (तत्र साधौ । ७ । १ । १५ । इ सू. शरणशब्दात् साध्वर्थे यः ।) शरणे साधु तत् । लोकैस्तत् तमोऽधकारं लक्ष्माभिधां लक्ष्मणच्चिह्नस्य (लक्ष्यते अनेनेति लक्ष्म । मन् । ९११ । इ. उ. सू लक्षधातोर्मन् प्रत्ययः ।) अभिधा तां लांछनाभिधानं किं न अलम्भि न प्रापितं अपितु प्रापितमेव ॥१६॥

**अत्रेर्द्विजादुद्भवति स्म न श्री-तातात्पयोधेर्विधुरित्यवैमि ।**
**यज्जातमात्रः प्रतिधिष्ण्यमेषोऽक्षिपत्करं श्रीलवलाभलोभात् ॥ १७ ॥**

(व्या०) अत्रेरिति । एके चन्द्रं अत्रिनेत्रज वदन्ति केचिच्चतुर्दशरत्नमध्ये समुद्राज्जातं वदन्ति । परमहं इति अवैमिजानामि इतीति किं विधुः अत्रेर्द्विजात् अत्रिनाम्नो ब्राह्मणात् उद्भवति स्म उत्पन्नः । श्रीतातात् श्रियाः तातस्तस्मात् लक्ष्मीपितुः समुद्रात् नोत्पन्नः । अत्र हेतुमाह—यत् यस्मात् कारणात् एषविधुश्चंद्रो जातमात्रः सन् श्रीलवलाभलोभात् श्रिया लवो लेशस्तस्य लाभः प्राप्ति तस्य लोभस्तस्मात् प्रतिधिष्ण्यं (योग्यतावीप्सार्थानतिवृत्तिसादृश्ये । ३ । १ । ४० । इ. सू. वीप्सा) प्रतिनक्षत्रं प्रतिगृहं वा करं हस्तं अक्षिपत । चन्द्रोदये नक्षत्राणि निस्तेजांसि जातानीति भावः । ब्राह्मणा हि प्रतिगृहं याच्ञां कुर्वन्ति तेन कारणेन भिक्षाचरकुलोत्पन्नश्चन्द्र इति ज्ञायते ॥ १७ ॥

**अलोपि सूरोऽपि मया पतन्त्या-प्यहं महोऽत्रग्रहभिद्ग्रहाणाम् ।**
**मय्येव जन्मोत्तमपूरुषाणां, का योगिभोगिष्वपरा मदिष्टा ॥ १८ ॥**

**न स्त्री ततः कापि मया समाना, मानास्पदं या बत सा पुरोस्तु ।**
**इतीव सल्लक्ष्मलिपीन्दुपत्र-मुच्चैः समुत्तम्भयति स्म रात्रिः ॥ १९ ॥**

(व्या०) अलोपि इति । रात्रिः सलक्ष्मलिपि सत् विद्यमानं लक्ष्म लाञ्छनमेव लिपिर्यस्मिन् तत् सलक्ष्मलिपि तत् इन्दुपत्रं इन्दुश्चन्द्रः स एव पत्रं तत् उच्चै उच्चैस्तरं समुत्तम्भयति स्म । वादिनो हि उच्चैः पत्रावलम्बं उत्तम्भयन्ति । उक्तं च—उद्धृत्य बाहू परिरारटीमि, यस्यास्ति शक्तिः स च वावदीतु । मयि स्थिते वादिनि वादिसिंहे नैवाक्षरं वेत्ति महेश्वरोऽपि ॥ १ ॥ इति पत्रावलम्बो वादिनां ज्ञेयः । उत्प्रेक्षते—इतीव इतीति किं मया आपतन्त्या आपततीति आपतन्ती तया आगच्छन्त्या सूरोऽपि सूर्यः सुभटो वा अलोपि लुप्तः । अहं ग्रहाणां महोऽवग्रहमित् महस्तेजः तस्यावग्रहो विघ्नस्तं भिनद्मीति महोवग्रहभित् वर्ते । उत्तमपुरुषाणां उत्तमाश्चते पुरुषाश्च (सन्महत्परमोत्तमोत्कृष्टं पूजायाम् । ३ । १ । १०७ । इ. सू. कर्मधारयसमासः । ) तेषां तीर्थकृच्चक्रवर्तिबलदेववासुदेवाद्युत्तमपुरुषाणां जन्म मय्येव मयि सत्यामेव वर्तते । योगिभोगिषु योगिनश्च भोगिनश्च तेषु का अपरा अन्या मदिष्टामत्सकाशात् इष्टा अभीष्टा । कोऽर्थः योगिनो हि रात्रावेव प्रायोध्यानस्तिमितलोचना योगनिद्रामापन्नाः स्युः । भोगिनोऽपि शब्दरूपरसगन्धस्पर्शएतत्पञ्चप्रकारे विषयसुखमनुभवन्ति । रात्राविति भावः ॥ १८ ॥ तत् तस्मात् कारणात् कापि स्त्री (स्त्री । ४५० । इ. उ सू. स्त्यायते ड्रट् ङित् स्त्यायति गर्भोऽस्यामिति स्त्री ।) मया (तुल्यार्थैस्तृतीयाषष्ठ्यौ । २ । २ । ११६ । इ. सू. मया इत्यत्र समानयोगे तृतीया ।) समाना तुल्या न वर्तते । या स्त्री मानास्पदं मानस्य अहंकारस्य आस्पदं स्थानं अहंकारस्थानं अस्ति सा स्त्री वत इति वितर्के पुरोऽस्तु अग्रे भवतु ॥ १९ ॥ युग्मम् ॥

**अदान्मदान्ध्यं तमसामसाध्यं, क्षिपाक्षिपादं प्रति वैरिणां या ।**
**तां विन्दुरिन्दुर्दयितां चकार, सारं कलत्रं क्व कलङ्किनो वा ॥ २० ॥**

(व्या०) अदात् इति । या क्षिपा रात्रिः तमसामन्धकाराणामसाध्यं न साध्यं असाध्यं तत् मदान्ध्यं मदेन आन्ध्यं (पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च । ७ । १ । ६० । इ. सू. अन्धशब्दात् ट्यण् । अन्धस्य भाव आन्ध्यम् ।) मदान्ध्यं तत् अदात् ददौ । किंविशिष्टानां तमसां क्षिपादं क्षिपा रात्रिः दं कलत्रं

यस्य स तं (भागिनि च प्रतिपर्यनुभिः । २ । २ । ३७ । इ. सू. प्रतियोगे क्षिपादमित्यत्र द्वितीया ।) प्रति पक्षे अक्षिणी लोचने पादौ च एषां समाहारस्तत् प्राण्यङ्गत्वात् समाहारद्वन्द्वः तत् प्रति वैरिणां । इन्दुश्चन्द्रो विन्दुर्विद्वानपि (विन्दिच्छू । ५ । २ । ३४ । इ. सू. शीलादिसदर्थे विन्दुर्निपात्यते ।) तां निशां दयितां पत्नीं चकार । वा अथवा कलङ्किनः सारं कलत्रं क्व वर्तते ॥ २० ॥

**विधोरुदीतस्य करैरवापि, दिनायितं यत्प्रसृतैस्त्रियामा ।**
**युवाक्षिभृङ्गैस्तदरामि राम-तरङ्गिणीस्मेरमुखाम्बुजेषु ॥ २१ ॥**

(व्या०) विधोरिति ॥ त्रियामा त्रयो यामा यस्या सा त्रियामा रात्रिः उदितस्य विधोश्चन्द्रस्य करैः किरणैः प्रसृतैः सद्भिः यत् दिनायितं दिवसवदाचरितमवापि प्रापि । तत् युवाक्षिभृङ्गैः यूनां तरुणानां अक्षीणि नेत्राणि एव भृङ्गाः तैः तरुणलोचनरूपभृङ्गैः । रामातरङ्गिणीस्मेरमुखाम्बुजेषु रामाः स्त्रियः एव तरङ्गिण्यो नद्यस्तासां स्मेराणि (स्म्यजसहिंसदीपकम्पकमनमो रः । ५-२-७९ । इ. सू. शीलादिसदर्थे स्मिङ्धातोः र प्रत्ययः । स्मयन्ते इति स्मेराणि ।) विकस्वराणि यानि मुखानि एव अम्बुजानि कमलानि तेषु स्त्रीरूपनदीसत्कविकस्वरमुखकमलेषु अरामि रम्यते स्म ॥ २१ ॥

**लोके सितांशोर्गभितै मयूखै-र्दुग्धाब्धिकेलीकुतुकानि देवः ।**
**इयेष स स्वापसुखं सरोज-साम्यं सिसत्यापयिषुः किमक्ष्णोः ॥२२॥**

(व्या०) लोके इति । स देवः श्रीयुगादीशः स्वापसुखं स्वापस्य सुखं तत् निद्रासुखं इयेष इच्छति स्म । किंलक्षणो भगवान् अक्ष्णोर्लोचनयोः सरोजसाम्यं सरोजानां साम्यं तत् कमलसादृश्यं किमु सिसत्यापयिषुः (णिज्बहुलं नाम्नः कृगादिषु । ३ । ४ । ४२ । इ. सू. सत्यशब्दात् करोत्यर्थे णिच् । सत्यार्थवेदस्याः । ३ । ४ । ४४ । इ. सू. णिच् योगे सत्यशब्दस्य आकारः अर्तिरीब्लीह्रीक्नूयिक्ष्माय्यातापुः । ४ । २ । २१ । इ. सू. णौपरे सत्याधातोः पु । सत्यापि धातोः तुमर्हादिच्छायां सन्नतत्सनः । ३ । ४ । २१ । इ. सू. इच्छार्थे सन् सन्यङश्च । ४ । १ । ३ । इ. सू. द्वित्वे स सत्यापिष इति । सन्यस्य ।

४ । १ । ५९ । इ. सू. पूर्वस्य अकारस्य इकारे सिसत्यापयिष इति सन् भिक्षाशंसेरु । ५ । २ । ३३ । इ. सू. शीलादिसदर्थे सिसत्यापयिष धातो उप्रत्यये सिसत्यापयिषुरिति सिद्धम् ।) सत्यापयितुमिच्छु । क सति लोके सितांशो सिता अंशवः किरणा यस्य स तस्य चन्द्रस्य मयूखैः किरणैः दुग्धाब्धिकेलीकुतुकानि दुग्धाना क्षीराणामब्धिः समुद्रस्तस्य केल्य क्रीडा तासां कुतुकानितानि क्षीरसमुद्रस्यकक्रीडाकौतुकानि प्रापिते सति यथा देवो नारायणः क्षीरसमुद्रे शेते ॥ २२ ॥

**तदैव देवैः कृतमग्र्यवर्णं, समं वधूभ्यां मणिहर्म्यमीशः ।**
**ततो गुरूद्गन्धि विवेश शास्त्रं, मतिस्मृतिभ्यामिव तत्त्वकामः ॥२३॥**

(व्या०) तदैवेति । ततस्ततोऽनन्तरमीशः श्रीऋषभो वधूभ्यां सुमंगलासुनन्दाभ्यां समं मणिहर्म्यं मणीनां हर्म्यं तत् मणिसत्कावासं विवेश प्रविष्टः । किंलक्षणं मणिहर्म्यं तदैव देवैरमरै कृतम् । अग्र्यवर्णं अग्र्यः श्रेष्ठो वर्णो यस्य तत् प्रधानवर्णं । अगुरूद्गन्धि अगुरुणा उद्गन्धि तत् परिमलबहुलं क इव तत्त्वकाम इव तत्त्वे कामो यस्य स यथा तत्वकामस्तत्त्वमिच्छुर्मतिस्मृतिभ्यां मतिश्च स्मृतिश्च ताभ्यां सह शास्त्रं प्रविशति । किंलक्षणं शास्त्रं प्रधानवर्णं प्रशस्याक्षरं अग्र्याः श्रेष्ठा वर्णा अक्षराणि यस्मिन् तत् । गुरूद्गन्धि गुरुणा उद्गन्धि उत्प्राबल्येन गन्धि गन्धेन परिमलेन युक्तं गुरुं विना शास्त्रस्य परिमलो न स्यात् ॥

**विवाहदीक्षाविधिविद्वधूभ्यां, कृत्वा सखीभ्यामिव नर्मकेलीः ।**
**निद्रां प्रियीकृत्य स तत्र तल्पे, शिश्ये सुखं शेष इवासुरारिः ॥२४॥**

(व्या०) विवाह इति । स भगवान् तत्र तस्मिन् मणिहर्म्ये मणिमयावासे तल्पे पल्यङ्के, निद्रां प्रियीकृत्य निद्रामेव प्रियामभीष्टां कलत्रं वाकृत्वा न प्रिया अप्रिया अप्रियां प्रियां कृत्वा इति प्रियीकृत्य सुखं शिश्ये सुप्त । क इव असुरारि रिव यथा असुराणां अरिः असुरारिर्नारायण शेषे सुखं स्वपिति । किंविशिष्टो भगवान् विवाहदीक्षाविधिवित् विवाहस्यदीक्षा विवाहसत्कदीक्षा तस्या विधिः आचारस्तं वेत्ति इति । किं कृत्वा शिश्ये सखीभ्यामिव वधूभ्यां सुमंगलासुनन्दाभ्यां नर्मणः केलयस्ता क्रीडाकौतुकानि कृत्वा ॥ २४ ॥

**त्रिरात्रमेवं भगवानतीत्या-निरुद्धपित्रानुपरुद्धचित्तः ।**
**ततस्तृतीयेऽपिपुमर्थसारे, प्रावर्तनावक्रमतिः क्रमज्ञः ॥ २५ ॥**

(व्या०) त्रिरात्रमिति । भगवान् एवं अमुना प्रकारेण त्रिरात्रं (संख्यासमाहारे च द्विगुश्चानाम्न्ययम् । ३ । १ । ९९ । इ सू संख्यापूर्वकद्विगुः । सङ्ख्यातैकपुण्यवर्षादीर्घाच्चरात्रेरत् । ७ । ३ । ११९ । इ सू रात्रिशब्दात् अत् प्रत्यय समासान्त ।) रात्रित्रय तिसृणां रात्रीणां समाहारस्तत् अतीत्य अतिक्रम्य ततस्ततोऽनन्तरं तृतीयेऽपि पुमर्थसारे पुमर्थेषु सारस्तस्मिन् पुरुषार्थरहस्ये कामाख्ये प्रावर्तत । किंलक्षणो भगवान् अनिरुद्धपित्रा अनिरुद्धस्य पिता तेन कामेन न उपरुद्धं अनुपरुद्धं अनासक्तं चित्तं हृदयं यस्य स· अनुपरुद्धचित्त· । अवक्रमतिः न वक्रा अवक्रा सरला मतिर्बुद्धिर्यस्य सः अकुटिलबुद्धि. । क्रमं जानातीति क्रमज्ञः धर्मार्थकामादीनां क्रमज्ञ ॥ २५ ॥

**भोगार्हकर्म ध्रुववेद्यमन्य-जन्मार्जितं स्वं स विभुर्विबुध्य ।**
**मुक्त्येककामोऽप्युचितोपचारै-रभुङ्क्त ताभ्यां विषयानसक्तः ॥२६॥**

(व्या०) भोगार्ह इति । स विभु· अन्यजन्मार्जितं अन्यत् च तत् जन्म च अन्यजन्म अन्यजन्मनि अर्जितं तत् प्राग्जन्मन्युपार्जितं स्वं आत्मीयं भोगार्हकर्म भोगार्हं (अर्होऽच् । ५ । १ । ९१ । इ सू. भोगपूर्वकअर्हधातो अच् प्रत्यय· भोगमर्हतीति भोगार्हम् ।) च तत् कर्म च तत भोगफलं कर्म ध्रुववेद्यं अवश्यभोक्तव्यं विबुध्य ज्ञात्वा मुक्त्येककामोऽपि मुक्तौ एव एक· कामोऽभिलाषो यस्य स· सन् उचितोपचारै उचिताश्चते उपचाराश्च तै· शीतग्रीष्मवर्षर्तुयोग्योपहारै· असक्तोऽनासक्त सन् ताभ्यां सुमङ्गलासुनन्दाभ्यां समं विषयानभुङ्क्त ॥

**न तस्य दासीकृतवासवोऽपि, मनो मनोयोनिरियेष जेतुम् ।**
**विगृह्णते स्वस्य परस्य मत्वा, ये स्थाम तानाश्रयते जयश्रीः ॥ २७ ॥**

(व्या०) न इति । मनोयोनिः मनोयोनिरुत्पत्तिस्थानं यस्य स· कंदर्प. दासीकृतवासवोऽपि न दासा अदासा अदासाः दासाः कृता इति दासीकृताः दासीकृता. वासवा इन्द्रा येन सः दासीकृतवासवोऽपि सन् तस्य भगवतो मनो

जेतुं न इयेष न वांछितवान् । ये पुरुषाः स्वस्य आत्मीयस्य परस्य स्थाम बलं मत्वा ज्ञात्वा विगृह्णते विग्रहं कुर्वन्ति जयश्रीः जयस्य श्रीस्तानाश्रयते ॥२७॥

**श्रोतांसि पञ्चापि न पुष्पचाप–चापल्यमातन्वत तस्य नेतुः ।**
**स्वदेहगेहांशनिवासिनां यो, न शासकः सोऽस्तु कथं त्रिलोक्याः ॥**

(व्या०) श्रोतांसि इति । तस्य नेतुः स्वामिनः पञ्चापि श्रोतांसि इन्द्रियाणि पुष्पचापचापल्यं पुष्पाणि चापं धनुर्यस्य सः पुष्पचापः कामस्तस्य चापल्यं तत् कंदर्प्पसत्कचपलत्वं न जतन्वत नाकुर्वन् । यः स्वदेहगेहांशवासिनां स्वस्य देह एव गेहस्यांशः स्वीयदेहरूपगृहकोणः तस्मिन् वसन्तीति वासिनस्तेषां न न शासको न शिक्षकः स त्रिलोक्या. त्रयाणां लोकानां समाहारस्त्रिलोकी (संख्यासमाहारे च द्विगुश्चानाम्न्ययम् । ३ । १ । ९९ । इ. सू. द्विगुसमासः । द्विगोः समाहारात् । २ । ४ । २२ । इ. सू. स्त्रियां ङी ।) तस्या शासकः शिक्षकः कथमस्तु ॥ २८ ॥

**या योषिदेनं प्रतिदृष्टिभल्ली–श्चिक्षेप बाधाकरकामबुद्ध्या ।**
**तामप्यवैक्षिष्ट दृशा स साम्य–स्पृशैव शक्तौ सहना हि सन्तः ॥२९॥**

(व्या०) या इति । या योषित् स्त्री तं भगवन्तं प्रति बाधाकरकामबुद्ध्या बाधां पीडा करोति इत्येवंशीलः स चासौ कामः कंदर्प्पस्तस्य बुद्धिस्तया दृष्टिभल्ली. दृष्टय एव भल्लयस्ताः चिक्षेप । बाधाकरकामबुद्ध्येति कामस्तस्या बाधाकरोऽस्ति । भगवन्तं दृष्ट्वा तया चिन्तितम् । एष एव कामस्ततोऽहमपि एनं हन्मीति बुद्ध्या दृष्टिभल्लीश्चिक्षेप इति भाव. । स भगवान् तामपि स्त्रियं साम्यं स्पृशतीति साम्यस्पृक् तया साम्यस्पृशैव दृशा रागरहितदृशा अवैक्षिष्ट व्यलोकयत् । हि निश्चितं सन्तो विद्वांसः शक्तौ सत्यां सहनाः सहन्ते इति सहनाः (नन्द्यादिभ्योऽनः । ५ । १ । ५२ । इ. सू. सह्धातोः अनप्रत्ययः ।) वर्तन्ते । 'ज्ञाने मौनं क्षमा शक्तौ, त्यागे श्लाघाविपर्यय' । इतिन्यायात् ॥ २९ ॥

**नासौ विलासोर्मिभिरप्सरोभि–रक्षोभि नाट्यावसरागताभिः ।**
**श्रोतःपतेर्योमनसोऽपि शोषे, प्रभूष्णुते तस्य किमत्र चित्रम् ॥ ३० ॥**

(व्या०) नासाविति ॥ असौ भगवान् नाट्यावसरागताभिः नाट्यस्य अवसर. समयस्तस्मिन् आगतास्ताभिः अप्सरोभिर्देवांगनाभिः पक्षे अपूप्रधानैः सरोभिः । विलासोर्मिभिः विलासा एव ऊर्मयः तैः विलासरूपैः ऊर्मिभिः कल्लोलैः न अक्षोभि न क्षोभित बिलासो नेत्रजो ज्ञेयः । यो भगवान् श्रोतः पतेः श्रोतसां इन्द्रियाणां पतिः श्रोत पति तस्य श्रोतःपतेः मनसोऽपि समुद्रस्य वा गोषे प्रभूयते (क्यङ् । ३ । ४ । २६ । इ. सू. प्रभुशब्दात् आचारेऽर्थे क्यङ् । इङितः कर्तरि । ३ । ३ । २२ । इ. सू. क्यङोङित्वादात्मनेपदम् । दीर्घश्च्वि यङ् यक् क्येषु च । ४-३-१०८ । इ. सू. दीर्घ । प्रभुरिव आचरतीति प्रभूयते) समर्थो भवति । तस्य भगवतोऽत्र अप्सरोभिरक्षोभणे किं चित्रं किमाश्चर्यम् ॥

**जगे न गेयेष्वपि नाकसद्भिः, स्मरस्य साराधिकता पुरोऽस्य ।**
**शांतं सतां वर्धयितुं विरोधं, लोला कथं सौमनसी विलोला ॥ ३१ ॥**

(व्या०) जग इति । नाकसद्भिः नाके स्वर्गे सीदन्ति गच्छन्ति इति नाकसदः (नकं अकं दु खं । नविद्यते अकं दुःखं अस्मिन्निति नाकः स्वर्गः । नखादय. । ३ । २ । १२८ । इ. सू. नाकशब्दस्य नखादित्वात् अन्स्वरे । ३ । २ । १२९ । इ. सू. अनादेशभावः । क्विप् । ५ । १ । १४८ । इ. सू. नाकपूर्वकसद्धातोः क्विप् प्रत्ययः ।) तैः देवैरस्य भगवतः पुरोऽग्रे गेयेष्वपि (आत्सन्ध्यक्षरस्य । ४ । २ । १ । इ. सू. गैधातोराकारः । यएचातः । ५ । १ २८ । इ. सू. यप्रत्ययः च आकारस्य एकारः । गातुं योग्यानि गेयानि ।) गीतेष्वपि स्मरस्य कंदर्पस्य साराधिकता सारस्य बलस्य अधिकता साराधिकता बलाधिकत्वं न जगे न गीयते स्म । सौमनसी सुमनसां देवानां सतां वा इयं सौमनसी लोला जिह्वा सतां साधूनां शान्तमुपशान्तं विरोधं वर्धयितुं कथं विलोला चञ्चला स्यात् अपि तु नैव स्यात् ॥ ३१ ॥

**अवारि वैराग्निविवर्धनोऽपि, तं नारदो जीप्सुरनन्यजौजः ।**
**जीवन्नसौ जीवमणान्नियोध्य, मां भूरिशस्तोषयितेतिबुद्ध्या ॥ ३२ ॥**

(व्या०) अवारि । नारदो (आतोडोऽह्वावाम· । ५ । १ । ७६ । इ. सू नारकर्मपूर्वक दोधातो· ड. । नारं नरसमूहं द्यति भिनत्ति इति नारद । ङस्युक्तं कृता । ३ । १ । ४९ । इ. सू समासः) वैराग्निविवर्धनोऽपि वैरमेवाग्निस्तस्य-विवर्धनः (नन्द्यादिभ्योऽन· । ५ । १ । ५२ । इ. सू. अन· । विवर्धयति इति विवर्धन ।) वैररूपाग्निविवर्धनशीलोऽपि तं भगवन्तं अनन्यजौज. अनन्यजस्य कामस्य ओजोबलं तत् ज्ञीप्सुर्ज्ञापयितुमिच्छुः सन् इतिवुद्धचा अवारि वारितवान् । इतोति किं असौ कंदर्प्प· कामो जीवन् जीवतीति जीवन् सन् जीवगणान् जीवानां गणास्तान् जीवसमूहान् नियोध्य संग्रामे पातयित्वा मां भूरिशो बहु-वारान् तोषयिता हर्षं प्रापयिष्यति । अत्र नारदवर्णनं कविधर्मत्वात् भाविनि· भूतवदुपचार इति न्यायाद्वा ॥ ३२ ॥

**आद्यापि या तस्य सुमंगलेति, हेतिः स्मरस्यास्खलिता रराज ।**
**रंभाप्यरं भारहिता यदग्रे, रूपं रतेरप्यरतिं तनोति ॥ ३३ ॥**

(व्या०) आद्या इति । तस्य भगवत. आद्या (दिगादिदेहांशाद्य. । ६ । ३ । १२४ । इ. सू. आदिशब्दस्य दिगादिपाठात् भवेऽर्थे यप्रत्यय आदौ भवा आद्या ।) प्रथमा प्रिया सुमंगला इति रराज शोभिता । किंलक्षणा सुमंगला स्मरस्य कंदर्प्पस्य अस्खलिता न स्खलिता अस्खलिता हेतिः (सातिहेतियूतिजूति-ज्ञप्तिकीर्ति. । ५ । ३ । ९४ । इ. सू. क्त्यन्तो निपात्यते हन्यते अनया इति हेति ।) प्रहरणम् । रंभापि अरं अत्यर्थं यदग्रे यस्या. सुमंगलाया अग्रं तस्मिन् भारहिता प्रभारहिता जाता । यदग्रे रतेरपि कामभार्याया अपि रूपं अरति अस-माधि तनोति करोति ॥ ३३ ॥

**यज्ज्वालमालायुजि कांचनेना-हुतिः स्वतन्वा विहिता हुताशे ।**
**तत्तेन तुष्टेन यदङ्गवर्ण-सवर्णतादायि मनाक्किमस्मै ॥ ३४ ॥**

(व्या०) यदिति । कांचनेन सुवर्णेन हुताशे (कर्मणोऽण् । ५ । १ । ७२ । इ. सू. हुतपूर्वक अशूधातोः अण् प्रत्यय· ।) हुतमश्नातीति हुताशस्तस्मिन् वैश्वानरे यत् स्वतन्वा स्वस्य तनुः तया स्वतन्वा निजशरीरेण आहुतिर्विहिता ।

(क्तक्तवतू । ५ । १ । १७४ । इ सू. विपूर्वक धाधातोः क्त प्रत्यय धागः । ४ । ४ । १५ । इ सू. धाधातो क्तपरे हिरादेश ।) किं लक्षणे हुताशे ज्वालानां माला पङ्क्तय ताभिर्युज्यते तस्मिन् ज्वालाश्रेणियुक्ते । तत् तस्मात्कारणात् तुष्टेन तेन हुताशेन मनाक् स्तोकतरा अस्मै काञ्चनाय यदङ्गवर्णसवर्णता यस्याः सुमंगलाया अङ्गस्य वर्ण तेन सह सवर्णता सदृशता अदायि दत्ता ॥

**पद्मं न चन्द्रं प्रति सप्रसाद, तस्योदितः सोऽपि ददाति सादम् ।**
**यस्या मुखं द्वावपि तावलुप्त, श्रीमान् परस्फातिसहः क हन्त ॥३५॥**

(व्या०) पद्ममिति । पद्मं कमलं चन्द्रं प्रति न सप्रसादं प्रसादेन सह वर्तते इति सप्रसादम् सुप्रसन्नं न उदितः उदयं प्राप्त सोऽपि चन्द्रोऽपि तस्यपद्मस्य सादं खेदं ददाति । यस्या सुमंगलाया मुखं कर्तृपदं तौ द्वावपि पद्मचन्द्रौ अलुप्त लुम्पति स्म । हन्त इति वितर्के श्रीमान् श्रीर्लक्ष्मीरस्यास्तीति श्रीमान् लक्ष्मीवान् परस्फातिसहः परस्य स्फातिर्वृद्धिस्तां सहते इति परस्फातिसहः कं वर्तते । श्रीर्लक्ष्मीः शोभा वा सुखे वसतीति श्रीमत्त्वम् ॥ ३५ ॥

**पूर्वं रसं नीरसतां च पश्चा–द्विवृण्वतो वृद्धिमतो जलौघैः ।**
**जगज्जने तृप्यति तद्गिरैव–स्थानेऽभवन्निष्फलजन्मतेक्षोः ॥ ३६ ॥**

(व्या०) पूर्वमिति । इक्षो. निष्फलजन्मता निष्फलं च तत् जन्म च निष्फलजन्मनो भाव अभवत स्थाने युक्तम् । किंकुर्वत इक्षो पूर्वप्रथमं रसं पश्चात् नीरसतां नीरसस्य भावस्तां विवृण्वतः विवृणोतीति विवृण्वन् तस्य प्रकटयत. । जलौघैः जलानां ओघा समूहा जलौघास्तै. पानीयसमूहैर्डलयोरैक्यात् जडसमूहै र्वा वृद्धिमत वृद्धिरस्यास्तीति वृद्धिमान् तस्य वृद्धियुक्तस्य । क सति तद्गिरा एव तस्याः सुमंगलाया गी तया तद्गिरा एव जगज्जने जगतोजन स्तस्मिन् लोके तृप्यति तृप्यतीति तृप्यन् तस्मिन् सति तृप्तिं प्राप्नुवति सति इत्यर्थ ॥ ३६ ॥

**यया स्वशीलेन ससौरभाङ्ग्या, श्रीखंडमन्तर्गडुतामनायि ।**
**देवार्चने स्वं विनियोज्य जात–पुण्यं पुनर्भोगिभिराप योगम् ॥३७॥**

(व्या०) यया इति । यया सुमंगलया श्रीखंडं अन्तर्गडुतां निरर्थकतां अनायि । किंलक्षया सुमंगलया स्वशीलेन स्वस्यशीलं तेन ससौरभाङ्ग्या सौरभेन सह वर्तते इति ससौरभं (ग्वृवर्णाल्लघ्वादेः । ७ । १ । ६९ । इ. सू. सुरभिशब्दात् भावे अण् । ) अङ्गं यस्याः सा तया परिमलसहितशरीरया शीलपरिमलवासितदेहेन चन्दनमधरीकृतमित्यर्थः । पुनः देवार्चने देवानामर्चनं तस्मिन् स्वं विनियोज्य व्यापार्य जातपुण्यं जातं पुण्यं यस्य तत् सत् श्रीखंडं चन्दनं भोगिभिः सर्पैः भोगिभिः पुरुषैर्वा योग माप ॥ ३७ ॥

**गरेण गौरीशगलो मृगेण, गौरद्युतिर्नीलिकयाम्बु गाङ्गम् ।**
**मलेन वासः कलुषत्वमेति, शीलं तु तस्या न कथंचनापि ॥ ३८ ॥**

(व्या०) गरेणेति । गौरीशगल गौर्याः पार्वत्या ईशः स्वामी शिवः तस्य गलः कंठः ईश्वरकंठो गरेण विषेण कलुषत्वं एति प्राप्नोति । गौरद्युतिः गौरा शुभ्रा द्युतिः कान्तिर्यस्य स चन्द्रो मृगेण कलुषत्वमेति । गाङ्गं गङ्गाया इदं अम्बु पानीयं नीलिकया सेवालेन कलुषत्वमेति । वासो वस्त्र मलेन कलुषत्वमेति तु पुनस्तस्याः सुमंगलायाः शीलं कथंचनापि कथमपि कलुषत्वं नैति । ईश्वरचन्द्रादिभ्योऽपि निर्म्मलं शीलमित्यर्थः ॥ ३८ ॥

**उदारवेदिन्युरुमानभित्तौ, सद्वारशोभाकरणोत्तरंगे ।**
**उवास वासौकसि वर्म्मणा या, गुणैस्तु तैस्तैर्हृदि विश्वभर्तुः ॥ ३९ ॥**

(व्या०) उदार इति । या सुमंगला वर्म्मणा (मन् । ९११ । इ. सू. सू. वृषू सेचने धातोः मन् प्रत्यय. वर्षति मलानिति वर्ष्म ।) शरीरेण वासौकसि वासस्य ओकः तस्मिन् भवने उवास वसति स्म । तु पुनस्तैस्तैर्गुणैः सुरूपा सुभगा सुवेषा सुरतप्रवीणा सुनेत्रा सुखा श्रिया भोगिनी विचक्षणा प्रियभाषिणी प्रसन्नमुखीप्रमृतिगुणैर्विश्वभर्तुः श्रीऋषभदेवस्य हृदि उवास । किंलक्षणे वासौकसि विश्वभर्तुर्हृदि वा उदारवेदिनि उदारा वेदा वा वरंडिका यस्मिन् तत् उदारवेदि तस्मिन् उदारवेदिनि पक्षे उत्कृष्टज्ञाने । पुनः उरुमानभित्तौ उरु मानं प्रमाणं यासां ता उरुमानाः गुरुप्रमाणा भित्तयो यस्मिन् तत् तस्मिन् उरुमानभित्तौ पक्षे

उर्वी मानस्य गर्वस्य भित्तिः क्षयो यस्मात् तस्मिन् उरुमानभित्तौ । अत्र 'वान्यतः पुमांष्टादौ स्वरे' इति पुल्लिंगात् नागमाभाव सद्द्वारशोभाकरणोत्तरंगे सत् च तत् द्वारं च तत्य शोभायाः करण उत्तरंगो यस्मिन् तत् तस्मिन् । पक्षे सतां द्वारस्य समूहस्य सत् प्रशस्यहारस्य वा शोभायाः करणे करणेन वा उतरङ्गे उत्कल्लोले ॥

**घनागमप्रीणितसत्कदम्बा, सारस्वतं सा रसमुद्गिरन्ती ।**
**रजोव्रजं मंजुलतोपनीत–छाया घ्नती प्रावृषमन्वकार्षीत् ॥ ४० ॥**

(व्या०) घनागमेति । सा देवी सुमङ्गला प्रावृषं श्रावणभाद्रपदजातं वर्षाऋतुमन्वकार्षीत् अनुचकार । किंविशिष्टा सुमङ्गला च किंविशिष्टां प्रावृषं घनागमप्रीणितसत्कदम्बा घनाश्च ते आगमाश्च शास्त्राणि तै प्रीणिताः सतां कदम्बाः समूहा यया सा घनागमप्रीणितसत्कदम्बा । वर्षापक्षे अर्थवशाद्विभक्तिपरिणामः घनागमप्रीणितसत्कदम्बां घनानां मेघानां आगमेन प्रीणिता सन्तः प्रधानाः कदम्बाः कदम्बवृक्षा यया सा ताम् । सारस्वतं (तस्येदम् । ६ । ३ । १६० । इ. सू. इदमर्थे प्राग्जितादण् । ६–१–१३ । इ. सू. सरस्वतीशब्दादण् । ) सरस्वत्या अयं तं रसं सरस्वतीसत्करसं सारं उद्गिरन्ती प्रकटयन्ती । पक्षे सरस्वतीरसं सरस्वतीनदीजलमुद्गिरन्तीं । रजोव्रजं रजसां व्रजस्तं पापव्रजं घ्नती क्षयं नयन्ती पक्षे रजोव्रजं रेणुसमूहं क्षयं नयन्तीं । पुनः मञ्जुलतोपनीतछाया मञ्जुलता मनोज्ञत्वं तया उपनीता ढौकिता छाया कान्तिर्यस्याः सा पक्षे मंजवो मनोज्ञाः ताश्चलताश्च ताभिरुपनीता छाया यस्याः तां मञ्जुलतोपनीतछायाम् ॥

**स्मेरास्यपद्मा स्फुटवृत्तशालि–क्षेत्रा नदद्धंसकचारुचर्या ।**
**याऽपास्तपङ्का विललास पुण्य–प्रकाशकाशा शरदङ्गिनीव ॥ ४१ ॥**

(व्या०) स्मेरास्यपद्मा इति ॥ सा सुमङ्गला अङ्गिनी अंगमस्या अस्तीति अङ्गिनी मूर्तिमती शरदिव अश्वयुक्कार्तिकसत्कऋतुवत् विललास । किं लक्षणा सुमंगला शरद् वा स्मेरास्य पद्मा स्वेरं विकस्वरं आस्यमेव पद्मं मुखकमलं यस्याः सा पक्षे स्मेरं आस्यमिव पद्मं मुखवत्कमलं यस्याः सा स्मेरकमला स्फुटवृत्तशालिक्षेत्रा स्फुटं प्रकटं औदार्यधैर्यगांभीर्यमाधुर्यादिवृत्तेन चरित्रेण शालि शोभमानं

क्षेत्रं शरीरं यस्याः सा। पक्षे स्फुटानि प्रकटानि वृत्तानि जातानि शालीनां क्षेत्राणि यस्यां सा। नदद्धंसकचारुचर्या नदद्भ्यां शब्दायमानाभ्यां हंसकाभ्यां नूपुराभ्यां चारुर्मनोज्ञा चर्या ( समजनिपन्निपदशीड्सुग् विदि चरिमनीणः। ५-३-९९। इ. सू. स्त्रियां नाम्नि चरधातोः क्यप्। आत् इ. सू. आप्।) गमनं यस्याः सा पक्षे नदन्तीति नदन्तः शब्दं कुर्वाणा. ते च ते हंसकाश्च तेषां हंसकानां चारुः चर्या यस्यां सा। अपास्तपङ्का अपास्त पङ्कः पापरूपकर्दमो यया सा पक्षे शोषितकर्दमा। पुण्यप्रकाशकाशा पुण्यप्रकाशिका आशा यस्याः सा पक्षे पुण्याः पवित्राः प्रकाशाः प्रकटाः काशा यस्यां सा ॥ ४१॥

**सत्पावकार्चिः प्रणिधानदत्ता-दरा कलाकेलिबलं दधाना।**
**श्रियं विशालक्षणदा हिमर्त्तोः, शिश्राय सत्यागतशीतलास्या ॥४२॥**

**(व्या०)** सत्पावक इति। सा सुमंगला हिमर्तोः मार्गशीर्षपौषसंबधिनीं श्रियं शोभां शिश्राय। किं लक्षणा सुमंगला हिमर्तुश्च अत्रापि अर्थवशाद्विभक्तिपरिणामः सत्पावकार्चिःप्रणिधानदत्तादरा सत् प्रधानं पावकं पावित्र्यकारकं अर्चिः तेजः परब्रह्मरूपं तस्मिन् प्रणिधानं ध्यानं येषां ते सत्पावकार्चिःप्रणिधानास्तेभ्यो दत्त आदरो यया सा। पक्षे सत् प्रधानं पावकस्याग्नेः अर्चिस्तेज 'तस्य प्रणिधाने दत्तादरा। पुनः कलाकेलिबलं दधाना। कलासु केलिबलं क्रीडाबलं तत् धत्ते इति दधाना। पक्षे कलाकेलेः कंदर्पस्य बलं दधाना। कला कामं निकामं सेवते शीतकाले इति वचनात्। पुनः विशालक्षणदा विशालश्चासौ क्षणश्च विशालक्षणः विस्तीर्णक्षणस्तं ददातीति विशालक्षणदा पक्षे विशाला क्षणदा रात्रिर्यस्यां सा। पुनः सत्यागतशीतलास्या त्यजनं त्यागः सह त्यागेन वर्तते इति सत्यागः एवंविधस्तकारो यस्मिन् स सत्यागतः एतावतातरहित. शीतल शब्दः शील इति स्यात् तस्मिन् शीले आस्था निवेशो यस्याः सा सत्यागतशीतलास्या शीले निश्चला इत्यर्थः पक्षे सत्येन आगतस्य शीतस्य लास्यं यस्यां सा ॥ ४२ ॥

**सत्रं विपत्रं रचयन्त्यदभ्रा-गमं क्रमोपस्थितमारुतौघा।**
**सा श्रीदकाष्ठामिनमानयन्ती, गोष्ठ्यां विजिग्ये शिशिरर्तुकीर्तिम् ॥४३॥**

(व्या०) सत्रमिति । सा सुमंगला शिशिरर्तुकीर्ति शिशिर इतिऋतुस्तस्य कीर्तिस्तां माघफाल्गुनयो: कीर्ति विजिग्ये ( परावेर्जे: । ३–३–२ । इ. सू. विपूर्वकजिधातो आत्मनेपद विधीयते । परोक्षे । ५–२–१२ । इ. सू. विपूर्वकजिधातो: परोक्षाया. आत्मनेपदस्य प्रथमपुरुषैकवचने ए प्रत्यये विजि ए द्विर्धातुः परोक्षाङे प्राक् तु स्वरेस्वरविधे: । ४–१–१ । इ. सू द्वित्वेविजिजिए इति । जेर्गि: सन्परोक्षयो । ४–१–३५ । इ. सू. परस्यजे: गि आदेशे विजिगि ए इति जाते । योऽनेकस्वरस्य । २–१–५६ । इ सू यकारे कृते विजिग्ये इति । ) जितवती किं कुर्वती सुमंगला हि शिशिरर्तुश्च सत्रं सत्रागारं विपत्त्रं विपदस्त्रायते इति विपत्त्रं तत् विपत्त्रायकं विपदो रक्षकं रचयतीति रचयन्ती कुर्वती पक्षे सत्रं वनं विगतानि पत्राणि यस्मात् तत् विपत्रं पत्ररहितं किंलक्षणं सत्रं वनं च अदभ्रागमं अदभ्रो बहु: आगमो जनानामागमनं यस्मिन् तत् पक्षे आगमा वृक्षा: बहुवृक्षमित्यर्थ: । पुन: क्रमोपस्थितमारुतौघा क्रमयोश्चरणयोरुपस्थित: मारुतानां देवानामोघ: समूहो यस्या. सा पक्षे क्रमेण उपस्थित: मारुतौघ: पवनसमूहो यस्यां सा । पुन: किंकुर्वती इनं स्वामिनं गोष्ठ्यां श्रीदकाष्ठां श्रीदानां लक्ष्मीदायकानां काष्ठां कोटिं आनयन्ती गोष्ठ्यां सखीमध्ये वार्तायां स्वामिनं लक्ष्मीदायकत्वेन श्लाघयन्तीति भाव: ॥ पक्षे इनं सूर्यं श्रीदस्य धनदस्य काष्ठामुत्तरदिशामानयन्ती ॥ ४३ ॥

**उल्लासयन्ती सुमन:समूहं, तेने सदालिप्रियतामुपेता ।**
**वसन्तलक्ष्मीरिव दक्षिणा हि–कान्ते रुचिं सत्परपुष्टघोषा ॥ ४४ ॥**

(व्या०) उल्लासयन्ती इति । दक्षिणा अनुकूला सुमंगला हि निश्चितं कांते श्रीऋषभदेवे भर्तरि वसन्तलक्ष्मीरिव वसन्तस्य लक्ष्मी: चैत्रवैशाखसत्कऋतुरिव रुचिमभिलापं तेने ( तन् ए इति दशायां अनादेशादेरेकव्यञ्जनमध्येऽत: । ४–१–२४ । इ. सू. एकारे तेने इति । ) विस्तारयामास । वसन्तलक्ष्मी दक्षिणस्या दिश. अहिकान्त पवनस्तस्मिन् रुचिं विस्तारयति । किं कुर्वती सुमंगला वसन्तलक्ष्मीश्च सुमन समूह शोभनं मनो येषां ते सुमनस: उत्तमास्तेषां

समूहस्तं उल्लासयन्ती पक्षे सुमनसः पुष्पाणि तेषां समूहमुल्लासयन्ती । पुनः सदा सर्वदा आलिप्रियतां प्रियस्यभावः प्रियता आलीनां सखीनां प्रियता प्रियत्वं तां उपेता पक्षे अलयो भ्रमरास्तेषां प्रियतामुपेता प्राप्ता । पुन. सत्परपुष्टघोषा सत्सु साधुषु परः प्रकृष्टः पुष्टो घोषः प्रसिद्धिरूपो यस्या. सा पक्षे सन् विद्यमानः परपुष्टानां कोकिलानां घोष. शब्दो यस्यां सा ॥ ४४ ॥

**संयोज्य दोषोच्छ्रयमल्पतायां, शुचिप्रभां प्रत्यहमेधयन्ती ।**
**तारं तपः श्रीरिव सातिपट्वी, जाड्याधिकत्वं जगतो न सेहे ॥ ४५ ॥**

(व्या०) संयोज्येति । सा सुमंगला तारमत्यर्थं तपःश्रीरिव ग्रीष्मलक्ष्मीरिव ज्येष्ठाषाढसत्कऋतुरिव जगतो विश्वस्य जाड्याधिकत्वं जडस्य भावो जाड्यं तस्याधिकत्वं तत् मूर्खत्वं जलाधिकत्वं वा न सेहे । किं कुर्वती दोषोच्छ्रयं दोषाणां दूषणानामुच्छ्रयोविस्तारस्तं पक्षे दोषा रात्रिस्तस्या उच्छ्रायो विस्तारस्तं अल्पतायां अल्पस्य भाव अल्पता तस्यां संयोज्य प्रत्यहं (योग्यतावीप्सार्थानतिवृत्तिसादृश्ये । ३–१–४० । इ. सू. वीप्सायामव्ययीभाव । अहः अह प्रति इति प्रत्यहम् ।) निरन्तरं शुचिप्रभां शुचिर्निर्मला प्रभा यस्याः सा तां पक्षे शुचेः सूर्यस्य प्रभा तामेधयन्ती वर्धयन्ती पुनः अतिपट्वी ( स्वरादुतोगुणादखरो. । २–४–३५ । इ. सू. स्त्रियां अतिपटु शब्दात् विकल्पेन ङी ) विदुषी पक्षे अतिशयेन पट्वी तीव्रा ॥ ४५ ॥

**परांतरिक्षोदकनिष्कलंका, नाम्ना सुनन्दा नयनिष्कलङ्का ।**
**तस्मै गुणश्रेणिभिरद्वितीया, प्रमोदपूरं व्यतरद् द्वितीया ॥ ४६ ॥**

(व्या०) परा इति । तस्मै भगवते श्रीऋषभाय परा अन्या नाम्ना सुनन्दा द्वितीया ( द्वेस्तीयः । ७–१–१६५ । इ. सू. द्विशब्दात् संख्यापूरणेऽर्थे तीयप्रत्ययः । आत् इति सूत्रेण आपि कृते द्वितीया । ) कलत्रं प्रमोदपूरं प्रमोदस्य हर्षस्य पूरस्तं व्यतरत् ददौ । किंलक्षणा सुनन्दा अन्तरिक्षोदकनिष्कलङ्का अन्तरिक्षस्य आकाशस्य उदकं जलं तद्वत् निष्कलङ्का निर्मला पुनः नयनिष्कलङ्का नय एव निष्कं सुवर्णं तस्य लंका तस्यां हि लंकायां सुवर्णं प्रचुरं पुन गुण-

श्रेणिभिः गुणानां श्रेणयस्ताभिः विनयविवेकविचारशीलप्रभृतिगुणसमूहैः अद्वितीया मनोज्ञा ॥ ४६ ॥

**तयोः सपत्न्योरपि यत्प्रसन्न–हृदोर्मदोद्रेकविविक्तमत्योः ।**
**अभूद्भगिन्योरिव सौहृदं स, सुस्वामिलाभप्रभवः प्रभावः ॥ ४७ ॥**

(व्या०) तयोरिति ॥ तयोः सुमंगलासुनन्दयोः सपत्न्योः (समान पतिर्ययोस्ते सपत्न्यौ समानस्य धर्मादिषु । ३–२–१४९ । इ. सू. समानस्य स आदेशः सपत्न्यादौ । २–४–५० । इ. सू. स्त्रियां पतिशब्दात् ङीः च अन्तस्य न् । ) रपि सत्योः भगिन्योरिव यत् सौहृदं प्रेम अभूत् । किंविशिष्टयोस्तयोः प्रसन्नहृदोः प्रसन्नं हृदयं ययोस्तयोः पुनः मदोद्रेकविविक्तमत्योः 'जातिलाभकुलैश्वर्यबलरूपतप श्रुतै' एषोऽष्टप्रकारो मदः तस्य मदस्य उद्रेक आधिक्यं तेन विविक्ता रहिता मतिर्ययोस्तयोः मदाधिक्यरहितबुद्ध्योः । सुस्वामिलाभप्रभवः शोभनः स्वामी सुस्वामी तस्य लाभः प्राप्तिः स प्रभवः कारणं यस्य सः भव्यभर्तृप्राप्तेरुत्पन्नः स प्रभावो ज्ञेयः ॥ ४७ ॥

**आत्मोचितामालिमनाप्नुवत्यौ, त्रिलोकभर्तुर्हृदयंगमे ते ।**
**सुरालयस्वामिनिबद्धरुच्या, शच्यापि सख्या समलज्जिषाताम् ॥४८॥**

(व्या०) आत्म इति । त्रिलोकभर्तुः त्रय अवयवा यस्या सः त्र्यवयवः स चासौ लोकश्च त्रिलोकस्तस्य भर्ता स्वामी तस्य श्रीयुगादिजिनस्य हृदयंगमे (नाम्नो गमः खड्डौ च विहायसस्तु विहः । ५–१–१३१ । इ. सू. हृदयपूर्वकगम् धातोः खप्रत्ययः । खित्यनव्ययारुषोर्मोऽन्तो ह्रस्वश्च । ३–२–१११ । इ. सू. मोऽन्तः । ) हृदयं गच्छतः इति हृदयंगमे ॥ ते कलत्रे सुमंगलासुनन्दे शच्यापि इन्द्राण्यापि सख्यौ समलज्जिषातां लज्जिते । किंकुर्वत्यौ आत्मोचितां आत्मन उचिता योग्या तामालिंसखीं अनाप्नुवत्यौ अप्राप्ते । किंलक्षणया शच्या सुरालयस्वामिनिबद्धरुच्या सुराणामालयः स्थानं सुरालयो 'देवलोक' सुराया मदिरायाः आलयः सुरालयो मदिरागृहं तस्य स्वामी भर्ता इन्द्रस्तस्मिन् निबद्धारुचिरभिलाषो यया सा तया ॥ ४८ ॥

**तयो रहंपूर्विकया निदेशं, विधित्समानासु गताभिमानम् ।**
**स्वर्गं गतास्वप्यमराङ्गनासु, ययौ न जातु प्रशमं विवादः ॥ ४९ ॥**

(व्या०) तयोरिति । तयोः सुमंगलासुनन्दयोः निदेशमादेशमहपूर्विकया (अहं पूर्वं इति यस्यां सा अहंपूर्विका मयूरव्यंसकादित्वात् निपातः ।) अहमहमिकया अमराङ्गनासु अमराणां देवानामङ्गना नार्यस्तासु गताभिमानं निरहंकारं यथा भवति तया विधित्समानासु (मिमीमादामित्स्वरस्य । ४-१-२० । इ. सू. विपूर्वक सन्नन्तधाधातो सनि परे इत् न च द्विः ।) विधातुमिच्छन्तीति विधित्सन्ते विधित्सन्ते इति विधित्समानास्तासु कर्तुमिच्छन्तीषु स्वर्गं गतासु अपि जातु कदाचिदपि विवादः प्रशमं उपशान्तिं न ययौ ॥ ४९ ॥

**उपाचरद् द्वे अपि तुल्यबुद्ध्या, प्रभुः प्रभापास्ततमःसमूहः ।**
**उच्चावचां नस्वरुचिं तनोति, भास्वन्निलीनालिषु पद्मिनीषु ॥ ५० ॥**

(व्या०) उपाचारदिति । प्रभुः श्रीऋषभस्वामी ते द्वे अपि कलत्रे तुल्यबुद्ध्या तुल्याचासौ बुद्धिश्च तुल्यबुद्धिस्तया सदृशभावेन उपाचरत् असेविष्ट । किंलक्षणः प्रभुः प्रभापास्ततमःसमूहः प्रभया कान्त्या अपास्तो निराकृतः तमसां समूहो येन सः प्रभानिराकृतान्धकारपटलः । भास्वान् सूर्यः निलीनालिषु निलीना अलयो भ्रमरा यासु ताः आलयः सख्यः एवं विधासु पद्मिनीषु कमलिनीषु स्त्रीषु उच्चावचां (उदक्च उदक्च उच्चावचा मयूरव्यंसकादित्वात् निपातः ।) विषमां स्वरुचिं स्वस्य रुचिः कान्तिरभिलाषश्च तां आत्मीयप्रभां स्वाभिलाषं वा किं तनोति अपि तु नैव ॥ ५० ॥

**ऋतूचितं पञ्चसु गोचरेषु, यदा यदाशंसि जिनेन वस्तु ।**
**तदिंगिताकूतविदोपनिन्ये, तदैव दूरादपि वासवेन ॥ ५१ ॥**

(व्या०) ऋतु इति । जिनेन श्रीऋषभेण पञ्चसु गोचरेषु (गोचरसंचरवहव्रज–म् । ५–३–१३१ । इ. सू. आधारे धान्तो निपातः गावः इन्द्रियाणि चरन्ति एषु इति गोचराः ।) पञ्चसंख्याकेषु विषयेषु यदा यस्मिन्नवसरे यत् ऋतूचितं ऋतूनां उचितं योग्यं–षड्ऋतुयोग्यं वस्तु आशंसि (आपूर्वकशंसुधातोः

कर्मणि अद्यतनी ।) वाञ्छितं तदैव तस्मिन्नेवावसरे वासवेन इन्द्रेण तद्वस्तु दूरादपि उपनिन्ये ढौकितम् । किं लक्षणेन वासवेन तदिंगिताकूतविदा इंगितं च आकूतश्च अभिप्राय इङ्गिताकूतौ तस्य भगवतः इङ्गिताकूतौ तदिंगिताकूतौ तौ वेत्तीति तेन तदिंगिताकूतविदा ॥ ५१ ॥

**कदापि नाथं विजिहीर्षुमन्त-र्वणं विबुध्येव समं वधूभ्याम् ।**
**पत्रैश्च पुष्पैश्च तरूनशेषा-न्विभूषयामास ऋतुर्वसन्तः ॥ ५२ ॥**

(व्या०) कदेति । ऋतुर्वसन्त पत्रैश्च पर्णै· पुन· पुष्पै कुसुमै अशेषान् न शेषा· अशेषास्तान सर्वान् तरून् वृक्षान् समस्तवृक्षान् विभूषयामास अलंकृतवान् कि कृत्वा उत्प्रेक्षते—नाथं श्रीऋषभदेवं कदापि अन्तर्वणं (परिमध्येऽग्रेऽन्तः षष्ठ्या वा । ३-१-३० । इ. सू. अव्ययीभावसमासः । निष्प्राग्रेऽन्तःखदिरकार्श्याम्रशरेक्षुप्लक्षपीयूक्षाभ्योवनस्य । २-३-६६ । इ. सू. अन्त शब्दपूर्वकवनशब्दस्य नस्यणत्वम् । ) वनस्यान्तर्मध्ये वधूभ्यां सुमंगलासुनन्दाभ्यां समं विजिहीर्षुं ( सन् भिक्षाशंसेरुः । ५-२-३३ । इ. सू सन्नन्तविजिहीर्षधातो· उ प्रत्यय ।) विहर्तुमिच्छतीति विजिहीर्षति विजिहीर्षतीति विजिहीर्षुस्तं क्रीडाकर्तुमिच्छुं विबुध्येव ज्ञात्वेव अन्तर्वणमित्यत्र निष्प्राग्रेतरिति सूत्रेण नस्य णत्वं ज्ञेयम् ॥ ५२ ॥

**शैत्यं सरस्यां मृदुता लतायां, सौरभ्यमब्जे ललनैः प्रकाश्य ।**
**आनन्दयन्निन्द्यदिगुद्भवोऽपि, देव समेतत्रिगुणः समीरः ॥ ५३ ॥**

(व्या०) शैत्यमिति । निन्द्यदिगुद्भवोऽपि निन्द्या चासौ दिक् च निन्द्यदिक् दक्षिणादिक् तस्या उद्भवतीति निन्द्यदिगुद्भव· दक्षिणदिशाया उत्पन्न· समीरो वायु देवं श्रीऋषभदेवं आनन्दयत् । किंलक्षण· समीरः समेतत्रिगुणः समेता· मिलिता· त्रयो गुणा यस्य स हीनकुलोत्पन्नोऽपि गुणैर्मान्य· स्यात् वायो· त्रयो गुणा शीतो मन्दो· सुरभिश्च । ललनै प्रकाश्य इति त्रिष्वपि स्थानेषु संबध्यते । किं कृत्वा सरस्यां सरोवरे ललनै· शैत्यं ( वर्णदृढादिभ्यष्ट्यण् च वा । ७-१-५९ । इ. सू दृढादित्वात् न वर्णत्वात् शीतशब्दात् वा ट्यण् । शीत-

स्य भावः शैत्यम् । ) शीतलत्वं प्रकाश्य प्रादुष्कृत्य लतायां वल्ल्यां मृदुतां कोमलत्वं अब्जे कमले ललनैः खेलनैः सौरभ्यं ( पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च । ७-१-६० । इ. सू. गुणाङ्गत्वात् सुरभिशब्दात् व्यण् सुरभेः भावः सौरभ्यम् । ) परिमलबहुत्वं प्रकाश्य ॥ ५३ ॥

**वल्ली विलोला मधुपानुषङ्गं, वितन्वती सत्तरुणाश्रितास्य ।**
**पुरा परागस्थितितः प्ररूढा, पुपोष योषित्सु चलत्वबुद्धिम् ॥ ५४ ॥**

(व्या०) वल्ली इति । वल्ली अस्य भगवतः श्रीऋषभदेवस्य योषित्सु स्त्रीषु चलत्वबुद्धिं चलस्य भावश्चलत्वं तस्य बुद्धिस्तां पुपोष । किंलक्षणा वल्ली विलोला चपला पुनः किं कुर्वती मधुपानुषङ्गं मधु पिबन्तीति मधुपा (आतोडोऽह्वावामः । ५-१-७६ । इ. सू. मधुपूर्वकपाधातो ड प्रत्ययः । ङस्युक्तं कृता । ३-१-४९ । इ. सू. समास ) भ्रमरा मद्यपा वा तेषां अनुषङ्गः संसर्गस्तं वितन्वती वितनोतीति । पुनः सत्तरुणा संश्चासौ तरुश्च तेन प्रशस्यवृक्षेण आश्रिता । अथवा सत्तरुणा प्रशस्य युवानमाश्रिता । पुरा पूर्वं परागस्थितितः परागः किंजल्कः परं प्रकृष्टं आगः अपराधो वा तस्य स्थितेः पूर्वं प्ररूढामुद्गतां अर्थवशाद्विभक्तिपरिणामः ॥ ५४ ॥

**निविश्य गुल्मानि महालतानां, विश्रम्य पत्रर्धिमिलारुहाणाम् ।**
**मंक्त्वा सदारः सरसां जलानि, कृतार्थयामास कृती वने सः ॥५५॥**

(व्या०) निविश्येति । स कृती (इष्टादेः । ७-१-१६८ । इ. सू. कृतशब्दात् कर्तरिइन् ।) कृतमनेनेति विद्वान् भगवान् सदारः (सहस्तेन । ३-१-२४ । इ. सू. बहुव्रीहिसमास ।) दारैः सह वर्तते इति सदारः सन् वने वनमध्ये महालतानां (जातीयैकार्थेऽच्वेः । ३-२-७० । इ. सू. समानाधिकरणे उत्तरपदे महतो डा । डित्यन्त्यस्वरादेः इति सू. अन्त्यस्वरादिलोपः ।) महत्यश्च ताः लताश्च तासां महावल्लीनां गुल्मानि निविश्य उपविश्य कृतार्थयामास । एतत् क्रियापदं सर्वत्र संबध्यते । इलारुहाणां इलायां पृथिव्यां रोहन्तीति इलारुहा वृक्षास्तेषां पत्राणि तेषां ऋद्धिः तां पत्रसंपद् विश्रम्य कृतार्थयामास ।

सरसां सरोवराणां जलानि मङ्क्त्वा कृतार्थयामास ॥ ५५ ॥

**विभोर्व्यतायन्त विवाहकाले, यत्पल्लवैस्तोरणमङ्गलानि ।**
**चूतस्य तस्याविकलां फलर्धि-मपप्रथत् साधु ततस्तपर्तुः ॥५६॥**

(व्या०) विभोरिति । यत्पल्लवैः यस्य चूतस्य पल्लवाः यत्पल्लवास्तैः विभोः श्रीऋषभस्वामिनः विवाहकाले विवाहस्य कालस्तस्मिन् विवाहसमये तोरणमङ्गलानि तानि व्यतायन्त व्यस्तार्यन्त । ततः ततोऽनंतरं तपर्तुः ग्रीष्मर्तुस्तस्य चूतस्य अविकला तां सपूर्णा फलर्धि फलानामृद्धिस्तां फलसम्पदं साधु युक्तं अपप्रथत् (स्मृदृत्वरप्रथम्रदस्तृस्पशेरः । ४-१-६५ । इ सू. प्रथधातोः पूर्वस्य अकारस्य अकारः न इकार ।) विस्तारयामास ॥ ५६ ॥

**दोषोन्नतिर्नास्य तमोमयीष्टा, इष्टेति तामेष शनैः पिपेष ।**
**पुपोष चाहस्तदमुष्य पूजा-पर्यायदानादुदितद्युतीति ॥ ५७ ॥**

(व्या०) दोषो इति । एष ग्रीष्मर्तु अस्य भगवत तमोमयी (अस्मिन् । ७-३-२ । इ. सू. तमस् शब्दात् मयट् । अणञेयेकण्नञ्स्नञ्टिताम् । २-४-२० । इ सू. स्त्रिया डी. प्रचुरं तमः अस्यमिति तमोमयी ।) अंधकारमयी पापमयी वा दोषोन्नतिर्दोषाणामुन्नतिः पक्षे दोषा रात्रि रात्रेरुन्नतिर्वा दृष्टा सती न इष्टा सती न इष्टा न प्रिया इति कारणात् तां दोषोन्नतिं शनैर्मन्दं मन्दं पिपेष पिष्टवान् । च अहर्दिनं इति कारणात् पुपुषे पुष्टवान् । इतीति किं तत् अहः अमुष्य भगवतः पूजापर्यायदानात् पूजाया पर्यायोऽवसरस्तस्य दानं तस्मात् पूजावसरदानतः उदितद्युति उदिता द्युतिर्यस्य तत् । सप्रकाशं वर्तते ॥ ५७ ॥

**उदग्रसौधाग्रनिलीनमल्ली-वल्लीसुमश्रेणिसुगन्धिशय्यः ।**
**श्रीखंडलेपावृतचन्द्रपाद-स्पर्शः कृशा ग्रीष्मनिशाः स मेने ॥५८॥**

(व्या०) उदग्र इति । स भगवान् ग्रीष्मनिशाः ग्रीष्मस्य निशा रात्रयः ताः उष्णकालसत्का रात्रीः कृशा मेने । किंलक्षणो भगवान् उदग्रसौधाग्रनिलीनमल्लीवल्लीसुमश्रेणिसुगन्धिशय्यः सौधस्य हर्म्यस्य अग्रं सौधाग्रं उदग्रं च तत् सौधाग्रं च उच्चैस्तरं सौधाग्रं तस्मिन् निलीना स्थापिता चसौ मल्लीवल्ली च विक-

सितवल्ली तस्याः सुमानि पुष्पाणि तेषां श्रेणयस्ताभिः सुगन्धिः शय्या यस्य सः उदप्रसौ० पुनः श्रीखंडलेपावृतचन्द्रपादस्पर्शः श्रीखंडस्य चन्दनस्य लेपः तेन आवृतः अन्तरितः: चन्द्रस्य पादानां किरणानां पक्षे चरणानां स्पर्शो यस्य सः श्रीखंडलेपा० ॥ ५८ ॥

**पुष्टयर्थमीशध्वजतैकसद्म-ककुद्मतः किं जलभृज्जलौघैः ।**
**उदीततृण्यामवनीं समन्ता-द्वितन्वती प्रावृडथ प्रवृत्ता ॥ ५९ ॥**

(व्या०) पुष्टि इति । अथानन्तरं प्रावृट् (क्रुत् संपदादिभ्यः क्विप् । ५-३-११४ । इ. सू. प्रपूर्वकवृषधातोः स्त्रियां क्विप् । गतिकारकस्य नहिवृति वृषि व्यधिरुचिसहितनौक्कौ । ३-२-८५ । इ. सू. गतिसंज्ञकस्य अस्य दीर्घः । प्रकर्षेण वर्षन्ति मेघा अस्यां प्रावृट् ।) वर्षा ऋतुः प्रवृत्ता किं कुर्वती जलभृज्जलौघैः जलानि बिभ्रतीति जलभृतो मेघास्तेषां जलानि तेषामोघाः समूहास्तैः मेघसत्क-जलसमूहैः समन्तात् सर्वतः उदीततृण्यां तृणानां समूहस्तृण्या (पाशादेश्चल्यः । ६-२-२५ । इ. सू. समूहेऽर्थेतृणशब्दात् ल्यप्रत्ययः ।) उदीता उद्गता तृण्या तृणसमूहो यस्यां सा तामवनीं पृथ्वीं वितन्वती विस्तारयन्ती । किमर्थं किमिति ईशध्वजतैकसद्मककुद्मतः ईशस्य स्वामिनो ध्वजताया एकं सद्म स्थानं य ककुद्मान् (नोर्म्यादिभ्यः । २-१-९९ । इ. सू. ककुद्मान् इत्यत्र न मतोर्मस्य वः ककुद् अस्ति अस्य इति ककुद्मान् ।) वृषभस्तस्य पुष्टयर्थम् ॥ ५९ ॥

**या वारिधारा जलदेन मुक्ताः,-सान्द्राः शिरस्यस्य बहिर्विहारे ।**
**असस्मरंस्ता हरिहस्तकुंभ-नीराभिषेकं शिशुतानुभूतम् ॥ ६० ॥**

(व्या०) या इति । जलदेन जलानि ददातीति तेन मेघेन अस्य भगवतः शिरसि शीर्षे या वारीधाराः वारीणां जलानां धाराः सान्द्रा अतिनिबिडाः बहि-र्विहारे मुक्ताः ता वारिधाराः शिशुतानुभूतं शिशोर्भावः शिशुता बाल्यं तया जन्माभिषेकावसरे अनुभूतस्तं हरिहस्तकुंभनीराभिषेकं हरेरिन्द्रस्य हस्तः करः तस्मिन् कुंभः कलशतस्य नीरं तेनाभिषेकस्तं इन्द्रसत्ककरकलशजलाभिषेकं अस-स्मरन् ( स्मृदृत्वरप्रथम्रदस्तृस्पशेरः । ४-१-६५ । इ. सू. ण्यन्तस्मारिधातोः पूर्वस्य अकारस्य अकारादेशः न इकारादेशः । ) स्मारयन्ति स्म ॥ ६० ॥

**असौ बहिर्बर्हिकुलेन क्लृप्तं, मृदङ्गवद्गर्जति वारिवाहे ।**
**निभालयन्नाटयमदान्मुदा तां, दशं धनाढ्यैरपि दुर्लभा या ॥६१॥**

(व्या०) असाविति । असौ भगवान् बहिर्मृदङ्गवत् ( स्यादेरिवे । ७-१-५२ । इ. सू. तुल्येऽर्थे मृदङ्गशब्दात् वत् प्रत्यय । ) मृदङ्गेन तुल्यं मृदङ्गवत् वारिवाहे (कर्मणोऽण् । ५-१-७२ । इ सू. वारिपूर्वकवहधातो· अण् प्रत्ययः । ङस्युक्त कृता । ३-१-४९ । इ सू. तत्पुरुष समास· । ) मेघे गर्जति सति यत् बर्हिकुलेन बर्हाणि पिच्छानि सन्ति इति बर्हिणो मयूरास्तेषां कुलं तेन मयूरसमूहेन क्लृप्तं रचितं नाटयं मुदा हर्षेण निभालयन् तांदशमदात् । या दश् धनाढ्यैरपि धनेनाढयास्तै· श्रीमद्भिरपि दुर्लभा ( दु·स्वीषत· कृच्छ्राकृच्छ्रार्थात् खल् । ५-३-१३९ । इ. सू. दु·खपूर्वक लभधातोः खल् दु खेन लभ्यते इति दुर्लभा ।) स्यात् ॥ ६१ ॥

**लोकोपकाराय स लोकनाथः, कृत्वा क्षमाभृद्भवसिन्धुरोधम् ।**
**तदा तदभ्यासवशाद्विधत्ते-ऽद्यापि क्षमाभृद्भवसिन्धुरोधम् ॥ ६२ ॥**

(व्या०) लोक इति । स लोकनाथ लोकानां जनानां नाथ स्वामी तदा तस्मिन्नवसरे लोकोपकाराय लोकानां मनुष्याणामुपकारस्तस्मै क्षमाभृद्भवसिन्धुरोधं क्षमा वसुधां बिभ्रतीति क्षमाभृत· पर्वता तेभ्यो भवा उत्पन्ना· या सन्धिवो नद्यस्तासां रोधो बन्धस्तं पर्वतोत्पन्ननदीबन्ध कृत्वा तदभ्यासवशात् तस्य अभ्यासस्तस्यवशस्तस्मात् अद्यापि क्षमाभृद्भवसिन्धुरोधं क्षमां बिभ्रतीति क्षमाभृत· साधवस्तेषां भव एव सिन्धु संसारसमुद्र तस्य रोधोबन्धस्तं विधत्ते करोति ॥६२॥

**प्रसादयन्त्याम्बु पयोजपुञ्जं, प्रबोधयन्त्याविधुमिद्धयन्त्या ।**
**अस्याभिषेकार्चनवक्त्रदास्या-ऽधिकारतोऽसौ शरदोपतस्थे ॥ ६३ ॥**

(व्या०) प्रसाद इति । असौ भगवान् शरदा उपतस्थे आश्रित· । किं कुर्वन्त्या शरदा । अम्बु जलं प्रसादयन्त्या प्रसादयतीति तया पयोजपुञ्जं पयसि जले जातानि पयोजानि कमलानि तेषां पुञ्जः समूहस्तं प्रबोधयन्त्या

प्रबोधयतीति तया कमलसमूहं विकासयन्त्या विधुं चन्द्रं इद्धयन्त्या समृद्धं कुर्वेत्या । कस्मात् अस्यभगवतः अभिषेकार्चनवक्त्रदास्याधिकारतः अभिषेकश्च स्नानं अर्चनं च पूजनं वक्त्रस्य मुखस्य दास्यं च तेषु अम्बुप्रमुखाणामधिकारात् ॥६३॥

**पङ्कैर्घनोपाधिभिराकुले प्राक्, लोके तिरोभावमुपागतो यः ।**
**अहो स हंसः सहसा प्रकाशी–बभूव भास्वन्महसा विपङ्के ॥ ६४ ॥**

(व्या०) पङ्कैरिति । यो हंसः प्राक् पूर्वं लोके तिरोभावं अदृश्यत्वमुपागतः । किंलक्षणे लोके घनोपाधिभिः घनाः मेघा उपाधयो येषां ते तैः मेघहेतुकैर्बहुकारणैर्वा पङ्कैः कर्दमैः पापैर्वा आकुले अहो इति आश्चर्ये स हंसः पक्षे आत्मा वा भास्वन्महसा भास्वतः सूर्यस्य महस्तेजस्तेन सूर्यतेजसा दीप्तज्ञानेन वा विपङ्के विगतः पङ्को यस्मात् तस्मिन् सति प्रकाशीबभूव ( कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागततत्त्वेच्विः । ७–२–१२६ । इ. सू. प्रकाश शब्दात् च्विः । ईश्चावर्णस्याऽनव्ययस्य । ४–३–१११ । इ सू. ईकार । न प्रकाशः अप्रकाशः अप्रकाशः प्रकाशः बभूव इति प्रकाशीबभूव । ) ॥ ६४ ॥

**करैः श्रमच्छेदकरैः शरीर–सेवां मणीकुट्टिमशायिनोऽस्य ।**
**विधुर्विविक्ते विदधत्प्रसाद–पूर्वामपूर्वां श्रियमाप युक्तम् ॥ ६५ ॥**

(व्या०) करैरिति । विधुश्चन्द्रः अस्य भगवतो मणिकुट्टिमशायिनः (अजातेः शीले । ५–१–१५० । इ. सू. शीलेऽर्थे शीधातो णिन् प्रत्ययः । ) मणिकुट्टिमे शेते इति तस्य मणिखचितभूमिशायिनः सतः विविक्ते विजने श्रमच्छेदकरैः (हेतुतच्छीलानुकूलेऽशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात् । ५–१–१०३। इ. सू. कृञ्धातोः टप्रत्ययः । ) श्रमस्यच्छेदं कुर्वन्तीत्येवशीलास्तैः करैः किरणैर्हस्तैर्वा शरीरसेवां शरीरस्य देहस्य सेवा तां विदधत् विदधातीति सन् प्रसादपूर्वां प्रसादः पूर्वो यस्याः सा तामपूर्वां न पूर्वा अपूर्वा तां श्रियं युक्तमाप प्राप ॥ श्रीश्चन्द्रेवसतीति प्रसिद्धिः ॥ ६५ ॥

**मनाग् मुखश्रीः परमेश्वरस्य, जिहीर्षिता यैः शरदा मदाढ्यैः ।**
**विधाय मन्तोः फलमन्तमेषु, पद्मेषु भेजे प्रशलर्तुरेनम् ॥ ६६ ॥**

(व्या०) मनागिति । शरदा मदाढ्यैः मदेन आढ्यानि तैः मदपरवशा-वद्भिर्यैः पद्मैः परमेश्वरस्य श्रीऋषभप्रभोः मनाक् स्तोकतरां मुखश्रीः मुखस्य श्रीःशोभा जिहीर्षिता हर्तुं वाञ्छिता । एषु पद्मेषु अन्तं विनाशं मन्तोरपराधस्य फलं विधाय कृत्वा प्रशलर्तुं हैमन्तर्तुः एनं भगवन्तं भेजे । शरदि पद्मानि सश्रीकानि हेमन्ते च दह्यन्ते इति भाव ॥ ६६ ॥

**भृशं महेलायुगलेन खेला–रसं रहस्तस्य विलोकमाना ।**
**पौषी पुपोषालसतां गतौ यां, निशा न माद्यापि निवर्ततेऽस्याः ६७**

(व्या०) भृशमिति । पौषी (तस्येदम् । ६–३–१६० । इ. सू. इद-मर्थे भर्तुसन्ध्यादेरण् । ६–३–८९ । इ. सू. अण् अणन्तत्वात् ङीः ।) निशा पौषमाससंबंधिनी रात्रिर्गतौ गमने यामलसतां अलसस्य भावस्तामालस्यं पुपोष । सा अलसता अस्या निशायाः अद्यापि न निवर्तते । किं कुर्वाणा भृशं अत्यर्थं तस्य भगवतो महेलायुगलेन महेलयो र्युगलं तेन रह एकान्ते खेलारसं खेलाया-रसस्तं क्रीडारसं विलोकमाना विलोकते इति विलोकमाना ॥ ६७ ॥

**नक्तं जगत्कम्पयतो हसन्ती, या शीतदैत्यस्य बलं बिभेद ।**
**नेतुः पुरःस्थोचितमात्तचक्रा, सा कृष्णवर्त्माश्रयतां बिभर्तु ॥ ६८ ॥**

(व्या०) नक्तमिति । या हसन्ती सघटीका नक्तं रात्रौ जगत् भुवनं कम्पयतः कम्पयतीति कम्पयन् तस्य शीतदैत्यस्य शीतमेवदैत्यस्तस्य बल सामर्थ्यं बिभेद भिनत्तिस्म । सा हसन्ती आत्तचक्रा आत्तं चक्रं यया सा सती नेतु स्वा-मिनः पुरःस्था पुरः तिष्ठतीति उचितं युक्तं कृष्णवर्त्माश्रयतां कृष्णवर्त्मा अग्निस्तस्य आश्रयतां पक्षे बिभर्तु कृष्णश्चक्रधरो दैत्यभेत्ता च भवति कृष्णो बलानुजस्तस्य वर्त्म मार्गस्तस्याश्रयतां बिभर्तु ॥ ६८ ॥

**अथ प्रभाह्रासकरीं विमोच्य, दुर्दक्षिणाशां शिशिरर्तुरंशुम् ।**
**अचीकरद्दीप्तिकरं प्रणन्तु–मिवोत्तरासङ्गमसङ्गमेनम् ॥ ६९ ॥**

(व्या०) अथेति । अथ अनन्तरं शिशिरर्तुः असङ्गं न विद्यते सङ्गो यस्य तं एनं भगवन्तं प्रणन्तुमिव प्रभाह्रासकरी (हेतुतच्छीलानुकूलेऽशब्दश्लोक-

कलहगाथावैरचाटुसूत्रमन्त्रपदात् । ५-१-१०३ । इ. सू. कृग्धातोः टः टित्वात् ङी । ) प्रभायाः कान्तेर्ह्रासोनाशस्तं करोतीत्येवंशीला तां तेजोनाशकरीं दुर्दक्षिणाशां दुष्टाचासौ दक्षिणाशा च तां विमोच्य मोचयित्वा अंशुं सूर्यं उत्तरासङ्गं उत्तरस्यादिशः सङ्गस्तं अचीकरत् कारयतिस्म । किंलक्षणमंशुं दीप्तिकरं (हेतुतच्छीलानुकूलेऽशब्दश्लोककलह-त् । ५-१-१०३ । इ. सू. कृग्धातोः टः ।) दीप्तिं करोतीत्येवंशीलस्तं दीप्तकरमिति पाठे दीप्तौ दीप्ता वा करौ हस्तौ कराः किरणा वा यस्य तम् ॥ ६९ ॥

**प्रभौ प्रसुप्ते निशि शीतवश्यं, यदम्बु कम्बुच्छवि बन्धमाप ।**
**तज्जाग्रतादिष्ट इवाह्नि तेन, भानुः स्वभावं स्वकरैर्निनाय ॥ ७० ॥**

**(व्या०)** प्रभाविति ॥ कम्बुच्छवि कम्बुवत् च्छविः कान्तिर्यस्य तत् शंखसदृशं निर्मलं यद् अम्बु जलं निशि रात्रौ प्रभौ ) यद्भावो भावलक्षणम् । २-२-१०६ । इ. सू.-प्रभौ इत्यत्र भावलक्षणा सप्तमी । ) श्रीऋषभस्वामिनि प्रसुप्ते सति शीतवश्यं शीतस्य वश्यं सत् बन्धमाप भानुः सूर्यस्तज्जलं अह्नि दिवसे स्वस्य करास्तैः किरणैर्हस्तै र्वा स्वभावं स्वस्य भावस्तं स्वप्रकृतिं निनाय नीतवान् । उत्प्रेक्षते-तेन भगवता जाग्रता सता जागर्तीति जाग्रत् तेन आदिष्ट इव ॥ ७० ॥

**शीतेन सीदत्कुसुमासु युष्मा-स्वर्चास्य देवस्य मदेकनिष्ठा ।**
**इति स्फुटत्पुष्परदा तदानीं, शेषा लताः कुन्दलता जहास ॥ ७१ ॥**

**(व्या०)** शीतेनेति । कुन्दलता कुन्दनाम्नीलता वल्ली तदानीं तस्मिन् शिशिरर्तौ शेषा लता इति अमुना प्रकारेण जहास किंलक्षणा स्फुटत्पुष्परदा स्फुटन्ति च तानि पुष्पाणि च तानि पुष्पाण्येव रदा दन्ता यस्याः सा । इतीति किं युष्मासु शीतेन सीदत्कुसुमासु सीदन्ति कुसुमानि यासान्तास्तासु अस्य देवस्य अर्चा पूजा मदे- ( त्वमौ प्रत्ययोत्तरपदे चैकस्मिन् । २-१-११ । इ. सू. अस्मदः मादेशः । ) कनिष्ठा मयिएव एका निष्ठा यस्याः सा मदेक निष्ठा वर्तते ॥ ७१ ॥

**तत्तादृगाहारविहारवासो–निवासनिर्नाशितशीतभीतिः ।**
**शरीरसौख्येन स शैशिरीणां, निशां न सेहे विपुलत्ववादम् ॥ ७२ ॥**

(व्या०) तदिति । स भगवान् शैशिरीणां (तस्येदम् । ६–३–१६० । इ. सू. इदमर्थे मतुसंख्यादेरण् । ६–३–८९ । इ सू. शिशिरशब्दात् अण् टीत्वात् ङीः ।) शिशिरस्य इमाः शैशिर्यस्तासां शिशिरसंबंधिनीनां निशां रात्रीणां शरीरसौख्येन शरीरस्य सौख्यं ( भेषजादिभ्यष्ट्यण् । ७–२–१६४ । इ. सू. सुखशब्दात् स्वार्थेट्यण् सुखमेव सौख्यम् । ) तेन विपुलत्ववादं विपुलस्य भावभावस्तस्य वादस्तं विस्तीर्णभावं न सेहे । किंलक्षणो भगवान् तत्तादृगाहारवासोनिवासनिर्नाशितशीतभितिः आहाराश्च भोजनानि विहाराश्च विचरणानि वासांसि च वस्त्राणि निवासाश्च गृहाणि तादृशाश्च ते आहारविहारवासोनिवासाश्च । ते च ते तादृगाहारविहारवासोनिवासाश्च तैर्निर्नाशिता शीतात् भीतिर्येन सः । उक्तं च 'तप्तं जलं तापनतैलनूत्नीताम्बूलतूलीवसनं तरुण्य । तमोप्रतापः क्वथितं पयोऽपि शरीरिणां शीतभये सुखाय ॥ ७२ ॥

**इति ऋतूचितखेलनकै र्न कै–र्हृतहृदश्चरतोऽस्य यथारुचि ।**
**सुकृतसूरसमुत्थधृतिप्रभा–परिचिता अरुचन्नखिला दिनाः ॥ ७३ ॥**

(व्या०) इतीति । अस्य भगवतो यथारुचि (योग्यता वीप्सार्थानतिवृत्ति सादृश्ये । ३–१–४० । इ. सू. अर्थानतिवृत्तौ यथारुचि । इत्यत्र अव्ययीभावसमासः) रुचिमनतिक्रम्य इतियथारुचि स्वेच्छया चरतः सतः अखिलाः समस्ता दिना अरुचन्–अदीप्यन्त । किंविशिष्टा दिनाः सुकृतसूरसमुत्थधृतिप्रभापरिचिता सुकृतं पुण्यमेव सूरः सूर्य ततः समुत्था धृतिः समाधि एव प्रभा कांतिस्तया परिचिताः सेविताः । किंविशिष्टस्य भगवतः इति ऋतूचितखेलनकैः ऋतूनामुचितानि यानि खेलनकानि क्रीडनकानि तैः कैर्न हृतहृद हृतं हृदयं यस्य तस्य । इति पूर्वोक्तप्रकारैः षड्ऋतुयोग्यक्रीडनैः । वर्षासु लवणममृतं शरदि जलं गोपयश्च हेमन्ते । शिशिरे चामलकरसो घृतं वसन्ते गुडश्चान्ते ॥ १ ॥ इत्यादिभिश्च कै कैर्न हृतहृदः अपि तु सर्वैर्हृतहृद ॥ ७३ ॥

**कौमारकेलिकलनाभिरमुष्य पूर्व–लक्षाः षडेकलवतां नयतः सुखाभिः।**
**आद्या प्रिया गरभमेणदृशामभीष्टं, भर्तुः प्रसादमविनश्वरमाससाद ७४**

(७५।०) कौमार इति। षट्त्रिंशत् निमेषैरेकोलव उच्यते सुखाभिः सुखं कुर्वतीभिः कौमारकेलिकलनाभिः कौमारस्य बाल्यस्य केलयः क्रीडास्तासां कलनाः ताभिः बाल्योचितक्रीडाकरणैः षट् पूर्वलक्षाः एकलवतां एकश्चासौ लवश्च तस्य भावः एकलवता तां नयतः नयतीति नयन् तस्य अमुष्य भगवतः आद्या (दिगादिदेहांशाद्यः। ६–३–१२४। इ. सू. भवेऽर्थे आदि शब्दात् य आदौ भवा आद्या।) प्रिया सुमंगला पत्नी गरभं (कृशृगृशलिकलिकडिगर्दिरासिरमिवडिवल्लेरभः। ३२९। इ. उ. सू. गॄत् निगरणे धातोः अभःप्रत्ययः) गर्भमाससाद प्राप। किं विशिष्टं गरभं एणदृशां स्त्रीणां अभीष्टं पुनर्भर्तुः स्वामिनः प्रसादं प्रसादरूपं अविनश्वरं (सृजीण्नशष्ट्वरप्। ५–२–७७। इ. सू. शीलादिसदर्थे नश् धातोः कित् ट्वरप् प्रत्ययः।) विनश्यतीति विनश्वरः न विनश्वरोऽविनश्वरस्तम् ॥ ७४ ॥

**सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि–,**
**धम्मिल्लादिमहाकवित्वकलनाकल्लोलिनीसानुमान्।**
**वाणीदत्तवरश्चिरं विजयते तेन स्वय निर्मिते,**
**सर्गो जैनकुमारसंभवमहाकाव्ये ऽभवत् षष्ठकः ॥ ६ ॥**

इतिश्रीमदञ्चीयअञ्चलगच्छेकविचक्रवर्त्तिश्रीजयशेखरसूरिविरचितस्य श्रीजैनकुमारसंभवमहाकाव्यस्य तच्छिष्यश्रीधर्मशेखरमहोपाध्यायविरचिताया टीकायां श्रीमाणिक्यसुन्दरशोधितायां षष्ठसर्गव्याख्या

समाप्ता ॥ ६ ॥

## ॥ अथ सप्तमः सर्गः प्रारभ्यते ॥

**अथ प्रथमनाथस्य, प्रिया तस्य सुमङ्गला ।**
**अध्युवास निजं वास-भवनं यामिनीमुखे ॥ १ ॥**

(व्या०) अथेति । अथ अनन्तरं तस्य प्रथमनाथस्य ( पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम् । ३-१-१०३ । इ. सू. कर्मधारयसमासः ) प्रथमश्चासौनाथश्च तस्य श्रीयुगादिदेवस्य प्रिया सुमङ्गला यामिनीमुखे यामिन्या रजन्या मुखं तस्मिन् सायंकाले निजमात्मीयं वासभवनं वासस्य निवासस्य भवनं तत् आवासं अध्युवास उषिता ॥ १ ॥

**यत्र ज्वलत्प्रदीपानां, प्रभाप्राग्भारभापितम् ।**
**धृत्वा धूमशिखेत्याख्यां-तरं दूरेऽगमत्तमः ॥ २ ॥**

(व्या०) यत्रेति । यत्र वासभवने ज्वलत्प्रदीपभाप्राग्भारभापितं ज्वलन्तश्च ते प्रदीपाश्च जाज्वल्यमानप्रदीपास्तेषां प्रभाः कान्तयस्तसां प्राग्भारः समूहस्तेन भापितं त्रासितं तमोऽन्धकारं धूमशिखा धूमस्य शिखा इति आख्यान्तरं अन्या आख्या इति आख्यान्तरं ( मयूरव्यंसकेत्यादयः । ३-१-११६ । इ. सू. समासः ) अपरं नाम धृत्वा दूरे अगमत् दूरंगतम् ॥ २ ॥

**यत्र नीलामलोल्लोचा-मुक्ता मुक्ताफलस्रजः ।**
**बभुर्नभस्तलाधार-तारकालक्षकक्षया ॥ ३ ॥**

(व्या०) यत्रेति । यत्रावासे मुक्ताफलस्रजः मुक्ताफलानां स्रजः नभस्तलाधारतारकालक्षकक्षया नभस आकाशस्य तलं तदेवाधारो यासां ताः ताश्चताः तारकाश्च तासां लक्षाणि तेषां कक्षया सादृश्येन बभु शोभिताः । किंलक्षणा मुक्ताफलस्रजः नीलामलोल्लोचामुक्ताः नीलेषु कृष्णवर्णेषु अमलेषु निर्मलेषु उल्लोचेषु-आमुक्ता बद्धाः ॥ ३ ॥

**सौवर्ण्यः पुत्रिका यत्र, रत्नस्तम्भेषु रेजिरे ।**
**अध्येतुमागता लीलां, देव्या देवाङ्गना इव ॥ ४ ॥**

(व्या०) सौवर्ण्य इति । यत्रावासे रत्नस्तम्भेषु रत्नानां स्तम्भास्तेषु सौवर्ण्यः सुवर्णमय्यः पुत्रिकाः रेजिरे शोभिताः । उत्प्रेक्षते । देव्याः सुमङ्गलाया लीलां अध्येतुं पठितुं आगता देवाङ्गना इव देवानाममराणामङ्गना नार्य इव ॥४॥

**दह्यमानाः काकतुंडा, यत्र धूमैर्विसृत्वरैः ।**
**स्वपङ्क्तिं वर्णगन्धाभ्यां, निन्युर्दार्वन्तराण्यपि ॥ ५ ॥**

(व्या०) दह्यमाना इति । यत्रावासे काकतुंडाः कृष्णागरवो दह्यमानाः दह्यन्ते इति दह्यमानाः सन्तः विसृत्वरैः ( सृजीण्नशष्ट्वरप् । ५-२-७७ । इ. सू. शीलादिसदर्थे सृधातोः कित् ट्वरप् । ह्रस्वस्य तः पित्कृति । ४-४-११३ । इ. सू. त् अन्तः । ) विसरन्तीत्येवंशीलाः तैः प्रसरणशीलैर्धूमैः दार्वन्तराण्यपि अन्यानिदारूणि इति दार्वन्तराणि तानि काष्ठान्तराण्यपि वर्णगन्धाभ्यां वर्णश्च गन्धश्च वर्णगन्धौ ताभ्यां स्वपङ्क्तिं स्वस्य पङ्क्तिं निन्युर्गृहीतवन्तः ॥ ५ ॥

**उत्पित्सव इवोत्पक्षा, यत्र कृत्रिमपत्रिणः ।**
**आरेभिरे लोभयितुं, बालाभिश्चारुचूर्णिभिः ॥ ६ ॥**

(व्या०) उत्पित्सव इति । यत्रावासे कृत्रिमपत्रिणः क्रियया निर्वृत्ताः कृत्रिमाः ( ड्वितस्त्रिमक् तत्कृतम् । ५-३-८४ । इ. सू. कृधातोः त्रिमक् प्रत्ययः ) पत्राणि पिच्छानि एषां सन्तीति पत्रिणः कृत्रिमाश्च ते पत्रिणश्च कृत्रिमपत्रिणः बालाभिर्बालिकाभिः चारुचूर्णिभिः चारवश्चताश्चूर्णयश्च चारुचूर्णयस्ताभिः मनोज्ञभक्षैः लोभयितुमारेभिरे । उत्प्रेक्षते । उत्पक्षाः उत् ऊर्ध्वं पक्षाणि येषां ते उत्पक्षाः ऊर्ध्वीकृतपक्षाः सन्तः उत्पित्सव उत्पतितुमिच्छन्तीति उत्पित्सन्ति उत्पित्सन्तीति उत्पित्सवः ( रभलभशकपतपदामिः । ४-१-२१ । इ. सू. सादौ सनि पत् धातोः स्वरस्य इः नच द्विः । सन् भिक्षाशंसेरुः । ५-२-३३ । इ. सू. सन्नन्त पित्सधातोः उः । ) उत्पतितुकामा इव ॥ ६ ॥

**यन्मणिक्षोणिसंक्रान्त-मिन्दुं कन्दुकशङ्कया ।**
**आदित्सवो भग्ननखा, न बालाः कमजीहसन् ॥ ७ ॥**

(व्या०) यदिति । यत्रावासे बाला: कं जनं न अजीहसन् न हासयन्ति स्म । किंलक्षणा बाला: यन्मणिक्षोणिसंक्रान्तं मणीनां रत्नानां क्षोणि: पृथिवी मणिक्षोणि यस्यावासस्य मणिक्षोणिस्तस्यां संक्रान्त: प्रतिबिम्बितस्तमिन्दु चन्द्रं कन्दुकशङ्कया कन्दुकस्य शङ्का तया आदित्सव आदातुमिच्छन्तीति आदित्सन्ति आदित्सन्तीति आदित्सवो ग्रहीतुमिच्छव । पुन भग्ननखा: भग्ना नखा येषां ते भग्ननखा ॥ ७ ॥

**व्यालम्बिमालमास्तीर्ण–कुसुमालि समन्ततः ।**
**यदृश्यत पुष्पास्त्र–शस्त्रागारधिया जनैः ॥ ८ ॥**

(व्या०) व्यालम्बीति । जनैर्लोकैर्यद् आवासगृहं पुष्पास्त्रशस्त्रागारधिया पुष्पाणि एव अस्त्राणि यस्य स पुष्पास्त्र: काम तस्य कामस्य शस्त्राणामायुधाना-मगारं गृहं तस्य धी बुद्धिस्तया कामदेवस्य आयुधशालाबुद्ध्या अदृश्यत व्यलोकि । किंलक्षणं गृहं व्यालम्बिमालं व्यालम्बिन्यो माला यस्मिन् तत् लम्ब-मानस्रक् । पुन समन्ततः सर्वत. आस्तीर्णकुसुमालि कुसुमानामालय पङ्क्तय: आस्तीर्णा: कुसुमालयो यस्मिन् प्रसारितपुष्पश्रेणि ॥ ८ ॥

**कौतुकी स्त्रीजनो यत्र, पुरः स्फाटिकभित्तिषु ।**
**स्पष्टमाचष्ट पृष्ठस्थ–चेष्टितान्यनुबिम्बनैः ॥ ९ ॥**

(व्या०) कौतुकी । यत्रावासे कौतुकी कौतुकमस्ति अस्येति कौतुकी स्त्रीजन स्त्रीणांजन स्त्रीजन पुर: अग्रे स्फाटिभित्तिषु स्फटिकानां विकारा: स्फाटिक्य (विकारे । ६ । २ । ३० । इ. सू विकारे अर्थे प्राग् जितादण् । ६ । १ । १३ । इ. सू स्फटिकशब्दादण् अणञेयेकण्नञ्स्नञ्टिताम् । २ । ४ २० । इ सू स्त्रियां ङी । पुम्वत् कर्मधारये । ३ । २ । ५७ । इ सू. पुंवत् ।) स्फाटिक्यश्चता भित्तयश्च तासु स्फटिकमणिसत्कभित्तिमध्ये अनुबिम्बनैः प्रति-बिम्बनै पृष्ठस्थचेष्टितानि पृष्ठस्थाना पश्चात् स्थितानां चेष्टितानि स्पष्टं आचष्ट कथितवान् ॥ ९ ॥

**लतागुल्मोत्थितो यत्रा–हरज्जालाध्वनागतः ।**
**मुक्ताधिया मरुच्चौरः, स्वेदबिन्दून् मृगीदृशाम् ॥ १० ॥**

(व्या०) लतेति यत्रावासे लतागुल्मोत्थित लताना वल्लीनां गुल्मानि तेभ्यः उत्थित वल्लीसत्कगुल्मसमुत्पन्नो मरुच्चौरः मरुत् एव चौरः पवनरूपचौरः मृगीदृशां मृगीणांदृगिवदृक् यासां तासां स्त्रीणां स्वेदबिन्दून् स्वेदस्य बिन्दवः स्वेदबिन्दवस्तान् मुक्ताधिया मुक्ताना धीस्तया अहरत् हृतवान् । किंलक्षणो मरुच्चौरः जालाध्वना जालस्य गवाक्षस्य अध्वा मार्गस्तेन आगतः प्रविष्टः ॥१०॥

**वीक्ष्य यत्परितोऽध्यक्षं, वनं सर्वर्तुकं जनः ।**
**श्रद्धेयमागमोक्त्यैवाभिननन्द न नन्दनम् ॥ ११ ॥**

(व्या०) वीक्ष्येति । जनो लोको यत्परितो यस्यावासस्य परित समन्ततः सर्वर्तुक सर्वे ऋतवो यस्मिन् तत् सर्वर्तुषु साधारण अध्यक्षं प्रत्यक्षं वनं वीक्ष्य दृष्ट्वा नन्दनं वनं नन्दनाख्यं वनं न अभिननन्द न प्रशशंस । किंलक्षणं नन्दनं वनं आगमोक्त्यैव आगमाना शास्त्राणामुक्तिर्वचनं तयैव श्रद्धेयं (यएचातः । ५ । १ । २८ । इ सू. श्रत्पूर्वक धाधातोः य च धातोराकारस्य एत्वम् । ) श्रद्धातुं योग्यं न तु प्रत्यक्षम् ॥ ११ ॥

**श्वेतोत्तरच्छदं तत्र, दोलातल्पमुपेयुषी ।**
**हंसीं गङ्गातरङ्गात्त-रङ्गामभिबभूव सा ॥ १२ ॥**

(व्या०) श्वेतइति । सा सुमङ्गला तत्र तस्मिन्नावासे श्वेतोत्तरच्छदपटं श्वेतः उत्तरच्छदस्य (पुन्नाम्नि घः । ५ । ३ । १३० । इ. सू संज्ञायां करणे घः उत्तरं छाद्यते अनेनेति उत्तरच्छदः । ) पटो यस्मिन् तत् श्वेतउत्तरपटयुक्तं दोलातल्पं उपेयुषी उपेयाय इति उपेयुषी दोलायमानशय्या प्राप्तवती सती हंसीमभि बभूव पराभवति स्म । किंलक्षणां हंसीं गङ्गातरङ्गात्तरङ्गां गङ्गाया तरङ्गा कल्लोलास्तेषु आत्त गृहीतो रङ्ग आनन्दो यया सा ता गङ्गानदीकल्लोलगृहीतानन्दाम् ॥१२॥

**दक्षिणं तमुरीचक्रे, विवाहे भगवानिति ।**
**वामा वाममुपष्टभ्य, पाणिं तस्मिन्नशेत सा ॥ १३ ॥**

(व्या०) दक्षिणमिति । सा वामा सुमङ्गला तस्मिन् शयनीये इति कारणात् वामं पाणिं हस्तमुपष्टभ्य अशेत स्वपिति स्म । इतीति किं विवाहे भगवान् तं दक्षिणपाणिं हस्तमुरीचक्रे अङ्गीकृतवान् ॥ १३ ॥

**पूर्वमप्सरसामङ्के, स्थित्वा तत्पादपङ्कजे ।**
**पश्चादवापतां दिव्य-तूलीमौलिवतंसताम् ॥ १४ ॥**

(व्या०) पूर्वमिति । पूर्वं प्रथममप्सरसामङ्के देवाङ्गनानामुत्सङ्गे स्थित्वा पश्चात् तत्पादपङ्कजे तस्याः सुमङ्गलायाः पादौ एव पङ्कजे चरणकमलौ दिव्य-तूलीमौलिवतंसतां दिव्या चासौ तूली च दिव्यतूली हंसतूली तस्याः मौलिवतंसतां मुकुटत्वमवापतां प्राप्ते ॥ १४ ॥

**दीपाः सस्नेहपटवोऽभितस्तां परिवव्रिरे ।**
**ध्वान्ताराातिभयं भेत्तुं, जाग्रतो यामिका इव ॥ १५ ॥**

(व्या०) दीपा इति । दीपा अभितः समन्ततः तां सुमङ्गलां परिवव्रिरे परिवृण्वन्ति स्म । किंलक्षणा दीपाः सस्नेहपटवः स्नेहेन सह वर्तन्ते इति सस्नेहाः ते च ते पटवश्च स्नेहसहिताः पटवश्च पटिष्ठाः । उत्प्रेक्षते ध्वान्ताराति ध्वान्तं तम एव अरातिः शत्रुस्तं भेत्तुं अन्धकारशत्रुभयं छेत्तुं जाग्रतो यामिकाः प्राहरिका इव ॥ १५ ॥

**विसृज्य सा परप्रेमा-लापपात्रीकृताः सखीः ।**
**निद्रां सुखार्थामेकान्त-सखीं संगन्तुमैहत ॥ १६ ॥**

(व्या०) विसृज्येति । सा सुमङ्गला परप्रेमालापपात्रीकृताः प्रेम्णा स्नेहेन आलापः परश्चासौ प्रेमालापश्च प्रकृष्टस्नेहवार्ता तस्य न पात्राणि अपात्राणि अपात्राणि पात्राणि कृताः एवंविधाः सखी विसृज्य विहाय निद्रां संगन्तु निद्रा-सङ्गममैहत इच्छति स्म । किंलक्षणां निद्रां सुखार्थां सुखमेव अर्थः प्रयोजनं यस्याः सा तां सुखकारिणीं पुनः एकान्तसखीं एकान्तसखी ताम् ॥ १६ ॥

**तस्याः सुषुप्सया जोष-जुषोऽजायत शर्मणे ।**
**मोहो निद्रानिमित्तः स्याद्दोषोऽप्यवसरे गुणः ॥ १७ ॥**

(व्या०) तस्या इति । तस्याः सुमङ्गलायाः निद्रानिमित्तः निद्रा निमित्तं कारणं यस्य स मोहः शर्मणे सौख्याय अजायत जातः । किंलक्षणायाः सुमङ्गलायाः सुषुप्सया स्वप्तुमिच्छा तया सुखशयनवाञ्छया जोषजुषः जोषं मौनं जुषते सेवते इति तस्याः मौनसेविन्याः दोषोऽपि अवसरे समये गुणः स्यात् ॥ १७ ॥

**स्रोतांसि निभृतीभूय, नृपस्येव नियोगिनः ।**
**निशि निर्ववृिरे तस्याः, स्वस्वव्यापारसंवृतेः ॥ १८ ॥**

(व्या०) स्रोतांसीति । तस्याः सुमङ्गलायाः स्रोतांसि इन्द्रियाणि स्वस्वव्यापारसंवृतेः स्वस्य स्वस्य व्यापारा तेषां संवृतिस्तस्याः निभृतीभूय (कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्वे च्विः । ७ । २ । १२६ । इ. सू भूधातुयोगे निभृतशब्दात् च्विः ईश्च्वाववर्णस्याऽनव्ययस्य । ४ । ३ । १११ । इ. सू. निभृतशब्दस्य अस्य ईः । गतिकान्यस्तत्पुरुषः । ३ । १ । ४२ । इ. सू. तत्पुरुषः समासः । अनञः क्त्वो यप् । ३ । २ । १५४ । इ. सू. क्त्वो यबादेशः ।) न निभृतं अनिभृतं अनिभृतं निभृतं भूत्वा इति निभृतीभूय निश्चलीभूय निर्ववृिरे निर्वृतिं प्रापुः । के इव नृपस्य राज्ञो नियोगिनो व्यापारिण इव यथा नृपस्य राज्ञो नियोगिनः स्वस्वव्यापारसंवृतेर्निर्वृतिं समाधिं प्राप्नुवन्ति ॥ १८ ॥

**तदा निद्रामुद्रितदृग्, भवने सा वनेऽब्जिनी ।**
**निद्राणकमला सख्यो-चितमाचेरतुर्मिथः ॥ १९ ॥**

(व्या०) तदेति । तदा तस्मिन्नवसरे सा सुमङ्गला भवने गृहे निद्रामुद्रितदृग् निद्रया मुद्रिता संकुचिता दृक् दृष्टि र्यस्याः सा सती वने अब्जिनी निद्राणकमला निद्राणानि संकुचितानि कमलानि यस्याः सा द्वे अपि मिथः परस्परं सख्योचितं सख्यस्य मैत्र्या उचित योग्यं सदृशं आचेरतुः ॥ १९ ॥

**आसतामपरेमौनं, भेजुराभरणान्यपि ।**
**असंचरतया तस्या, निद्राभङ्गभयादिव ॥ २० ॥**

(व्या०) आसतामिति । अपरे आसतां दूरे सन्तु तस्या सुमङ्गलायाः आभरणान्यपि भूषणान्यपि असंचरतया संचरस्य भाव संचरता न संचरता असंचरता तया निःसंचरत्वेन मौनं भेजु । उत्प्रेक्षते तस्या सुमङ्गलाया निद्राया भङ्गस्तस्मात् भयं तस्मादिव ॥ २० ॥

**निद्रानिभृतकाया सा, नायासान्नाकियोषिताम् ।**
**लोचनैर्लेह्यसर्वाङ्ग-लावण्या समजायत ॥ २१ ॥**

(व्या०) निद्रेति । सा सुमङ्गला निद्रानिभृतकाया निद्रया निभृतः कायो देहो यस्याः सा निद्रानिश्चलशरीरा सती नाकियोषितां नाकिनां देवानां योषितो नार्यस्तासां देवाङ्गनानां लोचनैर्नेत्रैर्नायासात् सुकरत्वेन लेह्यसर्वाङ्गलावण्या सर्वं च तत् अङ्गं च सर्वाङ्गं सर्वाङ्गस्य लावण्यं लेढुं योग्यं लेह्यं (ऋवर्णव्यञ्जनाद् घ्यण् । ५ । १ । १७ । इ. सू. लिह्धातोर्घ्यण्) मास्वाद्यं सर्वाङ्गलावण्यं (वर्णदृढादिभ्य-ष्ट्यण् च वा । ७ । १ । ५९ । इ सू. भावेऽर्थे लवणशब्दात् ट्यण् ।) यस्याः सा समजायत जाता ॥ २१ ॥

**निर्वातस्तिमितं पद्म-मिवामुष्या मुखं सुखम् ।**
**न्यपीयताप्सरोनेत्र-भृङ्गैर्लावण्यसन्मधु ॥ २२ ॥**

(व्या०) निर्वात इति । अमुष्याः सुमङ्गलाया लावण्यसन्मधु लावण्यमेव सत् विद्यमानं मधु मकरन्दो यस्मिन् तत् एवंविधं मुखं वदनं सुखं यथा भवति तथा अप्सरोनेत्रभृङ्गैः अप्सरसां नेत्राणि भृङ्गास्तैः देवाङ्गनासत्कलोचनभ्रमरैर्न्यपीयत पीतम् । उत्प्रेक्षते निर्वातस्तिमितं निर्वाते वातरहितेदेशे स्तिमितं निश्चलं पद्ममिव-कमलमिव ॥ २२ ॥

**आप्तनिद्रासुखा सौख्य-दायीति स्वप्नदर्शनम् ।**
**अन्वभूत् पुण्यभूमी सो-त्सवान्तरमिवोत्सवे ॥ २३ ॥**

(व्या०) आप्तेति । सा सुमङ्गला आप्तनिद्रासुखा आप्तं प्राप्तं निद्रायाः सुखं यया सा सती सौख्यदायि (सुखमेव सौख्यं भेषजादिभ्यष्ट्यण् । ७ । २ । १६४ । इ. सू स्वार्थेवा ट्यण् । अजाते शीले । ५ । १ । १५४ । इ. सू. शीलेऽर्थे दाधातोः णिन् ।) सौख्यं ददातीति तत् इति अमुना प्रकारेण वक्ष्यमाणं स्वप्नदर्शनं स्वप्नस्य दर्शनं तत् अन्वभूत् अनुभवति स्म । किंलक्षणा सुमङ्गला पुण्यभूमी पुण्यस्थान किमिव उत्सवान्तरमिव अन्य उत्सव इति उत्सवान्तर यथा उत्सवे अन्यउत्सव अनुभूयते ॥ २३ ॥

**प्रथमं सा लसद्दन्त-दंडमच्छुंडमुन्नतम् ।**
**भूरिभारादभुवो भङ्ग-भीत्येव मृदुचारिणम् ॥ २४ ॥**

**गण्डशैलपरिस्पर्धि-कुंभं कर्पूरपाण्डुरम् ।**
**द्विरदं मदसौरभ्य-लुभ्यद्भ्रमरमैक्षत ॥ २५ ॥ युग्मम् ॥**

(व्या०) प्रथममिति ॥ सा सुमङ्गला प्रथमं द्विरदं गजेन्द्रं ऐक्षत दृष्टवती। किंलक्षणं गजेन्द्रं तानि सर्वाणि गजेन्द्रलक्षणानि ज्ञेयानि लसद्दन्तदंडं लसत इति लसन्तौ दन्तौ एव दण्डौ यस्य स तं उल्लसद्दन्तमुसलं पुनः उच्छुण्डं उर्द्धं शुण्डा यस्य स उच्छुण्डस्तं उर्व्वीकृतशुण्डादण्डं पुन उन्नतमुच्चैस्तरम् । उत्प्रेक्षते भूरिभारात् भूरिश्चासौ भारश्च तस्मात् बहुभारात् भुवः भङ्गभीत्येव भङ्गात् भीतिस्तया पृथिवीभङ्गभयेनेव मृदुचारिणं मृदुचरतीति मृदुचारी तं मन्दगमनम् । पुनः गण्डशैलपरिस्पर्धिकुंभ गण्डशैलं परिस्पर्धेते कुंभौ यस्य तं पर्वत सत्कस्थूलोपलेनसह स्पर्धाकुर्वत् कुंभस्थलं कर्पूरपाण्डुरं कर्पूरमिव पाण्डुरस्तं कर्पूरवद् धवलं मदसौरभ्यलुभ्यद्भ्रमर मदस्य सौरभ्येण मदपरिमलेन लुभ्यन्तो भ्रमरा यस्य तम् । युग्मम् । २४-२५ ॥

**भाग्यैः शकुनकामाना-मिवगर्जन्तमूर्जितम् ।**
**शुभ्रं पुण्यमिवप्राप्तं, चतुश्चरणचारुताम् ॥ २६ ॥**
**सिन्धुरोधक्षमं रोधः, स्यन्तं मृल्लवलीलया ।**
**सशृङ्गमिवकैलासं, ककुद्मन्तं ददर्श सा ॥ २७ ॥ युग्मम् ॥**

(व्या०) भाग्यैरिति । सा सुमङ्गला ककुद्मन्तं (तदस्यास्त्यस्मिन्नितिमतुः ७ । २ । १ । इ. सू. ककुद् शब्दात् मतुः । नोर्म्यादिभ्य । २ । १ । ९९ । इ. सू. ककुद् शब्दस्य ऊर्म्यादिगणे पाठात् मतोर्मकारस्य वकाराभावः ।) ककुद् अस्यास्तीति ककुद्मान् तं वृषभं ददर्श । किंलक्षणं ककुद्मन्तं एतानि सर्वाणि ककुद्मत एव विशेषणानि गर्जन्तं गर्जतीति गर्जन् तं ऊर्जितं बलवन्तं उत्प्रेक्षते शकुनकामानां शकुनानि कामयन्ते इति तेषां शकुनाभिलाषिणां भाग्यैरिव चतुश्चरणचारुतां चत्वारश्चते चरणाश्च तैश्चारुता तां चतुर्भिश्चरणैर्मनोज्ञत्वं प्राप्तं शुभ्रमुज्ज्वलं पुण्यमिव । सिन्धुरोधक्षमं सिन्धोः रोधस्तस्मिन् क्षमस्तं नद्यारोधसमर्थं एवंविधं रोधस्तटं मृल्लवलीलया मृदो मृत्तिकाया लवो लेशस्तस्य लीला तया

मृत्तिकाखंडवत् स्यन्तं पातयन्तं उत्प्रेक्षते सशृङ्गं शृङ्गैः सह वर्तते इति तं कैलासमिव कैलासगिरिमिव स्थितम् ॥ २६-२७ ॥ युग्मम् ॥

**अप्यतुच्छतया पुच्छा-घातकम्पितभूतलम् ।**
**अप्युदारदरीक्रोड-क्रीडत्क्ष्वेडाभयङ्करम् ॥ २८ ॥**

**सद्यो भिन्नेभकुंभोत्थ-व्यक्तमुक्तोपहारिणम् ।**
**हरिणाक्षी हरिं स्वप्न-दृष्टं सा बहुमन्यत ॥ २९ ॥ युग्मम् ॥**

(**व्या०**) अपीति । सा हरिणाक्षी हरिणस्य मृगस्य अक्षिणी इव अक्षिणी यस्याः सा मृगलोचना सुमङ्गला स्वप्नदृष्टं स्वप्ने दृष्टस्तं हरिं सिंहं बहु अमन्यत बहु मन्यते स्म । किंलक्षणं हरिं एतानि सर्वाणि हरेर्विशेषणानि अतुच्छतया न तुच्छ अतुच्छस्तस्य भावोऽतुच्छतया घनतया पुच्छाघातकम्पितभूतलं पुच्छस्य आघातेन कम्पितं भुवस्तलं येन तमपि पुच्छप्रहारेण कम्पितपृथिवीतलमपि । उदारदरीक्रोडक्रीडत्क्ष्वेडाभयङ्कर (मेघर्तिभयाभयात् ख । ५ । १ । १०६ । इ. सू. भयपूर्वक कृग्धातोः ख । खित्यनव्ययारुषोर्मोऽन्तोह्रस्वश्च । ३-२-१११ । इ. सू. मोऽन्तः । ) अपि उदाराचासौदरी च विशालगुहा तस्या क्रोडे उत्संगे क्रीडन्ती क्ष्वेडा सिंहनादस्तेन भय करोतीति तमपि । सद्यस्तत्कालं भिन्नेभकुंभोत्थव्यक्तमुक्तोपहारिणं भिन्नाश्च ते इभाश्च विदारितगजाः तेषां कुंभेभ्यो गंडस्थलेभ्य उत्था या व्यक्ताः प्रकटाः मुक्ता मौक्तिकानि उपहरति ढौकयतीति भिन्नेभ० रौद्रोऽपिहरिर्मौक्तिकदायकत्वात् बहुमान्यो जात इति भावः ॥ २८ ॥ २९ ॥ युग्मम् ॥

**निधीनक्षय्यसारौघ-तुन्दिलान् सन्निधौ दधिः ।**
**भूषाहेम्नः स्ववपुषो, मयूखैरन्तरं प्रती ॥ ३० ॥**
**पद्माकरमयीं मत्वा, नेत्रवक्त्रकरांघ्रिणा ।**
**पद्मवासानिवासार्थ-मिवोपनमति स्म ताम् ॥ ३१ ॥ युग्मम् ॥**

(**व्या०**) निधीनिति । पद्मवासा पद्मेवासो निवासो यस्याः सा पद्मवासा लक्ष्मीस्तां सुमङ्गलां निवासार्थमिव निवासहेतोरिव उपनमति स्म । किंलक्षणा

पद्मवासा अक्षय्यसारौघतुन्दिलान् अक्षय्य. अत्रुटित सारस्य द्रव्यस्य ओघः समूहस्तेन तुन्दिलास्तान् (व्रीह्यर्थतुन्दादेरिलश्च । ७ । २ । ९ । इ. सू. मत्वर्थे तुन्दशब्दात् इलप्रत्ययः तुन्दमस्ति एषामिति तुन्दिलाः) लक्षणया स्थूलान् एवं विधान् निधीन् संनिधौ समीपे दधिः (सन्निचक्रिर्दधिजज्ञिनेमिः । ५-२-३९ । इ. सू शीलादिसदर्थे डयन्तो दधि निपातः धत्ते इत्येवंशीला दधिः) दधाना दधिरिति निपातो ज्ञेय । पुन स्ववपुषः स्वस्य वपु तस्य मयूखैः आत्मीयशरीर-किरणैः भूषाहेम्नः भूषायाहेम तस्य आभरणसत्कसुवर्णस्य अन्तरं घ्नती विना-शयन्ती । किंकृत्वा नेत्रवक्त्रकरांघ्रिणा नेत्रे च वक्त्रं च करौ च अंघ्री च एतेषां समाहारस्तेन प्राणितूर्याङ्गाणामित्येकवचनं लोचनमुखहस्तपदैस्तां सुमङ्गलां पद्मा-करमयीं मत्वा लक्ष्मीः पद्मेषु वसतीति सुमङ्गलामाश्रयति स्म ॥ ३०-३१ ॥

**भृङ्गैः सौरभलोभेना-नुगतं सेवकैरिव ।**
**तन्व्या दोःपाशवत् पुण्य-भाजां कण्ठग्रहोचितम् ॥ ३२ ॥**
**प्रहितं प्राभृतं पारि-जातेनैव जगत्प्रियम् ।**
**असमं कौसुमं दाम, जज्ञे तन्नेत्रगोचरः ॥ ३३ ॥ युग्मम् ॥**

(व्या०) भृङ्गैरिति ॥ कौसुमं कुसुमानामिदं कौसुमं दाम कुसुमसंबंधि दाम माला तन्नेत्रगोचरः तस्या सुमङ्गलाया नेत्रयोर्गोचरः प्रत्यक्ष जज्ञे तया सुमङ्गलया माला दृष्टेति भावः । किंलक्षणं दाम भृङ्गैः भ्रमरैः सौरभ्यलोभेन सौरभ्यस्य सुगन्धस्य लोभस्तेन अनुगतं परिमलस्य लोभेन वेष्टितं दाम्न एव सर्वाणि विशेष-णानि तन्व्याः स्त्रिया दोःपाशवत् (स्यादेरिवे । ७ । १ । ५२ । इ. सू. दो पाशशब्दात् इवार्थे वत् प्रत्ययः ।) दोष्णोः पाशस्तेन तुल्यं भुजपाशवत् पुण्य-भाजां (भजोविण् । ५ । १ । १४६ । इ. सू. पुण्यपूर्वक भजूधातो विण् प्रत्ययः ।) पुण्यं भजन्तीति तेषां भाग्यवतां कण्ठग्रहोचितं कण्ठस्य ग्रहस्तस्य उचितं कण्ठक्षेपणयोग्यम् । उत्प्रेक्षते पारिजातेन प्रहितं प्राभृतमिव ढौकनमिव जगत्प्रियं जगतः प्रियं विश्वासीष्टं असमं निरुपमम् ॥ ३२-३३ ॥ युग्मम् ॥

**चकोराणां सुमनसा-मिव प्रीतिप्रदामृतम् ।**
**रोहिण्या इव यामिन्या, हृदयंगमतां गतम् ॥ ३४ ॥**

**निर्विष्टकौमुदीसारं, कामुकैरिव कैरवैः ।**
**आस्ये विशन्तं पीयूष-मयूखं सा निरैक्षत ॥ ३५ ॥ युग्मम् ॥**

(व्या०) चकोराणामिति । सा सुमङ्गला आस्ये मुखे विशन्तं प्रविशन्तं पीयूषमयूखं पीयूषं मयूखा यस्य तं चन्द्रमसं निरैक्षत दृष्टवती । किंलक्षणं चन्द्रं एतानि सर्वाणि विशेषणानि चन्द्रस्यैव सुमनसां देवानां इव चकोराणां प्रीतिप्रदामृतं प्रीतिप्रदममृतं यस्य तं रोहिण्या इव रात्रेर्यामिन्या हृदयंगमतां गतं हृदयं गच्छतीति हृदयंगम भर्ता तस्य भावो हृदयंगमता तां भर्तृत्वं प्राप्तवन्तं कामुकैरिव कैरवैः कुमुदैः निर्विष्टकौमुदीसारं निर्विष्ट उपभुक्त कौमुद्या ज्योत्स्नाया: सारो यस्य तं उपभुक्तज्योत्स्नासारम् ॥ ३४-३५ ॥ युग्मम् ॥

**क्षिपन् गुहासु शैलानां, लोकादुत्सारितं तमः ।**
**संकोचं मोचितं पद्म-वनाद् घूकदृशां दिशन् ॥ ३६ ॥**
**न्यस्यन् प्रकाशमाशासु, तारकेभ्योऽपकर्षितम् ।**
**स्वप्नेऽपि स्मेरयामास, तस्या हृत्कमलं रविः ॥ ३७ ॥ युग्मम् ॥**

(व्या०) क्षिपन्निति । रवि. सूर्यः तस्या: सुमङ्गलाया हृत्कमलं हृदेवकमलं तत् स्वप्नेऽपि स्मेरयामास विकासयति स्म । किंकुर्वन् रवि: सर्वाणि विशेषणानि रवे र्ज्ञेयानि लोकात् उत्सारितं दूरितं तमः अन्धकारं शैलानां (ज्योत्स्नादिभ्योऽण् ७-२-३४ । इ सू. मत्वर्थे शिलाशब्दात् अण् शिला. सन्ति एषु इति शैलाः) पर्वतानां गुहासु गह्वरेषु क्षिपन् क्षिपतीति पद्मवनात् पद्मानां वनं तस्मात् मोचितं त्याजितं संकोचं घूकदृशां घूकानां दृशस्तासां दिशन् दिशतीति ददत् तारकेभ्योऽपकर्षितं गृहीतं प्रकाशमाशासु दिक्षु न्यस्यन् स्थापयन् ॥ ३६-३७ ॥

**अखंडदंडनद्धोऽपि, न त्यजन्निजचापलम् ।**
**सहजं दुस्त्यज घोष-मिव किंकिणिकाक्वणैः ॥ ३८ ॥**
**ध्वजो रजोभयेनेव, व्योमन्येव कृतास्पदः ॥**
**तत्प्रीतिनर्तकीनाट्या-चार्यकम्बां व्यडंबयत् ॥ ३९ ॥ युग्मम् ॥**

(व्या०) अखंड इति । ध्वज तत्प्रीतिनर्तकीनाट्याचार्यकम्बा तस्या सुमङ्गलायाः प्रीतिरेवनर्तकी तस्या नाट्याचार्यो रङ्गाचार्यः तस्य कम्बा ता सुम-

ङ्गलयाः प्रीतिरूपनर्तकी तस्या नर्तने रङ्गाचार्थकरकृतकम्बां व्यडम्बयत् लक्षणया नाटयाचार्यकम्बायाः प्रापेति भाव. । किंकुर्वन् ध्वजः एतानि ध्वजविशेषणानि ज्ञेयानि अखंडदंडनद्धोऽपि अखडश्चासौ दंडश्च तेन नद्ध बद्धोऽपि सहजं सहजातं स्वाभाविकं दुस्त्यजं दुःखेन त्यक्तुमशक्यं निजचापलं निजस्य चापलं तत् न त्यजन् । उत्प्रेक्षते किंकिणिकाक्वणै किंकिणिकानां क्षुद्रघंटिकाना क्वणाः शब्दास्तैः क्षुद्रघंटिकाशब्दैः घोषन् इव घोषतीति घोषन् शब्दं कुर्वन्निव । उत्प्रेक्षते रजोभयेन रजसोभयं तेन व्योम्नि एव आकाशे एव कृतास्पद इव कृतं आस्पदं येन स कृतस्थान इव ॥ ३८–३९ ॥ युग्मम् ॥

**स्त्रैणेन मौलिना ध्रीये, सोऽहं साक्षी जगज्जनः ।**
**त्वं धत्सेऽतुच्छमत्सम्प–ल्लुंपाकौ हृदये पुनः ॥ ४० ॥**
**मुखन्यस्ताम्बुजचंचच्चंचरीकरवच्छलात् ।**
**इति प्रीतिकलिं कुर्व–न्निव कुंभस्तयैक्ष्यत ॥ ४१ ॥ युग्मम् ॥**

(व्या०) स्त्रैणेन इति । तया सुमङ्गलया कुंभ ऐक्ष्यत दृष्टः । किं कुर्वन् कुंभ. उत्प्रेक्षते मुखन्यस्ताम्बुजचंचच्चंचरीकरवच्छलात् मुखे न्यस्तं निहितं यत् अम्बुजं कमलं तस्मिन् चंचन् भ्रमन् य चंचरीको भ्रमर. तस्य रवः शब्द तस्य च्छलात् इति प्रीतिकलिं प्रीत्याकलिस्तं कुर्वन् करोतीति कुर्वन् इव । इतीति किं स सर्वप्रसिद्धोऽहं स्त्रैणेन (षष्ठयाः समूहे । ६–२–९ । इ. सू. प्राग्वतः स्त्रीपुंसान्नञ्स्नञ् । ६ । १ । २५ । इ. सू. स्त्रीशब्दात् नञ् प्रत्यय ।) स्त्रीणां समूहः स्त्रैणं तेन स्त्रीसमूहेन मौलिना मस्तकेन आध्रीये ध्रीये अत्र विषये जगज्जनः जगतोजनः साक्षी (साक्षाद् द्रष्टा । ७ । १ । १९७ । इ. सू. साक्षात् इति अव्ययात् द्रष्टा इत्यर्थे इन् प्रत्ययः । प्रायोऽव्ययस्य । ७ । ४ । ६५ । इ. सू. अन्त्यस्वरादेर्लुक्) वर्तते । त्वं पुनः अतुच्छमत्संपल्लुम्पाकौ अतुच्छा महती या मम सम्पत् समृद्धिस्तस्या लुम्पाकौ अपहारकौ हृदये धत्से धरसि ॥ ४०–४१ ॥

**अम्लानकमलामोद–मनेककविशब्दितम् ।**
**सद्वृत्तपालिनिर्वेश–क्षमविष्टरडम्बरम् ॥ ४२ ॥**

**स्वर्णस्फातिस्फुरद्भङ्गि-वर्ण्यं विश्वोपकारकृत् ।**
**इभ्यागारमिवातेने, कासारं तद्दृगुत्सवम् ॥ ४३ ॥ युग्मम् ॥**

(व्या०) अम्लान इति । कासारं सरोवरं इभ्यागारमिव इभ्यस्य व्यावहारिकस्य अगारं गृहमिव व्यावहारिकगृहमिव तद्दृगुत्सवं तस्याः सुमङ्गलायाः दृशः उत्सवमातेने विस्तारयति स्म । कासारः पुंनपुमेव ज्ञेयः । किंलक्षणं कासारं इभ्यागारं च द्वयोरपि विशेषणानि सर्वाणि अम्लानकमलामोदं न म्लानः (व्यञ्जनान्तस्थातोऽख्याध्यः । ४-२-७१ । इ. सू. म्लाधातो परस्य तस्य नः ।) अम्लान. अम्लानः कमलानामामोदः परिमलो यस्मिन् तत् । पक्षे अम्लानः कमलया लक्ष्म्या आमोदो हर्षो यस्मिन् तत् अनेककविशब्दितं अनेककानां वीनां पक्षिणां शब्दितं यस्मिन् तत् पक्षे अनेकानां कवीनां शब्दितं गीतकवित्वादिना कीर्तिविस्तारणं यस्मिन् तत् सती प्रशस्या वृत्ताकारा पालिर्यस्मिन् तत् निर्वेशस्य उपभोगस्य क्षमो विष्टराणां वृक्षाणां डंबरो यस्मिन् तत् निर्वेशक्षमविष्टरडंबरं पक्षे सद्वृत्तं येषां ते सद्वृत्ताः साधव सद्वृत्तानां सच्चारित्राणां पालिः श्रेणि तस्याः निर्वेशक्षमः आसनानां डंबरो यस्मिन् तत् । स्वर्णस्फातिस्फुरद्भङ्गिवर्ण्यं सुष्टु शोभनस्य अर्णसः पानीयस्य स्फात्या स्फुरन्त्यो भंगयस्तरङ्गाः तैर्वर्ण्यं पक्षे स्वर्णस्य सुवर्णस्य स्फात्या स्फुरन्त्यो भंगयो विच्छित्तयस्ताभिर्वर्ण्यं विश्वोपकारकृत् विश्वस्य जगत उपकारं करोतीति ॥ ४२-४३ ॥ युग्मम् ॥

**क्वचिद्वायुवशोद्धूत-वीचीनीचीकृताचलम् ।**
**उद्वृत्तपृष्ठैः पाठीनैः, कृतद्वीपभ्रमं क्वचित् ॥ ४४ ॥**
**पीयमानोदकं क्वापि, सतृषैरिववारिदैः ।**
**रत्नाकरं कुरंगाक्षी, वीक्षमाणा विसिष्मिये ॥ ४५ ॥ युग्मम् ॥**

(व्या०) क्वचिदिति । कुरंगाक्षी कुरंगस्य मृगस्य अक्षिणी इव अक्षिणी यस्याः सा सुमङ्गला रत्नाकरं समुद्रं वीक्षमाणा वीक्षते इति वीक्षमाणा सती विसिष्मिये विस्मयं प्रापा । किंलक्षणं रत्नाकरं सर्वाणि रत्नाकरस्यैव विशेषणानि क्वचिद् वायुवशोद्धूतवीचीनीचीकृताचलम वायोर्वशेन उद्धूता उत्पादिता ये वीचयः कल्लोलास्तैर्नीचीकृताः नीचाः कृताः अचलाः पर्वता येन तं । क्वचिद् उद्वृत्तपृष्ठैः

उद्वृत्त पृष्ठं यैस्ते तैः उत्पाटितपृष्ठविभागैः पाठीनैर्मत्स्यविशेषैः कृतद्वीपभ्रमं कृतो द्वीपस्य भ्रमो यस्मिन् तम् । उत्प्रेक्षते सतृषैः (सहस्तेन । ३ । १ । २४ । इ. सू. बहुव्रीहिसमासः ।) सतृषितैरिव वारि ददतीति वारिदास्तैर्मेघैः (आतोडोऽह्वावामः ५ । १ । ७६ । इ. सू. वारिपूर्वकदाधातोः डः ।) कचित् पीयते इति पीयमानं पीयमानं उदकं यस्मिन् तम् ॥ ४४–४५ ॥ युग्मम् ॥

**सूर्यबिंबादिवोद्भूतं, जन्मस्थानमिवार्चिषाम् ।**
**चरिष्णुमिवरत्नाद्रिं, भारादिव दिवश्च्युतम् ॥ ४६ ॥**
**दीव्यदेवाङ्गनं रत्न–भित्तिरुग्भिः क्षिपत्तमः ।**
**अभूदभ्रंकषं तस्या, विमानं नयनातिथिः ॥ ४७ ॥ युग्मम् ॥**

(व्या०) सूर्यू इति । विमानं तस्याः सुमङ्गलायाः नयनातिथिः नयनयोर्नेत्रयोरतिथिः अभूत् तया विमानं दृष्टमित्यर्थः । किंलक्षणं विमानं एतानि सर्वाणि विमानस्यैव विशेषणानि ज्ञेयानि उत्प्रेक्षते सूर्यबिम्बात् सूर्यस्य बिम्बं तस्मात् उद्भूतमिव प्रकटीभूतमिव उत्प्रेक्षते अर्चिषां तेजसां जन्मस्थानमिव जन्मनः स्थानमिव उत्प्रेक्षते चरिष्णुं (भ्राज्यलङ्कृग् निराकृग्भूसहिरुचिवृतिवृधिचरिप्रजनापत्रप इष्णु । ५ । २ । २८ । इ. सू. शीलादिसदर्थे चर्धातोः इष्णुः प्रत्यय. ।) चरतीत्येवंशीलस्तं चलनशीलं रत्नाद्रिमिव रत्नाचलमिव । उत्प्रेक्षते भारात् दिवः स्वर्गात् च्युतमिव भ्रष्टमिव । दीव्यदेवाङ्गनं दीव्यन्तीति दीव्यन्त्यो देवानामङ्गनाः स्त्रियो यस्मिन् तत् कीदृग्देवस्त्रि रत्नभित्तिरुग्भिः रत्नानां भित्तयस्तासां रुग्भिः किरणैस्तमोऽन्धकारं क्षिपतीति क्षिपत् । अभ्रंकषं (कूलाभ्रकरीषात् कषः । ५ । १ । ११० । इ. सू. अभ्रकर्मपूर्वककषेः खः । खित्वान्मोऽन्तः) अभ्राणि कषतीति अभ्रंकषमाकाशलग्नम् ॥ ४६–४७ ॥ युग्मम् ॥

**रत्नाश्मरिष्टवैडूर्य–स्फटिकानां गभस्तिभिः ।**
**लम्भयन्तं नभश्चित्र–फलकस्य सनाभिताम् ॥ ४८ ॥**
**वार्धिना दुहितुर्दत्त–मिव कंदुककेलये ।**
**रत्नराशिं दवीयांस–मपुण्यानां ददर्श सा ॥ ४९ ॥**

(व्या०) रक्तइति । सा सुमङ्गला रत्नराशिं रत्नानां राशि: समूहस्तं ददर्श । किं कुर्वन्तं रत्नराशिं रक्ताश्मरिष्टवैडूर्यस्फटिकानां रक्ताश्मानश्च पद्मरागमणय: अरिष्टानिच कृष्णरत्नानि वैडूर्याणिच नीलमणय: स्फटिकाश्च श्वेतमणय: तेषां गभस्तय किरणा: तै: नभ: आकाशं चित्रफलकस्य चित्रस्य फलकं तस्य सनाभितां सादृश्यं चित्रपट्टकस्य सादृश्यं लंभयन्तं लंभयतीति लंभयन् तं प्रापयन्तं पुन: किंलक्षणं रत्नराशिं उत्प्रेक्षते वार्धिना समुद्रेण दुहितु पुत्र्या लक्ष्म्या: कंदुक-केल्यै कन्दुकस्य केलिस्तस्यै दत्तमिव अपुण्यानां न विद्यते पुण्यं येषां ते तेषां निर्भाग्यानां दवीयांसं (गुणाङ्गाद्वेष्ठेयसू । ७–३–९ । इ. सू. दूरशब्दात् ईयसु-प्रत्यय: । स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रस्यान्तस्थादेर्गुणश्चनामिन: । ७ । ४ । ४२ । इ. सू. ईयसुप्रत्यये परे दूरशब्दे अकारविशिष्टस्य रकारस्य लुक् च उकारस्य गुण: । ओदौतोऽवाव् । १ । २ । २४ । इ. सू. अवादेश: ।) अतिशयेनदूर इति दवीयान् तमतिदूरम् ॥ ४८–४९ ॥ युग्मम् ॥

**आधारधाररोचिष्णुं, जिष्णुं चामीकरत्विषाम् ।**
**अजिह्मविलसज्ज्वाला–जिह्वमाहुतिलोलुपम् ॥ ५० ॥**
**श्मश्रुणेव नु धूमेन, श्यामं मखभुजां मुखम् ।**
**ददर्श श्वसनोद्भूत–रोचिषं सा विरोचनम् ॥ ५१ ॥ युग्मम् ॥**

(व्या०) आधार इति । सा सुमङ्गला विरोचनमग्निं ददर्श । किंलक्षण-मग्निं एतानि सर्वाणि अग्ने विशेषणानि ज्ञेयानि आधारधाररोचिष्णुं आधारं घृतं तस्य धारेण सेकेन रोचिष्णुं (भ्राज्यलङ् कृग् निराकृग्–ष्णु । ५ । २ । २८ इ. सू रुच्धातो शीलेऽर्थे इष्णु ।) देदीप्यमानं । चामीकरत्विषां चामीकरस्य सुवर्णस्य त्विष कान्तयस्तासां जिष्णु भूजे ष्णुक् । ५ । २ । ३० । इ. सू शीलादिसदर्थे ष्णुक् प्रत्यय ।) जयनशीलम् । अजिह्मविलसज्ज्वालाजिह्वं न जिह्मा अजिह्मा पटिष्टा विलसन्त्य प्रसरन्त्य. ज्वाला: एव जिह्वा: यस्य तं आहुतिलोलुप आहुतौ होतव्यद्रव्यग्रहणे लोलुपं लंपटम् । उत्प्रेक्षते श्मश्रुणा इव कूर्चसदृशेन धूमेन श्यामं कृष्णं मखभुजां देवानां मुखं श्वसनोद्भूतरोचिषं श्वस-नात् पवनात् उद्भूता उत्पन्ना रोचि: कान्तिर्यस्य तम् ॥ ५०–५१ ॥ युग्मम् ॥

इत्यष्टाविंशतिश्लोकै चतुर्दशस्वप्नदर्शनम् ।

**प्रविश्य वदनद्वारा, तस्याः स्वप्ना अमी समे ।**
**कूटस्थकौटुंबिकतां, भेजिरे कुक्षिमन्दिरे ॥ ५२ ॥**

(व्या०) प्रविश्य इति । अमी गजादयोऽग्निपर्यन्ताः समे सर्वे स्वप्नाः (यजिस्वपिरक्षियतिप्रच्छो नः । ५ । ३ । ८५ । इ. सू. स्वप्धातो भावे नः ।) तस्याः सुमङ्गलायाः कुक्षिमन्दिरे कुक्षिरेव मन्दिरं तस्मिन् उदररूपगृहे वदनद्वारा मुखद्वारेण प्रविश्य कूटस्थकौटुंबिकतां कूटस्थश्चासौ कौटुंबिकश्च तस्य भावः स्थिरगृहपतित्वं भेजिरे सेवन्ते स्म । ५२ ॥

**ततो गुणव्रजागारं, जजागार सुमङ्गला ।**
**साक्षात्तद्वीक्षणात्कर्तु–कामेव नयनोत्सवम् ॥ ५३ ॥**

(व्या०) तत इति । तत ततोऽनन्तरं सुमङ्गला जजागार किंविशिष्टा सुमङ्गला गुणव्रजागारं गुणाः औदार्यगांभीर्यचातुर्यधैर्यादयस्तेषां व्रजः समूह स्तस्यागारं गृहम् । उत्प्रेक्षते साक्षात् प्रत्यक्षं तद्वीक्षणात् तेषां स्वप्नानां वीक्षणात् दर्शनात् नयनोत्सवं नयनयोर्नेत्रयोरुत्सवं कर्तुकामा (तुमश्चमन कामे । ३ । २ १४० । इ. सु. कामशब्देपरे तुमो मलोपः कर्तुं कामो यस्याः सा कर्तुकामा ।) इव ॥ ५३ ॥

**स्वप्नार्थास्तानपश्यन्ती, पुरः सा चिखिदे क्षणम् ।**
**प्राप्ता मत्कुक्षिमेवामी, इति द्राग् मुमुदे पुनः ॥ ५४ ॥**

(व्या०) स्वप्न इति । सा सुमङ्गला पुरोऽग्रे तान् स्वप्नार्थान् स्वप्नाना-मर्थास्तान् स्वप्नपदार्थान् अपश्यन्ती न पश्यतीति अपश्यन्ती सती क्षणं चिखिदे खिद्–ए द्विर्धातुः परोक्षाङे प्राक् तुस्वरेस्वरविधे । ४ । १ । १ । इ. सू. द्वित्वे खिखिद्ए द्वितीयतुर्ययो पूर्वौ । ४ । १ । ४२ । इ. सू. पूर्वखस्य कः कङश्चञ् ४ । १ । ४६ । इ. सू. कस्य चत्वं चिखिद्ए इत्यत्र इन्ध्यसयोगात् परोक्षा-किद्वत् । ४ । ३ । २१ । इ सू. कित्वात् गुणो न भवति ।) खेदं प्राप्तवती । पुनः द्राग् शीघ्रं इति कारणात् मुमुदे प्रमोदं धृतवती । इतीतिकिम् अमी स्वप्नार्थाः मत्कुक्षिमेव ममकुक्षिस्तमेव प्राप्ता. ॥ ५४ ॥

**निर्नष्टनेत्रनिद्रा सा, स्वप्नान्तरचिन्तयत् ।**
**मुनिरप्राप्तपूर्वाणि, पूर्वाणीव चतुर्दश ॥ ५५ ॥**

(व्या०) निर्नष्ट इति । सा सुमङ्गला निर्नष्टनेत्रनिद्रा निर्नष्टा प्रनष्टा नेत्रयोर्निद्रा यस्याः सा निद्रारहितलोचना सती चतुर्दशस्वप्नात् अन्तर्मध्येऽचिन्तयत् । क इव मुनिरिव यथा मुनिः अप्राप्तपूर्वाणि न प्राप्तपूर्वाणि अप्राप्तपूर्वाणि तानि चतुर्दश पूर्वाणि चिन्तयति स्म इति ॥ ५५ ॥

**स्मृतिप्रत्ययमानीते, मत्या स्वप्नकदम्बके ।**
**कदम्बकोरकाकार–पुलका साऽभवन्मुदा ॥ ५६ ॥**

(व्या०) स्मृति । सा सुमङ्गला मुदा हर्षेण कदम्बकोरकाकारपुलका कदम्बस्य पुष्पं कदम्बं कदम्बपुष्पस्य कोरको मुकुलं तदाकारा पुलकाः यस्याः सा तत्सदृशरोमाञ्चा अभवत् । क सति मत्या बुद्ध्या स्वप्नकदम्बके स्वप्नानां कदम्बकस्तस्मिन् स्वप्नसमूहे स्मृतिप्रत्ययं स्मृतेः प्रत्ययस्तं स्मृतिगोचरमानीते सति प्राप्ते सति ॥ ५६ ॥

**नैयग्रोधोऽङ्कुर इव, प्रवर्धिष्णुः पुटं भुवः ।**
**आनन्दो हृदयं तस्याः, सोल्लासं निरवीवृतत् ॥ ५७ ॥**

(व्या०) नैयग्रोध इति । प्रवर्धिष्णुः (भ्राज्यलङ्कृग् निराकृग् भूसहिरुचिवृतिवृधि–ष्णुः । ५–२–२८ । इ. सू. शीलादिसदर्थे प्रवृधधातोः इष्णुः)। प्रवर्धते इत्येवं शीलः प्रवर्धिष्णुः प्रवर्धनशीलः आनन्दः तस्याः सुमङ्गलाया हृदयं सोल्लासं उल्लासेन सह वर्तते इति सोल्लासं सविकाशं निरवीवृतत् निर्वर्तयामास निष्पादयामासेत्यर्थः । क इव नैयग्रोध (तस्येदम् । ६ । ३ । १६० । इ, सू. इदमर्थे प्रागजितादण् । ६–१–१३ । इ. सू. अण् । य्वः पदान्तात् प्रागैदौत् ७–४–५ । इ. सू. न्यग्रोध इत्यत्र अणिपरे यकारात्पूर्वं ऐकारः ।) न्यग्रोधस्य अयं नैयग्रोधः अङ्कुरः इव यथा वटसंबंधी अङ्कुरो वर्धिष्णुर्भुवः पुटं सोल्लासं निर्वर्तयति ॥ ५७ ॥

**यन्निभालनभूः प्रीति–र्मेने मम तनुं तनुम् ।**
**तत्फलावाप्तिजन्मा तु, मातु केत्याममर्शसा ॥ ५८ ॥**

(व्या०) यदिति । सा सुमङ्गला इति आममर्श इत्थं विमृशति स्म । इतीतिकिम् । यन्निभालनभू येषां स्वप्नानां निभालनात् दर्शनाद् भूः समुत्पन्ना प्रीतिः मम तनुं शरीरं तनुं कृशां मेने । तु पुन॰ तत्फलावाप्तिजन्मा तेषां स्वप्नानां फलानि तेषा मवाप्ति॰ प्राप्ति॰ तस्या जन्म यस्या सा प्रीतिः क्व मातु ॥ ५८ ॥

**तया स्वप्नक्षणोन्नीत-प्रीतिसंतर्पितात्मया ।**
**उन्निद्रा नित्यमस्वप्न-वध्वोऽप्यबहु मेनिरे ॥ ५९ ॥**

(व्या०) तयेति । तया सुमङ्गलया अस्वप्नवध्वोऽपि न विद्यते स्वप्नो निद्रा येषां ते अस्वप्ना देवा स्तेषां वध्वोनार्यो देवाङ्गना नित्यं निरन्तरं उन्निद्राः उद्गता निद्रा याभ्यस्ता उन्निद्रा॰ सत्योऽबहुमेनिरे न बहुमन्यन्ते स्म । किं विशिष्टया तया स्वप्नक्षणोन्नीतप्रीतिसंतर्पितात्मया स्वप्नानां क्षण उत्सवः तस्मात उन्नीता प्राप्ता या प्रीतिस्तया संतर्पित आत्मा यया सा तया ॥ ५९ ॥

**चेतस्तुरङ्गं तच्चारु-विचाराध्वनि धावितम् ।**
**सा निष्प्रत्यूहमित्यूह-वल्गया विदधे स्थिरम् ॥ ६० ॥**

(व्या०) चेत इति । सा सुमङ्गला चेतस्तुरङ्ग चेतोहृदयमेव तुरङ्गोऽश्वस्तं इति अनेन प्रकारेण ऊहवल्गया ऊहो विचार एव वल्गा मुखरज्जुस्तया निष्प्रत्यूहं निर्गताः प्रत्यूहा विघ्ना यस्मिन् कर्मणि यथा भवति तथा स्थिरं निश्चलं विदधे । किंलक्षणं चेतस्तुरङ्गं तच्चारुविचाराध्वनि तेषां स्वप्नानां चारुर्मनोज्ञो यो विचारः स एव अध्वा मार्गस्तस्मिन् धावितं सत्वरं चलितम् ॥ ६० ॥

**नाम्ना न केवलं वामा, वामाबुद्धिगुणेष्वपि ।**
**ऊहे स्फुरन्ति सद्दृष्टि-लालसे नालसेक्षणाः ॥ ६१ ॥**

(व्या०) नाम्ना इति । वामा स्त्रिय॰ केवलं नाम्ना न वामा॰ न प्रतिकूलाः किन्तु बुद्धिगुणेष्वपि बुद्धेर्गुणास्तेष्वपि तु वामा अलसेक्षणा॰ अलसे ईक्षणे यासां ता स्त्रिय. सद्दृष्टिलालसे सती चासौ दृष्टिश्च सद्दृष्टिस्तस्या लालसे प्रशस्यलोचन-गोचरे ऊहे विचारे न स्फुरन्ति न समर्था भवन्ति ॥ ५२ ॥

**कटीरस्तनभारेण, यासां मन्दः पदक्रमः ।**
**तासां विचारसामर्थ्यं, स्त्रीणां संगच्छते कथम् ॥ ६२ ॥**

(व्या०) कटीर इति । यासां स्त्रीणां कटीरस्तनभारेण कटीरं च कटीतटं स्तनौ च एतेषा समाहार कटीरस्तनं (प्राणितुर्याङ्गाणाम् । ३-१-१३७ । इ. सू. द्वन्द्वैकवद्भाव । ) तस्य भारेण पदक्रम पदानां क्रम चरणविन्यासो मन्दो वर्तते पदश्चरण पक्षे विभक्त्यन्तपदम् । तासा स्त्रीणां विचारसामर्थ्यं विशेषेण चारो गमनं तस्य सामर्थ्यं पक्षे ऊहशक्ति कथं संगच्छते कथं घटते ॥ ६२ ॥

**स्थूलस्तनस्थलं दृष्ट्वा, हृदयं हरिणीदृशाम् ।**
**त्रस्यता यानहंसेन, भारती नीयतेऽन्यतः ॥ ६३ ॥**

(व्या०) स्थूल इति हरिणीदृशां ( उष्ट्रमुखादयः । ३-१-२३ । इ. सू. समासः । ) हरिण्या दृगिव दृक् यासां ता हरिणीदृशस्तासां स्त्रीणां स्थूलस्तनस्थलं स्थूलौ चतौ स्तनौ च स्थूलस्तनौ तयो स्थलं तत् हृदयं दृष्ट्वा त्रस्यता त्रस्यतीति त्रस्यन् तेन त्रासं प्राप्नुवता यानहंसेन वाहनराजहंसेन भारती सरस्वती अन्यत अन्यत्र नीयते । कोऽर्थं स्थले राजहंसानां प्रायः स्थितिर्नभवतीति भाव ॥ ६३ ॥

**हारेऽनुस्तनवल्मीकं, महाभोगिनि वीक्षिते ।**
**आसीदति कुलायेच्छुः, स्त्रीणां धीविष्करी कथम् ॥ ६४ ॥**

(व्या०) हार इति । धीविष्करी (वौ विष्किरो वा । ४-४-९६ । इ सू. विपूर्वककिरते स्सट् । ) धीरेव विष्करी बुद्धिरूपपक्षिणी स्त्रीणा स्तनवल्मीक स्तनावेव वल्मीकरतं अनु पश्चात स्तनरूपकोटरं पश्चात् महाभोगिनि महान् आभोगो विस्तार , अस्ति यस्य महाभोगी तस्मिन् महासर्प्पे वा एवंविधे हारे वीक्षिते सति कथं आसीदति आसन्ना भवति अपि तु नैव । किं लक्षणा धीविष्करी कुलायेच्छु कुलायं (कुलिकुलिककलिकषिभ्य काय । ३७२ । इ उ. सू कुलिधातो काय कोलन्ति अत्र इति कुलाय ।) नीडं पक्षे कुलायवंशाय निरुपद्रवतामिच्छु (विन्द्विच्छू । ५-२-३४ । इ. सू. निपात ) ॥ ६४ ॥

**मन्ये मोहमयः सर्गः, स्त्रीषु धात्रा समर्थितः ।**
**यान्ति यत्तदभिष्वङ्गान्मूढतां तात्त्विका अपि ॥ ६५ ॥**

(व्या०) मन्ये इति । अहमेवं मन्ये धात्रा ब्रह्मणा स्त्रीषु मोहमयः सर्गः सृष्टि समर्थितः कृतः । यत् यस्मात् कारणात् तदभिष्वङ्गात् तासां स्त्रीणामभिष्वङ्गात् आसक्तितः तात्त्विका अपि विद्वांसोऽपि मूढतां मूढस्य भावो मूढता तामविवेकितां यान्ति प्राप्नुवन्ति ॥ ६५ ॥

**जातौ नः किल मुख्याश्रीः, सापि गोपालवल्लभा ।**
**जातं जलात्कलाधार-द्विष्टं शिश्राय पुष्करम् ॥ ६६ ॥**

(व्या०) जातौ इति । नोऽस्माकं जातौ या श्रीर्लक्ष्मी मुख्या (शाखादेर्यः । ७-१-११४ । इ. सू. तुल्येऽर्थेमुखशब्दात् य. । ) वर्तते । सापि श्रीर्लक्ष्मीर्गोपालवल्लभा गाः पालयतीति गोपाल ( कर्मणोऽण् । ५-१-७२ । इ. सू. गोशब्दपूर्वकपालधातोरण् । ङस्युक्तं कृता । ३-१-४९ । इ. सू. नित्यतत्पुरुषः ।) पशुपाल कृष्णो वा तस्य वल्लभा पत्नी । जलात्पानीयात् जडान्मूर्खात् वा जातं कलाधारद्विष्टं धरतीति धर कलानां धरश्चन्द्रो विचक्षणो वा तस्य द्विष्टं पुष्करं कमल शिश्राय आश्रितवती ॥ ६६ ॥

**बभार भारती ख्यातिं, स्त्रीजातौ विदुषीति या ।**
**स्वभावभङ्गे न श्रेय, इति साऽभूदभर्तृका ॥ ६७ ॥**

(व्या०) बभारेति । या भारती स्त्रीजातौ विदुषी ( वावेत्ते क्वसु· ५-२-२२ । इ. सू. सदर्थे विदधातो· क्वसु । अधातूदृदितः। २-४-२ । इ. सू. स्त्रियांङी· । क्वसुष्मतौ च । २-१-१०५ । इ. सू. क्वस उष् । ) वेत्तीति विदुषी इति ख्यातिं प्रसिद्धिं बभार धृतवती । स्वभावभङ्गे स्वभावस्य भङ्गस्तस्मिन् स्वीयसहजप्रकृतित्यागे न श्रेय· कल्याणं इति कारणात् सा अभर्तृका। नास्ति भर्ता यस्या· सा अभर्तृका भर्तृरहिता बालकुमार्येव अभूत् ॥ ६७ ॥

**तज्जगद्गुरुरेवैत-द्विचारं कर्तुमर्हति ।**
**जात्यरत्नपरीक्षायां, बालाः किमधिकारिणः ॥ ६८ ॥**

(व्या०) तदिति । तत् तस्मात्कारणात् जगद्गुरु. जगतां गुरु श्रीयुगादीश्वर एव एतद्विचारं एतेषां चतुर्दशस्वप्नानां विचारस्तं कर्तुमर्हति । योग्यः

स्यात् । जात्यरत्नपरीक्षायां जात्यानि च तानि रत्नानि च तेषां परीक्षायां बालाः शिशव: किमधिकारिणः अधिकारोऽस्ति एषामित्यधिकारिणः स्युरपि तु नैव भवेयुः ॥ ६८ ॥

**अथालसलसद्बाहु–लता तल्पं मुमोच सा ।**
**सौषुप्तिकैरिव प्रीय–माणा क्वणितभूषणैः ॥ ६९ ॥**

(व्या०) अथेति । अथानन्तरं अलसलसद्बाहुलता अलसेन आलस्येन लसन्ती बाहू एव लतावल्ली यस्याः सा सती सा सुमङ्गला तल्पं शय्यां मुमोच त्यक्तवती । किंविशिष्टा सुमङ्गला क्वणितभूषणै क्वणितानि च तानि भूषणानि च तै: शब्दितैराभरणै कैरिव सौषुप्तिकैः ( सुस्नातादिभ्य पृच्छति । ६–४–४२ । इ. सू. पृच्छत्यर्थे सुषुप्तशब्दात् इकण् ) सुषुप्तं सुष्ठु सुप्तं पृच्छन्तीति सौषुप्तिकानि तै: प्रीयमाणा प्रीतिं प्राप्यमाना ॥ ६९ ॥

**अकुर्वती स्वहर्षस्य, सखीरपि विभागिनीः ।**
**साऽचलच्चलनन्यासै–र्हसन्ती हंसवल्लभाः ॥ ७० ॥**

(व्या०) अकुर्वतीति । सा सुमङ्गला अचलत् चलतिस्म । किं कुर्वती सखीरपि स्वहर्षस्य स्वस्य हर्षस्तस्य विभागिनी विभागोऽस्ति आसामिति विभागिन्यस्ताः विभागवती: अकुर्वती पुन: चलनन्यासैः चलनयोर्न्यासास्तैश्चरणमोचनैः हंसवल्लभाः हंसानां वल्लभास्ता राजहंसी हसतीति हसन्ती ॥ ७० ॥

**इच्छन्त्या विजनं याने, तस्या नाभवतां प्रिये ।**
**नूपुरे रूपरेखाया, आरावैः स्तावकैः पदोः ॥ ७१ ॥**

(व्या०) इच्छन्त्या इति । तस्या: सुमङ्गलाया नूपुरे प्रिये अभीष्टे नाभवताम् । किं कुर्वत्या याने गमने विजनमेकान्तं इच्छन्त्या: इच्छतीति इच्छन्ती तस्या वाञ्छन्त्या किंलक्षणे नूपुरे आरावै: ( रोरुपसर्गात् । ५–३–२२ । इ. सू. भावेरुधातोर्घञ् । ) शब्दै तस्या: सुमङ्गलासंबंधिनो पदोश्चरणयो रूपरेखाया रूपस्यरेखा तस्या: स्तावकै (णकतृचौ । ५–१–४८ । इ. सू. स्तुधातो. कर्तरि णक । नामिनोऽकलिहले । ४–३–५१ । इ. सू. वृद्धि: । ) स्तुतिकारकै ॥ ७१ ॥

**अकाले मञ्जुसिञ्जाना, मेखला मे खलायितम् ।**
**अधुनैव विधात्री कि-मिति सा दध्युषी क्षणम् ॥ ७२ ॥**

(व्या०) अकाल इति । सा सुमङ्गला क्षणमिति दध्युषी दध्याविति दध्युषी ध्यातवती । इतीति किं मे मम मेखला खलायितं दुर्जनवदाचरितं अधुनैव किं विधात्री किं करिष्यति । किं कुर्वाणा मेखला अकाले न कालोऽकालस्तस्मिन् अनवसरे मञ्जु मनोज्ञ सिञ्जानां अव्यक्तं शब्दं कुर्वाणा ॥ ७२ ॥

**मौनं भेजे करस्पर्श-संकेताद्वलयावलिः ।**
**विदुषीव तदाकूतं, तरसा तत्प्रकोष्ठयोः ॥ ७३ ॥**

(व्या०) मौनमिति । तत्प्रकोष्ठयोः तस्याः सुमङ्गलाया. प्रकोष्ठौ तयोः तत्प्रकोष्ठयोः वलयावलि' वलयानामावलिर्वलयावलि' करस्पर्शसंकेतात् करस्य स्पर्शस्तस्य सकेतात मौनं भेजे । किं कुर्वती वलयावलिः तरसा वेगेन तदाकूतं तस्या' सुमङ्गलाया आकूतं स्वान्ताभिप्रायं विदुषी इव विज्ञावतीव ॥ ७३ ॥

**दुर्निमित्तात् क्व गन्तासी-त्यालापादालिजन्मनः ।**
**भीता मन्दपदन्यासं, साऽभ्यासं भर्तुरासदत् ॥ ७४ ॥**

(व्या०) दुर्निमित्तादिति । सा सुमङ्गला मन्दपदन्यास मन्द पदानां न्यासो यस्मिन् कर्मणि यथा भवति तथा भर्तु' श्रीऋषभदेवस्य अभ्यासं समीपं आसदत् प्रापा किंलक्षणा सुमङ्गला आलिजन्मन· आलिभ्य सखीभ्यो जन्म यस्य तस्मात सखीभ्य. समुत्पन्नात् दुर्निमित्तात् (दुर्निन्दाकृच्छ्रे । ३-१-४३ इ. सू. नित्यतत्पुरुष· । दुष्टं निमित्तं दुर्निमित्तं ।) अमङ्गलरूपात् क्व गन्तासि त्वं कुत्र गमिष्यसि इत्यालापात् ईदृग् जल्पनात् भीता भयं प्राप्ता । इतीति किं छीए विच्छभग्गे, कहि भणिएकंटके अभग्गे य ॥ 'दिठे सप्पबिडाले, नहि गमणं सुंदरं होइ ॥ १ ॥ इति शकुनशास्त्रे जिनदत्तपादा । इति वचनात् अपशकुनभयेन सखीनामकथयित्वैवैव एकाकिनी ययाविति भाव ॥ ७४ ॥

**रत्नप्रदीपरुचिसंयमितान्धकारे, मुक्तावचूलकमनीयवितानभाजि ।**
**सा तत्र दिव्यभवने भुवनाधिनाथं, निद्रानिरुद्धनयनद्वयमालुलोके ॥**

(व्या०) रत्नेति । सा सुमङ्गला तत्र तस्मिन् दिव्यभवने दिव्यं च तत् भवनं च तस्मिन् भुवनाधिनाथं भुवनानामधिनाथः स्वामी तं निद्रानिरुद्धनयनद्वयं निद्रया निरुद्ध नयनयोर्नेत्रयोर्द्वयं यस्य तं निद्रयामुद्रितलोचनयुग्मं आलुलोके ददर्श । किंविशिष्टे दिव्यभवने रत्नप्रदीपरुचिसंयमितान्धकारे रत्नानां प्रदीपाः तेषां रुचय कान्तयस्ताभिः संयमितं लक्षणया निराकृतमन्धकारं यस्मिन् तत् तस्मिन् रत्नसत्कप्रदीपानां कान्तिनिरस्तान्धकारे प्रकाशमये इत्यर्थः । पुनः मुक्तावचूलकमनीयवितानभाजि मुक्तानामवचूलाः झुंबनकाः तैः कमनीया मनोज्ञा ते च ते वितानाश्च चन्द्रोद्योताः तान् भजतीति भाक् तस्मिन् ॥ ७५ ॥

**पल्यङ्के विशदविकीर्णपुष्पतारे, व्योम्नीव प्रथिमगुणैकधाम्नि लीनः ।**
**उत्फुल्लेक्षणकुमुदां मुदा जिनेन्दु श्चक्राणः सपदि कुमुद्वतीमिवैताम् ॥**

(व्या०) पल्यङ्क इति । जिनेन्दुः जिन एव इन्दुः श्रीऋषभचन्द्रः एतां सुमङ्गलां मुदा हर्षेण कुमुद्वतीमिव कुमुदानि सन्ति अस्या इति कुमुद्वती तां कुमुदिनीमिव चक्राण. कुरुते इति चक्राणः कृतवान् । किंविशिष्टो जिनेन्दुः पल्यङ्के व्योम्नीव नभसीव लीनः सुप्तः । किंलक्षणे पल्यङ्के व्योम्नि च विशदविकीर्णपुष्पतारे विशदानि निर्मलानि विकीर्णानि विक्षिप्तानि यानि चम्पकशतपत्रादिपुष्पाणि तैस्तारे मनोज्ञे पक्षे विशदविकीर्णपुष्पवत् तारा यस्मिन् तस्मिन् । पुनः प्रथिमगुणैकधाम्नि पृथोर्भाव प्रथिमा (पृथ्वादेरिमन् वा । ७–१–५८ । इ. सू. पृथुशब्दात् इमन् वा । त्र्यन्तस्वरादे ७–४–४३ । इ. सू अन्त्यस्वरादेर्लुक् । ) विस्तार स एव गुण विस्तारगुणस्तस्य एकधाम्नि एकगृहे किंलक्षणां सुमङ्गलां उत्फुल्लेक्षणकुमुदां उत्फुल्ले विकस्वरे च ते ईक्षणे च लोचने एव कुमुदे यस्याः सा ताम् । कोऽर्थः यथा चन्द्र कुमुदिनीं स्वदर्शनेन विकाशयति तथा जिनेन्दुरपि सुमङ्गलां मोदयामासेति भाव ॥ ७६ ॥

**तोयार्द्रया इव परिचयान्मुक्तशोषं स्वतन्वाः,**
**पौष्पं तल्पं प्रति परिमलेनोत्तमर्णीभवन्तम् ।**
**दृग्भ्यां व्रीडाव्ययमकृजुस्फारिताभ्यां प्रसुप्तं,**
**दृष्ट्वा नाथं लवणिमसुधांभोनिधिं पिप्रिये सा ॥ ७७ ॥**

(व्या०) सा देवी सुमङ्गला दृग्भ्यां लोचनाभ्यां नाथं स्वामिनं प्रसुप्तं दृष्ट्वा पिप्रिये प्रीतिं प्राप । किं कुर्वन्तं नाथं पौष्पं (तस्येदम् ६-३-१६० । (इ. सू. इदमर्थे प्राग्जितादण् । ६-१-१३ । इ. सू. अण् ) पुष्पाणामिदं तत् तल्पं पुष्पशय्यां प्रति परिमलेन उत्तमर्णीभवन्तं परिमलदानं कुर्वन्तं किंविशिष्टं पौष्पं तल्पं जलक्लिन्नवस्त्रं तोयार्द्रा उच्यते तोयार्द्राया इव तोयार्द्रासदृशाया स्वतन्वाः स्वस्य तनुस्तस्याः स्वतन्वाः निजशरीरस्य परिचयात् मुक्ताशोषं मुक्त आशोषो येन तत् शोषरहितं किं लक्षणाभ्यां दृग्भ्यां व्रीडाव्यपगमऋजुस्फारिताभ्यां व्रीडायाः लज्जायाः व्यपगमेन अभावेन ऋजु सरलं यथा भवति तथा स्फारिताभ्यां विस्तारिताभ्यां किंविशिष्टं नाथं लवणिमसुधांभोनिधिं लवणिमा (पृथ्वादेरिमन् वा । ७-१-५८ । इ. सू लवणशब्दात् इमन् । त्र्यन्तस्वरादेः । ७-४-४३ । इ. सू. अन्त्यस्वरादेर्लुक् । लावण्यं तदेवसुधा अमृतं तस्याः लावण्यसुधाया अंभोनिधि समुद्रस्तम् ॥ ७७ ॥

**सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि-**
**र्धम्मिल्लादिमहाकवित्वकलनाकल्लोलिनीमानुमान् ।**
**वाणीदत्तवरश्चिरं विजयते तेन स्वय निर्मिते,**
**सर्गो जैनकुमारसंभवमहाकाव्ये ऽभवत् सप्तमः ॥ ७ ॥**

इतिश्रीमदञ्चलगच्छेकविचक्रवर्तिश्रीजयशेखरसूरिविरचितस्य **श्रीजैनकुमारसंभवमहाकाव्यस्य** तच्छिष्यश्रीधर्मशेखरमहोपाध्यायविरचितायां टीकायां श्रीमाणिक्यसुन्दरशोधितायां **सप्तमसर्गव्याख्या समाप्ता** ॥ ७ ॥

## ॥ अथ अष्टमः सर्गः प्रारभ्यते ॥

**अथ प्रसन्नप्रभुवक्त्रवीक्षा–पीयूषपानोत्सवलीनचेताः ।**
**विश्रम्य मृद्वी क्षणमङ्घ्रिचार–जन्मक्रमच्छेदमसौ विवेद ॥ १ ॥**

(व्या०) अथेति । अथानन्तरं मृद्वी (स्वरादुतो गुणादखरोः । २–४–३५ । इ. सू. मृदुशब्दात् स्त्रियांडीर्वा ) सुकोमला असो सुमङ्गला क्षणं विश्रम्य अंघ्रिचारजन्मक्रमच्छेदं अंघ्र्योश्चार अंघ्रिचार तस्मात् जन्म यस्य चासौ क्रमश्च तस्यच्छेदस्तं चरणसंचरणसमुत्पन्नश्रमच्छेदं विवेद प्राप । किंलक्षणा सुमङ्गला प्रसन्नप्रभुवक्त्रवीक्षापीयूषपानोत्सवलीनचेता प्रसन्नं च तत् प्रभोर्वक्त्रं च मुखं तस्य वीक्षा दर्शनं तदेव पीयूषममृतं तस्य पानं तस्य उत्सवे लीनं चेतो यस्याः सा ॥ १ ॥

**ये श्वासवाता वदनादमान्त–इवोद्भवन्ति स्म रयेण तस्याः ।**
**ते स्वास्थ्यमापत्सत वह्निदिश्य–वायोर्विरामे जलधेरिवापः ॥ २ ॥**

(व्या०) ये इति । तस्याः सुमङ्गलाया वदनात् मुखात् ये श्वासवाता श्वासस्य वाता. श्वासवायवो रयेण वेगेन अमान्त इव उद्भवन्ति स्म रयेण उद्यता. । ते श्वासवाताः स्वास्थ्यं स्वस्थस्य भाव स्वास्थ्यं निश्चलतामापत्सत आगता । के इव जलधेः जलानि धीयन्ते अस्मिन् इति जलधि. तस्य समुद्रस्य आपो जलानीव । यथा आपो जलानि वह्निदिश्य (दिगादिदेहांशाद्य ६–३–१२४ । इ. सू दिश् शब्दात् भवेऽर्थे यः । ) वायो वह्नेर्दिशिभवो यो वायुस्तस्य आग्नेयकोणपवनस्य विरामे अभावे स्वास्थ्यमापद्यन्ते ॥ २ ॥

**या कृत्रिमा मौक्तिकमण्डनश्री–रदीयत स्वेदलवैस्तदङ्गे ।**
**तत्र स्थितौ सा सहसा विलीना, किं कृत्रिमं खेलति नेतुरग्रे ॥ ३ ॥**

(व्या०) येति । तदङ्गे तस्या सुमङ्गलाया अङ्गं तस्मिन् शरीरे स्वेदजलै स्वेदस्य जलानि तै. प्रस्वेदबिन्दुभि. या कृत्रिमा (ड्वितस्त्रिमक् तत्कृतम् । ५–३–८४ । इ सू. कृञ्धातो त्रिमक् । ) क्रियया निर्वृत्ता मौक्तिकश्रीःमौ-

क्तिकानां श्रीः मुक्तामयी अलंकरणलक्ष्मीर्गदीयत दत्ता । तत्र स्थितौ श्रीयुगादीश-दृष्टौ सा मौक्तिकमंडनश्री सहसा विलीना विलयं गता । नेतु ( णकतृचौ । ५-१-४८ । इ. सू. नीधातोः कर्तरितृच् प्रत्यय । नामिनोगुणोऽक्ङिति । ४-३-१ । इ. सू. नीधातोर्गुण । ) स्वामिनोऽग्रे किं कृत्रिमं खेलति अपि तु नैव ॥ ३ ॥

**श्लथं विहारेण यदन्तरीय-दुकूलमासीत् पथि विप्रकीर्णम् ।**
**सांयात्रिकेणेव धनं नियम्य, नीवीं तया तद् दृढयांबभूवे ॥ ४ ॥**

**(व्या०)** श्लथमिति । यदन्तरीयदुकूलं यस्याः सुमङ्गलायाः अन्तरीयं परिधानवस्त्रं तदेव दुकूलं पट्टकूलं पथिमार्गे विहारेण चलनेन श्लथं शिथिलं विप्रकीर्णं विसंस्थुलमासीत् । तद्दुकूलं तया सुमङ्गलया नीवीं मेखलां नियम्य-बध्वा दृढयांबभूवे दृढीचक्रे ये श्वासवाता इत्यादिकं सुमङ्गलायाः स्तोकचलेऽप्युक्तम् । तत अतिशयालङ्कारे कवीनां धर्मादुक्तम् । यथा वाग्भटालङ्कारे त्वद्वारितारितरुणीश्वसितानलेनेत्यादि । केनेव सांयात्रिकेणेव (प्रयोजनम् । ६-४-११७ । इ. सू. संयात्राशब्दान् प्रयोजनेऽर्थे इकण् प्रत्ययः । ) संभूय यात्रा प्रयोजनमस्येति सांयात्रिकस्तेन प्रावहणिकेनेव यथा सांयात्रिकेण नीविं मूलद्रव्यं नियम्य पथि विप्रकीर्णं धनं दृढीक्रियते ॥ ४ ॥

**भर्तुः प्रमीलासुखभङ्गभीति-स्तामेकतो लम्भयतिस्म धैर्यम् ।**
**स्वप्नार्थशुश्रूषणकौतुकं चा-न्यतस्त्वरां स्त्रीषु कुतः स्थिरत्वम् ॥ ५ ॥**

**(व्या०)** भर्तुरिति । भर्तु श्रीऋषभदेवस्य प्रमीलासुखभङ्गभीतिः प्रमीलाया निद्रायाः सुखं तस्य भङ्गो नाशस्तस्माद् भीतिर्भयं एकत (आद्यादिभ्यः । ७-२-८४ । इ. सू. एकशब्दात् तसु एकस्मिन् इति एकत ।) स्तां सुमङ्गलां धैर्यं धीरस्य भावस्तत् लम्भयति स्म प्रापयति स्म । च अन्यत (आद्यादिभ्यः ७-२-८४ । इ. सू. अन्यशब्दात् तसु अन्यस्मिन् इति अन्यत ।) स्वप्नार्थसुश्रूषणकौतुकं स्वप्नानामर्थास्तेषां शुश्रूषणं श्रोतुमिच्छा तस्य कौतुकं त्वरामौत्सुक्यं प्रापयति स्म स्त्रीषु स्थिरत्वं स्थैर्यं कुत स्यात ॥ ५ ॥

**क्षोभो भवन् मा स्म सुषुप्तितृप्ते, नाथेऽत्र तारस्वरया ममोक्त्या ।**
**मेधाविनी तज्जय जीव नन्दे-त्युदीरयामास मृदुं गिरं सा ॥ ६ ॥**

(व्या०) क्षोभ इति । मेधाविनी (अस्तपोमायामेधास्रजोविन् । ७-२-४७ । इ. सू. मत्वर्थे मेधाशब्दात् विन् । स्त्रियां नृतोऽस्वस्रादेर्डी । २-४-१ । इ. सू. स्त्रियां डी ।) मेधा बुद्धिरस्ति अस्या इति मेधाविनी बुद्धिमती सा सुमङ्गला तत् तस्मात् कारणात् त्व जय त्वं जीव आयुष्मान् भव नन्द इति मृदुं सुकोमलां गिरं वाणीमुदीरयामास जगाद । कस्मात् हेतोः सुषुप्तितृप्ते सुषुप्त्या तृप्ते अत्र अस्मिन् नाथे स्वामिनि तारस्वरया तारो दीर्घः स्वरो यस्या सा तया, मम उक्त्या क्षोभो मा स्म भवन् (सस्मे ह्यस्तनी च । ५-४-४० । इ. सू. स्मयुक्तमाङिउपपदे ह्यस्तनी । अड्धातोरादिर्ह्यस्तन्यां चमाङा । ४-४२९ । इ. सू. अडभावः ।) मा भवतु इति कारणात् ॥ ६ ॥

**चित्रं वधूवक्त्रविधूत्थवल्गु-वाक्कौमुदीभिः सरसी रराज ।**
**श्रीसङ्गमैकप्रतिभूप्रबोध-लीलोल्लसल्लोचननीरजन्मा ॥ ७ ॥**

(व्या०) चित्रमिति । स भगवान् सरसी रसाढ्य पक्षे सरसी महासरः चित्रमाश्चर्यं रराज । काभि वधूवक्त्रविधूत्थवल्गुवाक्कौमुदीभि वध्वाः सुमङ्गलायाः वक्त्रं मुखमेव विधुश्चन्द्र तस्मादुत्था वल्गवो या कौमुद्यो ज्योत्स्नास्ताभि । किं विशिष्टो भगवान् श्रीसङ्गमैकप्रतिभूप्रबोधलीलोल्लसल्लोचननीरजन्मा श्रीर्लक्ष्मीस्तस्याः सङ्गमे एकश्चासौप्रतिभूश्च प्रतिभूसमानप्रबोधस्तस्य लीलया उल्लसन्ती लोचने एव नीरजन्मनी कमले यस्य स ॥ ७ ॥

**निविष्टवानिष्टकृपः स पूर्व-कायेन शय्यां सहसा विहाय ।**
**क्षणं धृतोष्मामिदमङ्गसङ्ग-भङ्गानुतापादिव देवदेवः ॥ ८ ॥**

(व्या०) निविष्ट इति । इष्टकृप. इष्टा कृपा करुणा यस्य स इष्टकृप अभीष्टकरुणः स देवदेवो देवानां देवः भगवान् पूर्वकायेन (पूर्वापराधरोत्तरमभिन्नेनांशिना । ३-१-५२ । इ. सू. तत्पुरुषसमास ।) पूर्वं कायस्य शरीरस्य पूर्वकायस्तेन अग्रशरीरेण शय्यां सहसा औत्सुक्येन विहाय मुक्त्वा निविष्टवान्

उपविष्टः । किंलक्षणां शय्यां इदमङ्गसङ्गभङ्गानुतापादिव अस्य भगवतः अङ्गं शरीरं तस्य सङ्गः तस्य भङ्ग तस्यानुतापस्तस्मात् पश्चात्तापात् क्षणं धृतोष्मामिव धृतं उष्मं यया सा तां धृतसंतापामिवेत्यर्थः ॥ ८ ॥

**पुरःस्थितामप्युषितां हृदन्त-र्निशिप्रबुद्धामपि पद्मिनीं ताम् ।**
**अप्यात्तमौनां स्फुरदोष्ठदष्ट-जिजल्पिषामैक्षत लोकनाथः ॥ ९ ॥**

**(व्या०)** पुर इति । लोकनाथः लोकानां नाथः श्रीयुगादीशः तां सुमङ्गलामैक्षत दृष्टवान् । किंविशिष्टां तां पुरोऽग्रे स्थितामपि हृदन्तः हृदयस्य अन्तर्मध्ये उषितां हृदयमध्ये कृतावासां निशि रात्रौ प्रबुद्धां जागरितामपि पद्मिनीं कमलिनीं पक्षे पद्मिनीं स्त्रीं आत्तमौनामपि आत्तं गृहीतं मौनं यया सा तामपि स्फुरदोष्ठदष्टजिजल्पिषां स्फुरन्तौ च तौ ओष्ठौ च ताभ्यां दष्टा जल्पितुमिच्छा जिजल्पिषा (शंसि प्रत्ययात् । ५–३–१०५ । इ. सू. सन्नन्तजिजल्पिषधातोः स्त्रियां अप्रत्ययः ।) जल्पनेच्छा यस्या सा ताम् ॥ ९ ॥

**सुमङ्गलां मङ्गलकोटिहेतु-र्नेतुर्निदेशस्त्रिदशेशमान्यः ।**
**निवेशयामास निवेशयोग्ये, भद्रासने भद्रमुखीमदूरे ॥ १० ॥**

**(व्या०)** सुमङ्गलामिति । नेतुः श्रीऋषभदेवस्य निदेशआदेशः भद्रमुखीं (नखमुखादनाम्नि । २–४–४० । इ. सू. भद्रमुखशब्दात् स्त्रियां ङीः ।) भद्रं कल्याणकृन्मुखं यस्याः सा तां सुमङ्गलां अदूरे प्रत्यासन्ने निवेशयोग्ये निवेशस्य योग्यं तस्मिन् उपवेशनार्हे भद्रासने निवेशयामास उपवेशयति स्म । किंविशिष्टो निदेशः मङ्गलकोटिहेतुः दधिदूर्वाक्षतचन्दनादिमङ्गलानि तेषां कोटिस्तस्याः हेतुः कारणं पुनः त्रिदशेशमान्यः त्रिदशानां देवानामीशाः स्वामिनस्त्रिदशेशाः सौधर्मादयश्चतुष्षष्टिर्देवेन्द्रास्तेषां मान्यः ॥ १० ॥

**दिगङ्गनाङ्गेषु सिताङ्गराग-भङ्गीं भजद्भिर्दशनांशुजालैः ।**
**ज्यौत्स्नीयशोजापयता जिनेन-तयारजन्या जगदेऽथ जाया ॥११॥**

**(व्या०)** दिगिति । अथानन्तरं जिनेन श्रीऋषभेण जाया सुमङ्गला जगदे । किंकुर्वता जिनेन दशनांशुजालैः दशनानां दन्तानां अंशवः किरणास्तेषां

जालानि समूहास्तैः दन्तकिरणसमूहैः तया रजन्या ज्योत्स्नी (ज्योत्स्नादिभ्योऽण् । ७-२-३४ । इ. सू. मत्वर्थे ज्योत्स्नाशब्दात् अण् । ज्योत्स्ना अस्ति अस्यामिति अण् । अणञेयेकण् इ. सू. स्त्रियां डी. ।) पूर्णिमा तस्या यशः कीर्तिं जापयता जयाय प्रयुञ्जता जिञ् अभिभवे जिधातोर्णिगन्तस्य प्रयोगः । किंकुर्वद्भिर्देशनांशुजालैः दिगङ्गनाङ्गेषु दिश एव अङ्गनाः स्त्रियस्तासामङ्गेषु शरीरेषु सिताङ्गरागभङ्गीं सितश्चासौ अङ्गरागश्च तस्य भङ्गी विच्छित्तिस्तां श्वेतविलेपनरचनां भजद्भिः सेवमानैः । कोऽर्थः भगवतो दन्तकिरणैः सा रात्रिरुज्ज्वला जाता तथा च पूर्णिमायशो निर्जितमिति भावः ॥ ११ ॥

**अयानचर्यानुचितक्रमायाः, कच्चित्तव स्वागतमस्ति देवि ।**
**तनूरबाधा तव तन्वि तापो-त्तीर्णस्य हेम्नो हसितप्रकाशा ॥ १२ ॥**

(व्या०) अयानेति । हे देवि कच्चित् अभीष्टप्रश्ने तव स्वागतं सुष्ठु शोभनं आगमनं अस्ति विद्यते । किंविशिष्टायास्तव अयानचर्यानुचितक्रमायाः न यानमयानं अयानेन चर्या ( समजनिपन्ननिषद्शीङ् सुग् विदिचरिमनीणः । ५-३-९९ । इ. सू. चर्धातोः भावे क्यप् । ) गमनं तस्यामनुचितौ अयोग्यौ क्रमौ चरणौ यस्याः सा तस्याः यानरहितचर्यानुचितगमनायोग्यचरणायाः हे तन्वि कृशाङ्गि तव तनूः शरीरं अबाधा न विद्यते बाधा पीडा यस्याः सा निराबाधा वर्तते । किंविशिष्टा तनूः तापोत्तीर्णस्य तापादुत्तीर्णस्य अग्नितापगतमलिनिम्नो हेम्नः सुवर्णस्य हसितप्रकाशा हसितः प्रकाशो यया सा जितस्वर्णकान्तिरित्यर्थः ॥ १२ ॥

**छायेव पार्श्वादपृथग्बभूवान्, सुखी सदास्ते स सखीजनस्ते ।**
**प्राप्ता सुवर्णे परभागमङ्ग, माणिक्यभूषा किमुतापदोषा ॥ १३ ॥**

(व्या०) छायेति । हे देवि ते तव स सखीजनः सखीनां जनः सखीवर्गः सदा सुखी सुखमस्यास्तीति सुखी कुशली आस्ते । किंलक्षण सखीजनः छाया इव पार्श्वात् समीपात् अपृथग्बभूवान् पृथग्बभूव इति पृथग्बभूवान् न पृथग्बभूवान् अपृग्बभूवान् (तत्र क्वसुकानौ तद्वत् । ५-२-२ । इ सू परोक्ष-

विषये भूधातोः क्वसु प्रत्ययः ।) उत अथवा अङ्गे शरीरे माणिक्यभूषा माणिक्यानां भूषा रत्नाभरणानि किं अपदोषा अपगतो दोषो यस्याः सा निर्दोषा वर्तते । किंरूपा माणिक्यभूषा सुवर्णे परभागं पुण्योत्कर्षं प्राप्ता ॥ १३ ॥

**महानिशायामपि मुक्तनिद्रे, दिदृक्षया मां किमुपस्थितासि ।**
**क्षणार्धमुक्तेऽपि चिराय दृष्ट–इव प्रिये धावति येन चेतः ॥ १४ ॥**

(व्या०) महा इति । महानिशाया (जातीयैकार्थेऽच्वेः । ३–२–७० । इ सू डाप्रत्ययः डित्यन्तस्व० २–१–११४ । इ. सू. अन्त्यस्वरादेर्लोपः ) मपि महती चासौ निशा च महानिशा तस्यां अर्द्धरात्रेऽपि हे मुक्तनिद्रे त्वं मां दिदृक्षया द्रष्टुमिच्छा दिदृक्षा तया विलोकनेच्छया किं उपस्थितासि आगतासि । येन कारणेन क्षणार्द्धमुक्तेऽपि क्षणार्द्धं मुक्तस्तस्मिन् प्रिये चिराय चिरकालं दृष्टे इव चेतो धावति ॥ १४ ॥

**स्वप्नोपलब्धे मयि मारदूना, रिरंसया वा किमुपागतासि ।**
**प्रायोऽबलासु प्रबलत्वमेति, कन्दर्पवीरो विपरीतवृत्तिः ॥ १५ ॥**

(व्या०) स्वप्न इति । वा अथवा हे देवि मयि स्वप्नोपलब्धे सति स्वप्ने उपलब्धः स्वप्नोपलब्धस्तस्मिन् स्वप्नमध्ये दृष्टे सति त्वं मारदूना मारेण कामेन दूना पीडिता मारदूना कामपीडिता सती रिरंसया रन्तुमिच्छा रिरंसा (शसिप्रत्ययात् । ५–३–१०५ । इ सू सन्नन्तरिरंसधातोः स्त्रियां भावे अप्रत्ययः । आत् २–४–१८ । इ. सू. स्त्रियामाप् ।) तया किमुपागतासि आयातासि । प्रायो-बाहुल्येन विपरीतवृत्तिः विपरीता वृत्तिर्यस्य स कन्दर्पवीरः कन्दर्प एव वीरो भटः अबलासु स्त्रीषु प्रबलत्वं प्रबलस्य भावः प्रबलत्वमेति प्राप्नोति ॥ १५ ॥

**प्रिये प्रयासं विचिकित्सितं वा, मीमांसितुं किंचिदमुं व्यधास्त्वम् ।**
**संदेहशल्यं हि हृदोऽनपोढ–मामृत्यु मर्त्यस्य महार्तिदायि ॥ १६ ॥**

(व्या०) प्रिये इति । वा अथवा हे प्रिये त्वं किंचिद् विचिकित्सितं संदिग्धं विचारं मीमांसितुं विचारयितुं अमुं प्रयासं व्यधाः अकार्षीः । हि निश्चित हृदो हृदयात् संदेहशल्यं संदेह एव शल्यं अनपोढं न अपोढं अनाकृष्टं

सत् मर्त्यस्य मनुष्यस्य आमृत्यु (पर्यपाङ् बहिरच् पञ्चम्या । ३-१-३२ । इ. सू. अव्ययीभाव समासः ।) मृत्यो आ मृत्युं यावत् महार्तिदायि महती चासौ आर्तिश्च पीडा तां ददातीति महार्तिदायि महादुःखदायि भवति ॥ १६ ॥

**चेद्वस्तु संत्रस्तमृगाक्षि मृग्यं, तवास्ति किंचिद्वद तद्विशंकम् ।**
**आनाकमानागगृहं दुरापं, प्रायो न मे नम्रसुरासुरस्य ॥ १७ ॥**

(व्या०) चेदिति । संत्रस्तश्चासौ मृगश्च संत्रस्तमृगः तस्य अक्षिणी इव अक्षिणी यस्याः सा तस्याः संबोधनं हे संत्रस्तस्तमृगाक्षि चेद् यदि मृग्यं मार्गणीयं वस्तु किंचित् तवास्ति तद् तर्हि विशङ्कं विगता शङ्का यस्मिन् कर्मणि यथा भवति निःशङ्कं वद ब्रूहि । प्रायो बाहुल्येन नम्रसुरासुरस्य सुराश्च असुराश्च नम्राः सुरासुराः यस्य स तस्य मे आनाकं (पर्यपाङ्बहिरच् पञ्चम्या । ३-१-३२ । इ. सू. अव्ययीभावसमासः ।) नाकात् आ आस्वर्गं यावत् आनागगृहं नागानां गृहं नागगृहं नागगृहात् आ आनागगृहं आपातालं यावत् न दुरापं दुःखेन आप्यते इति दुरापं (दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् । ५-३-१३९ । इ. सू कृच्छ्रार्थद परात् आप्धातोः खल् ।) दुष्प्रापं नास्ति ॥ १७ ॥

**विश्वप्रभोर्वाचममूं सखंड-पीयूषपांक्तेयरसां निपीय ।**
**प्राप्ता प्रमोदं वचनाध्वपारं, प्रारब्ध वक्तुं वनितेश्वरी सा ॥ १८ ॥**

(व्या०) विश्व इति । सा वनितेश्वरी वनितानामीश्वरी (अश्नोतेरीचादेः । ४४२ । इ उ सू. अशौट्धातो वरट् प्रत्ययः आदेरीश्च । टित्वात् ङी ।) सा सुमङ्गला वक्तु जल्पितुं प्रारब्ध प्रारभते स्म । किंविशिष्टा वनितेश्वरी वचनाध्वपारं वचनानामध्वा तस्य पारं वागगोचरातीतं प्रमोदं प्राप्ता । किं कृत्वा विश्वप्रभोः विश्वस्य प्रभुः स्वामी तस्य श्रीऋषभदेवस्य अमूं वाचं निपीय पीत्वा । किंविशिष्टां वाचं सखडपीयूषपांक्तेयरसां खडेन सह वर्तते इति सखंड सखंडं च तत् पीयूषं च खंडसहितमभिनवपय तस्य पंक्तौ भव पांक्तेयो ( भवे । ६-३-१२३ । इ सू भवेऽर्थे पंक्तिशब्दात् एयण् ।) रसो यस्यां सा ताम् ॥ १८ ॥

**पातुस्त्रिलोकं विदुषस्त्रिकालं, त्रिज्ञानतेजो दधतः सहोत्थम् ।**
**स्वामिन्नतेऽवैमि किमप्यलक्ष्यं, प्रश्नस्त्वयं स्नेहलतैकहेतुः ॥ १९ ॥**

(व्या०) पात्विति । हे स्वामिन् अहं ते तव किमपि अलक्ष्यं न लक्ष्यं अलक्ष्यं तत् अज्ञेयं नावैमि न जानामि । त्रीण्यपि विशेषणानि भगवतो ज्ञेयानि । किंविशिष्टस्य तव त्रिलोकं त्रिभुवन पातु पातीति पाता तस्य रक्षतः । त्रिकालविदुषः त्रयाणां कालानां समाहारस्तत् वेत्तीति तस्य अतीतानागतवर्तमानकालान् ज्ञातवतः सहोत्थं सहोत्पन्नं त्रिज्ञानतेजः त्रयाणां ज्ञानानां समाहारस्तस्य मतिश्रुतावधिज्ञानस्य तेज. तत् दधत दधातीति दधत् तस्य बिभ्रत तु पुनरयं प्रश्नः स्नेहलतैकहेतु स्नेह एव लता तस्याः एकश्चासौ हेतुश्च वर्तते ॥ १९ ॥

**निध्यायतस्ते जगदेकबुद्धया, मय्यस्ति कोऽपि प्रणयप्रकर्षः ।**
**भृशायते चूतलताविलासे, साधारणः सर्ववने वसंतः ॥ २० ॥**

(व्या०) निध्यायत इति । हे स्वामिन् ते तव जगत् एकबुद्धया एकाचासौ बुद्धिश्च तया निध्यायत पश्यत सत मयि विषये कोऽपि अपूर्व प्रणयप्रकर्ष प्रणयस्य स्नेहस्य प्रकर्षः स्नेहसमूहोऽस्ति । वसन्त सर्ववने साधारणः सदृशो वर्तते परं चूतलताविलासे चूतस्य लता तस्या विलासे सहकारवल्लीविलासे भृशायते (च्व्यर्थे भृशादे स्तो । ३-४-२९ । इ सू च्व्यर्थे भृशादे क्यङ् इडित कर्तरि । ३-२-२२ । इ. सू डित्वात आत्मनेपदम् । ) न भृशः अभृश अभृश भृशो भवतीति भृशायते अधिक स्यात ॥ २० ॥

**न नाकनाथा अपि यं नुवंतो, वहंति गर्व विबुधेशतायाः ।**
**वक्तुं पुरस्तस्य तव क्षमेऽह-महो महासुर्महिलासु मोहः ॥ २१ ॥**

(व्या०) नेति । हे नाथ नाकनाथा अपि नाकस्य स्वर्गस्य नाथा इन्द्रा अपि यं त्वा नुवन्त नुवन्तीति नुवन्त स्तुवन्त सन्तो विबुधेशताया विबुधानां देवानामीशास्तेषा भावस्तस्या देवेशत्वं पक्षे विद्वदीशित्वं तस्या गर्वमभिमानं न वहन्ति । तस्य तव पुरोऽग्रे अहं वक्तु जल्पितु क्षमे शक्नोमि । अहो इत्याश्चर्ये महिलासु स्त्रीषु मोहो महासु महाप्राणो वर्तते ॥ २१ ॥

**स्त्रीमात्रमेषास्मि तव प्रसादा–देवादिदेवाधिगता गुरुत्वम् ।**
**राज्ञो हृदि क्रीडति किं न मुक्ता–कलापसंसर्गमुपेत्य तन्तुः ॥२२॥**

(व्या०) स्त्री इति । हे आदिदेव आदिश्चासौ देवश्च तस्य संबोधनं हे आदिदेव एषा अहं स्त्रीमात्रं स्त्रीएव स्त्री साधारणा अस्मि । तव प्रसादादेव कृपाया एव गुरुत्व गुरोर्भावो गुरुत्वं तत् महत्त्वं अधिप्राप्तास्मि । तन्तुर्मुक्ताकलापसंसर्गं मुक्तानां कलाप समूहस्तस्य संसर्गं संबन्धमुपेत्य प्राप्य राज्ञो नृपस्य हृदि हृदये किं न क्रीडति अपि तु क्रीडति ॥ २२ ॥

**मां मानवीं दानववैरिवध्वो, याचन्ति यत्प्राञ्जलयोऽङ्गदास्यम् ।**
**सोऽयं प्रभावो भवतो न धेयं, भस्मापि भाले किमु मन्त्रपूतम् ॥२३॥**

मामिति । दानववैरिवध्व दानवानां दैत्यानामरय शत्रवः दानवारयो देवास्तेषां वध्व स्त्रिय देवाङ्गना प्राञ्जलय कृताञ्जलय सत्यो मानवीमपि यत् अङ्गदास्यं अङ्गस्य दास्य शरीरदास्यं याचन्ति । सोऽयं भवतस्तव प्रभावो वर्तते । भस्मापि रक्षापि मन्त्रपूतं सत् मन्त्रेण पूतं सत् भाले ललाटे कि न धेयं धातु योग्य किं न धार्यमपि तु धार्यमेव ॥ २३ ॥

**त्वत्सङ्गमात् सङ्गमितेन दिव्य–पुष्पैर्मदङ्गेन विदूरितानि ।**
**वैराग्यरङ्गादिव पार्थिवानि, वनेषु पुष्पाण्युपयान्ति वासम् ॥ २४ ॥**

(व्या०) त्वदिति । हे नाथ पार्थिवानि (जाते ६–३–९८ । इ. सू. जातेऽर्थे पृथिवीशब्दात् अण् प्रत्यय ।) पृथिव्यां जातानि पुष्पाणि वैराग्यरङ्गादिव वैराग्यस्य रङ्गस्तस्मादिव वनेषु वासमुपयन्ति प्राप्नुवन्ति किंविशिष्टानि पुष्पाणि । त्वत्सङ्गमात (त्वमौप्रत्ययोत्तरपदे चैकस्मिन् । २–१–११ । इ सू. उत्तरपदे युष्मद त्व आदेश ।) तव सङ्गमस्तस्मात् दिव्यपुष्पै दिव्यानि च तानि पुष्पाणि च तै सङ्गमितेन मिलितेन मदङ्गेन मम अङ्गं तेन मम शरीरेण विदूरिक्तानि दूरीकृतानि ॥ २४ ॥

**अङ्गेषु मे देववधूपनीत–दिव्याङ्गरागेषु निराश्रयेण ।**
**नाथानुतापादिव चन्दनेन, भुजङ्गभोग्या स्वतनुर्वितेने ॥ २५ ॥**

(व्या०) अङ्गेष्विति। हे नाथ चन्दनेन स्वतनु स्वस्य तनु शरीरं आत्मीयं शरीरं भुजङ्ग (नाम्नोगम खड्डौ च विहायसस्तु विह ५-१-१३१। इ. सू. भुजनामपूर्वकगम्धातो खड्प्रत्ययः खित्वात् मोन्तः।) भोग्या (ऋवर्णव्यञ्जनाद् घ्यण्। ५-१-१७। इ. सू. भुजधातो घ्यण्। क्तेऽनिटश्चजोः कगौघिति। ४-१-१११। इ. सू. भुज्धातो जस्य ग।) भुजङ्गैः भोग्या सर्प्पवेष्टिता वितेने। उत्प्रेक्षते अनुतापादिव पश्चात्तापादिव किंविशिष्टेन चन्दनेन मे मम अङ्गेषु निराश्रयेण निर्गत आश्रयो यस्य तत् तेन आश्रयरहितेन। किंविशिष्टेषु अङ्गेषु देववधूपनीतदिव्याङ्गरागेषु देवानां वध्वस्ताभिरुपनीता दिव्या अङ्गरागा येषु तानि तेषु ॥ २५ ॥

**स्वर्भूषणैरेव मदङ्गशोभां, सम्भावयन्तीष्वमराङ्गनासु।**
**रोषादिवान्तर्दहनं प्रविश्य, द्रवीभवत्येव भुवः सुवर्णम् ॥ २६ ॥**

(व्या०) स्वरिति। हे नाथ भुवः पृथिव्याः सुवर्णं अन्तर्दहनं (पारे मध्येऽग्रेऽन्तः षष्ठ्या वा। ३-१-३०। इ सू. अव्ययीभाव समासः।) दहनस्य अन्तर्मध्ये प्रविश्य रोषादिव क्रोधादिव द्रवीभवति न द्रवमद्रवं अद्रवं द्रवं भवति इति द्रवीभवति गलत्येव। कासु सतीषु अमराङ्गनासु अमराणां देवानामङ्गना नार्यस्तासु देवाङ्गनासु स्वर्भूषणैरिव स्वर्गसत्काभरणैरेव मदङ्गशोभां मम अङ्गस्य शोभां सम्भावयन्तीषु कुर्वतीषु सतीषु ॥ २६ ॥

**पयः प्रभो नित्यममर्त्यधेनोः, श्रीकोशतो दिव्यदुकूलमाला।**
**पुष्पं फलं चामरभूरुहेभ्यः, सदैव देवैरुपनीयते मे ॥ २७ ॥**

(व्या०) पय इति। हे प्रभो हे स्वामिन् देवैर्नित्यं निरंतरं अमर्त्यधेनोः अमर्त्यानां देवानां धेनुस्तस्याः कामधेनोः पयो दुग्धं श्रीकोशत श्रियो लक्ष्म्याः कोशः श्रीकोशस्तस्मादिति श्रीकोशत दिव्यदुकूलमाला दिव्यानि च तानि दुकूलानि च तेषां माला च अन्यत् अमरभूरुहेभ्य अमराणां देवानां भूरुहो वृक्षास्तेभ्य कल्पवृक्षेभ्य पुष्प फलं सदैव मे मम उपनीयते ढौक्यते ॥ २७ ॥

**भोगेषु मानव्यपि मानवीनां, स्वामिन्न बध्नामि कदाचिदास्थाम्।**
**अहं त्वदीयेत्यनिशं गुरीभिः, स्वभोगभङ्गीष्वभिकीकृताङ्गी ॥ २८ ॥**

(व्या०) भोगेष्विति । हे नाथ अहं मानवी मनुष्यमात्रापि मानवीनां भोगेषु कदाचिदास्थां न बध्नामि । अहं त्वदीया तव इयं त्वदीया त्वत्सत्का इति कारणात् सुरीभिर्देवाङ्गनाभि अनिशं निरन्तरं स्वभोगभङ्गीषु स्वभोगस्य भङ्गयस्तासु, देवलोकसत्कभोगविच्छित्तिषु अभिकीकृताङ्गी न अभीकं अनभीकं अनभीकं अभीकं ( अभेरीश्च वा ७-१-१८९ इ. सू. अभेः कमितरि कः ) कृतं इति अभिकीकृतं अभिकीकृतं अङ्गं यस्या सा अभिकीकृताङ्गी कामुकीकृतशरीरा वर्ते ॥ २८ ॥

**अन्यैरनीषल्लभमेति वस्तु, यदायदासेचनकं मनो मे ।**
**तदातदाकृष्टमिवैत्यदूरा-दपि प्रमोदं दिशति त्वयीशे ॥ २९ ॥**

(व्या०) अन्यैरिति । हे नाथ यदा यस्मिन्नवसरे मे मम मनः यत् आसेवनकं नयनानन्दकारि वस्तु एति गच्छति । किंलक्षणं वस्तु अन्यैः अनीषल्लभं ईषत्सुखेन लभ्यते इषल्लभं ( दु स्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् ५-३-१३९ । इ. सू. ईषत्पूर्वकलभधातो खल्।) न ईषल्लभं अनीषल्लभं दुष्प्रापं तद्वस्तु त्वयि-ईशे सति समर्थे सति तदा तस्मिन्नवसरे दूरादपि आकृष्टमिव एत्य आगत्य मे मम प्रमोदं दिशति ददाति ॥ २९ ॥

**प्रमार्ष्टि गेहाग्रमृभुर्नभस्वान्, पिपर्ति कुंभान् सुरसिन्धुरद्भिः ।**
**भक्ष्यस्य चोपस्कुरुतेंऽशुमाली-दास्योपि नेशे त्वयि दुर्विधा मे ॥ ३० ॥**

(व्या०) प्रमार्ष्टि इति । हे नाथ त्वयि ईशे स्वामिनि सति मे मम दास्योऽपि दुर्विधा न दुःस्थानदुष्कर्मकर्यो न वर्तते । नभस्वान् ऋभु ( रभिप्रथिभ्यामृच्चरस्य । ७३० इ. सू रभिधातो कित् उप्रत्यय रेफस्य च ऋकार । रभन्ते पुण्यकार्येषु उत्सुका भवन्तीति ऋभव । ) वायुर्देवता मे मम गेहाग्रं गेहस्याग्रं तत् गृहाङ्गणं प्रमार्ष्टि तृणकाष्ठकचवरादि परत्र करोति । सुरसिन्धु सुराणां सिन्धु. आकाशगङ्गा अद्भि पानीयै कुंभान् पिपर्ति पूरयति । च पुनरंशुमाली अंशूनां किरणानां माला पङ्क्तय सन्ति इति अंशुमाली सूर्य भक्ष्यस्य उपस्कुरुते ( उपाद् भूषासमवायप्रतियत्नविकारवाक्याध्याहारे । ४-४-९२ ।

इ. सू. उपात् परस्य कृगः सट् । ) शालिसूपपक्वान्नघृतपूरादि भोज्यं संस्करोति । भक्ष्यस्य इत्यत्र षष्ठी 'कृगः प्रतियत्ने' इति सूत्रेण ॥ ३० ॥

**त्रातस्त्वयि त्राणपरे त्रिधापि, दुःखं न मथ्नाति मुदं मदीयाम् ।**
**यं हेतुमायासिषमत्र माया-मुक्तं ब्रुवे तच्छृणु सावधानः ॥ ३१ ॥**

(व्या०) त्रात इति । हे त्रातः हे रक्षक त्वयि त्राणपरे त्राणे रक्षणे परस्तस्मिन् सति त्रिधापि त्रिभिः प्रकारैस्त्रिधा ( सङ्ख्याया धा । ७-२-१०४ इ. सू. त्रिशब्दात् प्रकारेऽर्थे धाप्रत्ययः । ) त्रिभि प्रकारैरपि आध्यात्मिकाधिभूतिकाधिदैविकभेदात् त्रिविधं वा देवमानुषतिर्यक्कृतं दु ख मदीयां मम इयं मदीया तां मम मुदं हर्षं न मथ्नाति न स्फेटयति । यं हेतु येन हेतुना अहमत्र आयासिषमायाता । तदहं मायामुक्तं मायया मुक्तं तत् कपटरहितं ब्रुवे सावधानस्त्वं शृणु ॥ ३१ ॥

**क्रियां समग्रामवसाय सायं-तनीमनीषद्धृतिरत्र रात्रौ ।**
**अशिश्रियं श्रीजितदिव्यशिल्पं, तल्पं स्ववासौकसि विश्वनाथ ॥३२॥**

(व्या०) क्रियामिति । हे विश्वनाथ विश्वस्य नाथस्तस्य संबोधनं अहं सायंतनीं ( सायञ्चिरं प्राह्णे प्रगेऽव्ययात् ६-३-८८ । इ. सू. सायमव्ययात् तनट्प्रत्यय· टित्वात् ङीः ।) सायं भवा सायन्तनीं संध्यासंबधिनी समग्रां सर्वां क्रियां अवसाय समाप्य अत्र रात्रौ स्ववासौकसि स्वस्य वासस्य ओकस्तस्मिन् आत्मीयवासभवने तल्पं शय्यां अशिश्रियमाश्रितवती । किंविशिष्टं तल्पं श्रीजितदिव्यशिल्पं श्रिया शोभया जित दिव्यं शिल्पं विज्ञानं येन तत । किंलक्षणा अहं अनीषद्धृति· न ईषत् अनीषद् धृतिर्यस्याः सा बहुसमाधियुक्ता ॥ ३२॥

**त्वन्नाममन्त्राहितदेहरक्षा-निद्रां स्वकालप्रभवामवाप्य ।**
**स्वप्नानिभोक्षप्रमुखानदर्शं, चतुर्दशादर्शमुख क्रमेण ॥ ३३ ॥**

(व्या०) त्वदिति । हे आदर्शमुख आदर्शो दर्पणः माङ्गल्यकारकत्वात् तत्सदृशं मुखं यस्य स तस्य संबोधनं हे आदर्शमुख अहं त्वन्नाममंत्राहितदेहरक्षा (त्वमौ प्रत्ययोत्तरपदे चैकस्मिन् २-१-११ इ. सू. । युष्मदः एकवचने त्वआ-

देशः ।) तव नाम एव मन्त्रः तेन आहिता देहस्य रक्षा यया सा त्वदीयनाममन्त्रेण कृतशरीररक्षा सती स्वकालप्रभवां स्वस्य काले प्रभवतीति तां आत्मीयकालोत्पन्नां निद्रां क्रमेण अवाप्य प्राप्य इभो गज उक्षा वृषभ इभश्च उक्षाणौ तौ प्रमुखौ येषां ते तान् चतुर्दशस्वप्नान् ( यजिस्वपिरक्षियतिप्रच्छोनः ५-८-८५ । इ. सू. भावेस्वप्धातोर्न ।) अदर्शं दृष्टवती ॥ ३३ ॥

**ततोऽत्यभीष्टामपि सर्वसार-स्वप्नौघसंदर्शनया कृतार्थाम् ।**
**विसृज्य निद्रां चतुरांचित त्वां, तत्त्वार्थमीमांसिषयागतास्मि ॥ ३४ ॥**

(व्या०) तत इति । हे चतुरांचित चतुरै अञ्चितस्तस्य संबोधनं हे विद्वत्पूजित ततः ततोऽनन्तरं अहं अत्यभीष्टामपि निद्रां विसृज्य त्यक्त्वा तत्त्वार्थमिमांसिषया मिमांसितुं विचारयितुमिच्छा मिमांसिषा तत्त्वस्य अर्थस्य मिमांसिषया विचारेण त्वां त्वत्समीपमागतास्मि । किंलक्षणां निद्रां सर्वसारस्वप्नौघसंदर्शनया सर्वेषु सारा प्रशस्या ये स्वप्नास्तेषामोघ समूहस्तस्य संदर्शना दर्शनेन कृतार्थां कृतोऽर्थो यया सा तां कृतार्थाम् ॥ ३४ ॥

**वस्त्वाकृषन्तीं भवतः प्रसाद-संदंशकेनापि दविष्ठमिष्टम् ।**
**न कोऽपि दुष्प्रापपदार्थलोभ-जन्माऽभजन् मां भगवंस्तदाधिः ॥३५॥**

(व्या०) वस्त्विति । हे भगवन् कोऽपि दुष्प्रापपदार्थलोभजन्मा दु खेन प्राप्यते इति दुष्प्राप प्राप्तुमशक्यः स चासौ पदार्थश्च तस्य लोभात् जन्म यस्य सः दुर्लभवस्तुलोभोत्पन्न. आधिरसमाधिस्तदा तस्मिन्नवसरे मां न अभजत् । किं कुर्वतीं मां भवतः प्रसादसंदंशकेन प्रसाद एव संदंशकस्तेन तव प्रसादरूपसंदंशकेन दविष्ठं ( गुणाङ्गाद्वेष्ठेयसू ७-३-९ । इ. सू. दूरशब्दात् इष्ठप्रत्ययः । स्थूलदूरयुव-न । ७-४-४२ । इ. सू. अन्त्यस्वरादेर्लोपः नामिनो गुणश्च । ओदौतोऽवाव् । १-२-२४ । इ सू अवादेश ।) अतिशयेन दूरं इति दविष्ठं दूरतरमपि इष्टमभीष्टं वस्तु आकृषन्तीं आकृषतीति आकृषन्ती ताम् ॥ ३५ ॥

**आकूतमक्षिभ्रुवचेष्टयैव, हार्दं विबुध्याखिलकर्मकारी ।**
**न स्वैरचारीति परिच्छदोऽपि, मनो दुनोति स्म तदा मदीयम् ॥३६॥**

**(व्या०)** आकूतमिति । हे नाथ तदा तस्मिन्नवसरे परिच्छदोऽपि परिवारोऽपि स्वैरचारी स्वैरं चरतीति इति कारणात् मदीयं मम इदं मदीयं तत् मामकं मनो हृदयं न दुनोति स्म खेदयुक्तं नाकरोत् किंलक्षणः परिच्छदः अक्षिभ्रुवचेष्टयैव अक्षिणी च भ्रुवौ च एतासां समाहार अक्षिभ्रुवं (ऋक् सामर्ग्यजुषधेन्वडुहवाङ्मनसाऽहोरात्ररात्रिंदिवनक्तंदिवाऽहर्दिवोर्वष्ठीवपदष्ठीवाक्षिभ्रुवदारगवम् । ७–३–९७ । इ. सू. अक्षिभ्रुवं अदन्तद्वन्द्वो निपातः ।) तस्य चेष्टा तया अक्षिभ्रुवचालनयैव हार्दं हृदयस्येदं तत् आकूतमभिप्रायं विबुध्य ज्ञात्वा अखिलकर्मकारी अखिलानि च तानि कर्माणि च अखिलकर्माणि तानि करोतीत्येवंशीलः समस्तकार्यकृत् ॥ ३६ ॥

**अपि द्वितीयाद्वितये विभज्य, चित्तं च वित्तं च समं समीचा ।**
**त्वया न सापत्न्यभवोऽभिभूति–लवोऽपि मेऽदत्त तदानुतापम् ॥३७॥**

**(व्या०)** अपीति । हे नाथ तदा तस्मिन्नवसरे सापत्न्यभवः सपत्न्या भावः सापत्न्यं तस्मात् भवः सपत्न्या उत्पन्नोऽभिभूतिलवोऽपि अभिभूतेः पराभवस्य लवो लेशोऽपि मे मम अनुतापं विषादं नादत्त । केन हेतुना त्वया द्वितीया– (द्वेस्तीयः । ७–१–१६५ । इ. सू. द्विशब्दात् संख्यापूरणे तीयप्रत्य ) द्वितयेऽपि द्वितीययोर्भार्ययोर्द्वितयं तस्मिन् कलत्रद्विकेऽपि चित्तं च पुनर्वित्तं समं समकालं विभक्त्वा इति विभज्य विभागीकृत्य समीचा सम्यग् अञ्चतीति सम्यङ् तेन समीचा सम्यग् अञ्चता । अञ्चौ गतौ समपूर्वकः 'सह सम' सध्रि समि इति सम्यादेशः ॥ ३७ ॥

**आसीन्न मे वर्ष्मणि मारुतादि–प्रकोपतः कोऽपि तदा विकारः ।**
**त्वयि प्रसन्ने न हि लब्धबाधा, मिथः पुमर्था इव धातवोऽपि ॥३८॥**

**(व्या०)** आसीदिति हे नाथ तदा तस्मिन्नवसरे मे मम वर्ष्मणि शरीरे मारुतादिप्रकोपत मारुतोवायुरादिर्येषां ते मारुतादयः तेषां प्रकोपात् इति प्रकोपतः कोऽपि विकारो नासीत् नाभूत् त्वयि प्रसन्ने सति धातवोऽपि पुमर्था इव मिथः परस्परं लब्धबाधा नहि लब्धा बाधायैस्ते लब्धपीडाः नहिवर्तन्ते ॥३८॥

**गदा वपुःकुंभगदाभिघाता, नासंस्तदा त्वन्निगदागदाप्त्या ।**
**अजातशत्रुं पतिमाश्रितायास्त्वां मे कुतः संभव एव भीतेः ॥३९॥**

(व्या०) गदा इति । हे नाथ गदा वात पित्तश्लेष्माणो रोगा मे मम तदा तस्मिन्नवसरे त्वन्निगदागदाप्त्या तव निगदो नाम स एव अगद ओषधं तस्य आप्त्या लाभेन न आसन् । किंविशिष्टा गदाः वपु कुंभगदाभिघाताः कुंभो घटः तस्य गदाया अभिघाता गदाप्रहारसदृशाः । अजातशत्रुं न जाताः अजाताः शत्रवो यस्य तं गतवैरिणं त्वां पतिं भर्तारमाश्रिताया मे मम भीतेर्भयस्य संभव उत्पत्तिरेव कुतः ( इतोऽतः कुतः ७-२-९० इ. सू कुतः तसन्तो निपातः । ) स्यात् अपि तु न कुतोऽपि ॥ ३९ ॥

**एवं सुखास्वादरसोर्जितायां, मनस्तनुक्लेशविवर्जितायाम् ।**
**स्वप्नैर्बभूवे मयि यैस्तदर्थ-मीमांसया मांसलय प्रमोदम् ॥ ४० ॥**

(व्या०) एवमिति । हे नाथ यैः स्वप्नैर्मयि बभूवे । तदर्थमीमांसया तेषां स्वप्नानामर्थस्य मीमांसया विचारणया हर्षं मयि विषये मांसलय (मांसमस्ति अस्य इति मांसलः । सिध्मादिक्षुद्रजन्तुरुग्भ्यः ७-२-२१ इ. सू मत्वर्थे ल । ) पोषय । किंविशिष्टायां मयि एवं सुखास्वादरसोर्जिताया एवं पूर्वोक्तप्रकारेण सुखस्य आस्वादस्य आस्वादस्य रसेन ऊर्जितायां बलिष्ठाया । पुन मनस्तनुक्लेशविवर्जितायां मनश्च तनुश्च शरीरं तयो क्लेशेन विवर्जितायां मानसिकशारीरिकक्लेशरहितायाम् ॥ ४० ॥

**सूक्ष्मेषु भावेषु विचारणायां, मेधा न मे धावति बालिशायाः ।**
**त्वमेव सर्वज्ञ ततः प्रमाणं, रात्रौ गृहालोक इव प्रदीपः ॥ ४१ ॥**

(व्या०) सूक्ष्मेषु इति । हे नाथ बालिशाया मूर्खाया मे मम मेधा बुद्धि सूक्ष्मेषु भावेषु विचारणायां न धावति । हे सर्वज्ञ सर्वं जानातीति तस्य संबोधनं ततस्तस्मात्कारणात् त्वमेव प्रमाणमसि । क इव प्रदीप इव यथा प्रदीपो गृहालोके गृहस्य आलोकः प्रकाशस्तस्मिन् प्रमाणं स्यात् ॥ ४१ ॥

**यद्दीपगौरद्युतिभास्कराणां, प्रकाशभासामपि दुर्व्यपोहम् ।**
**हार्दं तमस्तत्क्षणतः क्षिणोति, वाग्ब्रह्मतेजस्तव तन्वपीश ॥ ४२ ॥**

(व्या०) यदिति । यत् यस्मात् कारणात् दीपगौरद्युतिभास्कराणां दीपश्च प्रदीपः गौरद्युतिश्च चन्द्रः भास्करश्च (सङ्ख्याऽहर्दिवाविभानिशाप्रभाभाश्चित्र–टः ५–१–१०२ । इ. सू. भास्शब्दपूर्वककृग्धातोः ट प्रत्ययः ।) सूर्यः तेषां प्रकाशभासामपि प्रकाशा भाः येषां तेषामपि प्रकटतेजसामपि हार्दं हृदयस्येदं हार्दं हृदयसंबंधि तमोऽन्धकारं दुर्व्यपोहं दुःखस्फेटनीयं वर्तते । हे ईश हे स्वामिन् तद् हार्दं तमः तव वाग्ब्रह्मतेजः वाचां ब्रह्म ज्ञानं तस्य–तेजः वचनज्ञानसत्कं तेजः तन्वपि सूक्ष्ममपि क्षणतः क्षणादेव क्षिणोति क्षयं नयति ॥ ४२ ॥

**यत्र क्वचिद्वस्तुनि संशयानाः, स्मरन्ति यस्य त्रिदशेशितारः ।**
**तत्रांतिकस्थे त्वयि शास्त्रदृश्वा, मानार्ह नार्हत्यपरोऽनुयोक्तुम् ॥४३॥**

(व्या०) यत्रेति । हे नाथ त्रिदशेशितारः त्रिदशानां देवानामीशितारः इन्द्राः यत्र क्वचिद् वस्तुनि संशयानाः संशेरते इति संशयानाः संदेहं दधानाः यस्य तव स्मरन्ति । हे मानार्ह ( अर्होऽच् ५–१–९१ इ. सू. मानपूर्वकअर्ह्धातोः अच्प्रत्ययः ।) मानमर्हतीति तस्य संबोधनं हे पूजायोग्य तत्र वस्तुनि त्वयि अन्तिकस्थे सति समीपस्थे सति अपरः शास्त्रदृश्वा दृशः क्वनिप् ५–१–१६६ इ. सू. शास्त्रव्याप्यपूर्वक दृश्धातोः भूतेऽर्थे क्वनिप्प्रत्ययः ।) शास्त्राणि दृष्टवानिति शास्त्रदृश्वा सर्वशास्त्रविशारदः अनुयोक्तुं प्रष्टुं नार्हति योग्यः न स्यात् ॥४३॥

**दृक्कर्मघातीनि तमांसि हत्वा, गोभिर्बभूवान् भुवि कर्मसाक्षी ।**
**इदं हृदन्तर्मम दीप्रदेह, संदेहरक्षः स्फुरदेव रक्ष ॥ ४४ ॥**

(व्या०) दृगिति । हे दीप्रदेह दीप्रो देहो यस्य स दीप्रदेहस्तस्य संबोधनं हे दीप्यमानशरीर त्वं इदं संदेहरक्षः संदेह एव रक्षः तत् मम हृदन्तः हृदयमध्ये स्फुरत् स्फुरतीति प्रसरदेव रक्ष । किं विशिष्टस्त्वं गोभिर्वचोभिः किरणैर्वा । दृक्कर्मघातीनि दृष्टे कर्म दृक्कर्म ज्ञानक्रिया दर्शनक्रिया वा तस्य घातीनि विनाशकानि तमांसि पापानि अन्धकाराणि वा हत्वा भुवि पृथिव्यां कर्मसाक्षी कर्मणां साक्षी ( साक्षाद् द्रष्टा ७–१–१९७ इ. सू. साक्षात् अव्ययात् द्रष्टा इत्यर्थे इन्प्रत्ययः ।) पक्षे कर्मसाक्षी श्रीसूर्यः बभूवान् बभूव इति बभूवान् ( तत्र क्वसुकानौ तद्वत् ५–२–२ इ. सू. भूधातोः परोक्षे क्वसुः ।) जातः ॥ ४४ ॥

**अतीन्द्रियज्ञाननिधेस्तवेश, क्लेशाय नायं घटते विचारः ।**
**भङ्क्तुं महाशैलतटीं घटीय-द्वज्रं किमायस्य तृणं तृणेढि ॥ ४५ ॥**

(व्या०) अतीति । हे ईश अयं विचार॰ तव क्लेशाय न घटते । किं-विशिष्टस्य तव अतीन्द्रियज्ञाननिधे अतिक्रान्ता इन्द्रियाणि अतीन्द्रिया ( प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्था प्रथमाद्यन्तै॰ ३-१-४७ इ सू. तत्पुरुषसमास॰) इन्द्रियातीतपदार्थास्तेषां ज्ञानस्य निधिस्तस्य इन्द्रियातीतज्ञाननिधानस्य । महाशैलतटीं महांश्चासौ शैलश्च तस्य तटी तां महापर्वततट भंक्तुं भेत्तुं घटीयत् घट इव आचरतीति घटीयति घटीयतीति घटीयत् घट इवाचरत् वज्रं किं आयस्य आयसित्वा इति आयस्य अपक्रम्य तृणं तृणेढि छिनत्ति अपि तु आयास विनैव ॥ ४५ ॥

**उद्भूतकौतूहलया रयेणा-जागर्यथास्तन्मयि मास्म कुप्यः ।**
**कालातिपातं हि सहेत नेत-र्न कौतुकावेशवशस्त्वरीव ॥ ४६ ॥**

(व्या०) उद्भूतेति । हे नाथ रयेण वेगेन मया उद्भूतकौतूहलया उद्भूतं उत्पन्नं कौतूहलं यस्या सा तया उत्पन्नकौतुकया त्वं अजागर्यथाः जागरित॰ । तन्मयि विषये मास्म कुप्य कोपं मा कार्षीः । हे नेत. स्वामिन् कौतुकावेशवश॰ कौतुकस्य आवेशस्तस्य वशोऽधीन॰ पुमान् कौतुकाक्षिप्त॰ त्वरीव त्वरा अस्यास्तीति त्वरीव उत्सुक इव कालातिपातं कालस्य अतिपात॰ विलंबस्तं कालविलंबं हि निश्चितं न सहेत ॥ ४६ ॥

**श्रुत्वा प्रियालापमिति प्रियायाः, प्रीतिं जगन्वान् जगदेकदेवः ।**
**वाच मृदुस्वादुतया सुधाब्धि-गर्भादिवाप्तप्रभवामुवाच ॥ ४७ ॥**

(व्या०) श्रुत्वेति । जगदेकदेव॰ एकश्चासौ देवश्च एकदेवः ( पूर्वकालैकसर्वजरत्पुराणनवकेवलम् ३-१-९७ इ. सू कर्मधारयसमास॰ । ) जगति एक देव जगदेकदेव श्रीयुगादीशो वाचमुवाच उक्तवान् । किंविशिष्टां वाचं मृदुस्वादुतया मृदुच स्वादुच मृदुस्वादुनी तयोर्भावस्तया सुधाब्धिगर्भात् सुधाया अमृतस्य अब्धि समुद्रस्तस्यगर्भात् मध्यात् अमृतसमुद्रमध्यात् आप्तप्रभवामिव

आप्तः प्रभवो यया सा तामिव । किंलक्षणो जगदेकदेव प्रियायाः सुमङ्गलायाः इति प्रियालापं प्रियश्चासौ आलापश्च तं अभीष्टवचनं श्रुत्वा प्रीतिं जगन्वान् जगाम इति जगन्वान् गम् धातोः क्वसौ प्रत्यये द्वित्वे पूर्वगस्य जत्वे गमहनविद्लृविशदृशो वा इ. सू. विकल्पेन इट् इडभावे 'मोनोम्वोश्च इति सूत्रेण मस्य नकारे कृते सिविभक्तौ जगन्वान्–इति प्रथमैकवचनं सिद्धम् ॥ ४७ ॥

**प्रिये किमेतज्जगदे मदेका–त्मया त्वया हन्त तटस्थयेव ।**
**त्वदुक्तिपानोत्सव एव निद्रा–भङ्गस्य मे दस्यति वैमनस्यम् ॥ ४८ ॥**

(व्या०) प्रिये इति । हे प्रिये हन्त इति वितर्के त्वया तटस्थया ( स्थापास्नात्र कः ५–१–१४२ इ. सू. तटशब्दपूर्वकस्थाधातोः कः । इडेत् पुसिचातो लुक् इत्याकार लोप. । ) समीपस्थया इव किमेतत् जगदे ( गदधातोः कर्मणि परोक्षा । ) प्रोक्तम् । किं विशिष्टया त्वया मदेकात्मया मया सह एक आत्मा यस्याः सा तया हे प्रिये त्वदुक्तिपानोत्सवः तव उक्तेर्वचनस्य पानस्य उत्सव एव मे मम निद्राभङ्गस्य निद्राया भङ्गस्तस्य वैमनस्यं विमनसो भावो वैमनस्यं तत् मनोऽव्यथा दस्यति स्फेटयति ॥ ४८ ॥

**निद्रा तमोमय्यपि किं विगेया, सुस्वप्नदानात् परमोपकर्त्री ।**
**जाये जगज्जीवनदातुरब्दा–गमस्य को निन्दति पङ्किलत्वम् ॥ ४९ ॥**

(व्या०) निद्रेति । हे जाये हे प्रिये तमोमय्यपि तम एव तमोमयी निद्रा किं विगेया निन्द्या स्यात् अपि तु नैव । किंलक्षणा निद्रा सुस्वप्नदानात् (सु पूजायाम् ३–१–४४ इ सू. तत्पुरुषसमासः । ) शोभना स्वप्नास्तेषां दानात् परमोपकर्त्री परमा चासौ उपकर्त्री च उपकरोतीति उपकर्त्री शोभनस्वप्नदानतः परोपकारकारिणी । जगज्जीवदातु ददातीति दाता जीवनस्य जलस्य दाता जगतो जीवनदाता तस्य जगज्जलदायकस्य अब्दागमस्य वर्षाकालस्य पङ्किलत्वं ( व्रीह्यर्थतुन्दादेरिलश्च ७–२–९ इ सू. मत्वर्थे पङ्कशब्दात् इलप्रत्यय । पङ्क अस्ति अस्य इति पङ्किल पङ्किलस्य भाव पङ्किलत्वम् । ) पङ्किलभाव पङ्किलत्वं तत् कर्दमयुक्तत्वं को निन्दति अपि तु न कोऽपि ॥ ४९ ॥

**भद्रङ्करी निर्भरसेवनेन, निद्राह्वया काचन देवतेयम् ।**
**दूरस्थितं वस्तु निरस्तनेत्रा-नप्यङ्गिनो ग्राहयते यदीहा ॥ ५० ॥**

(व्या०) भद्र इति । हे प्रिये इयं निद्राह्वया निद्रा आह्वयं नाम यस्याः सा निद्रानाम्नी काचन देवता निर्भरसेवनेन निर्भरं सेवनं तेन भद्रङ्करी ( हेतुतच्छीलानुकूलेऽशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात् । ५-१-१०३ । इ. सू भद्रपूर्वककृग्धातोः टः टित्वात् डीः । ) भद्रं सुखं करोतीति सुखकरी वर्तते । यदीहा यस्या निद्राया ईहा इच्छा निरस्तनेत्रानपि निरस्तानि नेत्राणि यैस्ते तान् निरस्तलोचनव्यापारनपि अङ्गिनः प्राणिनः दूरस्थितं दूरे स्थितं तत् वस्तु ग्राहयते । अन्यापि देवता मनसोऽप्यगोचरं वस्तु यतस्ततोऽप्यानीय भक्तस्य दत्ते इति॥५०॥

**श्रोतांसि संगोप्य जडानि चेतः, सचेतनं साक्षिरहो विधाय ।**
**संदर्शयन्ती तव सारभावा-न्निद्रा धुरं छेकधियां दधाति ॥ ५१ ॥**

(व्या०) श्रोतांसीति । हे प्रिये निद्रा छेकधियां छेका चतुरा धीर्येषां ते छेकधियस्तेषां चतुरबुद्धीनां धुरं भारं दधाति धरति । किं कुर्वती निद्रा जडानि अज्ञानानि श्रोतांसि नव इन्द्रियाणि संगोप्य गोपयित्वा रह एकान्ते चेतश्चित्तं सचेतनं चेतनेन सह वर्तते इति सचेतनं साक्षि विधाय कृत्वा तव सारभावान् साराश्चते भावाश्च तान् संदर्शयन्ती संदर्शयतीति संदर्शयन्ती ॥ ५१ ॥

**एकात्मनोर्नौ परिमुञ्चती मा, सुस्वप्नसर्वस्वमदत्त तुभ्यम् ।**
**निद्रा ननु स्त्रीप्रकृतिः करोति, को वा स्वजातौ नहि पक्षपातम् ॥५२॥**

(व्या०) एक इति । निद्रा ननु निश्चितं स्त्रीप्रकृति स्त्री प्रकृतिर्यस्याः सा तुभ्यं सुस्वप्नसर्वस्वं शोभनाः स्वप्ना तेषां सर्वस्वं तत् अदत्त । किं कुर्वती एकात्मनोः एक आत्मा स्वरूपं ययोस्तौ तयो नौ आवयोः मां परिमुञ्चती परिमुञ्चतीति परिमुञ्चती । वा अथवा हि निश्चितं स्वजातौ स्वस्य जातिस्तस्यां पक्षपातं को न करोति अपि तु सर्व कोऽपि ॥ ५२ ॥

**दुर्घोषलालाश्रुतिदन्तघर्षा-दिकं विकर्माप्यत निद्रया यैः ।**
**स्वप्नव्रजे श्रोत्रपथातिथौ ते, ते खेदतः स्वं खलु निन्दितारः ॥ ५३ ॥**

(व्या०) दुर्घोष इति । यैः पुरुषैर्निद्रया दुर्घोषलालाश्च्युति-दन्तघर्षादिकं लालाया· श्च्युति. स्रावः दन्तानां घर्षणं दुर्घोषश्च रौद्रस्वरेण पूत्करणं लालाश्च्युतिश्च दन्तघर्षणं च तानि आदीनि यस्य तत् इत्यादि कुचिह्नरूपविकर्म आप्यत प्राप्यतेस्म । ते पुरुषाः ते तव स्वप्नव्रजे स्वप्नानां व्रज· समूहस्तस्मिन् स्वप्नसमूहे श्रोत्रपथातिथौ श्रोत्रयो. कर्णयो· पन्थाः श्रोत्रपथ ( श्रूयते अनेन इति श्रोत्रं हुयामाश्रुवसि-ख. । ४५१ इ. उ. सू. श्रुट्धातो· त्रप्रत्यय । ऋक्पूः पथ्यपोऽत् । ७-३-७६ । इ सू. पथिन्शब्दात् समासान्तोऽत् प्रत्यय अन्त्यस्वरादेर्लोप.) स्तस्यातिथिस्तस्मिन् कर्णमार्गातिथौ सति एतावति श्रुते सति खलु निश्चितं स्वं आत्मीयं निन्दितारो निन्दिष्यन्ति ॥ ५३ ॥

**आदौ विरामे च फलानि कल्प-वल्लेरिव स्वादुविपाकभाजः ।**
**नेमाननेमानपि नीरजाक्षि, स्वप्नान् दृशः कर्मकरोत्यपुण्या ॥ ५४ ॥**

(व्या०) आदाविति । हे नीरजाक्षि नीरेजाते नीरजे ते इव अक्षिणी यस्याः सा नीरजाक्षी तस्या संबोधनं हे कमललोचने अपुण्या न विद्यते पुण्यं यस्याः सा पुण्यरहिता स्त्री इमान् चतुर्दशस्वप्नान् अनेमानपि न नेमे अनेमे तान् अर्धरहितानपि दृश· कर्म न करोति न पश्यतीत्यर्थ· । किंविशिष्टान् इमान् आदौ (आदीयते प्रथमतया इति आदिः उपसर्गाद कि· इ. सू. आपूर्वकदाधातो. कि इडेत् पुसि इति-आलोप ) प्रथमं चान्यत् विरामे प्रान्ते कल्पवल्ले फलानीव स्वादुविपाकभाज स्वादुश्चासौ विपाकश्च तं भजन्तीति तान् ॥ ५४ ॥

**निशम्य सम्यक् फलदानशौंडान्, स्वप्नानिमांस्ते वदनादिदानीम् ।**
**दक्षे ममोल्लासमियर्ति वक्षः, किं स्थानदानाय मुदां भराणाम् ॥५५॥**

(व्या०) निशम्येति । हे दक्षे विचक्षणे मे मम वक्षो हृदयं इदानीमधुना ते तव वदनात मुखात् सम्यक् फलदानशौंडान् (सप्तमी शौण्डाद्यैः ३-१-८८ इ. सू. सप्तमी तत्पुरुष· । ) फलानां दाने शौंडा समर्थास्तान् इमान् चतुर्दश स्वप्नान् निशम्य श्रुत्वा मुदां हर्षाणां भराणां समूहानां स्थानदानाय स्थानस्य दानं तस्मै स्थितिकरणाय उल्लासं विस्तारमियर्ति याति ॥ ५५ ॥

**आनन्दमाकन्दतरौ हृदाल-वाले त्वदुक्तामृतसेकपुष्टे ।**
**रक्षावृतिं सूत्रयितुं किमङ्ग-ममाङ्गमुत्कण्टकता दधाति ॥ ५६ ॥**

(व्या०) आनन्द इति । अङ्ग इति कोमलामंत्रणे हे सुमङ्गले मम अङ्गं शरीरं उत्कण्टकतां उत्कण्टकस्य भाव उत्कण्टकता तां उद्गतरोमाञ्चत्वं उर्ध्वकण्टकत्वं वा किं दधाति । किं कर्तुं मम हृदालवाले हृदेव आलवालस्तस्मिन् हृदयरूपस्थानके आनन्दमाकन्दतरौ आनन्द एव माकन्दतरुस्तस्मिन् हर्षरूपसहकारवृक्षे त्वदुक्तामृतसेकपुष्टे तव उक्तानि वचनानि त्वदुक्तानि तान्येव अमृतं तस्य सेकेन सिञ्चनेन पुष्टे प्रौढे सति रक्षावृतिं रक्षाया वृतिस्तां रक्षायैकण्टकवृतिं सूत्रयितुं कर्तुम् ॥ ५६ ॥

**श्रुत्योः सुधापारणकं त्वदुक्त्या, मत्वा मनोहत्य समीपवासात् ।**
**पिंडोललोले इव चक्षुषी मे, प्रमृज्य तत्संनिधिमाश्रयेते ॥ ५७ ॥**

(व्या०) श्रुत्योरिति । हे प्रिये त्वदुक्त्या तव उक्तिर्वचनं तया त्वदीयवचनेन श्रुत्योः कर्णयोः मनोहत्य मनो हत्वा इति मनोहत्य (कणेमनस्तृप्तौ ३-१-६ । इ सू. तृप्त्यर्थे मनसो गतिसञ्ज्ञा । गतिकन्यस्तत्पुरुष ३-१-४२ । इ. सू. नित्यतत्पुरुषसमास ) मनस्तृप्तिं यावत् सुधापारणकं सुधाया पारणकं अमृताशनं मत्वा ज्ञात्वा मे मम चक्षुषी लोचने तत्संनिधिं (सम्यक्निधीयते अस्मिन् संनिधिः उपसर्गादः कि ५-३-८७ । इ. सू. संनिपूर्वकधाधातोः किः इडेत् पुसि इति आलुक् ।) तयोः कर्णयोः संनिधिस्तं कर्णसमीपमाश्रयेते । किंविशिष्टे चक्षुषी समीपवासात् समीपस्य वासस्तस्मात् प्रत्यासन्नवासात् पिंडोललोल इव पिंडोले भुक्तशेषे लोले लोलुपे इव ॥ ५७ ॥

**एकस्वरूपैरपि मत्प्रमोद-तरोः प्ररोहाय नवाम्बुदत्वम् ।**
**स्वप्नैरमीभिः कुतुकं खलाशा-वल्लीविनाशाय दवत्वमीये ॥ ५८ ॥**

(व्या०) एक इति । एकस्वरूपैरपि एकं स्वरूपं येषा तै अमीभिः स्वप्नै कुतुकमाश्चर्यम् । मत्प्रमोदतरो मम प्रमोदोहर्ष स एव तरुर्वृक्षस्तस्य मदीयहर्षवृक्षस्य प्ररोहाय अङ्कुराय नवाम्बुदत्वं अम्बूनि ददातीति अम्बुद. नवश्चासौ

अम्बुदश्च तस्य भाव' नवीनमेघसादृश्यं खलाशावल्लीविनाशाय खलानां दुर्जनाना-माशा मनोरथाः ता एव वल्लयस्तासां विनाशस्तस्मै दुर्जनमनोरथरूपवल्लीविनाशाय दवस्य भावो दवत्वं दवानलत्वमीये प्राप्तम् ॥ ५८ ॥

**नैषां फलोक्तावविचार्य युक्त-माचार्यकं कर्तुमहो ममापि ।**
**महामतीनामपि मोहनाय, छद्मस्थतेयं प्रबलप्रमीला ॥ ५९ ॥**

(व्या०) नेति । अहो इत्याश्चर्ये एषां स्वप्नानां फलोक्तौ फलानामुक्ति-स्तस्यां अविचार्य न विचार्य अविचार्य अविमृश्य ममापि आचार्यकं ( योपान्त्याद् गुरुपोत्तमादसुप्रत्याद्कञ् ७-१-७२ । इ. सू. भावे कर्मणि आचार्यशब्दात् अकञ् । ) आचार्यकर्म्म कर्तुं न युक्तं न योग्यमस्ति । इयं छद्मस्थता प्रबलप्रमीला प्रबलाचासौ प्रमीला च सबलनिद्रा महामतीनामपि महती मतिः येषां ते महाम-तयस्तेषां विचक्षणानां मोहनाय वर्तते ॥ ५९ ॥

**यावद् घनाभं घनघातिकर्म-चतुष्कमात्मार्यमणं स्तृणाति ।**
**तावत् तमश्छन्नतया विचारे, स्फुरन्न चेतोऽञ्चति जांधिकत्वम् ॥६०**

(व्या०) यावदिति । हे प्रिये घनाभं घनवत् मेघवत् आभातीति घनाभं मेघसदृशं घनघातिकर्म्मचतुष्कं घनघातीनि च तानि कर्माणि च घनघातीकर्माणि तेषां चतुष्कं ज्ञानावरणीयकर्म १ दर्शनावरणीयकर्म २ मोहनीयकर्म ३ अन्तरा-यकर्म एतत् घनघातिकर्मचतुष्कं आत्मार्यमणं आत्मा एव अर्यमा सूर्यस्तं यावत् स्तृणाति आच्छादयति । तावत् चेतः चित्तं तमश्छन्नतया तमसा अज्ञानेन छन्न-माच्छादितं विचारे स्फुरत् सत् जांधिकत्वं (वेतनादेर्जीवति ६-४-१५ इ. सू. जीवत्यर्थे जंघाशब्दात् इकण् जंघाभ्या जीवति इति जांघिक जांधिकस्य भावः जांघिकत्वम् ) जघालत्वं त्वरमाणत्वं न अञ्चति न प्राप्नोति ॥ ६० ॥

**आकेवलार्चिःकलनं विशङ्कं, वयं न संदेहभिदां विदध्मः ।**
**को वा विना काञ्चनसिद्धिमुर्वी-माधातुमुर्वीमनृणां यतेत ॥ ६१ ॥**

(व्या०) आकेवल इति । हे प्रिये वयं आकेवलार्चि.कलनं केवलमिति अर्चिः तस्य कलनं आकेवलार्चि'कलनात् केवलज्ञानलाभं यावत् विशङ्कं विगता

शङ्का यस्मिन् कर्मणि यथा भवति तथा निःशङ्कः सदेहभिदां संदेहस्य भिदा तां संशयभेदं न कुर्मः । वा अथवा कः पुमान् काञ्चनसिद्धिं काञ्चनस्यसिद्धिस्तां सुवर्णसिद्धिं (विनाते तृतीया च २–२–११५ । इ. सू. विनायोगे द्वितीया ।) विना उर्वी गुर्वी उर्वी पृथ्वीं अनृणां न विद्यते ऋणं यस्याः यस्यां वा सा तां ऋणरहितामाधातु–कर्तुं यतेत उपक्रमेत ॥ ६१ ॥

**तस्मान्मनागागमयस्व काल–मतित्वरा विघ्नकरीष्टसिद्धेः ।**
**इत्युक्तवांस्त्यक्तमनस्तरङ्गः, क्षणं समाधत्त स मेधिरेशः ॥ ६२ ॥**

(व्या०) तस्मादिति । तस्मात् कारणात् हे प्रिये मनाक् स्तोकं कालं आगमयस्व प्रतीक्षस्व । अतित्वरा इष्टसिद्धेः इष्टस्य सिद्धिस्तस्याः विघ्नकरी विघ्नं करोतीत्येवंशीला इति हेतो औत्सुक्यं इष्टसिद्धेर्विघ्नकृत् वर्तते । इति उक्तवान् सन् उवाच इत्युक्तवान् एतावता इत्युक्त्वा स मेधिरेशः मेधा प्रज्ञा अस्ति एषा-मिति मेधिराः ( मेधारथान्नवेर ७–२–४१ । इ सू. मत्वर्थे मेधाशब्दात् वा इरः । ) प्राज्ञास्तेषामीशः भगवान् त्यक्तमनस्तरङ्गः मनसः तरङ्गो व्यापारः त्यक्तो मनस्तरङ्गो मनोव्यापारो येन स सन् क्षणं समाधत्त समाधिं दधौ ॥ ६२ ॥

**निमील्य नेत्रे विनियम्य वाचं, निरुध्य नेताखिलकायचेष्टाः ।**
**निशि प्रसुप्ताब्ज मनादिहंसं, सरोऽन्वहार्षीदलसत्तरङ्गम् ॥ ६३ ॥**

(व्या०) निमील्येति । स नेता भगवान् निशिरात्रौ प्रसुप्ताब्जं प्रसुप्तानि संकुचितानि अब्जानि कमलानि यस्मिन् तत् सकुचितकमलं । अनादिहंसं नद-न्तीति नादिनः ननादिनोऽनादिनो हंसा यस्मिन् तत् अशब्दायमानहंसं अलस-त्तरङ्गं लसन्तीति लसन्तः न लसन्तोऽलसन्तस्तरङ्गा कल्लोला यस्मिन् तत् अनु-लसत्तरङ्गं एवंविधं सरः सरोवरं अन्वहार्षीत् सरोवरस्यानुकरणं चकार । किं कृत्वा नेत्रे निमील्य वाचं विनियम्य संवृत्य अखिलकायचेष्टाः कायस्य शरीरस्य चेष्टाः अखिलाश्च ताः कायचेष्टाश्चताः समस्तशरीरचेष्टाः निरुध्य ॥ ६३ ॥

**स्वप्नानशेषानवधृत्य बुद्धि–बाह्वा मनोवेत्रधरः पुरोगः ।**
**महाधियामूहसभामभीष्टां, निनाय लोकत्रयनायकस्य ॥ ६४ ॥**

(व्या०) स्वप्नानिति । मनोवेत्रधरः मन एव वेत्रधरः मनःप्रतीहारः अशेषान् न शेषा अशेषास्तान् समस्तान् स्वप्नान् बुद्धिबाह्वा बुद्धिरेव बाहुस्तया अवधृत्य लोकत्रयनायकस्य लोकानां त्रयस्य नायकः स्वामी तस्य श्रीयुगादीशस्य अभीष्टां प्रियां ऊहसभां ऊहस्तर्कः स एव सभा तां विचारसभां निनायनीतवान्। किंविशिष्टो मनोवेत्रधरः महाधियां महती धीर्येषां ते महाधियस्तेषां महाबुद्धीनां पुरोगः पुरो गच्छतीति पुरोगः ( नाम्नो गम खड्डौ च विहायसस्तु विहः । ५-१-१३१ । इ. सू. पुरस्पूर्वकगम्धातोः डः डित्वात् अन्त्यस्वरादेर्लोपः ।) अग्रेसरः ॥ ६४ ॥

**अस्ताघताधारविचारवार्धिं, ज्ञानाञ्जनोद्भिन्नदृशावगाह्य ।**
**चित्तेन नेतुः स्फुट धीवरेण, समर्पितास्तत्फलयुक्तिमुक्ताः ॥ ६५ ॥**

(व्या०) अस्त इति । चित्तेन तत्फलयुक्तिमुक्ताः तेषां स्वप्नानां फलानि तेषां युक्तय एव मुक्ता मुक्ताफलानि नेतुः श्रीऋषभस्वामिनः समर्पिताः । किंविशिष्टेन चित्तेन स्फुटधीवरेण । धीवरो बुद्धिमान् मात्स्यिकश्च स्फुटश्चासौ धीवरश्च बुद्धिमांश्च तेन बुद्धिप्रधानेन पक्षे धीवरेण ( ध्यायति मत्स्यघातं इति धीवरः । तीवर धीवर पीवर-यः ४४४ । इ. उ. सू. निपातः । ) मात्स्यिकेन । पुनः ज्ञानाञ्जनोद्भिन्नदृशा ज्ञानमेव अञ्जनं तेन उद्भिन्ना दृक् यस्य तेन ज्ञानरूपाञ्जनेन विकस्वरलोचनेन । अस्ताघताधारविचारवार्धिं अस्तं अघं पापं येन स अस्ताघस्तस्य भावः अस्ताघता निष्पापता पक्षे अस्ताघता गंभीरत्वं तस्या आधारो यो विचारस्तस्य वार्धिः समुद्रः तमवगाह्य यथा अञ्जनोद्भिन्नदृशा धीवरेण समुद्रमवगाह्य मौक्तिकानि नेतुः स्वामिनः समर्प्यन्ते ॥ ६५ ॥

**तद्भूर्हर्षामृतरसभरः किं शिरासारणीभिः,**
**स्वान्तानूपाद्युगपदमुपत्क्षेत्रदेशेऽखिलेऽस्य ।**
**लोकत्रातुः कथमितरथा लोमबर्हिःप्ररोहैः,**
**सद्यस्तत्रोल्लसितमसितच्छायसूक्ष्माग्रभागैः ॥ ६६ ॥**

(व्या०) तदिति । तद्भूः तेभ्यः स्वप्नेभ्यो भवतीति तद्भूः स्वप्नसमुत्पन्नः हर्षामृतरसभरः हर्ष एव अमृतस्य रसस्तस्य भरः अस्य लोकत्रातु लोकानां त्राता तस्य त्रिभुवनपालकस्य भगवतः स्वान्तानूपात् स्वान्तं चित्तमेव अनूपः (अनोर्देशे उप् । ३-२-११० । इ. सू. अनो. परस्य अपो देशेऽर्थे उप् ।) सजलप्रदेशस्तस्मात् शिरासारणीभिः शिरा एव सारण्यः प्रणाल्यस्ताभिः अखिले समस्ते क्षेत्रप्रदेशे क्षेत्रस्य शरीरस्य प्रदेशे युगपत् समकालं असृपत् प्रासरत् । इतरथा तत्र क्षेत्रप्रदेशे सद्यस्तत्कालं कथं लोमबर्हिः प्ररोहैः लोमानि एव बर्हिषो दर्भाः तेषां प्ररोहाः अङ्कुरास्तैः लोमरूपदर्भाङ्कुरैः उल्लसितम् । किंलक्षणैः लोमबर्हिःप्ररोहैः असिता कृष्णा छाया कान्तिर्येषां ते असितच्छायाः सूक्ष्माश्चते अग्रभागाश्च सूक्ष्माग्रभागाः असितच्छायाः सूक्ष्माग्रभागा येषां तैः ॥ ६६ ॥

**दृग्युग्ममुल्लसितमुच्छ्वसितां तनुं च, चञ्चन्मतिद्रढिमधाम सुमङ्गला सा।**
**दृष्ट्वाद्भुतं वरयितुर्वचनं विनापि, स्वप्नान्महाफलतयान्वमिमीत सर्वान्॥६७**

(व्या०) दृगिति । सा सुमङ्गला वरयितु श्रीऋषभदेवस्य वचनं (विना ते तृतीया च । २-२-११५ । इ. सू. विनायोगे वचनं इत्यत्र द्वितीया । ) विनापि दृग्युग्मं दृशोर्नेत्रयोर्युग्मं युगलं उल्लसितं दृष्ट्वा च तनुं शरीरमुच्छ्वसितां दृष्ट्वा सर्वान् स्वप्नान् महाफलतया महत् च तत् फलं च तस्य भावो महाफलता तया अन्वमिमीत अनुमानेन ज्ञातवती । किंविशिष्टा सुमङ्गला चञ्चन्मति द्रढिमधाम चञ्चन्ती चासौ मतिश्च चञ्चन्मतिः प्रसरन्मति तस्याः द्रढिमा (वर्णदृढादिभ्यष्ट्यण् च वा । ७-१-५९ । इ. सू. भावे दृढशब्दात् इमन् । त्र्यन्तस्वरादेः । ७-४-४३ । इ सू. अन्त्यस्वरलोपः । दृढस्य भावो द्रढिमा) दृढता तस्य धाम स्थानम् ॥ ६७ ॥

**ईहांचक्रे सा स्वामिनो मौनमुद्रा-भेदं तृष्णालुर्वाक्सुधायास्तथापि ।**
**धत्ते नोत्कंठां गर्जिते केकिनी किं, मेघस्योन्नत्या ज्ञातवर्षागमापि॥६८॥**

**इतिश्री अञ्चलगच्छेशश्रीजयशेखरसूरिविरचिते श्रीजैनकुमारसंभवमहाकाव्ये चतुर्दशमहास्वप्नावधारणावर्णनो नामाष्टमः सर्गः समाप्तः ॥**

सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि-
धम्मिल्लादिमहाकवित्वकलनाकल्लोलिनीसानुमान् ।
वाणीदत्तवरश्चिरं विजयते तेन स्वयं निर्मिते,
सर्गो जैनकुमारसंभवमहाकाव्येऽष्टमोऽयं गतः ॥ ७ ॥

(व्या०) ईहांचक्रे इति। सा सुमङ्गला तथापि स्वामिनः श्रीऋषभदेवस्य मौनमुद्राभेदं मौनस्य मुद्राया भेदं ईहांचक्रे वाञ्छितवती। किंलक्षणा सुमङ्गला वाक्सुधायाः वाक् एव सुधा तस्याः वचनामृतस्य तृष्णालुः तृष्णा अस्ति अस्या इति तृषार्ता मेघस्य उन्नत्या ज्ञातवर्षागमापि ज्ञातो वर्षागमो यया सा केकिनी मयूरी गर्जिते उत्कंठां किं न धत्ते अपि तु धत्ते ॥ ६८ ॥

इतिश्रीमदञ्चलगच्छेकविचक्रवर्तिश्रीजयशेखरसूरिविरचितस्य श्रीजैनकुमारसंभवमहाकाव्यस्य तच्छिष्यश्रीधर्मशेखरमहोपाध्यायविरचितायां टीकायां श्रीमाणिक्यसुन्दरशोधितायां अष्टमसर्गव्याख्या समाप्ता ॥ ८ ॥



## ॥ अथ नवमः सर्गः प्रारभ्यते ॥

**तदा तदास्येन्दुसमुल्लसद्वचः–सुधारसस्वादनसादरश्रुतिः ।**
**गिरा गभीरस्फुटवर्णया जग–त्त्रयस्य भर्त्रा जगदे सुमङ्गला ॥ १ ॥**

(व्या०) तदेति । तदा तस्मिन्नवसरे जगत्त्रयस्य जगतां त्रयं तस्य भर्त्रा श्रीयुगादीश्वरेण सुमङ्गला गिरा वाण्या जगदेजल्पिता । किंलक्षणया गिरा गभीरस्फुटवर्णया गभीराश्च स्फुटाश्च प्रकटा वर्णा अक्षराणि यस्यां सा तया प्रकटाक्षरया । किंविशिष्टा सुमङ्गला तदास्येन्दुसमुल्लसद्वच.सुधारसस्वादनसादरश्रुतिः तस्य भगवतः आस्यं मुखमेव इन्दुश्चन्द्र तस्मात् समुल्लसत् निर्गच्छत् वचः वचनमेव सुधाया–अमृतस्य रसः तस्य आस्वादस्तस्मिन् सादरे आदरसहिते श्रुतो कर्णौ यस्याः सा ॥ १ ॥

**जुडजडिम्ना जडभक्ष्यभोजना–दनावृतस्थानशयेन जन्तुना ।**
**विलोक्यते यो विकलप्रचारवद्–विचारणं स्वप्नभरो न सोऽर्हति ॥२॥**

(व्या०) जडेति । हे सुमङ्गले जुडजडिम्ना जडस्य भावो जडिमा (वर्णदृढादिभ्यष्ट्यण् च वा ७–१–५९ इ. सू. जडशब्दात् भावे इमन् प्रत्यय ।) जुडंश्चासौ जडिमा च तेन मिलज्जाडयेन । जडभक्ष्यभोजनात् जडं च तत् भक्ष्यं च.जडभक्ष्यं तस्य भोजनात शीतलाहारभोजनात । अनावृतस्थानशयेन न आवृतमनावृतं अनाच्छादितं अनावृतं च तत् स्थानं च तस्मिन् शेते इति अनावृतस्थानशयस्तेन एवंविधजंतुना मानवेन य स्वप्नभर स्वप्नानां भरः विलोक्यते दृश्यते । स स्वप्नभरः स्वप्नसमूहो विकलप्रचारवत् विकलस्य ग्रथिलस्य प्रचारो-गमनं विकलप्रचार स इव विकलप्रचारवत् ग्रथिलागमनवत् विचारणं नार्हति विचारं कर्तुं योग्यो न स्यात् ॥ २ ॥

**निभालयत्यालयगोऽपि यं प्रिये–ऽनुभूतदृष्टश्रुतचिन्तितार्थतः ।**
**नरो निशि स्वप्नमबद्धमानसो, न सोऽपि पंक्ति फलिनस्य पश्यति ॥३॥**

(व्या०) निभालयतीति । हे प्रिये अबद्धमानस न बद्ध अबद्धं मानसं

यस्य सः असंवृतचित्तो नरो मनुष्यः आलयगोऽपि आलयं गच्छतीति आलयगः गृहे स्थितोऽपि सन् अनुभूतदृष्टश्रुतचिन्तितार्थतः अनुभूतश्च दृष्टश्च श्रुतश्च चिन्तितश्च अनुभूतदृष्टश्रुतचिन्तिताः ते च ते अर्थाश्च तेभ्य इति निशि रात्रौ यं स्वप्नं निभालयति पश्यति । सोऽपि स्वप्न फलिन ( फलबर्हाच्चेन. । ७–२–१३ । इ. सू. मत्वर्थे फलशब्दात् इन प्रत्यय ।) फलमस्यास्तीति फलिनः तस्य पङ्क्ति न पश्यति ॥ ३ ॥

**नरस्य निद्रावधिवीक्षणोत्सवं, तनोति यस्तस्य फलं किमुच्यते ।**
**विमुच्यते सोऽपि विचारतःपृथ–ग्गतः प्रथां यो मलमूत्रबाधया ॥४॥**

(व्या०) नरस्येति । यः स्वप्नः नरस्य मनुष्यस्य निद्रावधिवीक्षणोत्सवं दर्शनस्योत्सवं तनोति करोति । तस्य स्वप्नस्य फलं किमुच्यते किं कथ्यते न किमपीति । य. स्वप्नः मलमूत्रबाधया मलश्च मूत्रंच मलमूत्रे तयोर्बाधया पीडया प्रथां विस्तारं गतः सोऽपि स्वप्नः विचारतः विचारात् पृथग् विमुच्यते विचारात् अन्यत्र क्रियते अर्थात् तादृशानां स्वप्नानां फलं नास्तीत्यर्थः ॥ ४ ॥

**मनाक् समुत्पाद्य दृशोर्निमीलनं, सुखं निषण्णे शयितेऽथवा नरे ।**
**प्रवक्ति यत्स्वप्नमिषेण देवता, वितायते तस्य विचारणा बुधैः ॥ ५ ॥**

(व्या०) मनागिति । हे प्रिये नरे मनुष्ये सुखं निषण्णे सुखेन उपविष्टे सति अथवा शयिते दृशोर्लोचनयोर्मनाक् स्तोकतर निमीलनं समुत्पाद्य स्वप्नमिषेग देवता यत् प्रवक्ति । बुधैर्विद्वद्भिस्तस्य विचारणा चिन्तनं वितायते (तनः क्ये ४–२–६३ । इ. सू. क्ये परे तन् धातो आत्वं वा ।) क्रियते ॥ ५ ॥

**अधर्मधर्माधिकतानिबन्धनं, यमीक्षते स्वप्नमपुष्कलं जनः ।**
**वदन्ति वैभातिकमेघगर्जिव–न्न मोघतादोषपदं तमुत्तमाः ॥ ६ ॥**

(व्या०) अधर्म इति । हे प्रिये जनो लोकः अपुष्कलं न पुष्कलं अपुष्कलं तत् स्तोकं अधर्मधर्माधिकतानिबन्धनं अधर्मश्च धर्मश्च अधर्मधर्मौ तयोरधिकता आधिक्यं सैव निबन्धनं कारणं यस्य त एवंविध यं स्वप्नं ईक्षते पश्यति । उत्तमाः सत्पुरुषास्तं स्वप्नं वैभातिकमेघगर्जिवत् विभाते प्रभाते भवो वैभातिक स चासौ

मेघश्च तस्य प्रभातसत्कमेघस्य गर्जिः गर्जारवः तस्या गर्जेस्तुल्यं गर्जिवत् मोघतादोषपदं मोघस्य भावो मोघता निष्फलता सैव दोष निष्फलतादोषस्तस्य पदं स्थानं न वदन्ति । कोऽर्थः यथा प्रभातसत्कमेघगार्जितं निष्फलं नैव स्यात् तथा सोऽपि स्वप्नः सफल एव स्यात् ॥ ६ ॥

**त्वमादृत द्विड्निबिरीसभाञ्जनं, सभाजनं सिञ्चसि मे वचोऽमृतैः ।**
**सभाजनं यत्तव तन्वते सुरा, विभासि तत्पुण्यविलासभाजनम् ॥७॥**

(व्या०) त्वमिति । हे प्रिये त्वं वचोमृतैः वचांसि वचनान्येव अमृतानि तैः मे मम सभाजनं सभाया जनस्तं सभासत्कलोकं सिञ्चसि । किंलक्षणं सभाजनं आदृतद्विड्निबिरीसभाजनं आदृतं द्विषां वैरिणां निबिरीसायाः ( विडबिरीसौ नीरन्ध्रे च ७-१-१२९ इ. सू. ने नीरन्ध्रेऽर्थे बिरीस प्रत्ययः । ) निबिडायाः भाया प्रभाया अञ्जनं क्षेपणं येन तं आदृतद्विड्० । सुरा देवास्तव यत् सभाजनमापृच्छनं तन्वते कुर्वते तत् तस्मात्कारणात् पुण्यविलासभाजनं पुण्यस्य विलासस्तस्य भाजनं पात्रं त्वं विभासि शोभसे ॥ ७ ॥

**कुलं कलङ्केन न जातु पङ्किलं, न दुष्कृतस्याभिमुखी च शेमुषी ।**
**गिरः शरच्चन्द्रकरानुकारिका, गतं सतंद्रीकृतहंसवल्लभम् ॥ ८ ॥**
**निरर्गलं मङ्गलमङ्गसौष्ठवं, वदावदीभूतविचक्षणा गुणाः ।**
**इदं समग्रं सुकृतैः पुराकृतै, र्ध्रुवं कृतज्ञे तव ढौकनीकृतम् ॥९॥ युग्मम्**

(व्या०) कुलमिति । हे कृतज्ञे कृतं जानातीति कृतज्ञा तस्याः संबोधने हे कृतज्ञे ध्रुवं निश्चितं तव पुराकृतैः पूर्वभवकृतैः सुकृतैः शोभनानि कृतानि तैः पुण्यैः इदं समग्रं ढौकनीकृतं न ढौकनं अढौकनं अढौकनं ढौकनं कृतमिति ढौकनीकृतमुपदीक्रियतेस्म । इदं किमिति तवकुलं कलङ्केन जातु कदाचिदपि न पङ्किलं ( ब्रीह्यर्थतुन्दादेरिलश्च ७-२-९ इ. सू मत्वर्थे पङ्कशब्दात् इल प्रत्ययः । ) न कलुषं वर्तते । च अन्यत् तव शेमुषी बुद्धि दुष्कृतस्य दुष्टं कृतं दुष्कृतं तस्य पापस्य अभिमुखी संमुखी न स्यात् । तव गिरो वाण्यः शरच्चन्द्रकरानुकारिकाः शरदः चन्द्रस्तस्य करास्तान् अनुकुर्वन्तीति शारदचन्द्रकिरणानुकारिण्यो वर्तन्ते ।

तव गतं गमनं सतन्द्रीकृतहंसवल्लभं सतन्द्रीकृताः अलसीकृताः हंसानां वल्लभा हंस्यो येन तत् वर्तते । तव अङ्गसौष्ठवं अङ्गे सौष्ठवं (सुष्टु भावः सौष्ठवं युवादेरण् ७-१-६७ । इ. सू. सुष्टु शब्दात् भावे अण् ।) शरीरपाटवं निरर्गलं निर्गता अर्गला बंधनं यस्य तत् अर्गलारहितं मङ्गलं वर्तते । तव गुणा माधुर्यौदार्यादयः वदावदीभूतविचक्षणाः वदन्तीति वदावदाः (चराचर चलाचल पतापत वदावद घनाघन पाटूपट वा । ४-१-१३ । इ. सू. अच् प्रत्ययान्तो वदावद शब्दो निपात्येति ।) वाचालाः न वदावदाः अवदावदाः अवदावदावदावदाभूता इति वदावदीभूताः वाचालीभूता ते च ते विचक्षणाश्च कवीश्वराः वाचालीभूतकवीश्वरा वर्तन्ते ॥ ८ ॥ ९ ॥ युग्मम् ॥

**न कोऽधिकोत्साहमना धनार्जने, जनेषु को वा न हि भोगलोलुपः ।**
**कुतः पुनः प्राक्तनपुण्यसंपदं, विना लता वृष्टिमिवेष्टसिद्धयः ॥ १० ॥**

(व्या०) नेति हे प्रिये कः पुमान् जनेषु लोकेषु धनार्जने धनानामर्जनं तस्मिन् धनोपार्जने अधिकोत्साहमनाः अधिकउत्साहो यस्य तत् अधिकोत्साहं अधिकोत्साहं मनो यस्य सः अधिकोत्साहमनाः अधिकतरोद्यमचित्तो न स्यात् अपि तु स्यादेव हि निश्चितम् । वा अथवा कः पुमान् भोगलोलुपः भोगेषु लोलुपः सुखलम्पटो न स्यात् अपि तु स्यादेव । प्राक्तनपुण्यसम्पदं विना प्राक्भवा प्राक्तनी (सायं चिरं प्राह्णे प्रगेऽव्ययात् ६-३-८८ इ. सू. तनट् प्रत्ययः ।) पुण्यानां सम्पद् पुण्यसम्पद् । प्राक्तनी चासौ पुण्यसम्पत् च तां विना पुनः कुतः इष्टसिद्धयः इष्टानां सिद्धयः स्युः । का इव लता इव वल्ल्य इव यथा लताः वल्ल्यो वृष्टिं विना कुतः स्युः ॥ १० ॥

**न जापलक्षैरपि यन्निरीक्षणं, क्षणं समश्येत विचक्षणैरपि ।**
**सुराङ्गनाः सुन्दरि तास्तवक्रम-द्वयस्य दास्यं स्पृहयन्ति पुण्यतः ॥ ११ ॥**

(व्या०) नेति । विचक्षणैरपि बुधैरपि यन्निरीक्षणं यासां सुराङ्गनानां निरीक्षणं दर्शनं जापलक्षैरपि जापानां लक्षणितैरपि क्षणं न समश्येत न प्राप्येत । अशौट् व्याप्तौ इति धातोः प्रयोगः । हे सुन्दरि ताः सुराङ्गनाः तव क्रमद्वयस्य

क्रमयोश्चरणयोर्द्वय तस्य पुण्यत पुण्यात् इति पुण्यतः पुण्यप्रभावात् दास्यं स्पृहयन्ति ॥ ११ ॥

**न कापथे कंटककोटिसंकटे, पदेषु कासांचन पादुका अपि ।**
**मणिक्षमाचारभवः क्रमक्लमः, शमं सुरीभिः सुकृतैस्तवाप्यते ॥१२॥**

(व्या०) नेति । हे प्रिये कासांचन स्त्रीणां कंटककोटिसंकटे कंटकानां कोटय. ताभि संकुले कापथे ( गति क्वन्यस्तत्पुरुष· ३–१–४२ इ. सू. तत्पुरुष समास· । काक्षपथो ३–२–१३४ इ. सू. पथशब्दे परे को· कादेश । ऋक्पू· पथ्यपोऽत् ७–३–७६ इ. सू पथिन् शब्दात् समासान्त· अत्प्रत्यय·।) कुत्सित· पन्थाः कापथस्तस्मिन् कुमार्गे पदेषु पादुका अपि न स्यु· । सुरीभिर्देवीभि· तव मणिक्षमाचारभव· मणिभिर्निर्मितायां क्षमायां चारात् चलनाद् भवः मणिकुट्टिमचलनात् समुत्पन्नः क्रमक्लमः क्रमयो. क्लम· पदश्रमः सुकृतैः पुण्यैः शमं उपशान्तिं आप्यते प्राप्यते ॥ १२ ॥

**बहुत्वतः काश्चन शायिनां वने, कृशे कुशश्रस्तरकेऽपि शेरते ।**
**द्युतल्पतूलीष्वपि न प्रिये रतिः, सुमच्छदप्रच्छदमन्तरेण ते ॥१३॥**

(व्या०) बहु इति । हे प्रिये काश्चन स्त्रियो वने वनमध्ये शायिनां शेरते इति शायिनस्तेषां बहुत्वत· बहुत्वं बहुत्वमिति बहुत्वतो बाहुल्यात् कृशे अल्पे कुशश्रस्तरके कुशानां श्रस्तरकस्तस्मिन् दर्भसंस्तारके शेरते स्वपन्ति । हे प्रिये ते तव द्युतल्पतूलीष्वपि दिव स्वर्गस्य तल्प शय्या तस्य तूलिकास्वपि सुमच्छदप्रच्छदं सुमाना पुष्पाणा छदो वस्त्रं तस्य प्रच्छदं उत्तरच्छदं (गौणात् समया निकषा हाधिगन्तरान्तरेणातियेन तेनै द्वितीया २–२–३३ इ. सू अन्तरेणयोगे सुमच्छदप्रच्छद मित्यत्रद्वितीया।) अन्तरेण विना पुष्पवस्त्रस्य उत्तरच्छदं विना नरतिर्न सुखम्॥१३॥

**कदन्नमप्यात्ममनोविकल्पनै-र्महारसीकृत्य लिहन्ति काश्चन ।**
**चटुक्रियां कारयसि द्युसत्प्रियाः, फलाशने त्वं सुरभूरुहामपि ॥१४॥**

(व्या०) कदन्नमिति । काश्चन स्त्रिय कदन्न ( गतिक्वन्यस्तत्पुरुष ३–१–४२ इ. सू तत्पुरुषसमास· । को· कत्तत्पुरुषे ३–२–१३० इ सू अन्न

शब्दे परे कोः कदादेशः । ) मपि कुत्सितमन्नं कदन्नं कुत्सितान्नमपि आत्ममनोविकल्पनैः आत्मनो मनांसि तेषां विकल्पनानि तैः महारसीकृत्य महान् रसो यस्मिन् तत् महारसं न महारसं अमहारसं अमहारसं महारसं कृत्वा इति महारसीकृत्य लिहन्ति आस्वादयन्ति । त्वं द्युसत्प्रिया दिविसीदन्तीति द्युसदो देवास्तेषां प्रियाः देवाङ्गनाः सुरभूरुहामपि भुवि रोहन्तीति भूरुहो वृक्षाः सुराणां देवानां भूरुहस्तेषां कल्पवृक्षाणामपि फलाशने फलानामशनं भोजनं तस्मिन् फलाहारे चटुक्रियां चटूनां क्रिया तां चाटुवचनानि कायसि ॥ १४ ॥

**विनाश्रयं संततदुःखिता ध्रुवं, स्तुवन्ति काश्चित् सुगृहाः पतत्रिणीः ।**
**विमानमानच्छिदि धाम्नि लीलया, त्वमिद्धपुण्ये पुनरप्सरायसे ॥१५**

(व्या०) विनेति । हे प्रिये काश्चित् स्त्रियः आश्रयं गृहं विना संततदुःखिताः संततं दुःखिताः सत्यः ध्रुवं निश्चितं सुगृहाः शोभनं गृहं यासां ताः सुगृहाख्याः पतत्रिणीः पक्षिणीः स्तुवन्ति । हे इद्धपुण्ये इद्धं पुण्यं यस्याः सा तस्याः संबोधनं हे समृद्धपुण्ये त्वं विमानमानच्छिदि विमानस्य मानं छिनत्तीति तस्मिन् विमानमानच्छेदिनि धाम्नि गृहे लीलया अप्सरायसे ( ओजोऽप्सरस ३–४–२८ इ. सू. अप्सरस्शब्दात् वा क्यङ् सस्य लुक् च । ) अप्सरस इव आचरसि अप्सरायसे देवाङ्गनावदाचरसि ॥ १५ ॥

**अखंडयन्त्या स्वसदःस्थितिं मदा, गतागतं ते सदने वितन्वती ।**
**ऋतीयते किं सुकृताञ्चिते शची, तुलां त्वया स्थानमधर्मकं श्रिता ॥१६**

(व्या०) अखंडयन्त्येति । हे सुकृताञ्चिते सुकृतेन पुण्येन अञ्चिता युक्ता सुकृताञ्चिता तस्याः संबोधनं हे सुकृताञ्चिते हे पुण्ययुक्ते शची इन्द्राणी त्वया तुलां सादृश्यं किं ऋतीयते ( ऋतीङीय ३–४–३ इ. सू. ऋतिधातोः स्वार्थे ङीयः ङित्वात् आत्मनेपदम् । ) गच्छति अपितु न गच्छति । किं लक्षणा शची अधर्मकं स्थानं देवलोकं श्रिता आश्रिता पुनः किं कुर्वती ते तव सदने गृहे सदा ( सदाधुनेदानींतदानीमेतर्हि ७–२–९६ इ. सू. सदा निपात्यते । ) सर्वदा गतागतं गतं च आगतं च एतयोः समाहारः गतागतं तत् गमनागमनं वित-

न्वती वितनोतीति वितन्वती कुर्वती । किंविशिष्टया त्वया स्वसद स्थितिं स्वस्यात्मनः सदो गृहं तस्य स्थितिस्तां स्वस्थानकस्थितिं अखंडयन्त्या न खंडयन्ती-अखडयन्ती तया ॥ १६ ॥

**प्ररूढदोषाकरनाम्नि निर्भरं, कलङ्किनीन्दौ महिषीत्वमीयुषीम् ।**
**तमःसमुत्पन्नरुचिं कृतीनरो, न रोहिणीमप्युपमित्सति त्वया ॥१७॥**

(व्या०) प्ररुढ इति । हे प्रिये कृती कृतमनेनेति कृती ( इष्टादेः ७–१–१६८ इ. सू. कृत शब्दात् कर्तरि इन् । ) विचक्षणो नरः पुमान् त्वया रोहिणीमपि न उपमित्सति ( मिमीमादामित्स्वरस्य ४–१–२० इ. सू. स्वरस्य इत् न च द्विः । ) उपमातुमिच्छति । किं विशिष्टां रोहिणीं तम समुत्पन्नरुचिं तम सु अंधकारेषु पापेषु वा समुत्पन्ना रुचिः कान्तिरभिलाषो वा यस्याः सा तां पुन इन्दौ चन्द्रे महिषीत्वं महिष्या भावो महीत्वं पट्टराज्ञीत्वं ईयुषी इयाय इति ईयुषी प्राप्तवती किंलक्षणे इन्दौ प्ररूढदोषाकरनाम्नि दोषाणामाकरः दोषाकरः पक्षे दोषा रात्रिं करोतीति दोषाकरः दोषाकर ( सङ्ख्याहर्दिवाविभा–टः ५–१–१०२ । इ. सू. दोषापूर्वक कृग् धातोः टः । ) इति नाम दोषाकरनाम प्ररूढं दोषाकरनाम यस्य स तस्मिन् पुनः निर्भरमत्यर्थं कलङ्किनि कलङ्कोऽस्यास्तीति कलङ्की तस्मिन् ॥ १७ ॥

**कुतः प्रकर्षं समतामपि त्वया, न सङ्गता श्रीरपि रूपवैभवैः ।**
**स्वकं शकुन्त्याः सदृशं नभोगता–गुणं तृणं जल्पति खेचराङ्गना ॥१८॥**

(व्या०) कुत इति । हे प्रिये प्रकर्षं कुत श्री लक्ष्मीः अपि रूपवैभवैः रूपस्य वैभवास्तैः रूपद्रव्यैः त्वया सह समतां अपि समस्य भावः समता तां तुल्यतामपि न सङ्गता न प्राप्ता । तु प्रकर्षमतिशयं कुत न कथमपि । खेचराङ्गना खेचरतीति खेचरः ( अद्व्यञ्जनात् सप्तम्या बहुलम् ३–२–१८ इ. सू. सप्तम्या अलुक् । चरेष्टः ५–१–१३८ इ. सू. चरधातो टप्रत्ययः । ) विद्याधरस्तस्य अङ्गना भार्या विद्याधरस्त्री स्वकं आत्मानं शकुन्त्याः पक्षिण्याः सदृशं न भोगतागुणं नभः गच्छतीति नभोग नभोगस्य भाव नभोगता नभोगतायाः गुणः न भोगतागुणस्तं आकाशचारित्वगुणं तृण जल्पति ॥ १८ ॥

**निजैर्द्विजिह्वप्रियतादिदूषणै, र्ह्रियेव मुञ्चन्ति न जातु या बिलम् ।**
**अनाविलं ते चरितं विषानना, न नागकन्या अनिशं स्पृशन्ति ताः ॥**

(व्या०) निजैरिति । हे प्रिये या नागकन्याः निजैरात्मीयैः द्विजिह्वप्रियतादिदूषणैः द्वे जिह्वे येषां ते द्विजिह्वाः सर्पाः खला वा तेषां प्रियता तद्भोग्यत्वं सा आदिर्येषां तानि तान्येव दूषणानि तैः दोषैः जातु कदाचिदपि बिलं पातालं न मुञ्चन्ति । उत्प्रेक्षते ह्रियेव लज्जया इव । हे प्रिये ता विषानना विषमानने मुखे यासां ता विषानना विषमुख्यः नागकन्याः नागानां कन्याः अनिशं निरन्तरं अनाविलं न विद्यते आविलो दोषो यस्मिन् तत् अनाविलं तत् निर्मलं ते तव चरितं न स्पृशन्ति ॥ १९ ॥

**नवोदयं संगतया रयात्त्वया, ततोऽतिशिश्ये त्रिजगद्वधूजनः ।**
**तमोबलाल्लब्धभवः परः प्रभा-भरः स्वधर्मैस्तरणेरिव त्विषा ॥२०॥**

(व्या०) नवोदयमिति । हे प्रिये ततस्तस्मात्कारणात् त्रिजगद्वधूजनः त्रयाणां जगतां समाहार स्त्रिजगत् तस्य वध्वस्तासां जनः स्वर्गमर्त्यपातालसत्कस्त्रीजनः त्वया अतिशिश्ये अतिक्रान्तः । किंविशिष्टया त्वया स्वधर्मैः स्वस्य धर्मास्तैः स्वधर्मैः आत्मपुण्यैः नवोदयं नवश्चासौ उदयश्च तं नवीनोदयं सङ्गतया प्राप्तवत्या । कयेव तरणेः सूर्यस्य त्विया इव यथा सूर्यस्य त्विषा कान्त्या तमोबलात् तमसां बलं तस्मात् लब्धभव लब्धो भवो येन सः परोऽन्य प्रभाभरः प्रभाणां भरः समूहः कान्तिसमूह स्वधर्मैः स्वकिरणैः अतिशय्यते अतिक्रम्यते ॥

**त्वयेक्षितः स्वप्नगुणो गुणोज्ज्वलो, न जायते जात्यमणिर्यथा वृथा ।**
**पुनः प्रकल्प्या कथमल्पबुद्धिभि-र्विचारणा तस्य विचक्षणोचिता ॥२१**

(व्या०) त्वयेति । हे प्रिये त्वया ईक्षितो दृष्टो गुणोज्ज्वलः गुणैरुज्ज्वलो-गुणोज्ज्वल स्वप्नगणः स्वप्नानां गणः स्वप्नसमूह वृथानिष्फलो न जायते । यथा जात्यमणि वृथा न जायते । यथा इवार्थे । पुनः परं अल्पबुद्धिभिः अल्पा बुद्धिर्येषां ते अल्पबुद्धयस्तैः मन्दबुद्धिभिः मन्दप्रज्ञैः विचक्षणोचिता विचक्षणानां विदुषां उचिता योग्या विद्वज्जनयोग्या तस्य स्वप्नगणस्य विचारणा कथं प्रकल्प्या स्यात् ॥

**मृगाक्षि वल्लीव घनाघनोदका-द्भवत्यतः स्वप्नभरान्नवा रमा ।**
**प्रयाति गर्भानुगुणात्प्रथां पुनः, पुरोदिता सा सरसीकृताश्रयात् ॥२२॥**

(व्या०) मृगाक्षि इति । हे मृगाक्षि मृगस्य अक्षिणी इव अक्षिणी लोचने यस्या सा मृगाक्षी तत्सम्बोधनं हे मृगाक्षि हे मृगलोचने अतोऽस्मात् स्वप्नभरात् स्वप्नानां भरस्तस्मात् स्वप्नसमूहात् नवा नवीना रमा लक्ष्मीर्भवति । पुन' पुरोदिता पूर्वमुदिता सा रमा प्रथां विस्तारं प्रयाति । किंविशिष्टात् स्वप्नभरात घनाघनोदकात् घनं च तत् अघं च पापं घनाघं तत् नुदति स्फोटयति इति घनाघनोदकस्तस्मात पुन गर्भानुगुणात् गर्भस्य अनुगुणः सदृश तस्मात् गर्भसदृशात् । यदि उत्तमो गर्भस्तदा स्वप्ना अपि उत्तमा' स्युरिति । पुन सरसीकृताश्रयात् रसेन सह वर्तते इति सरस' न सरस असरस असरस' सरसः कृत इति सरसीकृत' सरसीकृत' आश्रयो येनस' सरसीकृताश्रयस्तस्मात् । केव वल्लीव यथा वल्ली घनाघनोदकात घनाघनस्य ( चराचरचलाचलपतापतवदावदघनाघन पाटूपटं वा ४-१-१३ । इ सू. घनाघनशब्दो निपात्यते ) मेघस्य उदकं जलं तस्मात् मेघजलात नवा भवति पुरोदिता सा वल्ली प्रथां विस्तारं प्रयाति । किंविशिष्टात् घनाघनोदकात गर्भानुगुणात अभ्रविद्युत हिमानि गर्भास्तेषामनुगुणात् सदृशात् यादृशा गर्भास्तादृशी वृष्टि स्यात् । पुन सरसीकृताश्रयात् सरस्यां सरोवरे कृत आश्रय स्थान येन तत् तस्मात् ॥ २२ ॥

**अनेन सर्वस्वजनाकुले कुले-नवा नवासं विदधत्यहो गदाः ।**
**पुरातना अप्युपयान्ति ते शमं, रसायनेनेव विदोषधीभुवा ॥ २३ ॥**

(व्या०) अनेनेति । हे प्रिये अहो इत्याश्चर्ये अनेन स्वप्नभरेण सर्वस्वजनाकुले स्वस्य जना स्वजना' सर्वे च ते स्वजनाश्च तैराकुलं व्याप्तं तस्मिन् कुले नवा नूतना गदा रोगा वासं स्थानं न विदधति न कुर्वन्ति । पुरातना अपि पुरा भवा पुरातना ( सायञ्चिरंप्राह्णेप्रगेऽव्ययात् ६-३-८८ । इ. सू. पुरा इति अव्ययात् नित्यं तनट् प्रत्यय ।) चिरंतना अपि ते गदा रोगा' शमं शान्तिमुपयान्ति । किंविशिष्टेन स्वप्नभरेण विदोषधीभुवा विगता दोषा यस्या सा

विदोषा निर्दोषा विदोषा चासौ धोश्च विदोषधी तस्या भवतीति तेन विदोषधीभुवा। केनेव रसायनेनेव यथा रसायनेन नवा गदा रोगा वासं स्थितिं न कुर्वन्ति पुरातना अपि गदाः शमं यान्ति। किंविशिष्टेन रसायनेन विदोषधीभुवा वित् च ज्ञानं ओषध्यश्च विदोषध्यस्ताभ्यो भवतीति तेन विदोषभुवा ॥ २३ ॥

**दिनोदयेनेव हते सुसंहते-ऽमुना घनारिष्टतमिस्रमण्डले।**
**कुले विलास कमलावदुत्पले, करोति पुण्यप्रभवा शिवावली ॥ २४ ॥**

(व्या०) दिन इति। अमुना स्वप्नभरेण सुसंहते सुष्ठु संहतं मिलितं तस्मिन् अत्यर्थं मिलिते घनं च तत् अरिष्टं च घनारिष्टं निचितं अरिष्टं पापं तमिस्राणामन्धकाराणां मण्डलं घनारिष्टमेव तमिस्रमण्डलं तस्मिन् घनारिष्टरूपअन्धकारसमूहे हते सति पुण्यप्रभवा पुण्यं प्रभवः (प्रभवति अस्मात् इति प्रभव। युवर्णवृदृवशरणगमृद्ग्रह। ५-३-२८। इ. सू प्रपूर्वकभूधातोरल्।) कारणं यस्याः सा पुण्योत्पन्ना शिवावली शिवाना मङ्गलानामावली श्रेणि मङ्गलश्रेणिः कुले विलासं करोति। किंवत् कमलावत् ( स्यादेरिवे ७-१-५२ इ. सू. कमलाशब्दात् सादृश्येऽर्थे वत् प्रत्यय।) कमला इव कमलावत् लक्ष्मीवत्। केनेव दिनोदयेनेव दिनस्य उदयो दिनोदयस्तेन यथा दिनोदयेन घनारिष्टतमिस्रमण्डले घनश्च मेघ अरिष्टं च रत्नं घनारिष्टे तमिस्राणामन्धकाराणां मण्डलं घनारिष्टे इव तमिस्रमण्डलं तस्मिन् घनवत् अरिष्टवत् कृष्णान्धकारसमूहे हते सति कमला लक्ष्मीः उत्पले कमले वासं निवासं करोति ॥ २४ ॥

**अबालभाविश्रुतसौख्यदायिनीं, वृथा विभूतिर्विभुता च यां विना।**
**अयं हि तां वर्धयितुं निशान्तरुक्, धृतिं मतिं ब्राह्ममुहूर्तवत्प्रभुः ॥२५॥**

(व्या०) अबाल इति। विभूतिर्लक्ष्मी विभुता प्रभुत्वं यां धृतिं मतिं (विनाते तृतीया च २-२-११५। इ. सू विनायोगे धृतिं मतिमित्यत्र द्वितीया।) विना वृथा निष्फला स्यात्। किंलक्षणां धृतिं अबालभाविश्रुतसौख्यदायिनीं अबाला चासौ भा च प्रौढा प्रभा तया विश्रुतं विख्यातं यत् सौख्यं तद् ददातीति। किंरूपां मतिं अबालभाविश्रुतसौख्यदायिनीं (अजाते शीले ५-१-१५४। इ.

सू. सौख्यपूर्वकदाधातोः शीलेऽर्थे णिन् । आत ऐ कृञ्ञौ ४-३-५३ इ. सू. ऐ' एदैतोऽयाय् १-२-२३ । इ. सू. आयादेश । स्त्रियां नृतोऽस्वस्रादेर्डी. २-४-१ । इ. सू. नान्तत्वात् स्त्रियां डीः । ) न बाला अबाला पण्डितास्तेषु भवतीत्येवं शीलं अबालभावि तच्च तत् श्रुतं च शास्त्रं तस्यसो दयं रात्रो ताम् । अयं स्वप्नभर हि निश्चितं तां धृतिं मतिं वर्धयितुं प्रभु समर्थ स्यात् । किंवत् ब्राह्ममुहूर्तवत् ब्राह्ममुहूर्त इव यथा ब्राह्ममुहूर्त धृतिं समधिं मतिं बुद्धिं वर्द्धयितुं प्रभु समर्थ' स्यात् । किंविशिष्ट. स्वप्नभर ब्राह्ममुहूर्तश्च निशान्तरुक् नितरां-शान्ता रागा यस्मात् स निशान्तरुक् पक्षे निशाया रात्रेरन्ते अवसाने रोचते इति निशान्तरुक् ॥ २५ ॥

**जनानुरागं जनयन्नयं नवं, ध्रुवोदयप्राभवदानलग्नकः ।**
**यदन्यदप्यत्र मनोहरं तद-प्यनेन जानीहि पुरः स्फुरत् प्रिये ॥२६॥**

(व्या०) जन इति हे प्रिये अयं स्वप्नभर ध्रुवोदयप्राभवदानलग्नकः ध्रुवो निश्चित उदयो यस्य स ध्रुवोदय' स चासौ प्राभवश्च स्वामित्वं ध्रुवोदयप्राभव-स्तस्य दाने लग्नक प्रतिभूर्वर्तते । किं कुर्वन् अयं नवं नवीनं जनानुरागं जनाना-मनुराग स्नेहस्तं जनयन् जनयतीति जनयन् उत्पादयन् । यत् अन्यदपि अत्र त्रिजगति विश्वे मनोहरं (हृगोवयोऽनुद्यमे ५-१-९५ । इ सू अनुद्यमे मन' कर्मण' परात् हृग्धातोरच् प्रत्ययः नामिनोगुणोऽक्ङिति ४-३-१ इ. सू. गुण' । वस्तु तदपि अनेन स्वप्नभरेण पुरोऽग्रे स्फुरत् देदीप्यमानं जानीहि ॥ २६ ॥

**यदिष्यते हन्त शुभान्निमित्ततः, पुरापि तद्वस्तु समस्तमस्ति मे ।**
**भवन्नशीतांशुमहोमहोज्ज्वले, दिनेन दीपः परभागमृच्छति ॥ २७ ॥**

**असावसामान्यगुणैकभूरिति, त्वया विशालाक्षि वृथा न चिन्त्यताम् ।**
**फलं यदस्यं तदथ ब्रवीमि ते, मितेः परां कोटिमियर्तु संमदः ॥२८॥**

(व्या०) यदिति । हे प्रिये हन्त इति वितर्के शुभात् निमित्तत निमि-त्तात् इति निमित्तत शुभनिमित्तहेतो यदिष्यते वाञ्छ्यते तत् समस्तं वस्तु पुरापि अग्रेपि मे ममास्ति । अशीतांशुमहोमहोज्ज्वले न शीता अशीता अशीता

अंशवो यस्य स अशीतांशुः अशीतांशोः सूर्यस्य महसा तेजसा महत् च तत् उज्ज्वलं च तस्मिन् अशीतांशुमहोमहोज्ज्वले सूर्यस्य तेजसा देदीप्यमाने दिने दिवसे दीपो भवन् परभाग गुणोत्कर्षं न ऋच्छति न याति । हे विशालाक्षि विशाले अक्षिणी यस्याः सा तस्याः संबोधनं हे विशालाक्षि विस्तीर्णलोचने असौ स्वप्नभरः असामान्यगुणैकभूः असामान्याश्चते गुणाश्च तेषां निरुपमगुणानामेकभूः एकस्थानं वर्तते । इति अस्मात् कारणात् वृथा निष्फलो न चिन्त्यताम् । यत् अग्र्यं प्रशस्यं फलं तत् अथ ब्रवीमि । ते तव संमदो हर्षो मितेर्गणनाया परां कोटिमियर्तु प्राप्नोतु ॥ २७ ॥ २८ ॥ युग्मम् ॥

**चतुर्दशस्वप्ननिभालनद्रुम–स्तनोत्यसौ मातुरुभे शुभे फले ।**
**इहैकमर्हज्जननं महत्फलं, तनु द्वितीयं ननु चक्रिणो जनुः ॥ २९ ॥**

(व्या०) चतुरिति । असौ चतुर्दशस्वप्ननिभालनद्रुमः चतुर्दश च ते स्वप्नाश्च चतुर्दशस्वप्ना (संख्या समाहारे च द्विगुश्चानाम्न्ययम् ३–१–९९ । इ. सू. द्विगुसमासः । ) स्तेषां निभालनमवलोकनं तदेव द्रुमो ( द्युद्रोर्मः ७–२–३७ इ. सू. मत्वर्थे द्रुशब्दात् मः द्रुः शाखा अस्ति अस्य इति द्रुमः । ) वृक्षः चतुर्दशस्वप्नावलोकनरूपवृक्षः मातुर्जनन्या उभे द्वे शुभे फले तनोति करोति । इह एकं अर्हज्जननं अर्हतो जननं जन्म अर्हज्जन्म महत्फलं वर्तते । द्वितीयं (द्वेस्तीयः ७–१–१६५ इ. सू. द्विशब्दात् संख्यापूरणे तीयप्रत्ययः । ) तु तनु स्तोकं ननु निश्चितं चक्रिणो जनुः जन्म स्यात् ॥ २९ ॥

**प्रदुष्टभावारिभयच्छिदं स्फुटी–कृता निशीथे सुकृतैः पुराकृतैः ।**
**तदर्धवीक्षा विशिनष्टि केशवो–द्भवं भवोत्तारमरागवागिव ॥ ३० ॥**

(व्या०) प्रदुष्ट इति । हे प्रिये तदर्धवीक्षा वीक्षाया अर्धं अर्धवीक्षा (समेंऽशेऽर्द्धं नवा ३–१–५४ इ. सू. तत्पुरुषसमासः ।) तेषा मर्धवीक्षा तदर्धवीक्षा तदर्धदर्शनं केशवोद्भवं केशवस्य उद्भव उत्पत्तिस्तं वासुदेवोत्पत्तिं विशिनष्टि कथयति । किंविशिष्टं केशवोद्भवं प्रकर्षेण दुष्टो भावो येषां ते प्रदुष्टभावाः ते च ते अरयश्च वैरिणः प्रदुष्टभावारीणां भयं छिनत्तीति तम् । किंविशिष्टा तदर्द्ध-

वीक्षा पुराकृतै सुकृतै पुण्यै स्फुटीकृता न स्फुटा अस्फुटा अस्फुटा स्फुटा कृता इति स्फुटीकृता निशीथे अर्धरात्रे स्फुटीकृता प्रकटीकृता । केव अरागवागिव न विद्यते रागो यस्य स अराग वीतरागोऽर्हन् तस्य वाग् वाणी वीतरागवाणी भवोत्तरं भवस्य उत्तरस्तं संसारपारं विशिनष्टि । किंविशिष्टा अरागवाक् प्रस्तावात् भव्यानां पुराकृतै. सुकृतै स्फुटीकृता निशीथस्य उपलक्षणत्वात् अन्येऽपि सिद्धान्तग्रन्था ज्ञेया । किं विशिष्टं भवोत्तरं प्रदुष्टभावारिभयच्छिदं प्रकर्षेण दुष्टानां क्रोधमानमायालोभमोहादिभावारीणां भयं छिनत्तीति प्रदुष्टभावारिभयच्छित् तम्॥

**बलं सुतं यच्छति तच्चतुष्टयी, लतेव जातिः कुसुमं समुज्ज्वलम् ।**
**तदेकतां वीक्ष्य तदेकतानया, स्त्रियाङ्गभूर्माण्डलिकः प्रकल्प्यताम् ॥३१**

(व्या०) बलमिति । तच्चतुष्टयी तेषां स्वप्नानां चतुष्टयी (अवयवात् तयट् ७-१-१५१ इ. सू. चतुर्शब्दात् तयट् टित्वात् ङी । ) चतुष्कं बलं सुतं बलदेवं पुत्रं यच्छति । केव जातिर्लतेव यथा जातिर्लता मालती समुज्ज्वलं कुसुमं यच्छति । यतो बलदेवोऽपि समुज्ज्वलः स्यादिति । तदेकतानतया तेषु स्वप्नेषु एकतानता सावधानता तया सावधानतया स्त्रिया तदेकतां तेषां स्वप्नानामेकतां एकं स्वप्नं वीक्ष्य मांडलिकोऽङ्गभूः अङ्गात् भवतीति अङ्गभू पुत्रः प्रकल्प्यतां चिन्त्यताम् ॥ ३१ ॥

**तदीदृशस्वप्नविलोकनात्त्वया- ऽधिगंस्यते चक्रधरस्तनूरुहः ।**
**विशन्ति विद्याः किल यं चतुर्दश, श्रयन्ति रत्नान्यपि संख्ययातया॥**

(व्या०) तदिति । हे प्रिये तत् तस्मात् कारणात् ईदृगस्वप्नविलोकनात् ईदृशाश्च ते स्वप्नाश्च ईदृशस्वप्नास्तेषां विलोकनात् त्वया चक्रधरः चक्रं धरतीति चक्रधरः ( आयुधादिभ्यो धृगोऽदण्डादेः ५-१-९४ इ सू. धृग्धातोः अच् प्रत्ययः । ङस्युक्तं कृता ३-१-४९ इ सू. नित्यतत्पुरुषसमासः । ) तनूरुहः तन्वां शरीरे रोहतीति तनूरुहः पुत्रः अधिगंस्यते प्राप्स्यते किल इति सत्ये । चतुर्दश विद्या यं पुत्रं विशन्ति प्रविशन्ति । तया चतुर्दशरूपया संख्यया रत्नान्यपि संश्रयन्ति सेवन्ते ॥ ३२ ॥

**त्वया यदादौ हरिहस्तिसोदरः, पुरः स्थितस्तन्वि करी निरीक्षितः ।**
**मनुष्यलोकेऽपि ततः श्रियं पुरा, दधाति शातक्रतवीं तवाङ्गजः ॥३३**

(व्या०) त्वयेति । हे तन्वि त्वया यद् आदौ हरिहस्तिसोदरः हरेरिन्द्रस्य हस्ती गज ऐरावणस्तस्य सोदर ( समानस्य धर्मादिषु ३–२–१४९ इ. सू. समानस्य स आदेश. समानं उदरं यस्य सः सोदरः । ) ऐरावणस्य बांधवः करी हस्ती पुरः स्थितः अग्रे स्थितो निरीक्षित' दृष्ट' । तत् तस्मात्कारणात् तव अङ्गज' पुत्र' मनुष्यलोकेऽपि मनुष्याणां लोकस्तस्मिन् शातक्रतवीं शतक्रतोरिन्द्रस्य इयं शातक्रतवी तां इन्द्रसंबन्धिनीं श्रियं लक्ष्मीं पुरा दधाति धास्यति । 'पुरा यावतो वर्तमाना' इति सूत्रेण भविष्यति काले वर्तमाना ज्ञेया ॥ ३३ ॥

**दिगन्तदेशांस्तरसा जिगीषया, ऽभिषेणयिष्यन्तमवेत्य तेऽङ्गजम् ।**
**प्रहीयते स्म प्रथमं दिशा गजैः, प्रिये किमैरावत एष संधये ॥ ३४ ॥**

(व्या०) दिगिति । हे प्रिये ते तव अङ्गज अङ्गात् जातस्त पुत्र तरसा वेगेन दिगन्तदेशान् दिशामन्तास्तेषां देशास्तान् जिगीषया जेतुमिच्छा जिगीषा तया जेतुमिच्छया अभिषेणयिष्यन्तं सेनया अभिमुखं गमिष्यन्तमवेत्य ज्ञात्वा ऐरावतः १ पुंडरीकः २ वामन ३ कुमुद' ४ अञ्जन ५ पुष्पदन्त ६ सार्वभौम' ७ सुप्रतीकश्च ८ दिग्गजाः ॥ पुंडरीकाद्यैर्दिशांगजै दिग्गजै एष ऐरावतः प्रथमं संधये संधिकरणाय किं प्रहीयते स्म ॥ ३४ ॥

**यदक्षतश्रीर्वृषभो निरीक्षितः, क्षितौ चतुर्भिश्चरणैः प्रतिष्ठितः ।**
**महारथाग्रेसरतां गतस्तत–स्तवाङ्गभूर्वीरधुरां धरिष्यति ॥ ३५ ॥**

(व्या०) यदिति । यत् यस्मात् कारणात् अक्षतश्रीः न क्षता अक्षता अक्षता श्रीर्यस्य स' अक्षयलक्ष्मीर्वृषभो निरीक्षित' दृष्टः । किंलक्षणो वृषभः क्षितौ पृथिव्यां चतुर्भिश्चरणै पादै प्रतिष्ठित' । हे प्रिये ततस्तस्मात्कारणात् तव अङ्गभू अङ्गात् भवतीति अङ्गभू ( क्विप् ५–१–१४८ इ. सू. अङ्गशब्द पूर्वकभूधातो' क्विप्प्रत्यय' । ) पुत्रः महारथाग्रेसरतां महान् रथो येषां ते महारथा' सहस्रयोधिन. अग्रे सरतीति अग्रेसरस्तस्य भावोऽग्रेसरता ( पुरोऽग्रतोऽग्रे

सर्ते ५-१-१४० इ. सू. अग्रेशब्दात् परात् सृधातो टप्रत्ययः । ) महारथेषु अग्रेसरता तां मुख्यतां पक्षे महान रथः तस्य अग्रेसरतां अग्रगामित्वं गतः प्राप्तः सन् वीरधुरां वीरस्य धूः तां वीरधुरां ( धुरोऽनक्षस्य ७-३-७७ इ. सू समासान्तोऽत् । अदन्तत्वात् स्त्रियामाप् । ) धरिष्यति । 'धनुर्वेदस्य तत्वज्ञ सर्वयोधगुणान्वितः । सहस्रं योधयत्येकः स महारथ उच्यते' ॥ १ ॥ इति युद्धकलाविलासे ॥ ३५ ॥

**सुपर्वलोकाद्यदिवा तवाङ्गजे, प्रवेशमातन्वति भूतले नवम् ।**
**अहो महोक्षः किमसौ पुरोऽस्फुर-न्नदन्नदभ्रं शकुनप्रदित्सया ॥३६॥**

(व्या०) सुपर्व इति । यदिवा अथवा इति शब्देन द्वितीयकारणमाह प्रिये अहो इत्याश्चर्ये महोक्षो महावृषभ महांश्चासौ उक्षा च महोक्षः ( जातमहद् वृद्धादुक्ष्णः कर्मधारयात् ७-३-९५ इ. सू महत् शब्द पूर्वक उक्षन् शब्दात् अत् समासान्त ) सुपर्वलोकात् सुपर्वणां देवानां लोकः तस्मात् देवलोकात् तव अङ्गजे पुत्रे भूतले भुवस्तलं तस्मिन् पृथ्वीतले नवं नूतनं प्रवेशं आतन्वति आतनोतीति आतन्वन् तस्मिन् कुर्वति सति अदभ्रं अतुच्छ नदन् शब्द कुर्वन् सन् शकुनप्रदित्सया शकुनानां प्रदातुमिच्छा तया शकुनप्रदानेच्छया किं पुरोऽग्रेऽस्फुरत् ॥ ३६ ॥

**जिनेषु सर्वेषु मयैव लक्ष्मणा, जनेन तातस्तव लक्षयिष्यते ।**
**अयं चटूक्त्येत्यथवा तवात्मजा-त्प्रसादमासादयितुं किमापतत् ॥३७॥**

(व्या०) जिनेषु इति । अथवा अयं वृषभ इति चटूक्त्या चाटुवचनेन हे प्रिये तव आत्मजात् आत्मनो जात आत्मज पुत्रस्तस्मात् प्रसादमासादयितुं प्राप्तुं किं आपतत् आगत । इतीति किं जनेने लोकेन सर्वेषु जिनेषु मयैव लक्ष्मणा लाञ्छनेन तव तात पिता लक्षयिष्यते उपलक्षयिष्यते ॥ ३७ ॥

**द्विपद्विषो वीक्षणतोऽवनीगता-ङ्गिनो मृगीकृत्य महाबलानपि ।**
**न नेतृतामाप्स्यति न त्वदङ्गजः, प्रघोषतोऽतध्वनयन्महीभृतः ॥ ३८**

(व्या०) द्विप इति । हे प्रिये द्विपद्विष द्विपान् हस्तिनो द्वेष्टीति द्विद्विपट्

सिंहस्तस्य वीक्षणत वीक्षणात् इति वीक्षणतो दर्शनत त्वदङ्गज तव अङ्गजस्त्वत्पुत्रो नेतृतां नेतुर्भावो नेतृता तां प्रभुतां न आप्स्यति न अपि तु प्राप्स्यत्येव ।। किं कृत्वा अवनीगताङ्गिन. अवनी मही गता अवनीगताः ते च ते अङ्गिनश्च प्राणिन तान् पक्षे महद्वनं वनो तत्र स्थितान् प्राणिनः महाबलानपि महद्बलं येषां ते तानपि सबलानपि मृगीकृत्य न मृगाः अमृगा अमृगान् मृगान् कृत्वा इति मृगीकृत्य । किं कुर्वन् महीभृतः महीं बिभ्रतीति महीभृतस्तान् राज्ञ प्रघोषत प्रसिद्धेरन्तर्ध्वनयन् चमत्कुर्वन् पक्षे प्रकृष्टात् घोषतः सिंहनादात् महीभृत पर्वतान् अन्तर्ध्वनयन् प्रतिशब्दयन् ॥ ३८ ॥

**नयाप्तसप्ताङ्गकराज्यरङ्गभूः, क नायकस्त्वं प्रखरायुधो नृणाम् ।**
**प्रभुः पशूनां नयनैपुणं विना, वसन् वनेऽहं नखरायुधः क च ॥३९**
**तथापि मा कोपमुपागमः कृतो-पमः कृतीशै युधि विक्रमान्मया ।**
**सुतं तवेत्यर्थयितुं समागतः, किमर्थिकल्पद्रुममेष केसरी ॥४०॥युग्मम्**

(व्या०) नय इति । हे प्रिये एष केसरी केसरा सन्ति अस्येति केसरी सिंहः अर्थिकल्पद्रुमं अर्थयन्ते इति अर्थिनो याचकास्तेषां कल्पद्रुम ( द्युद्रोर्मः ७–२–३७ इ. सू. मत्वर्थे द्रुशब्दात् म । ) तं याचकजनकल्पवृक्षं तव सुतं पुत्रं इति प्रार्थयितुं समागत । इतीति किं त्वं नृणां नायक क किं विशिष्टस्त्वं नयाप्तसप्ताङ्गकराज्यरङ्गभूः सप्त स्वाम्यादीनि अङ्गानि यस्य तत् सप्ताङ्गकं सप्ताङ्गकं च तत् राज्यं च सप्ताङ्गराज्यक नयेन न्यायेन आप्तं प्राप्तं नयाप्तं नयाप्तं च तत् सप्ताङ्गराज्यं च नयाप्तसप्ताङ्गकराज्यं तस्य रङ्गभूमि । पुन प्रखरायुध प्रखराणि कठोराणि आयुधानि यस्य स. । अन्यत् अहं पशुनां प्रभु क किं वशिष्टोऽहं नखरायुध नखरा एव आयुधानि यस्य स न निषेधार्थे खरायुध. तीव्रशस्त्रो न । पुन नयनैपुणं नये नैपुणं नयनैपुणं ( विना ते तृतीया च । २–२–११५ इ. सू विनायोगे नयनपुणमित्यत्र द्वितीया । ) तत् न्यायदक्षत्वं विना वने वसन् । त्वं कृतीशै कृतिना ( इष्टादे ७–१–१६८ इ. सू. कृत शब्दात् कर्तरि इन् । ) मीशा कृतीशास्तै कृतज्ञैर्युधि संग्रामे विक्रमात् पराक्रमात् मया सह कृतोपम कृता उपमा यस्य सः भविष्यसि । तथापि कोपं मा उपागम ॥ ३९ ॥ ४० ॥ युग्मम्

**यदिन्दिरा सुन्दरि वीक्षिता ततः, स्त्रियो नदीनप्रभवा अवाप्स्यति ।**
**कलाभृदिष्टाः कमलंगताः परः–शतास्तयैवोपमिताः सुतस्तव ॥४१॥**

(व्या०) यदिवि । हे सुन्दरि यत् त्वया इन्दिरा लक्ष्मीर्वीक्षिता दृष्टा । ततस्तस्मात् कारणात् तवसुत पुत्र· पर शता शतेभ्यः परा पर शताः शत-सहस्राधिका तयैव इन्दिरया लक्ष्म्या उपमिता उपमानं प्रापिता· स्त्रिय आप्स्यति प्राप्स्यति । किंविशिष्टा· स्त्रिय· नदीनप्रभवा । न दीनो हीन· प्रभव उत्पति· यासां ता लक्ष्मी पक्षे नदीना इनः–स्वामी समुद्र· तस्मात् प्रभवो यस्याः सा । अत्र अर्थवशाद्विभक्तिपरिणामो लक्ष्म्या विशेषणो ज्ञेयः । पुन· कलाभृदिष्टा· कलाः बिभ्रतीति कलाभृतः कलावन्तस्तेषां इष्टा अभीष्टा । पक्षे कलाभृत् चन्द्रस्तस्य इष्टा रात्रौ लक्ष्म्याः चन्द्रमण्डलवासितत्वात् । कमलं गताः कं सुखं अलं अत्यर्थं गताः पक्षे कमलं पद्मं गताः स्थिता ॥ ४१ ॥

**बलाधिकत्वाच्चलिते हरेर्हृदि, प्रसह्य भग्ने युधि राजमण्डले ।**
**अनेन पद्भ्यां कृशिते कुशेशये, चमूरजोभिः स्थगिते पयोनिधौ ॥४२॥**
**सुतस्तवैवास्ति गतिर्ममाधुना, तवेति वा जल्पितुमाययावसौ ।**
**स्वजातिधौरेय मनुप्रविश्य य–त्प्रभुप्रसादाय यतेत धीरधीः॥४३युग्मम्**

(व्या०) बल इति । हे प्रिये असौ इन्दिरा लक्ष्मी वा अथवा तव इति जल्पितुं किमाययौ आयाता । तव इत्यत्र विवक्षातः संबन्धे षष्ठी अन्यथा त्वामिति स्यात् । इतीति किं ममतावच्चत्वारि स्थानानि । एकं हरिहृदय । द्वितीयं चन्द्र-मण्डलं । तृतीयं कमलं । चतुर्थं समुद्र । अनेन तव पुत्रेण इति पदं सर्वत्र योज्यते । बलाधिकत्वात बलस्य अधिकत्व तस्मात् बलाधिक्यात् हरेर्वासुदेवस्य हृदि हृदये चलिते सति बलो बलभद्र· बलं सैन्यं हरेरेक एव बलः अस्यतुबलाधिकत्वमिति भाव । प्रसह्य बलात्कारेण राजमण्डले राज्ञां मण्डलं तस्मिन् राजसमूहे चन्द्रमण्डले वा युधिसग्रामे भग्ने सति पद्भ्यां चरणाभ्यां कुशेशये (आधारात् । ५–१–१३७ । इ. सू. कुशे इति आधारपूर्वकशीङ्धातो अप्रत्यय । नामिनो गुणोऽक्ङिति । ४–३–१ । इ. सू. गुण· । एदैतोऽयाय् । १–२–२३ । इ सू अयः-

देशः । इत्युक्तं कृता । ३–१–४९ । इ. सू. नित्यतत्पुरुषः । अद्वयञ्जनात्सप्तम्याबहुलम् । ३–२–१८ । इ. सू सप्तम्या अलुप् । कुशे शेते इति कुशेशयम् ।) कमले कुशिते ग्लानिं प्रापिते सति चमूरजोभि: चमूनां रजांसि तै: पयोनिधौ पयसां निधिस्तस्मिन् समुद्रे स्थगिते सति आच्छादिते सति ॥४२-४३॥ युग्मम् ॥

**स्वसौरभाकर्षितषट्पदाध्वगा, स्रगालुलोके यदि कौसुमी त्वया ।**
**ततःसुतस्ते निजकीर्तिसौरभा–वलीढविश्वत्रितयो भविष्यति ॥ ४४ ॥**

(व्या०) स्वइति । हे प्रिये यदि त्वया कौसुमी कुसुमानामियं कौसुमी कुसुमसंबंधिनी स्रग् माला आलुलोके दृष्टा । किंलक्षणा स्रक् स्वसौरभाकर्षितषट्पदाध्वगा स्वस्यात्मनः सौरभेण ( ऋवर्णाल्लघ्वादे । ७–१–६९ । इ. सू. भावेऽर्थे सुरभिशब्दादण् । सुरभेर्भाव: सौरभम् । ) परिमलेन आकर्षिता: षट्पदा भ्रमरा एव अध्वगा: पान्था यया सा तत: तस्मात् कारणात् ते तव सुतः पुत्रो निजकीर्तिसौरभावलीढविश्वत्रितय: निजस्यात्मनः कीर्त्या सौरभेण परिमलेन अवलीढ व्याप्तं विश्वानां जगतां त्रितयं ( अवयवात्तयट् । ७–१–१५१ । इ. सू अवयवे त्रिशब्दात् तयट् । ) येन स भविष्यति ॥ ४४ ॥

**अयं विवादे ननु दानविद्यया, विजेष्यते नश्चिरशिक्षितानपि ।**
**इयं भियेतीव सुरद्रुभिर्भव–द्भुवो ददे दंडपदेऽथवा किमु ॥ ४५ ॥**

(व्या०) अयमिति । अथवा सुरद्रुभि कल्पवृक्षै इयं स्रग् भवद्भुवः भवत्या भवतीति भवद्भू तस्य भवद्भुव तव पुत्रस्य किमु दडपदे दंडस्य पदं तस्मिन् दंडस्थाने ददे दत्ता । उत्प्रेक्षते इति भिया ईदृग्भयेनेव । इतीति किं अयं तव पुत्रो ननु निश्चितं चिरशिक्षितानपि चिरंशिक्षिता: तानपि नोऽस्मान् दानविद्यया दानविद्या तया विजेष्यते 'परावेर्जे' इति सूत्रेणात्मनेपदम् ॥ ४५ ॥

**भवान् ममादेशवशो भवेद्गृही, गृहीतदीक्षस्य च नास्मि ते प्रभुः ।**
**वदन्निदं वानुगभृङ्गनिःस्वनैः, स्मरोऽस्य रोपं व्यसृजत् स्रजश्छलात् ४६**

(व्या०) भवानिति । अनुगभृङ्गनि.स्वनै अनुपश्चाद् गच्छन्तीति–अनुगाः पृष्ठस्था: ते च ते भृङ्गाश्च भ्रमरास्तेषां नि स्वनाः शब्दास्तै: । इद वदन् वा इव

अत्र वा इवार्थे स्रजो मालायाः छलात् मिषात् स्मरः कामः रोपं बाणं व्यसृजत् प्रहितवान् । इदमिति किं भवान् गृही गृहस्थः सन् मम आदेशवशः आदेशस्य वशो भवेत वशेन भवितव्यमिति भाव । च अन्यत् गृहीतदीक्षस्य गृहीता दीक्षा येन तस्य ते तव अहं प्रभुः समर्थो नास्मि ॥ ४६ ॥

**यदिन्दुरापीयत पार्वणस्त्वया, ततः सुवृत्तो रजनीघनच्छविः ।**
**सदा ददानः कुमुदे श्रियं कला-कलापवांस्ते तनयो भविष्यति ॥४७**

(व्या०) यदिति । हे प्रिये यत् पार्वणः पर्वणि पौर्णमास्यां भव पार्वणः (भवे । ६–३–१२३ । इ. सू. पर्वन् शब्दात् भवेऽर्थे अण् ।) ततः सुवृत्तः पूर्णिमासंबंधी इन्दुश्चन्द्रः आपीयत ( क्यः शिति । ३–४–७० । इ. सू. पाधातो कर्मणि शिद्विषये क्यः । ईर्व्यञ्जनेऽयपि । ४–३–९७ । इ. सू. क्ये परे पाधातोराकारस्य दीर्घ ईकार कर्मणि ह्यस्तनी । ) पीयते स्म किंलक्षण इन्दुः रजनीघनच्छवि रजन्या रात्रौ घना बहु छवि कान्तिर्यस्य स । कुमुदे कैरवे सदा श्रियं शोभां ददान ददाति इति ददान । कलाकलापवान् कलानां कलापः स अस्ति अस्येति कलाकलापवान् कलासमूहयुक्तः । ततः तस्मात् कारणात् सुवृत्तः शोभनं वृत्तं यस्य स सुचरित्र । रजनीघनच्छवि रजनी हरिद्रा तद्वत् घना छविः कान्ति र्यस्य स । कुमुदे को पृथिव्याः मुत् हर्षस्तस्यै पृथिव्या हर्षाय सदा श्रियं शोभां ददान । कलाकलापवान् कलानां गीतवाद्यनृत्यगणितपठितलिखितादीनां कलाप समूहस्तद्वान् । एवंविधस्ते तव तनयः पुत्रो भविष्यति ॥ ४७ ॥

**त्वदाननस्पर्धि सरोजमोजसा, निमीलयिष्यामि तथाधिकश्रिये ।**
**तव श्रयिष्यामि सितातपत्रता-समुत्कमुक्तामिषतारतारकः ॥ ४८ ॥**
**परं रुजन् राजकमाजिभाजिनं, न राजशब्दं मम मार्ष्टुमर्हसि ।**
**इतीव विज्ञापयितुं रहोरया-दुपस्थितोऽयं तनयं तवाथवा॥९४युग्मम्**

(व्या०) त्वदिति । अथवा अयं चन्द्रस्तव तनयं पुत्रं रह एकान्ते इति विज्ञापयितुमिव रयात् वेगात् उपस्थितः प्राप्त इतीति किं हे स्वामिन् अहं त्वदाननस्पर्धि तव आननं स्पर्धते इति त्वदाननस्पर्धि त्वदीयमुखस्पर्धाकारि सरोजं

सरसि जातं सरोजं कमलं ओजसा बलेन तेजसा वा निमीलयिष्यामि संकोचं प्रापयिष्यामि । तथा तव अधिकश्रिये अधिका चासौ श्रीश्च तस्यै अधिकशोभायै सितातपत्रतां सितं च तत् आतपत्रं च सितातपत्रं (आतपात् त्रायते इति आतपत्रं स्थापास्नात्र: कः । ५-१-१४२ इ. सू. आतपपूर्वकत्रावातो: कः इडेत् पुंसि चातोलुक् इति सू. आलोप ) तस्य भाव. श्वेतच्छत्रतां श्रयिष्यामि । किंविशिष्टो विधुः अमुक्तमुक्तामिषतारतारकः न मुक्ताः अमुक्ताः मुक्ता मिषं येषां ते मुक्तामिषाः ताराश्च ते तारकाश्च तारतारका मुक्तामिषाश्च ते तारतारकाश्च मुक्तामिषतारतारकाः अमुक्ता: मुक्तामिषतारतारका: येन सः । त्वं परं आजिभाजिनं आर्जि भजतीति आजिभाजिनं (अजाते: शीले । ५-१-१५४ । इ. सू. आजिशब्द पूर्वकभज्धातोः णिन् ।) संग्रामसेविनं राजकं (गोत्रोक्षवत्सोष्ट्रवृद्धाजोरभ्रमनुष्यराजराजन्यराजपुत्रादकञ् । ६-२-१२ । इ. सू. राजन् शब्दात् समूहेऽर्थे अकञ् राज्ञां समूहो राजकम् ।) राजसमूहं रुजन् भञ्जन् सन् अत: कारणात् मम राजशब्दं मार्ष्टुं स्फेटयितुं न अर्हसि । राजशब्देन चन्द्र उच्यते ॥४८-४९॥ युग्मम् ॥

**दिशन् विकाशं गुणसद्मपद्मिनी-मुखारविन्देषु सदा सुगन्धिषु ।**
**निरुद्धदोषोदयमात्मजस्तव, प्रपत्स्यते धाम रवेरवेक्षणात् ॥ ५० ॥**

**(व्या०)** दिशन्निति । हे प्रिये रवे: सूर्यस्य अवेक्षणात् दर्शनात् तव आत्मज पुत्र: धाम तेज प्रपत्स्यते आश्रयिष्यते । किंविशिष्टं धाम निरुद्धदोषोदयं निरुद्धो दोषाणामिषणादीनां उदयो येन तत् । तव आत्मज किं कुर्वन् सदा निरन्तरं सुगन्धिषु (सुपूत्युत्सुरभेर्गन्धादिद्गुणे । ७-३-१४४ । इ. सू. सुपूर्वक गन्धशब्दात् इ: ॥) शोभनो गन्धो येषां तानि तेषु सुपरिमलेषु गुणसद्मपद्मिनीमुखारविन्देषु गुणानां विवेकादीनां सद्मानि पद्मिनीनां स्त्रीणां मुखानि एव अरविन्दानि गुणसद्मानि च तानि पद्मिनीनां मुखारविन्दानि च मुखकमलानि तेषु विकाशं दिशतीति दिशन् रविपक्षे गुणास्तन्तवः पद्मिन्य: कमलिन्यः ॥५०॥

**उदेष्यतस्त्वत्तनयस्य तेजसा, दिवाकरो दीप्तिदरिद्रतां गतः ।**
**मृगाक्षि मन्येऽबलयापि तत् त्वया, सुदर्शनः स्वप्नपरम्परास्त्वयम् ५१**

(व्या०) उदेष्यदिति । हे मृगाक्षि हरिणलोचने अहमेवं मन्ये उदेष्यतीति उदेष्यन् तस्य उदयं प्राप्तुकामस्य त्वत्तनयस्य तवतनयस्य पुत्रस्य दिवा करोतीति दिवाकरः (सङ्ख्याऽहर्दिवाविभा–ट । ५–१–१०२ । इ. सू. दिवापूर्वककृग्धातो टप्रत्यय । ) सूर्य दीप्तिदरिद्रतां दरिद्रस्य भावो दरिद्रतां दीप्तिदरिद्रतां दीप्तिरहितत्वं गत प्राप्त । तत तस्मात् कारणात् त्वया अबलयापि अयं सूर्यः स्वप्नपरम्परासु स्वप्नानां परम्परा तासु सुदर्शन सुखेन दृश्यते इति सुदर्शनः जातः ॥ ५१ ॥

**मया नभः स्थालदशेन्धनेन ते, विधातुरारात्रिककर्म भावि तत् ।**
**ममोर्ध्वगत्वं च महश्च मृष्यतां, भवद्भुवं वक्तुमिदं स वाययौ ॥५२॥**

(व्या०) मयेति । वा अथवा स रविः भवत्याः भूः भवद्भूस्तं तव पुत्रं इदं वक्तुं आययौ आयात । इदमिति किं विधातु ब्राह्मणो मया नभःस्थालदशेन्धनेन दशा वर्तिरेव इन्धनं यस्य स दशेन्धनो दीपः नभः आकाशमेव स्थालं पात्रं तस्मिन् दशेन्धनेण दीपेन ते तव आरात्रिकं कर्म भावि भविष्यति । तत् तस्मात् कारणात मम ऊर्ध्वगत्वं उच्चैर्गमनत्वं च अन्यत् महस्तेजो मृष्यतां सह्यताम् । मृषूच् क्षान्तौ एतस्यधातो प्रयोगः ॥ ५२ ॥

**ध्वजावलोकाद्दयिते तवाङ्गजो, रजोभिरस्पृष्टवपुः कुसङ्गजैः ।**
**गमी गुणाढ्यः शिरसोऽवतंसतां, कुले विशाले विपुलक्षणस्पृशि ॥५३॥**

(व्या०) ध्वजेति । हेदयिते ध्वजावलोकात् ध्वजस्य अवलोको दर्शनं तस्मात् ध्वजदर्शनात् तव अङ्गज पुत्र विशाले विस्तीर्णे कुले वंशे गृहे वा शिरोऽवतंसतां शिरस अवतंसता तां मस्तकमुकुटमणित्वं गमी ( वर्त्स्यति गम्यादि । ५–३–१ । इ. सू भविष्यत्यर्थे गम् धातोर्णिन् । ) गमिष्यतीति । किंविशिष्टस्तव पुत्रो ध्वजश्च कुसङ्गजैः कुत्सितः सङ्गः कुसङ्ग ( गतिक्वन्यस्तत्पुरुष । ३–१–४२ । इ. सू. तत्पुरुषसमास । ) स्तस्मात् जातानि तै कुसंसर्गजै रजोभि पापैः पक्षे कु पृथ्वी तस्या सङ्गजैः रजोभि रेणुभिः अस्पृष्टवपु न स्पृष्टं अस्पृष्टं अस्पृष्टं वपुर्यस्यस अस्पृष्टशरीरः । पुनः गुणाढय गुणैर्विन-

यादिभिः तन्तुभिर्वा आढ्यः समृद्धः। किंविशिष्टे कुले विपुलक्षणस्पृशि विपुलश्चा क्षणश्च विस्तीर्णः क्षण उत्सवो वा गृहविभागो वा तं स्पृशतीति विपुलक्षणस्पृक् तस्मिन् ॥ ५३ ॥

**परिस्फुरन्तं दिवि केतुसंज्ञया, निरीक्ष्य मां ते पृतनाग्रवर्तिनम्।**
**विपक्षवर्गः स्वयमेव भंक्ष्यते, युधेऽमुना तद्भव जातु नातुरः ॥५४॥**
**बिभर्तु गांभीर्यगुणं युवा भवा-न्निधाय सर्वं मयि बालचापलम्।**
**इति प्रजल्पन् कलकिंकिणीक्वणै रमुं किमागात्प्रियमित्रवत् स वा ५५**

(व्या०) परीति। हे प्रिये वा अथवा ध्वजः अमुं तव सुतं प्रियमित्रवत् प्रियं च तत् मित्रं च प्रियमित्रं तदिव प्रियमित्रवत् (स्यादेरिवे। ७-१-५२। इ. सू. सादृश्येऽर्थे प्रियमित्रशब्दात् वत् प्रत्ययः।) किमागात् (इणिकोर्गा। ४-४-२३। इ. सू. अद्यतन्यां इण्धातो गाः आङ्पूर्वक इण्धातोः अद्यतनीरूपम्।) किं कुर्वन् कलकिंकिणीक्वणैः कलाश्चता किंकिण्यश्च मनोज्ञकिंकिण्यस्तासां क्वणाः शब्दास्तैः मनोज्ञक्षुद्रघंटिकाशब्दैः इति जल्पतीति जल्पन् इतीति किं ते तव पृतनाग्रवर्तिनं पृतनायाः (पृपूभ्यां कित्। २९३। इ. उ. सू. पृङ्त् व्यायामे इतिधातोः कित् तन प्रत्ययः अदन्तत्वात् स्त्रियां आप् प्रियते इति पृतना।) सेनाया अग्रे वर्तते इति पृतनाग्रवर्तिनं दिवि आकाशे केतुसंज्ञया केतुरिति संज्ञा तया केतुरिति नाम्ना परिस्फुरन्तं परिस्फुरतीति परिस्फुरन् तं निरीक्ष्य दृष्ट्वा विपक्षवर्गः विपक्षाणां वर्गः शत्रुसमूहः स्वयमेव भंक्ष्यते भग्नो भविष्यति। केतुशब्देन ध्वज उच्यते धूमकेतुरपि इति भावः। तत् तस्मात् कारणात्-युधे संग्रामे अमुना विपक्षवर्गेण सह जातु कदाचिदपि आतुर उत्सुको न भव माभूः। भवान् युवा यौवनं प्राप्तः सन् सर्वं बालचापलं बालस्य चापलं तत् मयि निधाय मुक्त्वा गांभीर्यगुणं गंभीरस्य भावोगांभीर्यं ( पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च। ७-१-६०। इ. सू. गंभीरशब्दात्। भावेट्यण्।) तदेवगुणस्तं बिभर्तु दधातु ॥ ५४-५५ ॥ युग्मम्।

**न्यभालि कुंभः करभोरु यत्त्वया, ततः सुवृत्तः सुमनश्रयाञ्चितः।**
**गतः सुतस्ते कमलैकपात्रता-मभङ्गमाङ्गल्यदशां श्रयिष्यति ॥५६॥**

(व्या०) न्यभालीति। हे करभवत् ऊरू यस्याः सा करभोरुः (उपमानसहितसंहितसहशफवामलक्ष्मणाद्यूरोः। २-४-७५। इ. सू. करभशब्दपूर्वक ऊरुशब्दात् स्त्रियां ऊङ् प्रत्ययः।) तस्याः संबोधनं हे करभोरु 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' स करभ उच्यते। यत् त्वया कुंभो न्यभालि पूर्णकलशो दृष्टः। ततस्तस्मात् कारणात् ते तवसुतः कुम्भवत् अभङ्गमाङ्गल्यदशां मङ्गलस्य भावो माङ्गल्यं अभङ्गं च तत् माङ्गल्यं च तस्य दशामवस्थां श्रयिष्यति आश्रयिष्यति। किंविशिष्टस्तव सुतः कुंभश्च सुवृत्तः शोभनं वृत्तं यस्य स. सच्चरित्रः सदाकारो वा। सुमनश्चयाञ्चितः सुमनसां साधूनां पुष्पाणां चयेन समूहेन अञ्चितः पूजितः। कमलैकपात्रतां कमलाया लक्ष्म्याः कमलस्य जलजस्य वा एकपात्रस्य भावः एकपात्रतां स्थानकत्वं गतः प्राप्तः ॥ ५६ ॥

**सुमङ्गलाङ्गीभवितुं तवर्द्धये, विसोढवान् कारुपदाहतीरहम्।**
**विवेश वह्नावनुभूय भूयसी-श्चिराय दंडान्वितचक्रचालनाः ॥५७॥**

**कृतज्ञ मद्दत्तजलैः प्रतीष्यतां, ततस्त्वया चक्रिपदाभिषेचनम्।**
**इतीहितं ज्ञापयितुं किमाययौ, घटः स्फुटत्वं तनयस्य तेऽथवा ॥५८॥**

(व्या०) सुमङ्गलीति। हे प्रिये अथवा घटः कुम्भः ते तव तनयस्य पुत्रस्य इति ईहितं ईप्सितं ज्ञापयितुं स्फुटत्वं प्रकटत्वं किमाययौ प्राप। इतीति किं अहं तव ऋद्धये पुष्टये सुमङ्गलाङ्गीभवितुं सुष्ठु मङ्गलं (सुः पूजायाम्। ३-१-४४। इ. सू. समासः।) अङ्गं यस्य स सुमङ्गलाङ्गः न सुमङ्गलाङ्गः असुमङ्गलाङ्गः असुमङ्गलाङ्गः सुमङ्गलाङ्गः भवितुमिति सुमङ्गलाङ्गीभवितुं कारुपदाहतीः कारूणां (कृवापाजिस्वदिसाध्यशौदृस्नासनिजानिरहीणुभ्य उण्। १। इ. सू. उण् प्रत्ययः कुर्वन्तीति कारवः) कुंभकाराणां पदानामाहतीः प्रहारान् चरणघातान् विसोढवान् सेहे। भूयसीः (गुणाङ्गाद्वेष्ठेयसू। ७-३-९। इ. सू. बहुशब्दात् ईयसुः। भूर्लुक्चेवर्णस्य। ७-४-४१। इ. सू. बहोर्भूरादेशः ईयस ईवर्णस्यलुक्च अधातूदृदितः। २-४-२। इ. सू. उदित्वात् स्त्रियांङीः) बह्वीश्चिराय चिरकालं दंडान्वितचक्रचालनाः दंडेन अन्वितं युक्तं यत् चक्रं तस्य

चालनास्ता: दंडयुक्तचक्रपरिचालनमनुभूय वह्नौ अग्नौ विवेश प्रविष्ट: । ततस्तस्मात् कारणात् हे कृतज्ञ चतुर मद्दत्तजलै मया दत्तैर्जलै: चक्रिपदाभिसेचनं चक्रिण: चक्रवर्तिन: पदस्य पदव्या: अभिषेचनं अभिषेकत्वं त्वया प्रतीष्यतामङ्गीक्रियताम् ॥ ५७ ॥ ५८ ॥ युग्मम् ।

**सर: सरोजाक्षि यदैक्षि तेन ते, सुत: सतोषै: सवयोभिराश्रित: ।**
**प्रफुल्लपद्मोपगतो घनागमौ–रसं रसं धास्यति साधुपालियुक् ॥ ५९ ॥**

(व्या०) सर: इति । हे सरोजाक्षि सरसि जाते सरोजे कमले तद्वत् अक्षिणी यस्या: सा सरोजाक्षी तस्या: संबोधनं हेसरोजाक्षि कमललोचने त्वया यत् सर: सरोवरं ऐक्षि ( ईक्ष्धातो: कर्मणि अद्यतनी । ) दृष्टम् । तेन कारणेन ते तव सुत: सरोवररसं पानीयं शृङ्गारादिरसं वा धास्यति धरिष्यति कथंभूतस्तव सुत: सरोवरं च सतोषै: (सहस्तेन । ३–१–२४ । इ. सू बहुव्रीहिसमास: । सहस्य सोऽन्यार्थे । ३–२–१४३ । इ. सू सहस्य सो वादेश ) तोषेण सह वर्तन्ते इति सतोषास्तै सहर्षै. सवयोभि: समानं वयो येषां ते सवयस: तै: सवयोभि: ( एकार्थं चानेकं च । ३–१–२२ । इ. सू. बहुव्रीहिसमास: । समानस्य धर्मादिषु । ३–२–१४९ । इ. सू. समानस्य स. । ) मित्रै: प्रधानैर्वयोभि: पक्षिभिर्वा आश्रित: प्रफुल्लपद्मोपगत: प्रफुल्लया विकस्वरया पद्मया लक्ष्म्या पक्षे प्रफुल्लै: पद्मै: कमलै: उपगत: । साधुपालियुक् साधूनां पालि: श्रेणि: वा मनोज्ञा पालि: तया युज्यते इति । किंविशिष्टं रसं घनागमौरसं घनो बहुरागम: सिद्धान्त: पक्षे घनागमो वर्षर्तु: तस्मात् औरसमुत्पन्नम् ॥ ५९ ॥

**मयैव जातानि मयैव वर्धिता–न्यनाङ्मुखीभूय ममावतस्थिरे ।**
**इमानि पद्मानि रमानिवासता–मवाप्य माद्यन्मधुपैश्च सङ्गतिम् ॥६०॥**
**प्रशाधि विश्वाधिप किं करोम्यहं, त्वमीशिषे मूढजनानुशासने ।**
**इदं वदंस्तत्त्वधिय: कृते स्वयं, जडस्तडाग: किमुपास्त ते सुतम् ॥६१॥**

(व्या०) मयेति । प्रिये स्वयं जडो मूर्ख: शीतलो वा तडाग इदं वदन् सन् तत्त्वधिय: तत्त्वानां धीस्तस्या: कृते परमार्थबुद्ध्यर्थं किं ते तव सुतमुपास्त

सिषेवे । इदमिति किं इमानि मयैव जातानि मयैव वर्धितानि रमानिवासतां निवासस्य भावो निवासता रमाया निवासता तां लक्ष्म्यावासत्वम् । च अन्यत् माद्य-न्मधुपैः (आतोडोऽह्वावामः । ५-१-७६ । इ सू. मधुशब्दपूर्वकपाधातोः डः प्रत्ययः डित्वात् आलोप ।) माद्यन्तश्च ते मधुपाश्च तैः मत्तभ्रमरैर्मद्यपैर्वा सङ्गति-मवाप्य मम अवाङ्मुखीभूय अवाङ्मुखं येषां तानि अवाङ्मुखानि अवाङ्मुखानि भूत्वा अवतस्थिरे । हे विश्वाधिप विश्वानामधिपः तस्य संबोधनं हे विश्वाधिप हे चक्रवर्तिन् प्रशाधि ( शासऽसूहनः शाध्येधिजहि । ४-२-८४ । इ. सू. शास्धातोः ह्यन्तस्य निपात । ) शिक्षां देहि । अहं किं करोमि त्वं मूढजनानु-शासने मूढाश्चते जनाश्च तेषामनुशासनं तस्मिन् मूर्खजनशिक्षणे ईशिषे समर्थो भवसि ॥ ६० ॥ ६१ ॥ युग्मम् ।

**निभालनान्नीरनिधेरधीश्वरः, सरस्वतीनां रसपूर्तिसंस्पृशाम् ।**
**अलब्धमध्योऽर्थिभिराश्रितो घनैः, सुतस्तवात्येष्यति न स्वधारणाम् ६२**

(०५।०) निभालनमिति । हे प्रिये नीरनिधेः नीराणां जलानां निधिः तस्य समुद्रस्य निभालनात् दर्शनात् । रसपूर्तिसंस्पृशाम् रसानां शृङ्गारादीनां पूर्तिः ( स्त्रियां क्तिः । ५-३-९१ । इ. सू. पृंक्धातोः स्त्रियां भावे क्तिः । ओष्ठ्यादुर् । ४-४-११७ । इ. सू. क्तौ परेपृधातोः ऋकारस्य उर् । भ्वादे-र्नामिनो दीर्घोर्वोर्व्यञ्जने । २-१-६३ । इ सू. उकारस्य दीर्घः । ) पूरणं पक्षे रसस्य जलस्य पूर्तिः पूरणं तां संस्पृशन्ति इति रसपूर्तिसंस्पृश-(स्पृशोऽनुदकात् । ५-१-१४९ । इ. सू रसपूर्तिपूर्वकसंस्पृश्धातोः क्विप् प्रत्ययः ।) स्तासां सरस्वतीनां वाणीनां नदीनां च अधीश्वर स्वामी । अलब्धमध्य अलब्धं मध्यं यस्य स गंभीर. । घनैर्बहुभिरर्थिभिर्याचकैः पक्षे घनैर्मेघैराश्रितः एवंविधस्तव सुतः स्वधारणां स्वस्यधारणा तां निजमर्यादां न अत्येष्यति न अतिक्रमिष्यति ॥६२॥

**प्रचेतसापि स्फुटपाशपाणिना, कृपाणिना मध्यशयेन जिष्णुना ।**
**न राजनीतेः किल कुलमुद्रुजो, न्यवारि मात्स्यः समयो भवन्मयि ६३**
**धरातलं धन्यमिदं त्वयि प्रभौ, न यन्नयव्यत्ययदोषमाप्स्यति ।**
**इति स्ववीचिध्वनितैरिवस्तुवन् , किमाविरासीत्पुरतोऽस्य वारिधिः ६४**

(व्या०) प्रचेतसा इति । हे प्रिये वारिधिः (व्याप्यादाधारे । ५-३-८८ । इ. सू. वारिपूर्वकधाधातोः किः । इडेत्पुसीति सू. आलोपः । वारीणि धीयन्ते अस्मिन् इति वारिधिः । ) समुद्रः अस्य तव पुत्रस्य पुरतः अग्रे इति अमुना प्रकारेण स्ववीचिध्वनितैः स्वस्य वीचीनां ध्वनितानि तैः स्वकल्लोलशब्दितैः स्तुवन् इव स्तवीति इति स्तुवन् किमाविरासीत प्रकटीबभूव । इतीति किं स्फुटपाशपाणिना स्फुटः पाशः पाणौ यस्य सः तेन प्रकटपाशहस्तेन प्रचेतसापि वरुणेनापि । कृपाणिना कृपाणोऽस्यास्तीति तेन खड्गयुक्तेन मध्यशयेन (आधारात् । ५-१-१३७ । इ. सू मध्ये इति आधारपूर्वक शीङ्धातोः अप्रत्ययः । डस्युक्तं कृता । ३-१-४९ । इ. सू. नित्यतत्पुरुषः ।) मध्ये शेते इति मध्यशयस्तेन मध्यवर्तिना जिष्णुना (भूजेः ष्णुक् । ५-२-३० । इ सू शीलादिसदर्थे जिधातोः ष्णुक् प्रत्ययः कित्त्वात् न गुणः । जयति इत्येवंशीलः जिष्णुः ।) नारायणेन किल इति सत्ये राजनीतेः राज्ञां । नीतिस्तस्याः कूलमुद्रुजः कूलमुद्रुजतीति कुलमुद्रुजः (कूलादुद्रुजोद्वहः । ५-१-१२२ । इ सू कूलकर्मपूर्वकउद्रुज्धातोः खश् प्रत्ययः । खित्यनव्ययाऽरुषोर्मोऽन्तो ह्रस्वश्च । ३-२-१११ । इ. सू. मोऽन्तः ।) कूलंकषः मात्स्यः समयः मत्स्ये गिलगिलन्यायो मयि भवतीति भवन् सन् न न्यवारि न वारित । इदं धरायास्तलं पृथ्वीतलं धन्यम । यत् यस्मात्कारणात् त्वयि प्रभौ सति व्यत्ययस्य दोषो व्यत्ययदोषस्तं न्यायविपरीतत्वदोषं न आप्स्यति न प्राप्स्यति ॥ ६३ ॥ ६४ ॥ युग्मम् ।

**प्रिये विमानेन गतेन गोचरं, समीयुषा भोगसमं समुच्छ्रयम् ।**
**उदारवृन्दारकवल्लभश्रिया, भवद्भुवा भाव्यमदभ्रवेदिना ॥ ६५ ॥**

(व्या०) प्रिये इति । हे प्रिये विमानेन गोचरं गतेन दृष्टेन सता भवद्भुवा भवत्याः भुवा तव पुत्रेण विमानसदृशेन भाव्यम् । किं विशिष्टेन तव पुत्रेण विमानेन च भोगसमं भोगस्य सम भोगसदृशं पक्षे आभोगसम आभोगस्य विस्तारस्य समं सदृशं समुच्छ्रयं वृद्धिं समीयुषा समीयाय इति समीयिवान् तेन प्राप्तेन । पुनः उदारवृन्दारकवल्लभश्रिया उदारा दातारस्तेषु वृन्दारका देवसदृशाः तेषां वल्लभा श्री शोभायस्य सः पक्षे उदारा प्रोढा ये वृन्दारका (वृन्दादारका । ७-

२-११ । इ. सू. मत्वर्थे वृन्दशब्दात् आरक प्रत्ययः । प्रशस्तं वृन्दमस्ति एषामिति वृन्दारका) देवास्तेषां वल्लभा श्रीर्लक्ष्मीर्यस्य सः तेन पुनः अदभ्रवेदिना अदभ्रं बहु वेत्तीति अदभ्रवेदी तेन अदभ्रवेदिना पक्षे अदभ्रा वेदिर्वलभी यस्य स तेन ॥ ६५ ॥

**पुराश्रितं मां परिहृत्य यन्महीं, पुनासि पङ्केरुहतापदैः पदैः ।**
**किमत्र हेतुर्मयि दोषसंभवो, विरागता वा चिरसंस्तवोद्भवा ॥ ६६ ॥**

**नवीनपुण्यानुपलम्भतोऽथ चे-द्विरक्तिरश्चिष्यसि तत्कथं शिवम् ।**
**प्रसीद मामेह्यथवोपयुज्यते, चटूक्तिरस्नेहरसे न सेतुवत् ॥ ६७ ॥**

**यदि त्वयात्यज्यत हन्त तावितो, विषोपमः सोऽस्तु न तन्ममापि किम् ।**
**किमित्यमुष्यानुपदीनमागतं, सुधाशिधामानुनयाय तन्वि वा ॥ ६८ ॥**

**त्रिभिर्विशेषकम् ।**

(व्या०) पुराइति । हे तन्वि वा अथवा सुधाशिधाम सुधाममृतमश्नन्ति इति सुधाशिनो देवास्तेषां धाम अमरविमानं किं इति अमुना प्रकारेण अमुष्य तव पुत्रस्य अनुनयाय स्नेहकरणाय अनुपदीनं पृष्ठलग्नमागतम् । इतीति किं हे स्वामिन् त्वं पुराश्रितं मां परिहृत्य त्यक्त्वा यत् पङ्केरुहतापदैः पङ्के रोहन्तीति पङ्केरुहाणि ( अद्व्यञ्जनात् सप्तम्या बहुलम् । ३-२-१८ । इ सू. सप्तम्या लुप् न ) कमलानि तेषां तापं संतापं ददतीति पङ्केरुहतापदास्तैः पदैश्चरणैः महीं पृथ्वीं पुनासि पवित्रीकरोषि । अत्र मयि विषये दोषसंभवः दोषाणां संभवः किं हेतु । वा अथवा चिरसंस्तवोद्भवा चिरं संस्तवात् उद्भव उत्पत्तिर्यस्याः सा चिरकालीनपरिचयोत्पन्ना विरागता विरागस्य भावो वैराग्यं वर्तते । अथ चेत् यदि नवीनपुण्यानुपलंभतः नवीनं (नवादीनतनत्नं च नू चास्य । ७-२-१६० । इ. सू स्वार्थे नवशब्दात् ईनप्रत्ययः ।) च तत् पुण्यं च नवीनपुण्यं तस्य अनुपलंभात् अप्राप्तेर्विरक्तिर्वर्तते । तत् शिवं मोक्षं कथमश्चिष्यसि यास्यसि । प्रसीद प्रसाद कुरु मां एहि । अथवा अस्नेहरसे स्नेहस्य रसः स्नेहरस न विद्यते स्नेहरसो यस्मिन् स अस्नेहरसस्तस्मिन् पुरुषे चटूक्तिश्चाटुवचनं

सेतुवत् पालिवत् सेतुना तुल्यं नोपयुज्यते न उपयोगमेति । हन्त इति वितर्के यदि त्वया ताविषः ( तवेर्वा । ५५० । इ. उ. सू. तव गतौ इति सौत्रधातोः टित् इष प्रत्ययः स च णित् वा णित्वात् वृद्धिः तव्यते गम्यते शुभकर्मवशात् अस्मिन् इति ताविषः ।) स्वर्गोऽत्यज्यत त्यक्तः स ताविषः स्वर्गो ममापि विषोपमः विषं उपमा यस्य सः विषोपमः न अस्तु अपितु अस्त्वेव ॥ ६६ ॥ ६७ ॥ ॥ ६८ ॥ त्रिभिर्विशेषकम् ।

**विलोकिते रत्नगणे स ते सुतः, स्थितौ दधानः किल काञ्चनौचितिम् ।**
**उदंशुमत्रासमुपास्य विग्रहं, महीमहेन्द्रैर्महितो भविष्यति ॥ ६९ ॥**

(व्या०) विलोकिते इति । हे प्रिये किल इति सत्ये ते तव स सुतः पुत्रः रत्नानां गणः समूहस्तस्मिन् रत्नगणे विलोकिते दृष्टे सति रत्नगणवत् उदंशुं उद्गता अंशवो यस्य तं उद्गतकिरणम् । अत्रासं न विद्यते त्रासो भयं यस्य तं भयरहितं दवरकरहितं वा विग्रहं युद्धं शरीरं वा उपास्य संसेव्य महीमहेन्द्रैः मह्याः पृथिव्याः महेन्द्रास्तैः महेन्द्रैर्वा पृथ्वीसत्कराजभिर्महितः पूजितो भविष्यति । किं कुर्वाणस्तवसुतो रत्नगणश्च स्थितौ मर्यादायां काञ्चन अपूर्वां औचितिं योग्यतां दधानः ( शत्रानशावेष्यति तु सस्यौ । ५-२-२० । इ. सू. सदर्थे धाधातोः आनश् प्रत्ययः ) धत्ते इति दधानः पक्षे स्थितौ अवस्थाने काञ्चने सुवर्णे औचितिं दधानः ॥ ६९ ॥

**न रोहणे कर्कशतागुरौ गिरौ, न सागरे वाऽनुपकारिवारिणि ।**
**अहं गतो निर्मलधामयोग्यतां, शुचौ समीहे तव धाम्नि तु स्थितिम् ७०**
**परार्थनैयर्थ्यमलीमसं जनुः, पुनीहि मे संततदानवारिणा ।**
**तवेति वा प्रार्थयितुं स गर्भगः, सुखं सिषेवे किमु रत्नराशिना ॥७१॥**

(व्या०) नेति । हे प्रिये वा अथवा तव स गर्भगः (नाम्नो गमः खड्डौ च विहायसस्तु विहः । ५-१-१३१ । इ. सू. गर्भशब्दपूर्वक गमधातोर्डः डित्वात् अन्त्यस्वरादि लोपः ।) पुत्र रत्नराशिना रत्नानां राशि समूहस्तेन रत्नसमूहेन इति प्रार्थयितुं किमु इति किं सुखं सिषेवे सेवित । इतीति किं अहं

कर्कशतागुरौ कर्कशस्य भाव कर्कशता काठिन्यं तया गुरौ गरीयसि गिरौ रोहणाचले वा अथवा अनुपकारिवारिणि उपकरोतीति उपकारि न उपकारि अनुपकारि अनुपकारि वारि यस्य स अनुपकारिवारिस्तस्मिन् सागरे उपकाररहितजले समुद्रे निर्मलधामयोग्यतां निर्मलं च तत् धाम च स्थानकं तस्य योग्यता तां निर्मलस्थानकयोग्यतां न गत न प्राप्त । तु पुन शुचौ पवित्रे तव धाम्नि स्थितिं समीहे । हे स्वामिन् परार्थवैयर्थ्यमलीमसं परार्थस्य परोपकारस्य वैयर्थ्येन निरर्थकत्वेन मलीमसं ( मलादीमसश्च । ७-२-१४ । इ. सू. मलशब्दात् मत्वर्थे ईमसप्रत्यय मलोऽस्ति अस्येति मलीमसम् । ) मलिनं मे जनु मदीयं जन्म संततदानवारिणा सन्ततं निरन्तरं दानमेव वारि जलं तेन पुनीहि पवित्रं कुरु ॥ ७०-७१ ॥ युग्मम् ।

**स्फुरन्महाः प्राज्यरसोपभोगतो, गतो न जाड्यं द्युतिहेतुहेतिभृत् ।**
**तव ज्वलद्वह्निविलोकनात्सुतो, द्विषः पतङ्गानिव धक्ष्यति क्षणात् ७२**

(व्या०) स्फुरन्निति । हे प्रिये तव सुत पुत्र ज्वलद्वह्निविलोकनात् ज्वलंश्चासौ वह्निश्च तस्य विलोकनं तस्मात् निर्धूमवैश्वानरदर्शनात् द्विषः शत्रून् पतङ्गानिव क्षणात् धक्ष्यति भस्मीकरिष्यति । किंविशिष्टः तव सुतो वह्निश्च प्राज्यरसोपभोगतः प्राज्या प्रभूता चासौ रसा च पृथ्वी पक्षे प्रकृष्ट आज्यस्य घृतस्य रसः तस्या च तस्य उपभोगत उपभोगात् स्फुरन्महा स्फुरत् महो यस्य स प्रसरत्तेजाः । पुन. जाड्यं जडत्वं मूर्खत्वं शीतत्वं न गत । द्युतिहेतुहेतिभृत् द्युते. कान्तेर्हेतवो या हेतयः ( सातिहेतियूतिजूतिज्ञप्तिकीर्तिः । ५-३-९४ । इ. सू. हेतिशब्दो निपात्यते । ) शस्त्राणि ज्वाला वा ता बिभर्ति धरतीति ॥ ७२ ॥

**प्रभो न मां कोऽप्युपलक्षयिष्यति, क्षितौ चिराद्गोचरमागतोऽसि यत् ।**
**मनुष्व मूर्तिं मम तैजसीमिमां, महानसि स्थापय तन्महानसे ॥७३॥**
**जने जिघत्सौ यदतीव जीवनं, मयैव तद्भक्ष्यमुपस्करिष्यते ।**
**इति स्वरूपं किममुष्य भाषितुं, भुवि प्रवेक्ष्यन्ननलोऽस्फुरत्पुरः ॥७४॥**

(व्या०) प्रभो इति । अनलो वैश्वानरः अमुष्य तव पुत्रस्य किं इति भाषितुं भुवि पृथिव्यां प्रवेक्ष्यन् प्रवेष्टुकामः सन् पुरोऽग्रेऽस्फुरत् । इतीति किं हे प्रभो क्षितौ पृथिव्यां मां कोऽपि न उपलक्षयिष्यति । यत अहं चिरात् बहुकालेन गोचरं (गोचरसंचरवहव्रजव्यजखलापणनिगमबकभगकषाकषनिकषम्। ५–३–१३१ । इ. सू. गोचरशब्दः पुंसि धान्तोनिपातः ।) दृष्टिमार्गमागतोऽस्मि । मम इमां तैजसीं मूर्तिं मनुष्य जानीहि । त्वं महान् असि । तत् तस्मात्कारणात् मां महानसे (महत् च तत् अनश्च महानसं । सन्महत्परमोत्तमोत्कृष्टं पूजायाम् । ३–१–१०७ । इ. सू. कर्मधारयसमास· । जातीयैकार्थेऽच्वे· । ३–२–७० । इ. सू. अनस् उत्तरपदे महतो डा· । डित्वात अन्त्यस्वरादिलोपः । सरोऽनोऽश्माऽसो जातिनाम्नोः । ७–३–११५ । इ. सू. महतशब्दपूर्वकअनसन्तात् तत्पुरुषादट् । ) पाकस्थाने स्थापय । जिघत्सौ ( तुमर्हादिच्छायां सन्नतत्सनः । ३–४–२१ । इ. सू. अद्धातोऽरिच्छार्थे सन् । घस्लृसनद्यतनीधञचलि । ४–४–१७ । इ. सू. सनि परे अदो घस्लृ आदेश । सन्भिक्षासंशेरुः । ५–२–३३ । इ. सू. जिघत्स् इति सन्नन्तात् उ । ) अत्तुमिच्छति इति जिघत्सति जिघत्सति इति जिघत्सुस्तस्मिन् बुभुक्षिते जने लोके यद् भक्ष्यं अतीव जीवनं वर्तते । तद् भक्ष्यं मयैव उपस्करिष्यते ॥७३–७४॥

**सुदुर्वचं शास्त्रविदामिदं मया, फलं स्वसंवित्तिबलादलापि ते ।**
**दुरासदं यद्व्यवसायसोष्मणां, सुखं तदाकर्षणमांत्रिकोऽश्नुते ॥७५॥**

(व्या०) सुदुर्वचमिति । हे प्रिये इदं स्वप्नफलं मया ते तव स्वसंवित्तिबलात स्वस्य संवित्तिर्ज्ञानं तस्या बलात् स्वीयज्ञानबलात् अलापि प्रोक्तम् । किंलक्षणं स्वप्नफलं शास्त्राणि विदन्तीति शास्त्रविदस्तेषां सुदुर्वचं सुष्टु अत्यर्थं दुर्वचं वक्तुमशक्यम् । व्यवसायसोष्मणां व्यवसायेन ऊष्मणा सह वर्तन्ते सोष्माण· सगर्वास्तेषां यद् वस्तु दुरासदं दुःखेन आसद्यते इति दुष्प्रापं वर्तते । तद्वस्तु आकर्षणमान्त्रिकः आकर्षणस्य मंत्रं जानाति इति आकृष्टिमंत्रज्ञः सुखं अश्नुते प्राप्नोति ॥ ७५ ॥

**व्यलीकतादूषणमुत्तमे न मे, मुखप्रियत्वेन गिरोऽधिरोप्यताम् ।**
**सुवर्णनाम्ना हि समर्पिता रिरी-भवेत्स्वरूपाधिगमेऽधिकार्तये ॥७६॥**

(व्या०) व्यलीकता इति । हे उत्तमे त्वं मे मम गिरो वाण्याः मुखप्रियत्वेन मुखस्य प्रियत्वं तेन व्यलीकतादूषणं व्यलीकस्य भावो व्यलीकता असत्यता सा एव दूषणं न अधिरोप्यतां मा स्थाप्यताम् । रिरीपित्तलं हि निश्चितं सुवर्णनाम्ना सुवर्णस्य नाम तेन समर्पिता स्वरूपाधिगमे स्वरूपस्य अधिगमोज्ञानं तस्मिन् स्वरूपे ज्ञाते सति अधिका चासौ आर्तिश्च पीडा तस्यै अधिकपीडायै भवेत् ॥

**इदं वदन्तं भगवन्तमन्तरा-लयं नभःस्था ऋभवो भवन्मुदः ।**
**सुमैरसिञ्चन् जय संशयक्षया-मयागदंकारवरेति वादिनः ॥ ७७ ॥**

(व्या०) इदमिति ॥ नभः स्था नभसि आकाशे तिष्ठन्तीति आकाशस्था ऋभवोदेवाः भवन्मुदः भवन्ती मुद् येषां ते जायमान हर्षाः सन्तः अन्तरालयं ( पारे मध्येऽग्रेऽन्त षष्ठ्या वा । ३-१-३० । इ. सू. अव्ययीभावसमासः ) आलयस्य अन्तरावासस्य अन्तर्मध्ये इदं वदन्तं भगवन्तं सुमैः कुसुमैरसिञ्चन् । किंलक्षणा ऋभवः हे संशयक्षयामयागदंकारवर संशय संदेहः स एव क्षयनामा आमयः रोगः अगदं करोतीति अगदङ्कारो वैद्यः (कर्मणोऽण् । ५ । १ ।७२ । इ. सू. अगदकर्मपूर्वक कृधातोः अण् । नामिनोऽकलिहलेः । ४ । ३ । ५१ । इ. सू. अणिपरे कृधातोः ऋकारस्य वृद्धिः । इत्युक्तं कृता । ३ । १ । ४९ । इ. सू. तत्पुरुष समासः । सत्यागदास्तोः कारे । ३ । २ । ११२ । इ. सू. कारशब्दे उत्तरपदे अगदशब्दस्य मोऽन्तः । ) तेषु वरः उत्तमस्तस्य संबोधनं संशयक्षयामयस्य अगदङ्कारवर हे राजवैद्य त्वं जय इति वादिनः इति वदन्तीति ॥

**श्रुत्वेदं दयितवचः प्रमोदपूर्त्या, दध्रे सा समुदितकंटकं वपुः स्वम् ।**
**पद्मिन्या निजमुखमित्रपद्ममातु-र्न्यक्कर्तुं किमिह सकंटकत्वदोषम् ॥७८॥**

(व्या०) श्रुत्वेति । सा सुमङ्गला इदं दयितवचः दयितस्य वचस्तत् श्रीऋषभदेववचनं श्रुत्वा प्रमोदपूर्त्या प्रमोदस्य पूर्तिस्तया हर्षपूरेण स्वं वपुः आत्मीयं शरीरं समुदितकंटकं समुदिताः कंटका यस्य तत् उद्गतरोमाञ्चं दध्रे

धरति स्म । किंकर्तुं निजमुखमित्रपद्ममातुः निजमुखस्य मित्रं यत् पद्मं कमलं तस्य माता जननी पद्मिनी तस्याः इह जगति किंसकंटकत्वदोषं कंटकैः सह वर्तते इति सकंटका तस्या भावः सकंटकत्वं तदेव दोषस्तं न्यक्कर्तुं निराकर्तुम् ॥७८॥

तामेकतोऽमृतमयीमभितश्चकार,
स्वप्नार्थसम्यगुपलब्धिभवः प्रमोदः ।
चक्रेऽन्यतश्च दवदाहमयीं विषादः,
प्राणेशितुर्वचनपानविरामजन्मा ॥ ७९ ॥

(व्या०) तामिति । स्वप्नार्थसम्यगुपलब्धिभवः स्वप्नानामर्थस्य सम्यक् उपलब्धिः प्राप्तिः तस्या भवः उत्पन्नः प्रमोदो हर्षः तां सुमङ्गलां (सर्वोभयाभिपरिणा तसा । २–२–३ । इ. सू. अभितोयोगे द्वितीया ।) अभितः समन्ततः एकतः अमृतमयीं चकारः । अन्यतश्च प्राणेशितुः प्राणानामीशिता स्वामी तस्य श्रीऋषभदेवस्य वचनपानविरामजन्मा वचनरूपामृतस्यपानं तस्य विरामो निवर्तनं तस्मात् जन्म उत्पत्तिर्यस्य सः विषादः दवदाहमयीं दवस्य वनाग्नेर्दाहस्तन्मयीं चक्रे ॥ ७९ ॥

नहि बहिरकरिष्यद्वक्षसोऽस्याः स्तनाख्यं,
यदि तरुणिमशिल्पी मंडपद्वन्द्वमुच्चैः ।
तदिह कथममास्यल्लास्यलीलां दधानं,
प्रभुवचनसुतासिस्फीतमानन्दयुग्मम् ॥ ८० ॥

सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि–
र्धम्मिल्लादिमहाकवित्वकलनाकल्लोलिनीसानुमान् ।
वाणीदत्तवरश्चिरं विजयते तेन स्वयं निर्मिते,
सर्गो जैनकुमारसंभवमहाकाव्ये गतस्तत्त्वभाक् ॥ ८१ ॥

(व्या०) नहि इति । तरुणिमशिल्पी तरुणस्य भावस्तरुणिमा तरुणिमा एव शिल्पी यौवनरूपविज्ञानी अस्याः सुमङ्गलायाः स्तनाख्यं स्तन इति आख्या यस्य तत् मंडपद्वन्द्वं मंडपयोर्द्वन्द्वं युगलं तत् उच्चैरत्यर्थं यदि वक्षसो हृदयात्

बहिर्नहि अकरिष्यत् । तत् तदा इह वक्षसि आनन्दयुग्मं आनन्दयोर्युग्मं कथं अमास्यत् । किं कुर्वाणं आनन्दयुग्मं लास्यलीलां लास्यस्य तांडवनृत्यस्य लीलां धत्ते इति दधानम् । पुन: प्रभुवचनसुताभिस्फीतं सुतस्याभि: सुताभि: प्रभुवचनं च सुताभिश्च प्रभुवचनसुताभी ताभ्यां स्फीतं प्रौढम् ॥ ८० ॥

इतिश्रीमदचलगच्छकविचक्रवर्तिश्रीजयशेखरसूरिविरचितस्य श्रीजैनकुमार
संभवमहाकाव्यस्य तच्छिष्यश्रीधर्मशेखरमहोपाध्यायकृतायां
टीकायां श्रीमाणिक्यसुन्दरशोधितायां नवमसर्गव्याख्या
समाप्ता ॥ ९ ॥

## ॥ अथ दशमः सर्गः प्रारभ्यते ॥

**साथ नाथवदनारविन्दतो, वाङ्मरन्दमुपजीव्य निर्भरम् ।**
**उज्जगार मृदुमंजुलां गिरं, गौरवादिति सदालिवल्लभा ॥ १ ॥**

(व्या०) सा इति । अथानन्तरं सा सुमङ्गला गौरवात् गुरोर्भावो गौरवं तस्मात् मृदु मंजुलां मृद्वीचासौ मंजुला च तां सुकुमारां मनोज्ञां गिरं वाणीं उज्जगार उद्गिरतिस्म । किंलक्षणा सुमङ्गला सदा सर्वदा आलिवल्लभा आलीनां सखीना वल्लभा अभीष्टा अलिवल्लभा भ्रमरीसमाना । किंकृत्वा नाथवदनारविन्दत: नाथस्य श्रीऋषभस्वामिनो वदनं मुखमेव अरविन्दं कमलं तस्मात् स्वामिमुखकमलात् वाक् एव मरन्दस्त वाङ्मरन्दं वचनमकरन्दं निर्भरं अत्यर्थं उपजीव्य निपीय ॥ १ ॥

**लब्धवर्णजनकर्णकर्णिका, वाञ्छितार्थफलसिद्धिवर्णिका ।**
**दीधितिर्धृतजडिम्नि पावकी, वाग् विभो जयति कापि तावकी ॥२॥**

(व्या०) लब्ध इति । हे विभो हे स्वामिन् कापि तावकी (वा युष्मदस्मदोऽञीनञौ युष्माकास्माकं चास्यैकत्वेतु तवकममकम् । ६ । ३ । ६७ । इ. सू युष्मद' अञ् प्रत्यय' एकवचने तवकादेश । अणञेयेकण् नञ् स्नञ्टिताम् । २ । ४ । २० । इ सू स्त्रियां डी ।) तव इयं त्वदीया वाक् जयति । किं

लक्षणा। वाक् लब्धवर्णजनकर्णकर्णिका लब्धा वर्णा यैस्ते लब्धवर्णाः विद्वांसः लब्धवर्णाश्चते जनाश्च विद्वज्जनास्तेषां कर्णयोः कर्णिका कर्णाभरणम् । पुनः वाञ्छितार्थफलसिद्धिवर्णिका वाञ्छिताश्चते अर्थाश्च तेषां फलानि तेषां सिद्धेर्वर्णिका । पुनः घृतजडिम्नि जडस्य भावो जडिमा। जाड्यं घृतवत् जाड्यं यस्मिन् स तस्मिन् घृतजाड्ये पुरुषे पावकस्याग्नेरियं पावकी वह्निसंवधिनी दीधिति. कान्तिः ॥२॥

**रूपमीशसमकं दिदृक्षते, तावकं यदि सहस्रलोचनः ।**
**ईहते युगपदर्चनं च ते, चेत् सहस्रकर एव नापरः ॥ ३ ॥**

(व्या०) रूपमिति । हे ईश तावकं तवेदं रूपं यदि समकं समकालं दिदृक्षते द्रष्टुमिच्छतीति दिदृक्षते विलोकयितुमीहते तर्हि सहस्रं लोचनानि नेत्राणि यस्य स सहस्रलोचनः इन्द्रः एव नापर. । दिदृक्षते इत्यत्र स्मृदृशा इति सूत्रेणात्मनेपदं भवति । च अन्यत् चेत् यदि ते तव युगपत् समकालं अर्चनं पूजनं ईहते वाञ्छति । तदा सहस्रं कराः किरणा यस्य स सहस्रकरः सूर्यः एव नापरः ॥ ३ ॥

**यो बिभर्ति रसनासहस्रकं, द्व्याहतत्वमधिरोप्य सोऽप्यलम् ।**
**देव वक्तुमखिलान्न ते गुणा-न्मादृशः किमबलाजनः पुनः ॥ ४ ॥**

(व्या०) य इति। हे देव यो द्व्याहतत्वं द्वाभ्यामाहतत्वं द्विगुणत्वं अधिरोप्य रसनासहस्रं रसनानां सहस्रं तत् जिह्वासहस्रं बिभर्ति । सोऽपि शेषनागः तव अखिलान् समस्तान् गुणान् वक्तुं न अलं न समर्थः । मादृशो मत्सदृशः अबला एव जनः स्त्रीजनः किं पुनः ॥ ४ ॥

**धीधनोचितभवद्गुणस्तवा-द्वारकेऽपि निजजाड्यचिन्तने ।**
**उच्यते किमपि नाथ यन्मया, भक्तितन्मयतया तदर्थताम् ॥ ५ ॥**

(व्या०) धी इति । हे नाथ मया निजजाड्यचिन्तने निजस्य जाड्यं मूर्खत्वं तस्य चिन्तने आत्मीयमूर्खत्वचिन्तने । धीधनोचितभवद्गुणस्तवान् धीः धनं येषां ते धीधना विद्वांसः तेषां उचिता ये भवतो गुणास्तेषां स्तवान् विद्वज्जनयोग्यत्वदीयगुणस्तवान् निवारयतीति निवारकं तस्मिन् सत्यपि किमपि उच्यते

कथ्यते । तत् भक्तितन्मयतया तदेव तन्मयं तस्य भावो तन्मयता भक्तेः तन्मयता तया अवधार्यतां ज्ञायताम् ॥ ५ ॥

**स्वादुतां मृदुलतामुदारतां, सर्वभावपटुतामकूटताम् ।**
**शंसितुं तव गिरः समं विधिः, किं व्यधान्न रसनागणं मम ॥ ६ ॥**

(व्या०) स्वादुतामिति । हे नाथ विधिः विधाता तव गिरो वाण्याः स्वादुतां स्वादुनो भाव स्वादुता तां सुस्वादुत्वं मृदुलतां मृदुलस्य भावो मृदुलता तां सौकुमार्यत्वं उदारतां उदारस्य भाव उदारता मौदार्यं सर्वभावपटुतां पटोर्भावः पटुता सर्वे च ते भावाश्च सर्वभावास्तेषु पटुता तां पटिष्ठतां अकूटतां कूटभावः कूटता न कूटता अकूटता तां सत्यतां समं समकालं शंसितुं स्तोतुं मम रसनागणं रसनानां गणस्तं जिह्वासमूहं किं न व्यधात् न अकरोत् ॥ ६ ॥

**किन्तु ते हृदि गभीरतागुणं, शिक्षितुं वसति दुग्धसागरः ।**
**ईदृगुक्तिपयसां यदूर्मयो, विस्फुरन्ति बहिराननाध्वना ॥ ७ ॥**

(व्या०) किन्तु इति । हे नाथ तु इति वितर्के दुग्धसागरः दुग्धानां (दुह्यते इति दुग्धं । क्लीबे क्तः । ५ । ३ । १२३ । इ. सू. भावे दुह्धातोः क्तः । भ्वादेर्दादेर्घः । २–१–८३ । इ. सू. हस्य घ. । अधश्चतुर्थात् तथोर्धः । २ । १ । ७९ । इ. सू. प्रत्ययस्य तस्य धकारः । तृतीयस्तृतीयचतुर्थे । १ । ३ । ४९ । इ सू. धे परे पूर्वघस्य गः ) सागरः क्षीरसमुद्रस्तव हृदि गभीरतागुणं गभीरस्य भावो गभीरता सा एव गुणस्तं गांभीर्यगुणं शिक्षितुं किं वसति । यत् ईदृगुक्तिपयसां ईदृशश्चताः उक्तयश्च ईदृगुक्तयः ता एव पयांसि तेषां ईदृशवचनदुग्धानां ऊर्मयः कल्लोलाः आननाध्वना आननस्य मुखस्य अध्वा मार्गस्तेन मुखमार्गेण बहिर्विस्फुरन्ति प्रसरन्ति ॥ ७ ॥

**स्वस्थमेव सुखयन्त्यहो जनं, दुःखितेष्वपि सुखं ददानया ।**
**बिभ्यतीव भवतो जिता गिरा, किं सुधा न वसुधामियर्ति सा ॥८॥**

(व्या०) स्वस्थमिति । हे नाथ भवतो गिरा त्वदीय वाण्या जिता सती सा सुधा वसुधां पृथ्वीं किं न इयर्ति नागच्छति । उत्प्रेक्षते बिभ्यती इव बिभेति

इति भयभ्रान्ता इव किंकुर्वाणया तव गिरा अहो इति आश्चर्ये दु खितेषु अपि सुखं दत्ते इति ददाना तया ददानया । किंकुर्वती सुधा स्व स्थं स्व तिष्ठतीति तमेव जनं सुखिनं करोतीति सुखयति सुखयतीति सुखयन्ती सुखिनं जनं कुर्वती ॥ ८ ॥

**वैधवं ननु विधिर्न्यधात्सुधा–सारमत्र सकलं भवद्गिरि ।**
**पूर्णिमोपचितदेहमन्यथा, तं कथं व्यथयति क्षयामयः ॥ ९ ॥**

(व्या०) वैधवमिति । हे नाथ विधिर्विधाता वैधवं विधोरयं वैधवस्तं चन्द्रसत्कं सुधासारं सुधाया अमृतस्य सारस्तं सकलं संपूर्ण अत्र अस्यां भवतो गीः भवद्गीः तस्यां भवद्गिरि त्वद्वाण्यां न्यधात् ( पिबैतिदाभूस्थः सिचो लुप् परस्मै न चेद् । ४–३–६६ । इ. सू. न्यधात् इत्यत्र सिचो लुप् ) क्षिप्तवान् अन्यथा क्षयामयः क्षय इति आमय क्षयरोगः । तं पूर्णिमोपचितदेहं पूर्णिमायां–उपचितः वृद्धिं गतो देहो यस्य तं पूर्णिमायां पुष्टदेहं चन्द्रं कथं व्यथयति पीडयति ॥ ९ ॥

**बद्धधारममृतं भवद्वचो, निर्व्यपायमभिपीय साम्प्रतम् ।**
**प्रीतिभाजिनि जनेऽत्र नीरसा, शर्करापि खलु कर्करायते ॥ १० ॥**

(व्या०) बद्ध इति । हे नाथ शर्करा अपि अत्र मल्लक्षणे जने । नीरसा निर्गतो रसो यस्याः सा सती सांप्रतं अधुना खलु निश्चिते कर्करायते ( क्यङ् ३–४–२६ । इ. सू आचारे अर्थे कर्करशब्दात् क्यङ् वा ङित्वात् आत्मने पदम् । ) कर्कर इव आचरति । किंविशिष्टे जने बद्धधारं बद्धा धारा यस्य तत् अमृतं अमृतरूपं भवता वचो भवद्वचस्तत् निर्व्यपायं निर्गतो व्यपायो विघ्नो यस्मिन् कर्मणि यथा भवति तथा अभिपीय पीत्वा प्रीतिभाजिनि (अजातेः शीले ५–१–१५४ । इ. सू शीलेऽर्थे प्रीतिशब्दपूर्वकभज्धातोः णिन् प्रत्ययः णित्वात् वृद्धिः ।) प्रीतिं भजतीति प्रतिभाजिन् तस्मिन् ॥ १० ॥

**प्राकषायकलुषं ततो घनं, घोलनार्पितरसं विनाशि यत् ।**
**तद्विपूकृतघनागम समं, नाम्रमीशवचसामनीदृशाम् ॥ ११ ॥**

(व्या०) प्रागिति । तत् आम्रं आम्रफलं ईशवचसां ईशस्य स्वामिनो वचांसि तेषां समं सदृशं न भवति । किंविशिष्टानां ईशवचसां अनीदृशां न ईदृशि अनीदृशि तेषां न अनेन आम्रफलेन सदृशानाम् । किंविशिष्टमाम्रं रिपूकृतघनागमं घनानामेघानामागमो यस्मिन् स घनागमोवर्षर्तु न रिपु. अरिपु· अरिपु रिपु· यथा संपद्यमान कृत रिपूकृत रिपूकृतो घनागमो वर्षर्तु सिद्धान्तो वा येन तत भगवद्वचनमागम मन्यते । अत एव अनीदृशत्वम् । यत् आम्रफलं प्राक्कषायकलुषं प्राक्पूर्वं कषायेण कलुषम् । भगवद्वचो नैवंविध स्यात् । ततोऽनन्तरं यत आम्रं घनं अत्यर्थम् । घोलनार्पितरस घोलनेन अर्पितो रसो येन तत् विनश्यतीति विनाशि विनश्वर वर्तते ॥ ११ ॥

**द्राक्षया किल यदानुशिक्ष्यते, स्वं फलं मधुरतां भवद्गिरः ।**
**तत्तदा द्रुतमितो वियोज्यते, वेधसा ध्रुवममन्दमेधसा ॥ १२ ॥**

(व्या०) द्राक्षयेति । हे नाथ किल इति सत्ये स्वं फलं आत्मीयं फलं भवद्गिर· भवता गी तस्या त्वदीयवाण्या मधुरतां मधुरस्य भावो मधुरता तां माधुर्यं अनुशिक्ष्यते । तदा तस्मिन्नवसरे तत्फलं इतो द्राक्षावल्लीत द्रुतं शीघ्रं अमन्दमेधसा (मन्दाल्पाच्च मेधाया । ७–३–१३८ । इ. सू. मन्दशब्दपूर्वक.मेधाशब्दान्तात् बहुव्रीहे अस् समासान्त ।) न मन्दा अमन्दा अमन्दा मेधा यस्य स तेन बहुप्रज्ञावता वेधसा ध्रुवं निश्चित वियोज्यते पृथक् क्रियते ॥१२॥

**वारिवाहवदलं तव श्रवः–पल्वलप्रमभिवर्षतः सतः ।**
**निश्चयधीश शममाम मामकं, संशयान्धतमसं तदद्भुतम् ॥ १३ ॥**

(व्या०) वारीति । हे अधीश तव वारिवाहवत् वारीणि जलानि वहतीति तेन तुल्यं मेघवत अलमत्यर्थं श्रव पल्वलप्र श्रव एव पल्वलं पूरयति इति श्रव पल्वलप्र अत्र 'वृष्टिमाने ऊलुक चास्य वा' इति सूत्रेण पूरयतेर्णम् प्रत्यये ऊकारस्य लोपे श्रव पल्वलप्ररूपसिद्धि ॥ कर्णसर पूर यथा भवति तथा अभिवर्षत सत निशि रात्रौ मामक ममेद मामकं सशयान्धतमस अन्धं करोतीति अन्धयति अन्धयतीति अन्ध अ ध च तत तमश्च अन्धतमसं (समवान्धात्तमसः

७-३-८० । इ. सू. अन्धपूर्वकतमस् शब्दात् अत् समासान्तः ।) संशय एव अन्धतमसं संशयान्धतमसं शमं शान्तिं आम जगाम तत् अद्भुतमाश्चर्यम् १३

**निर्गतं यदि तवाननाद्वचः, क्षीणमेव तदशेषसंशयैः ।**
**कोशतोऽसिरुदितो भटस्य चे-न्नष्टमेव तदसत्त्वदस्युभिः ॥ १४ ॥**

(व्या०) निर्गतमिति । हे नाथ यदि तव आननात् मुखात् वचो निर्गतम् तत् तदा अशेषसंशयैः अशेषाश्च ते संशयाश्च तैः समस्तसंदेहैः क्षीणमेव । चेत् यदि कोशतः परिवारात् भटस्य सुभटस्य असिः खड्गः उदितो निर्गतः स्यात् तत् तदा असत्त्वदस्युभिः नास्ति सत्त्वं बलं येषां ते असत्त्वा निर्बलाः असत्त्वाश्चते दस्यवश्च चौरैर्नष्टमेव ॥ १४ ॥

**तावकेऽपि वचने श्रुतिं गते, यस्य मानसमुदीर्णसंशयम् ।**
**मुष्टिधामनि मणौ सुधाभुजां, तस्य हन्त न दरिद्रता गता ॥ १५ ॥**

(व्या०) तावके इति । हे नाथ तावकेऽपि तव इदं तस्मिन् वचने श्रुतिं कर्णं गते सति यस्य मानसं चित्तं उदीर्णसंशयं उदीर्णः संशयो यस्य तत् गतसंदेहं वर्तते तस्य पुंसो मुष्टिधामनि मुष्टिर्धाम स्थानं यस्य स तस्मिन् मुष्टिस्थिते सुधाभुजां सुधाममृतं भुञ्जते इति सुधाभुजो देवास्तेषां मणौ चिन्तामणौ । हन्त इति वितर्के दरिद्रता न गता ॥ १५ ॥

**यत्त्वयौच्यत तथैव तन्महे, तन्महेश निजहृद्यसंशयम् ।**
**कम्पते किल कदापि मन्दरो, मन्दरोष न पुनर्वचस्तव ॥ १६ ॥**

(व्या०) यदिति । हे महेश यद् वचस्त्वया औच्यत प्रोक्तम् । तत् तथैव असंशयं न विद्यते संशयो यस्मिन् तत् निःसन्देहं वयं निजहृदि तन्महे विस्तारयामः 'अविशेषणे द्वौ चास्मद' इति सूत्रेण एकवचने बहुवचनम् । किल इति सत्ये हे मन्दरोष मन्दोरोषो यस्य स तस्य संबोधनं हे मन्दरोष । मन्दरो मेरुः कदापि कम्पते पुनस्तव वचो न कम्पते ॥ १६ ॥

**शैलसागरवनीभिरस्खल-त्पक्ष्ममात्रमीलनान्नियन्त्रितम् ।**
**ज्ञानमेकमनलीकसंगतं, नेत्रयुग्ममतिशय्य वर्तते ॥ १७ ॥**

(व्या०) शैल इति । हे नाथ एकं ज्ञानं नेत्रयुग्मं नेत्रयोर्युग्मं अतिशय्य अतिशयित्वा इति अतिशय्य (ञिडतियि शय् । ४-३-१०५ । इ. सू. अतिपूर्वकशीङ्धातोः यपि परे शय् आदेशः ।) जित्वा वर्तते । किंलक्षणं ज्ञानं अनलीकसंगतं न अलीकमसत्यमनलीकं सत्यं तेन संगतम् । नेत्रयुग्मं तु अलीकेन ललाटेन संगतं मिलितं भवति । पुनः शैलसागरवनीभिः महद्वनं वनी शैलाश्च (ज्योत्स्नादिभ्योऽण् । ७-२-३४ । इ. सू. मत्वर्थे शिलाशब्दात् अण् णित्वात्वृद्धिः शिलाः सन्ति एषु इति शैलाः ।) पर्वताः सागराश्च समुद्राः वन्यश्च महद्वनानि ताभिः पर्वतसमुद्रमहद्वनादिभिः अस्खलत् न स्खलतीति अस्खलत् स्खलनां न प्राप्नुवत् । पुनः किंलक्षणं नेत्रयुग्मं पक्ष्ममात्रमिलनात् पक्ष्म एव पक्ष्ममात्रं तस्य मिलनात् नियन्त्रितं स्पष्टम् ॥ १७ ॥

**पात्रतैलदशिकादिभिर्ज्वल-न्निःसहायमधिकायितस्य ते ।**
**अश्नुते न खलु कज्जलध्वज-श्चिन्मयस्य महसः शतांशताम् ॥ १८ ॥**

(व्या०) पात्र इति । हे नाथ कज्जलध्वजः कज्जलं ध्वजो यस्य स दीपः खलु निश्चितं ते तव चिन्मयस्य चिदेव चिन्मयं तस्य ज्ञानरूपस्य महसस्तेजसः शतांशतां शतांशस्य भावः शतांशता तां न अश्नुते न प्राप्नोति । किंविशिष्टो दीपः पात्रतैलदशिकादिभिः पात्रं च तैलं च दशिका च वर्तिका पात्रतैलदशिकाः ताः आदयो येषां तानि तैः पात्रतैलवर्तिकाप्रमुखैरुपकरणैर्ज्वलन् ज्वलतीति ज्वलन् दीप्यमानः । किंविशिष्टस्य महसः निःसहायं निर्गतः सहायो यस्मिन् कर्मणि यथा भवति तथा साहाय्यरहितं अधिकायितस्य आधिक्यं प्राप्तस्य ॥ १८ ॥

**सर्वतो विकिरतोऽपि कौमुदीं, यस्य शाम्यति न कालिमा हृदः ।**
**स स्पृशत्यपि न ते तमस्विनी-वल्लभः स्वपरभासि चिन्महः ॥१९॥**

(व्या०) सर्वत इति । सर्वतः सर्वपार्श्वतः कौमुदीं ज्योत्स्नां विकिरतोऽपि विकिरतीति विकिरन् तस्य विस्तारयितोऽपि यस्य चन्द्रमसः हृदो हृदयकालिमा न शाम्यति । स तमस्विनी वल्लभः तमस्विन्या रात्रेर्वल्लभः स्वामी चन्द्रः ते तव

चिन्महः चिदेव महस्तत् ज्ञानतेजः स्पृशति अपि न । किंविशिष्टं चिन्महः स्वपरभासि स्वस्य आत्मनः परस्य अन्यस्य भासि प्रकाशकम् ॥ १९ ॥

**जाड्यहेतुनि हिमर्तुसंकटे, याति याऽतिकृशतां रवेः प्रभा ।**
**तां गिरस्तव सदैव दिद्युतो, लज्जते बत सपत्नयन्न कः ॥ २० ॥**

(व्या०) जाड्य इति । हे नाथ या रवेः सूर्यस्य प्रभा कान्तिर्जाड्यहेतुनि जडस्य भावो जाड्यं जडत्वं तस्य हेतु कारणं तस्मिन् हिमर्तुसंकटे हिमर्तोः संकटं तस्मिन् सति अतिकृशतां याति तां प्रभां सदैव दिद्युतः ( दिद्युत् दद्-ज्जगज्जुहूवाक्प्राट्धीश्रीद्रूस्रूज्वायतस्तूकटप्रूपरिव्राट्भ्राजादयः क्विप् ५-२-८३ इ. सू. शीलादिसदर्थे क्विबन्तः दिद्युत् निपातः । ) द्योतते इति दिद्युत् तस्याः दीप्यमानायास्तव गिरो वाण्या बत इति वितर्के सपत्नयन् सदृशीकुर्वन् कः पुमान् न लज्जते अपि तु सर्वः कोऽपि लज्जते ॥ २० ॥

**बिभ्रता मतिमतीन्द्रियां त्वया, वस्तुतत्त्वमिह यन्निरौच्यत ।**
**नेतरेतदपरेण जन्तुना, दुर्वचं प्रतनुबुद्धितन्तुना ॥ २१ ॥**

(व्या०) बिभ्रता इति । हे नेतः स्वामिन् त्वया इह जगति अतीन्द्रियां (प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्थाः प्रथमाद्यन्तैः । ३-१-४७ इ. सू. तत्पुरुषः ।) इन्द्रियाणि अतिक्रान्ता तां इन्द्रियातीतां मतिं बुद्धिं बिभ्रता बिभर्तीति बिभ्रत् तेन धरमाणेन वस्तुतत्त्वं वस्तूनां तत्त्वं यत् निरौच्यत प्रोचे । एतत् वस्तुतत्त्वं अपरेण जन्तुना प्रतनुबुद्धितन्तुना प्रतनु कृशो बुद्धिरेव तन्तुर्यस्य तेन दुर्वचं (दु स्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् । ५-३-१३९ । इ. सू. दु पूर्वकवच्धातोः खल् प्रत्ययः ।) दुःखेन वक्तुमशक्यमित्यर्थः ॥ २१ ॥

**अस्तु वास्तवफलस्य वास्तु ते, वाग्लता त्वरितमेवमूचुषी ।**
**वासवेश्म निजमाश्रयेति सा, शासनं सपदि पत्युरासदत् ॥ २२ ॥**

(व्या०) अस्तु इति । सा सुमङ्गला निजं वासवेश्म वासस्य वेश्म तत् वासभवनं आश्रय इति अमुना प्रकारेण पत्युः श्रीऋषभदेवस्य शासनमादेशं आसदत् प्राप । किंविशिष्टा सुमङ्गला हे स्वामिन् ते तव वाग्लता वाग् एव

लता वाग्वल्ली वास्तवफलस्य वास्तवस्य फलं तस्य सम्यक्फलस्य वास्तु (वसन्ति अत्र इति वास्तु । वसेर्णिद्वा ७७४ । इ. उ. सू वसं निवासे इ. धातोः तुन् प्रत्ययः स च णित् णित्वात् वृद्धिः । ) स्थानं अस्तु भवतु एवं ऋजुषी उवाच इति ऋजुषी जल्पितवती ॥ २२ ॥

**दत्तदक्षिणभुजा निजासने, गर्भगे धरणीपाकशासने ।**
**सोदतिष्ठदतनुस्तनावनी-भृत्तटीललितहारनिर्झरा ॥ २३ ॥**

(व्या०) दत्त इति । सा सुमङ्गला धरणीपाकशासने धरण्याः पृथिव्याः पाकशासन इन्द्रस्तस्मिन् चक्रवर्तिनि गर्भगे गर्भं गच्छतीति गर्भगस्तस्मिन् उदरस्थे सति निजासने निजस्य आसनं तस्मिन् दत्तदक्षिणभुजा दक्षिणश्चासौ भुजश्च दक्षिणभुजः दत्तो दक्षिणभुजो यया सा सती उदतिष्ठत् उत्थिता । किंविशिष्टा सुमङ्गला अतनुस्तनावनीभृत्तटीललितहारनिर्झरा । न तनू अतनू स्थूलौ अतनू च तौ स्तनौ अतनुस्तनौ तौ एव अवनीभृतौ पर्वतौ अतनुस्तनावनीभृतौ तयोस्तट्यां तटे ललिताश्च ते हाराश्च ललिताः सविलासाः हारा एव निर्झरा यस्याः सा॥२३॥

**फुल्लमल्लिकमिदं वनं किमु, स्मेरकैरवगणं सरोऽथवा ।**
**एवमूहविवशा निशामयं-त्यभ्रमक्रमविकीर्णतारकम् ॥ २४ ॥**
**बिभ्यती स्खलनतः शनैः शनैः, प्रांजलेऽपि पथि मुञ्चती पदौ ।**
**अल्पकेऽपि भवनान्तरे गते, ग्लानवेन भवनान्तरीयिता ॥ २५ ॥**
**कौतुकाय दिविषत्पुरंध्रिभिः, स्वं तिरोहितवतीभिरग्रतः ।**
**शोध्यमानसरणिः शिरस्यथा, धीयमानधवलातपत्रिका ॥ २६ ॥**
**रत्नभित्तिरुचिराशिभासिते-नाध्वना ध्वनितनूपुरक्रमा ।**
**वायुनावसरवेदिनेव सा, दम्यमानगमनश्रमाऽचलत् ॥ २७ ॥**

**(चतुर्भिः कलापकम् )**

(व्या०) फुल्लमिति । अथानन्तरं सा सुमङ्गला रत्नभित्तिरुचिराशिभासितेन रत्नानां भित्तयस्तासां रुचयः कान्तयस्तासां राशिः समूहः तेन भासितेन दीपितेन अध्वना मार्गेण अचलत् । किंकुर्वती एवममुना प्रकारेण ऊहविवशा

ऊहेन विचारेण विवशा परवशा सती । अक्रमविकीर्णतारकं न क्रमः अक्रमः अक्रमेण विकीर्णा विक्षिप्तास्तारका यस्मिन् तत् अम्बराकाशं निशामयन्ती निशामयतीति निशामयन्ती पश्यन्ती एवमिति किं इदं फुल्लमल्लिकं फुल्ला: मल्लिका यस्मिन् तत् विकसितविचकिलकुसुमं किमु वनं वर्तते । अथवा स्मेरकैरवगणं स्मेरा: (स्म्यजसहिंसदीपकम्पकमनमोरः । ५–२–७९ । इ. सू. शीलादिसदर्थे स्मिधातो रप्रत्ययः । ) विकस्वराः कैरवाणां कुमुदानां गणाः समूहाः यस्मिन् तत् विकस्वरकुमुदसमूहं सरो वर्तते । पुनः स्खलनात् इति स्खलनतः बिभेतीति बिभ्यती सती प्रांजलेऽपि सरलेऽपि पथि मार्गे शनैः शनैः पदौ चरणौ मुञ्चती अल्पकेऽपि स्तोकेऽपि भवनान्तरे भवनस्य अन्तरं तस्मिन् गते सति स्तानवेन गतिलाघवेन भवनान्तरीयिता अन्यत् भवनं भवनान्तरं भवनान्तरमाचरती भवनान्तरीयिता । पुनः स्वमात्मानं तिरोहितवती आच्छादितवती । दिविषत्पुरन्ध्रिभीः दिविसीदन्तीति दिविषदो ( क्विप् । ५–१–१४८ । इ. सू. दिव्शब्दपूर्वसद्धातोः कर्तरि क्विप् । ) देवास्तेषां पुरन्ध्रयः ताभिः देवाङ्गनाभिः कौतुकाय अग्रतः शोध्यमानसरणिः शोध्यमाना सरणिर्मार्गो यस्याः सा विलोक्यमानमार्गा । अथ पुनः शिरसि मस्तके आधीयमानधवलातपत्रिका आधीयते इति आधीयमाना आधीयमाना धवला श्वेता आतपत्रिका यस्याः सा धार्यमाणश्वेतछत्रा ध्वनितनूपुरक्रमा ध्वनिते नूपुरे ययोस्तौ ध्वनितनूपुरौ ध्वनितनूपुरौ क्रमौ यस्याः सा । अवसरवेदिना इव अवसरं वेत्तीति अवसरवेदी तेन इव अवसरज्ञसदृशेन वायुना दम्यमानगमनश्रमा दम्यमानो गमनस्य श्रमो यस्याः सा निर्गम्यमानगमनश्रमा । २४ । २५ । २६ । २७ ॥

**कान्तमन्दिरमुपेत्य सा चिरा–शंसितार्थपरिपूरिताशया ।**
**सारसंमदमहाबलेरिता, स्वं निकेतनमियाय नौरिव ॥ २८ ॥**

**(व्या०)** कान्तमिति । सा सुमङ्गला कान्तमन्दिरं कान्तस्य स्वामिनो मन्दिरं उपेत्य प्राप्य अचिराशंसितार्थपरिपूरिताशया अचिरेण स्तोककालेन आशंसितः कथित अर्थः स्वप्नार्थलक्षणस्तेन परिपूरित आशयोऽभिप्रायो यस्याः सा

सुमङ्गला। नौपक्षे अर्थो द्रव्यं तेन परिपूरित आशयो मध्यं यस्याः सा। सारसंमदमहाबलेरिता सारः प्रधानो यः संमदो (संमदप्रमदौ हर्षे। ५-३-३३। इ. सू. अलन्त संमदशब्दो निपात्यते।) हर्षस्तस्य महता बलेन महास्थाम्ना ईरिता प्रेरिता। पक्षे महाबले वायुर्ज्ञेयः महावायुप्रेरिता नौरिव नौका इव स्वं निकेतनं आत्मीयं गृहमियाय जगाम ॥ २८ ॥

**तत्र चित्रमणिदीपदीधिति-ध्वस्यमानतिमिरे ददर्श सा।**
**पानशौंडमिव लुप्तचेतनं, सुप्तमन्तरखिलं सखीजनम् ॥ २९ ॥**

**(व्या०)** तत्रेति। सा सुमङ्गला तत्र तस्मिन् निकेतने गृहे पानशौंडमिव पानेन शौंडस्तं सुरापानमत्तमिव लुप्तचेतनं लुप्तं चेतनं ज्ञानं यस्य स तं अन्तर्मध्ये सुप्तं अखिलं समस्तं सखीनां जनः सखीजनस्तं ददर्श दृष्टवती। किंविशिष्टे निकेतने चित्रमणिदीपदीधितिध्वस्यमानतिमिरे चित्राश्चते मणीनां दीपाश्च आश्चर्यकररत्नदीपाः तेषां दीधितयः किरणास्तैः ध्वस्यमानं निराक्रियमाणं तिमिरमन्धकारो यस्मिन् तस्मिन् ॥ २९ ॥

**सोऽध्वगत्वचपलाङ्गसङ्गतो-न्मेषिघोषमणिमेखलादिभिः।**
**निद्रयाऽजगरितोऽपि जागरं, द्रागनीयत तया विना गिरम् ॥३०॥**

**(व्या०)** स इति। तया सुमङ्गलया स सखीजनः अध्वगत्वचपलाङ्गसङ्गतोन्मेषिघोषमणिमेखलादिभिः अध्वगस्य भावः अध्वगत्वं मार्गगत्वं तेन चपलं च तत् अङ्गं च शरीरं तस्मिन् संगता मिलिता या उन्मेषी घोषो यस्याः सा विकस्वरनादा मणीनां मेखला सा एव आदयस्तैः। गिरं वाणीं (विना ते तृतीया च। २-२-११५। इ. सू. विनायोगे गिरमित्यत्र द्वितीया।) विना द्राक् शीघ्रं जागरं अनीयत गृहीतः। किंविशिष्टः सखीजनः निद्रया जागरितोऽपि अजगरितः अजगरवदाचरितः ॥ ३० ॥

**तां ससंभ्रमसमुत्थितास्ततः, सन्निपत्य परिवव्रुरालयः।**
**उच्छ्वसज्जलरुहाननां प्रगे, पद्मिनीमिव मधुव्रतालयः ॥ ३१ ॥**

**(व्या०)** तामिति। ततस्ततोऽनन्तरमालयः सख्यः ससंभ्रमं संभ्रमेण

सह यथा भवति तथा समुत्थिताः सख्यः संनिपत्य संनिपतित्वा इति संनिपत्य समुदायं कृत्वा तां सुमङ्गलां परिवव्रु' परिवृण्वन्ति स्म। किंलक्षणां सुमङ्गलां उच्छ्वसज्जलरुहाननां जले रोहतीति जलरुहं उच्छ्वसत् च तत् जलरुहं उच्छ्वसज्जलरुहमिव आननं यस्याः सा तां विकसत्कमलसदृगमुखीम्। कामिव पद्मिनीमिव यथा मधुव्रतालय' मधु व्रतयन्ति भुञ्जते इति मधुव्रता (इत्युक्तं कृता। ३-१-४९। इ. सू. तत्पुरुषसमास।) भ्रमरास्तेषामालयो भ्रमरश्रेणय. प्रगे प्रभाते विकसत्कमलमुखीं पद्मिनीं परिवृण्वन्ति ॥ ३१ ॥

**ऊचिरे त्रिचतुराः पुरस्सरी-भूय भक्तिचतुरा रयेण ताः।**
**तां प्रणम्य वदनेन्दुमण्डला-भ्यासकुड्मलितपाणिपङ्कजाः ॥३२॥**

(व्या०) ऊचिरे इति। त्रिचतुरा. (सुज्वार्थे सङ्ख्या सङ्ख्येये सङ्ख्यया बहुव्रीहिः। ३-१-१९। इ सू त्रिचतुरा' इत्यत्र बहुव्रीहि समास। नञ्सुव्युपत्रेश्चतुरः। ७-३--१३१। इ. सू त्रिशब्दपूर्वकचतुरन्तात् बहुव्रीहेः अप् समासान्तः।) तिस्रो वा चतस्रो वा भक्तिचतुरा' भक्त्या चतुरास्ता आलयः सख्यः पुर'सरीभूय पुर सरन्तीति पुरःसराः ता' भूत्वा पुर सरीभूय अग्रे भूत्वा तां सुमङ्गलां प्रणम्य प्र नत्वा प्रणम्य रयेग वेगेन ऊचिरे ऊचु। किंलक्षणाः सख्यः वदनेन्दुमण्डलाभ्यासकुड्मलितपाणिपङ्कजा वदनमाननमेवेन्दो-श्चन्द्रस्य मण्डलं तस्याभ्यासे समीपे कुड्मलिते कोशीकृते पाणी हस्तावेव पङ्कजे अरविन्दे याभिस्ताः वदनेन्दु० पङ्कजा ॥ ३२ ॥

**एवमाजनुरसंस्तुतो भवे-द्यः स एव शयितो विमुच्यते।**
**उच्यते किमथवा तव प्रभु-र्नापरस्य परिभाषणोचितः ॥ ३३ ॥**

(व्या०) एवमिति। हे स्वामिनि यो जनः आजनु' (पर्यपाङ्बहिरच् पञ्चम्या ३-१-३२। इ. सू आङा सह अव्ययीभाव'।) आजनुष' आजन्म असंस्तुतः न संस्तुतः अपरिचितो जनो भवति। स एव जन एवं शयित सुप्तो विमुच्यते। अथवा तव किमुच्यते। प्रभु' स्वामी अपरस्य परिभाषणोचितः परिभाषणस्य उचितो योग्यो न भवति जल्पनयोग्यो न भवति ॥ ३३ ॥

**युक्तमेव यदि वा विनिर्मितं, सर्वविद्दयितया त्वया सखि ।**
**यत्तमोगुणजिता विमुच्य नो, रुच्यसद्म विकसन्मना गता ॥ ३४ ॥**

(व्या०) युक्तमिति । हे सखि यदि वा अथवा सर्वविद्दयितया सर्वं वेत्तीति सर्वविद् तस्य दयिता तया सर्वज्ञपत्न्या त्वया युक्तमेव योग्यमेव विनिर्मितं कृतम् । यत तमोगुणजिता· तमोगुणेन निद्रया जितास्ता नो अस्मान् विमुच्य त्वं विकसन्मना· विकसत विकस्वरं मनो यस्या· सा प्रफुल्लहृदया सती रुच्यसद्म (रुच्याऽव्यथ्यव्यवास्तव्यम । ५-१-६ । इ. सू. रुच्धातो· कर्तरि यो निपात्यते । रोचते इति रुच्य· ।) भर्तृगृहं गता ॥ ३४ ॥

**त्वामविद्म न वयं विनिर्यतीं, जातसिद्धिमिव ही प्रमद्वराः ।**
**मन्तुमेतमनपेतचेतना, दध्महे स्वहृदि शल्यवत्पुरा ॥ ३५ ॥**

(व्या०) त्वामिति । हे स्वामिनि ही इति खेदे वयं प्रमद्वरा· प्रमादिन्य· त्वां जातसिद्धिमिव जाता सिद्धिः दृष्टचावरणादिसिद्धिर्यस्या· सा तामिव विनिर्यती निर्गच्छन्तीं न विद्मः न ज्ञातवत्यः । एतं मन्तुमपराधं अनपेतचेतनाः न अपेतं अनपेतं चेतनं यासां ता वलितचेतना· सत्य· वयं स्वहृदि स्वस्य हृदये शल्यवत् शल्यमिव पुरा दध्महे धास्यामः । पुरा यावतोर्वर्तमाना इति सूत्रेण पुरायोगे भविष्यदर्थे वर्तमाना ॥ ३५ ॥

**विश्ववन्द्यवधुपारिपार्श्विको-ऽस्त्येव ते सततमप्सरोजनः ।**
**वेधसा हि वयमेव वञ्चिता, यत्कृता भवदुपासनाद्बहिः ॥ ३६ ॥**

(व्या०) विश्व इति । हे विश्ववन्द्यवधु विश्वस्य वन्द्य· पूज्य· तस्य वधू तस्याः संबोधने हे त्रिभुवनाधीशदयिते अप्सरोजन अप्सरसां जन· देवाङ्गनासमूह· सततं निरन्तरं ते तव पारिपार्श्विक परिपार्श्वे वर्तते इति समीपस्थोऽस्त्येव । हि निश्चितं वेधसा ब्रह्मणा वयमेव वञ्चिता· । यत् वयं भवदुपासनात् भवत उपासनं तस्मात् त्वदीयसेवनात बहि कृता विमुखीकृता· ॥ ३६ ॥

**कार्यमेतदजनिष्ट किं तवा-कस्मिकं विमलशीलशालिनि ।**
**यत्पुरा व्रजसि चाटुकोटिभि-र्भर्तृवेश्म तदगाः स्वयं यतः ॥ ३७ ॥**

(व्या०) कार्यमिति । हे विमलशीलशालिनि विमलं च तत् शीलं च विमलशीलं निर्मलशीलं तेन शालते इति विमलशीलशालिनी तस्याः संबोधनं हे निर्मलशीलशोभिते एतत्कार्यं तव किं आकस्मिकमुत्सुकमजनिष्ट जातम् । यत पुरा पूर्वं चाटुकोटिभिः चाटूना कोटयस्ताभिः भर्तृवेश्म भर्तुर्वेश्म तत् स्वामिगृहं व्रजसि यतो यस्मात्कारणात् । तत् स्वयमगा गतवती ॥ ३७ ॥

**तद्भविष्यति फलोदये स्फुटं, गूढचारिणि चिरादपि स्वयम् ।**
**किन्तु नः प्रकृतिचञ्चलं मनः–काललालनमियन्न सासहि ॥ ३८ ॥**

(व्या०) तद् इति हे गूढचारिणि गूढं चरतीति हे प्रच्छन्नगमने तत् कार्यं चिरादपि बहुकालतोऽपि स्वयमात्मना फलोदये फलस्य उदयस्तस्मिन् सति स्फुटं प्रकटं भविष्यति । किन्तु नोऽस्माकं मनश्चित्त प्रकृतिचञ्चलं प्रकृत्या स्वभावेन चञ्चलं चपलं सत् इयत् काललालनं कालस्य लालनं कालविलंबं न सासहि (डौ सासहि वावहि चाचलि पापति । ५–२–३८ । इ. सू. डचन्तो निपातः भृशं सहते इत्येवंशीलं सासहि । ) न सहते ॥ ३८ ॥

**सिञ्च न स्त्वमखिलाः स्वकार्यवाक्–शीकरैः समयभङ्गतापिताः ।**
**सर्वदैकहृदयं सखीगणं, मा पृथग्गणनयाऽवजीगणः ॥ ३९ ॥**

(व्या०) सिञ्च इति । त्वं समयभङ्गतापिताः समयस्य भङ्गेन तापिताः ताः मर्यादाभङ्गेन तापयुक्तानोऽस्मान् अखिलाः समस्ता सखी कार्यवाक्शीकरैः कार्यस्य वाग् सा एव शीकराः कार्यवचनरूपजलकणै सिञ्च । सर्वदा (किंयत्त-त्सर्वैकान्यात् काले दा । ७–२–९५ । इ. सू. कालेऽर्थे सर्वशब्दात् दाप्रत्ययः सर्वस्मिन् काले इति सर्वदा ।) निरन्तरं एकं हृदय यस्य स एकहृदयस्तं सखीनां गणः सखीगणस्तं सखीसमूहं पृथग्गणनया मा अवजीगणः मा अवगणय ॥३९॥

**सा सखीभिरिति भाषिता रमे–वोरुपद्मसणुपद्मवेष्टितम् ।**
**अध्यशेत शयनं समन्ततः, सन्निविष्टवरविष्टरावलि ॥ ४० ॥**

(व्या०) सा इति । सा सुमङ्गला सखीभिरिति अमुना पूर्वोक्तप्रकारेण भाषिता जल्पिता सती शयनं पल्यङ्कं अध्यशेत आश्रिता । किंलक्षणं शयनं

समन्ततः सर्वतः संनिविष्टवरविष्टरावलि वराणि च तानि विष्टराणि वरविष्टराणां प्रशस्यमञ्चिकागब्दिकामूढकसिंहपीठाद्यासनानां आवलि श्रेणिः संनिविष्टा वर-विष्टरावलिर्यस्मिन् तत् । सुमङ्गला काइव रमा इव लक्ष्मीरिव यथा रमा अणुप-द्मवेष्टितं अणूनि च तानि पद्मानि च अणुपद्मानि तैर्वेष्टितं तत् लघुकमलपरिवृतं उरुपद्मं बृहत्कमलमाश्रयति ॥ ४० ॥

**एकमूलकमलद्वयाभयो–स्तत्पदोरुपरि पेतुरुत्सुकाः ।**
**हेमहंसललनागरुच्छ्रियो, लालनाय शतशः सखीकराः ॥ ४१ ॥**

(व्या०) एक इति । शतश शतसंख्याका सखीकराः सखीनां कराः सखीहस्ताः उत्सुका (उदुत्सोरुन्मनसि । ७–१–१९२ । इ. सू उत्सुशब्दात् क ।) सन्तः लालनाय प्रतिपालनाय तत्पदो तस्या सुमङ्गलायाः पदो. पाद-योरुपरि पेतु पतिता । किंविशिष्टयोस्तत्पदो एकमूलकमलद्वयाभयोः एकमेव-मूलं ययोस्ते एकमूले एकमूले च ते कमले च तयोर्द्वयं तदिव आभातः तयोः। किंलक्षणा सखीकराः हेमहंसललनागरुच्छ्रिय हंसानां ललनाः हंसललना हंस्यः हेम्न सुवर्णस्य हेमललना. हंस्यस्तासां गरुतः पक्षास्तद्वत् श्री शोभा येषां ते हेमहंसललनागरुच्छ्रिय ॥ ४१ ॥

**पाणिपूरपरिमर्दमर्दना–हेतुमप्यपगतश्रमत्वतः ।**
**सालिपालिमरुणन्न तन्मनो–रङ्गभङ्गभयतोऽतिवत्सला ॥ ४२ ॥**

(व्या०) पाणि इति । सा सुमङ्गला तन्मनोरङ्गभङ्गभयत तासां सखीनां मनांसि तेषां रङ्ग आनन्दस्तस्य भङ्गात् भयतः अतिवत्सला सती अपगतश्रमत्वतः अपगतश्चासो श्रमश्च तस्य भाव अपगतश्रमत्वं तस्मात् आलिपालिं आलीनां पालिस्तं सखीगणं अर्दना हेतुं अर्दनाया पीडाया हेतु कारणं तं पाणिपूरमर्दं पाणीनां हस्तानां पूर समूहस्तस्य परिमर्दस्तं अरुणत् न न रुणद्धिस्म । रुधिधा-तोर्द्विकर्मकत्वम् ॥ ४२ ॥

**स्वमनीक्षणमुखामृषाभरे, भर्तृवेश्मगतिहेतुदां कथाम् ।**
**तासु सासनगतासु विस्तृत–श्रोत्रपात्रपरमामृतं व्यधात् ॥ ४३ ॥**

(व्या०) स्वप्न इति । सा सुमङ्गला आसनगतासु आसनं गता आसनगतास्तासु सखीषु उषाभरे उषाया भरतस्तस्मिन् रात्रिमध्यभागे स्वप्नवीक्षणमुखां स्वप्नानां वीक्षणं मुखं प्रमुखं यस्याः सा तां स्वप्नावलोकनप्रमुखां भर्तृवेश्मगतिहेतुदां भर्तुः स्वामिनोवेश्मगृहं तत्र गतिः तस्याः हेतुं ददातीति तां प्रियगृहगमनदायिनीं कथां विस्तृतश्रोत्रपात्रपरमामृतं विस्तृतानि यानि श्रोत्राण्येव पात्राणि तेषु परमममृतं परमामृतसमानां व्यधात् कृतवती ॥ ४३ ॥

**तोषविस्मयभवः सखीमुखा–दुद्ययौ कलकलः स कश्चन ।**
**अन्तरालयकुलायशायिभि–र्येन जागरितमण्डजैरपि ॥ ४४ ॥**

(व्या०) तोष इति । तोषविस्मयभवः तोषश्च विस्मयश्च तोषविस्मयौ ताभ्यां भवः हर्षविस्मयोत्पन्नः सखीमुखात् सखीनां मुखं तस्मात् स कश्चन कलकलः कोलाहलः उद्ययौ उदयं प्राप्तः। येन कलकलेन अन्तरालयकुलायशायिभिः अन्तरं च तत् आलयं च अन्तरालयं तस्मिन् गृहमध्ये कुलायो नीडस्तस्मिन् शेरते इति अन्तरालयकुलायशायिनस्तैः गृहमध्यनीडशयनशीलैः अण्डजैरपि अण्डात् जाता अण्डजाः पक्षिणस्तैरपि पक्षिभिरपि जागरितं जागर्यते स्म ॥ ४४ ॥

**स्वप्नमेकमपि सालसेक्षणा, किं विचारयितुमीश्वरीदृशम् ।**
**उल्लसत्तमसि यन्मनोगृहे, संचरन्त्यपि बिभेति भारती ॥ ४५ ॥**

(व्या०) स्वप्नमिति। सा अलसेक्षणा अलसे ईक्षणे यस्याः सा स्त्री ईदृशं स्वप्नमेकमपि विचारयितुमीश्वरी (अश्नोतेरीच्चादेः । ४४२ । इ. उ. सू. अश्–धातोर्वरट् प्रत्ययः आदेरस्य ईः टित्वात् ङीः । ) समर्था वर्तते अपि तु नैव । यन्मनो गृहे यस्य मन एव गृहं तस्मिन् भारती सरस्वती संचरंती अपि संचरतीति संचरन्त्यपि बिभेति । किंविशिष्टे यन्मनो गृहे उल्लसत्तमसि उल्लसत् तमः अज्ञानरूपान्धकारं यस्मिन् तत् तस्मिन् ॥ ४५ ॥

**वर्णयेम तव देवि कौशलं, यत्प्रकृत्यकृतिनीरुपेक्ष्य नः ।**
**देवदेववदनादनाकुलं, स्वप्नसूनृतफलं व्यबुध्यथाः ॥ ४६ ॥**

(व्या०) वर्णयेम इति । हे देवि वयं तव कौशलं वर्णयेम । यत् त्वं

प्रकृत्यकृतिनी प्रकृत्या अकृतिन्यस्ता स्वभावेन मूर्खा अस्मान् उपेक्ष्य देवदेववदनात देवानां देवो देवदेवः श्रीऋषभदेवस्तस्य वदनं तस्मात् अनाकुलं यथा भवति तथा स्वप्नमृतफल स्वप्नानां सूनृतं सत्यं फलं व्यबुध्यथाः ज्ञातवती ४६

**नाथवक्त्रविधुवाक्करोंभित–स्त्वत्प्रमोदजलधिः सदैधताम् ।**
**एवमालपितमालिभिर्वचः, शुश्रुवे श्रुतिमहोत्सवस्तया ॥ ४७ ॥**

(व्या०) नाथ इति । हे स्वामिनि त्वत्प्रमोदजलधिः तव प्रमोद एव जलधि त्वदीयहर्षसमुद्र सदा निरतरमेधतांवृद्धिं यातु । किंलक्षण प्रमोदजलधि–नाथवक्त्रविधुवाक्करोंभित नाथस्य स्वामिनो वक्त्रं मुखं तदेव विधुश्चन्द्रस्तस्य वाग्भिरेव करै किरणै उम्भित पूरित । आलिभि सखीभिरेवं आलपितं कथितं वचस्तया सुमङ्गलया शुश्रुवे श्रुतम् । किंलक्षणं वच. श्रुतिमहोत्सव महांश्चासौ उत्सवश्च महोत्सव श्रुत्योः कर्णयोर्महोत्सवः महोत्सवरूपम् ॥ ४७ ॥

**वाग्मिषादथ सुमङ्गला गला–यातहृन्नदजसंमदामृता ।**
**आदिशद्दशनदीधितिस्फुटी–भूतमुज्ज्वलमुखी सखीगणम् ॥ ४८ ॥**

(व्या०) वागिति। अथानन्तरं सुमङ्गला सखीगणं सखीनां गण सखीगणस्तं सखीसमूहमादिशत । किंलक्षणा सुमङ्गला वाग्मिषात वाचो मिषात गलायातहृन्नदजसमदामृता गले आयातमागतं हृदेव नदस्तस्माज्जात संमदो (संमदप्रमदौ हर्षे । ५–३–३३ । इ सू संपूर्वकमद्धातो अलन्तो निपात । ) हर्ष एव अमृतं गलायातं हृन्नदजसंमदामृतं यस्या सा । पुन उज्ज्वलं मुखं यस्या. सा उज्ज्वलमुखी । ( नखमुखादनाम्नि । २–४–४० ॥ इ सू स्त्रियां उज्ज्वलशब्दपूर्वकमुखशब्दात् ङीर्वा) किंलक्षणं सखीगणं दशनदीधितिस्फुटं दशनानां दन्तानां दीधितय किरणा तै स्फुटीभूत प्रकटीभूतस्तम् ॥ ४८ ॥

**रामणीयकगुणैकवास्तुनो, वस्तुनः सुकरमर्जनं जने ।**
**भाविविप्लवनिवारणं पुन रस्य दुष्करमुशन्ति सूरयः ॥ ४९ ॥**

(व्या०) रामणीयक इति । हे हला रामणीयकगुणैकवास्तुन रमणीयस्य भावो रामणीयक ( योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ् । ७–१–७२ । इ.

सू. भावे रमणीयशब्दात् अकञ् ।) तस्य गुणानां एकं वास्तु स्थानं तस्य वस्तुनः अर्जनमुपार्जनं जने लोके सुकरं सुखेन क्रियते इति सुकरं सुलभमस्ति। पुनस्तस्य वस्तुनो भाविविप्लवनिवारणं भविष्यन्तीति भाविनः भाविनश्चते विप्लवाश्च नाशा-स्तेषां निवारणं सूरयो विद्वांसो दुष्करं दुःखेन क्रियते इति दुष्करं (दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् । ५-३-१३९ । इ. सू. कृच्छ्रार्थदु पूर्वकृगातो. खल् प्रत्ययः ।) दुर्लभं उशन्ति कथयन्ति ॥ ४९ ॥

**अर्जिते न खलु नाशशङ्कया, क्लिश्यमानमनसस्तथा सुखम् ।**
**जायते हृदि यथा व्यथाभरो, नाशितेऽलसतया सुवस्तुनि ॥ ५० ॥**

(व्या०) अर्जिते इति । हे हला. सुवस्तुनि शोभने वस्तुनि अर्जिते उपार्जिते सति खलु निश्चितं पुरुषस्य तथा सुखं न जायते । यथा अलसतया अलसस्य भावोऽलसता तया सुवस्तुनि नाशिते सति व्यथाभरो व्यथायाः पीडाया भरः समूहो जायते । किंविशिष्टस्य पुरुषस्य नाशशङ्कया नाशस्यशङ्का नाशशङ्का तया क्लिश्यमानमनसः क्लिश्यते इति क्लिश्यमानं मनः यस्य स तस्य क्लिश्यमान-मनसः पीडयमानमनस ॥ ५० ॥

**दृष्टनष्टविभवेन वर्ण्यते, भाग्यवानिति सदैव दुर्विधः ।**
**जन्मतो विगतलोचनं जनं, प्राप्तलुप्तनयनः पनायति ॥ ५१ ॥**

(व्या०) दृष्ट इति । दृष्टनष्टविभवेन आदौ दृष्टः पश्चान्नष्टः दृष्टनष्टः (पूर्व-कालैकसर्वजरत् पुराणनवकेवलम् । ३-१-९७ । इ सू दृष्टनष्ट इत्यत्र पूर्व-कालेऽर्थे कर्मधारयसमास ।) दृष्टनष्टो विभवो यस्य तेन पुरुषेण सदैव दुर्विधः दरिद्रो भाग्यवान् भाग्यमस्यास्तीति भाग्यवानिति वर्ण्यते प्राप्तलुप्तनयनः आदौ प्राप्ते पश्चात् लुप्ते नयने यस्य सः पुरुषो जन्मतो (अहीयरुहोपादाने । ७-२-८८ । इ. सू पञ्चम्यन्तात् जन्मन् शब्दात् तसुर्वा ।) जन्मनः इति जन्म यावत् विगते लोचने नेत्रे यस्य तं गतनेत्रं अन्धजनं पनायति । (गुपौधूपविच्छिपणिपनेराय । ३-४-१ । इ. सू पन् धातोः स्वार्थे आयप्रत्यय ।) स्तवीति ॥ ५१ ॥

**हारि मातदिदमद्य निद्रया, स्वप्नवस्तु मम संमदास्पदम् ।**
**तत्प्रमादमवधूय रक्षितुं, यामिकीभवत यूयमालयः ॥ ५२ ॥**

(व्या०) हारि इति । हे हलास्तत् तस्मात् कारणात् संमदास्पदं संमदस्य आस्पदं हर्षस्थानमिदं मम स्वप्नवस्तु स्वप्नस्य वस्तु निद्रया अद्य मा हारि-माहार्यताम् । हे आलयः हलाः तत स्वप्नवस्तु प्रमादमवधूय त्यक्त्वा रक्षितुं यूयं यामिकीभवत आरक्षकीभवत ॥ ५२ ॥

**स्वप्नवस्तु दयतेऽप्यगोचरं, दत्तमप्यहह हन्ति तामसी ।**
**संनिरुध्य नयनान्यचेतसां, चेष्टते जगति सा यदृच्छया ॥ ५३ ॥**

(व्या०) स्वप्न इति । सा तामसी तमोमयी रात्रिः अचेतसां न विद्यते चेतो येषां ते तेषां पुरुषाणां नयनानि लोचनानि संनिरुध्य जगति विश्वे चेष्टते या रात्रिः अगोचरं न गोचरं अगोचरमपि स्वप्नवस्तु स्वप्नस्य वस्तु यदृच्छया स्वेच्छया दयते दत्ते । अहह इति खेदे दत्तमपि वस्तु हन्ति ॥ ५३ ॥

**वासरे सरसिजस्य जाग्रतो, गर्भमन्दिरमुपेयुषीं श्रियम् ।**
**शर्वरीसमयलब्धविक्रमा, लुम्पतीयमनिमित्तवैरिणी ॥ ५४ ॥**

(व्या०) वासरे इति । इयं निद्रा अनिमित्तवैरिणी न विद्यते निमित्तं यस्याः सा अनिमित्ता अनिमित्ता चासौ वैरिणी च निर्निमित्तवैरकारिणी वर्तते । या निद्रा शर्वरीसमयलब्धविक्रमा शर्वर्याःसमये लब्धो विक्रमो यया सा रात्रिसमयलब्धपराक्रमा सती वासरे दिवसे जाग्रतः सरसिजस्य विकसितकमलस्य गर्भमन्दिरं गर्भस्य मन्दिरं तत् उपेयुषीं नपेयाय इति उपेयुषीं ( वेयिवदनाश्वदनूचानम् । ५-२-३ । इ. सू. उपेयिवस् क्वस्वन्तोनिपातः । अधातूदृदितः । २-४-२ । इ. सू स्त्रियां ङी । क्सुष्मतौ च । २-१-१०५ । इ. सू. ङीपरे वस उष् ।) तां गतवर्ती श्रियं लक्ष्मीं लुम्पति ॥ ५४ ॥

**यद्यसौ भुवनवञ्चनोत्सुका, स्वप्नराशिमपहृत्य तादृशम् ।**
**दास्यते किमपि गर्हितं तदा, पत्तने वसति लुण्टितास्मि हा ॥५५॥**

(व्या०) यदीति । यदि असौ निद्रा भुवनवञ्चनोत्सुका भुवनस्य वञ्चने

उत्सुका स्वप्नराशिं स्वप्नानां राशिस्तं स्वप्नसमूहं अपहृत्य अपहृत्वा इति तादृशं किमपि गर्हितं स्वप्नं दास्यते तदा हा इति खेदे वसति पत्तने लुण्टिता अस्मि ॥

**सर्वसारबहुलोहनिर्मितै–र्युष्मदाननिषङ्गनिर्गतैः ।**
**वाक्शरैः प्रसरमेत्य धर्मतो, धर्षितेयमिह मासदत्पदम् ॥ ५६ ॥**

(व्या०) सर्व इति । इयं निद्रा इह मयि विषये पदं स्थानं मासदत् मा प्राप्नोतु । किंविशिष्टा निद्रा धर्मत धर्मात इति धर्मत –पुण्यत धनुषो वा वाक्शरैः वाच एव शरास्तै वचनबाणैः प्रसरं एत्य प्राप्य । किंलक्षणैर्वाक्शरैः सर्वसारबहुलोहनिर्मितैः सर्वेषु सार उत्कृष्ट सर्वसार बहुलश्चासौ ऊहश्च विचारः बहुलोहः सर्वसारश्चासौ बहुलोहश्च तेन निर्मितैः पक्षे सर्वसारमयं बहुलोहं तेन निर्मितैः निष्पादितैः । पुनः युष्मदाननिषङ्गनिर्गतैः युष्माकं आननं मुखमेव निषङ्गस्तूणीरस्तस्मात् निर्गतैः भवतीनां मुखरूपतूणकेभ्यो निसृतैः ॥ ५६ ॥

**तत्तदुत्तमकथातरङ्गिणी–भङ्गिमज्जनकसज्जचेतसा ।**
**नैशिकोऽपि समयो मयोच्यतां, वासरः स्वरसनष्टनिद्रया ॥ ५७ ॥**

(व्या०) तदिति । तत् तस्मात् कारणात् स्वरसनष्टनिद्रया स्वरसेन नष्टा निद्रा यस्याः सा तया स्वभावगतनिद्रया मया नैशिकोऽपि निशायां भवो नैशिकः (निशाप्रदोषात् । ६–३–८३ । इ. सू. शैषिके भवेऽर्थे निशाशब्दात् इकण् वा णित्वात् वृद्धिः । ) रात्रिसंबंधी अपि समयः वासरो दिवस कथ्यताम् ॥ किंविशिष्टयामया तत्तदुत्तमकथातरङ्गिणीभङ्गिमज्जनकसज्जचेतसा ताश्च ताश्च उत्तमकथा एव तरङ्गिण्यो नद्यस्तासां भङ्गयः कल्लोलास्तेषु मज्जनके स्थाने सज्जं सबलं चेतो हृदयं यस्याः सा तया ॥ ५७ ॥

**स्वप्नभङ्गभयकम्प्रमानसां, मां विबोध्य सरसोक्तियुक्तिभिः ।**
**जाग्रतोऽस्ति नहि भीरितिश्रुति–र्नाथिपीष्ट चरितार्थतां हलाः ॥५८॥**

(व्या०) स्वप्न इति । हे हला इति श्रुतिश्चरिताथतां चरितार्थस्य भावस्तां सत्यार्थतां नाथिपीष्ट । इतीति किंजाग्रतो भीर्न हि अस्ति । किं कृत्वा स्वप्नभङ्ग–भयकम्प्रमानसां स्वप्नानां भङ्गात् भयेन कम्प्रं (स्म्यजसहिंसदीपकम्पकमनमोर ।

५–२–७९ । इ. सू. शीलादिसदर्थे कम्प्धातो.रप्रत्ययः ।) मानसं यस्याः सा तां मां सरसोक्तियुक्तिभिः रसेन सह वर्तन्ते इति सरसाः ताश्च ता उक्तयश्च तासां युक्तयस्ताभिर्विबोध्य जागरयित्वा ॥ ५८ ॥

**एवमूचुषि विभोः परिग्रहे, विग्रहे घनरुचिः सखीगणः ।**
**धर्मधामगुणगीर्णवाक्शरा–सारमारभतमारभङ्गिवित् ॥ ५९ ॥**

(व्या०) एवमिति । सखीगणः सखीनां गणः सखीसमूहः धर्मधामगुणगीर्णवाक्शरासारं धर्मः पुण्यं धनुर्वा धाम स्थानं येषां ते धर्मधामानः एवंविधा ये गुणाः विनयादयः प्रत्यञ्चा वा तेभ्यो गीर्णा निसृता वाच एव शराः तेषामासारं वेगवद्वृष्टिमारभत । क सति विभोः स्वामिनः परिग्रहे कलत्रे एवं पूर्वोक्तप्रकारेण ऊचुषि उवाच इति ऊचिवान् तस्मिन् उक्तवति । किंविशिष्टः सखीगणः विग्रहे घनरुचिः घना रुचिः कान्तिर्यस्य सः बहुकान्तिः पक्षे विग्रहे युद्धे घनाभिलाषः। पुनः मारभङ्गिवित् मारः कंदर्पस्तस्य भङ्गिं विच्छित्तिं वेत्तीति ॥ ५९ ॥

**प्रागपि प्रचुरकेलिकौतुकी, सोऽदसीयवचसाऽभृशायत ।**
**नीरनाडियुजि किं न वाक्पता–वेति वृष्टिघनतां घनाघनः ॥६०॥**

(व्या०) प्रागिति । स सखीगणः अदसीयवचसा अमुष्या इदं अदसीयं च तत् वचश्च तेन अमुष्याः सुमङ्गलाया वचनेन अभृशायत ( च्व्यर्थे भृशादेः स्तोः ३–४–२९ । इ. सू. च्व्यर्थे भृशशब्दात् वा क्यङ् ।) प्रगल्भो बभूव । किंलक्षणः सखीगणः प्रागपि अग्रेऽपि प्रचुरकेलिकौतुकी बहुक्रीडाविषये कौतुकवान् । नीरनाडियुजि नीरस्य नाड्या युज्यते तस्मिन् जलनाडियुक्ते वाक्पतौ वाचां पतिः तस्मिन् बृहस्पतौ घनाघनो ( चराचर चलाचल पतापत वदावद घनाघन पाटूपटं वा । ४–१–१३ । इ सू. घनाघनशब्दो निपातः ।) मेघः वृष्टिघनतां वृष्ट्यायुक्तोघनस्तस्य भावो वृष्टिघनता तां किं न एति न याति अपि तु यात्येव ॥ ६० ॥

**सुश्रुताक्षरपथानुसारिणी, ज्ञातसंमतकृताङ्गिकक्रिया ।**
**आत्मकर्मकलनापटुर्जगौ, कापि नृत्यनिरता स्वमार्हतम् ॥ ६१ ॥**

(व्या०) सुश्रुत इति । कापि सखी नृत्यनिरता नृत्ये निरता सती स्वमात्मानं आर्हतं (देवता । ६–२–१०१ । इ. सू. देवता अर्थे अर्हत् शब्दात् अण् प्रत्ययः । ) जैनं जगौ । किंविशिष्टा सखी सुश्रुताक्षरपथानुसारिणी सुष्ठु अत्यर्थं श्रुतः कर्णगोचरीकृत अक्षराणां पन्थाः अक्षरपथो (ऋक् पूः पथ्यपोऽत् । ७–३–३६ । इ. सू. अक्षरपूर्वकपथिन् शब्दात् अत् समासान्तः ।) वर्णमार्गस्तमनुसरतीत्येवंशीला । यादृग् गीतं वाद्यं तादृग् नृत्यमपि स्यात् । पुन ज्ञातसंमतकृताङ्गिकक्रिया आदौ ज्ञाता पश्चात् संमता इति ज्ञातसंमता ( पूर्वकालैकसर्वजरत्पुराणनवकेवलम् । ३–१–९७ । इ. सू. ज्ञातसंमता इत्यत्र पूर्वकाले कर्मधारयः ।) आदौ ज्ञातसंमता पश्चात् कृता आङ्गिकी अङ्गसंबंधिनी क्रिया यया सा । पूर्वं गीतवाद्यस्वरूपं ज्ञातं पश्चात् सम्यगवबुद्धं तदनुमानेन अङ्गसंबंधिनी क्रिया कृतेति भावः । पुन आत्मकर्मकलनापटुः आत्मन कर्मणो नृत्यरूपकर्मणः कलनायां कर्तव्ये पटु पतिष्ठा या आर्हती भवति सा तु एवंविधा सुष्ठु शोभनं श्रुतं सिद्धान्तस्तेन अक्षरपथं मोक्षमार्गं अनुसरतीत्येवंशीला । ज्ञाता सम्यग्ज्ञानेन संमता सम्यक्दर्शनेन कृता सम्यक्चरित्रेण आङ्गिकी द्वादशाङ्गसंबंधिनी क्रिया यया सा । आत्मा च जीवः कर्माणि च तेषां कलनायां पटुः । इति जैनम् ।

**सद्गुणप्रकृतिराप चापलं, कापि कापिलमताश्रयादिव ।**
**रङ्गयोग्यकरणौघलीलया, साक्षितामुपगते तदात्मनि ॥ ६२ ॥**

(व्या०) सदिति । कापि सखी तदात्मनि तस्याः आत्मा तस्मिन् साक्षितां ( साक्षाद्द्रष्टा । ७–१–१९७ । इ. सू. साक्षात् इति अव्ययात् द्रष्टा इत्यर्थे इन् प्रत्ययः । प्रायोऽव्ययस्य । ७–४–६५ । इ. सू. साक्षात् इत्यत्र अन्त्यस्वरादेर्लुक् । साक्षात् द्रष्टा इति साक्षी साक्षिणोभावः साक्षिता ताम् ) सम्यक्परिज्ञानतया साक्षित्वं उपगते प्राप्ते सति । रङ्गयोग्यकरणौघलीलया रङ्गो रङ्गभूमिस्तस्मिन् योग्यानां करणानां उत्पतनपतनादिकानां ओघ समूहस्तस्य लीलया चापलं चपलस्य भावश्चापलं तत् चपलत्वं आप प्राप । किंविशिष्टा सखी सद्गुणप्रकृतिः सन्तो गुणा विनयादिगुणा यस्यां सा सद्गुणा प्रधानविनयादिगुणा

प्रकृतिः स्वभावो यस्याः सा सद्गुणप्रकृतिः । उत्प्रेक्षते कापिलमताश्रयादिव कपिलेन प्रोक्तं कापिलं (तेन प्रोक्ते । ६–३–१८१ । इ. सू. कपिलशब्दात् प्रोक्तेऽर्थे अण् णित्वात् आदिस्वरवृद्धिः ।) कापिलं च तत् मतं च तस्य आश्रयात् इव या कापिलमतं सांख्यमतं आश्रयति सापि एवंविधा सांख्यमते सत्त्वरजस्तमोलक्षणास्त्रयो गुणा सत्त्वरजस्तमोगुणानां साम्यावस्था प्रकृतिः प्रधानापरपर्याया उच्यते । सैव सर्वं व्यापारं प्रपञ्चयति। आत्मा तु साक्षिमात्रं। अकर्ता अभोक्ता निर्गुणः आत्मा कपिलदर्शने इति वचनात । सद्गुणा विद्यमानसत्त्वरजस्तमोलक्षणा गुणाः प्रकृतिःप्रधानम्। रङ्गस्य हर्षस्य योग्यानां करणानामिन्द्रियाणां ओघ समूहस्तस्य लीलया चापलं चपलत्वं प्राप। यथा प्रकृतेर्महान् महतोऽहंकारः अहंकारात् पञ्चेद्रियाणि इत्यादि क सति तदा तस्मिन्नवसरे आत्मनि साक्षितां अकर्तृत्वात् साक्षिमात्रं प्राप्ते सति । यथा नृपे सभायां निविष्टे विलोकयति सति नृत्यकी नृत्यं करोति तथा अत्रापि ज्ञेयम् ॥ इति सांख्यमतम् ।

**तां विधाय शुचिरागसंभव–न्मूर्च्छनाभिरुपनीतमूर्च्छनाम् ।**
**सौगतं ध्वनिगतं तदुद्भवा–भावदूषणमलुप्त काचन ॥ ६३ ॥**

(व्या०) तामिति । काचन स्त्री सौगतं (तेन प्रोक्ते। ६–३–१८१ । इ. सू. सुगतशब्दात प्रोक्तेऽर्थे अण् णित्वात् वृद्धि ।) सुगतप्रणीतं ध्वनिगतं शब्दगतं तदुद्भवाभावदूषणं तस्मात् उद्भवति इति अस्य अभावः स एव दूषणं तत् अलुप्त लुम्पतिस्म । किंकृत्वा शुचिरागसंभवन्मूर्च्छनाभिः शुचिः पवित्रो यो रागः श्रीरागादिः तस्मात् संभवन्तीभिरेकविंशतिमूर्च्छनाभिः तां सुमङ्गलां उपनीतमूर्च्छनां उपनीता मूर्च्छना यस्याः सा तां प्राप्तमोहां विधाय कृत्वा । तथा च बौद्धमते सुगतो देवः क्षणक्षयिकं च विश्वं क्षणक्षयत्वात् अमुकममुकादुत्पद्यते इति न वक्तव्यम् । यतो यो यत्रैव स तत्रैव च यो यदैव तदैव सः । न देशकालयोर्व्याप्तिर्भावानामिह विद्यते । यदि रागात् संभवन्तीभिर्मूर्च्छनाभिस्तस्याः सुमङ्गलाया मूर्च्छना जाता तदा रागस्य क्षणक्षयत्वं नास्ति । यदि रागः क्षयी स्यात् तदा ततो मूर्च्छना कथमुत्पद्यते । अतः कारणात् ध्वनेः शब्दस्य तस्मा-

दुद्भवस्य अभावः । यथा वन्ध्यायाः पुत्राभावदूषणं तथात्रापि तदुद्भवाभावदूषणं लुप्तमिति भाव· । रागोध्वनिः तदुद्भवाश्च मूर्च्छना ज्ञेयाः ॥ इति बौद्धमतम् ॥

**तत्त्वषोडशकतोऽधिकं स्वकं, गीततत्त्वमुपनीतनिर्वृति ।**
**व्यञ्जतीह विधिनाच्युते न का–प्यक्षपादमतमन्यथाकृत ॥ ६४ ॥**

(व्या०) तत्त्व इति । कापि स्त्री अक्षपादमतं अक्षपादस्य मतं तत् अन्यथा अकृत वैपरीत्येन करोतिस्म । नैयायिकमते हि प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त सिद्धान्त अवयव तर्क निर्णयवादजल्पवितंडा हेत्वाभास छलजातिनिग्रहस्थानानि षोडश तत्त्वानि सृष्टिसंहारकर्ता मोक्षदो देवो महेश· । एवं च सति वैपरीत्यं कथ्यते । किं कुर्वती कापि स्त्री तत्त्वषोडशकतः तत्त्वानां षोडशकतः अधिकं स्वकीयं गीतं व्यञ्जयन्ती प्रकटयन्ती । किंविशिष्टं गीतं अच्युतेन अस्खलितेन विधिना उपनीता निर्वृतिः समाधिर्येन तत् । वैपरीत्यपक्षे षोडशतत्त्वेभ्योऽधिकं सप्तदशं तत्वं कथयति । अच्युतेन कृष्णेन विधिना ब्रह्मणा उपनीता ढौकिता निर्वृतिर्मोक्षो यत्र एवं वैपरीत्यं ज्ञेयम् ॥ ६४ ॥ इति नैयायिकमतम् ।

**विश्रुतस्वरगुणश्रुतेः परं, या प्रपञ्चमखिलं मृषादिशत् ।**
**मूर्च्छनासमयसंकुचद्दृशां, सा न किं परमहंसतां गता ॥ ६५ ॥**

(व्या०) विश्रुत इति । सा स्त्री किं सतां परमहं परं च तत् महश्च तत् प्रकृष्टोत्सवं न गता अपि तु गता प्राप्ता । अथवा परमहंसतां परमहंसस्य भावः परमहंसता तां मीमांसकभेदं न गता अपि तु गतैव । यत·—'चत्वारो भगवद्भेदाः कुटीचरवहूदकौ । हंस· परमहंसश्चाधिकोऽमीषु पर· परः' ॥१॥ एके मीमांसका भट्टाः एके प्राभाकराः । भट्टानां षट् प्रमाणानि प्राभाकराणां पञ्च प्रमाणानि । भट्टा· प्राभाकरा कर्ममीमांसका वेदवादिनः परे च वेदान्तब्रह्ममीमांसकाः इत्यादि मीमांसकमतस्वरूपं ज्ञेयम् । अथ काव्यार्थः कथ्यते या सतां परमहंगता सा किंविशिष्टा वर्तते । या स्त्री मूर्च्छनासमये संकुचन्त्यौ दृशौ येषां ते मूर्च्छनासमयसंकुचद्दृशस्तेषां विश्रुतस्वरगुणश्रुतेः विश्रुता विख्याता ये स्वराः सारिगमपधनीरूपाः मन्द्रमध्यमतराः तेषा गुणा माधुर्यादय· सङ्गीतोक्तास्तेषां श्रुतेः श्रवणात्

परमन्यमखिलं समस्तं प्रपञ्चं देवतादिपौरुपेयशास्त्रादिविस्ताररूपं मृषा अलीकं आदिशत् । गीतश्रोतारस्तल्लयलीनत्वेन गीतमेव शुश्रुवु इति भावार्थः । परमहंसगतिपक्षे या स्त्री विश्रुता विख्याता. स्वरा उदात्तानुदात्तस्वरितरूपा. वेदोच्चारविशेषा गुणा वेदोक्ता । कारिरीं निर्वपेत् वृष्टिकामः अग्निहोत्रं जुहुयात् स्वर्गकामः इत्यादिका यस्याः सा एवंविधा श्रुतिर्वेदस्तस्या परमन्यं अखिलं प्रपञ्चं देवतादिपौरुपेयशास्त्रादिविस्ताररूपं मृषा अलीकं आदिशत् । तेषां मते वेदानामेव तत्त्वरूपत्वात् । तन्मते देवता अपि मंत्रमय्यो मन्यन्ते ॥ ६५ ॥ इति मीमांसकमतम् ।

**आत्मनः परभवप्रसाधना–भासुरामिषनिषेधिनैपुणा ।**
**गीःपतेर्मतमतीन्द्रियार्थवि–त्तत्र काचिदुचितं व्यधाद् वृथा ॥ ६६ ॥**

(व्या०) आत्मन इति । काचित् स्त्री गी पतेश्चार्वाकस्य मतं तत्र सुमङ्गलाग्रे उचितं वृथा निष्फलं व्यधात् कृतवती । चार्वाकमते इन्द्रियार्था एव वहु मन्यन्ते । अणुत्तं भोयणं सुच्चा इत्यादिवचनात् । पिब खाद च चारुलोचने, यदतीतं वरगात्रि तन्न ते । नहि भीरु गतं निवर्तते समुदयमात्रमिदं कलेवरम् ॥१॥ एतावानेव लोकोऽयं, यावानिन्द्रियगोचर । भद्रे वृकपदं पश्य यद्वदन्ति बहुश्रुता ॥२॥ इत्याद्यागम तन्मते चात्मन परभवो न मन्यते । इत्यादियुतं चार्वाकमतम् । सा एवंविधं तन्मतं निराकार्षीत् । सा कथंभूता आत्मनः परभवप्रसाधनाभासुरा आत्मन स्वस्य परेभ्यो भवा स्नानशीर्षग्रथनादिसंभवा प्रसाधना अलङ्करणं तया भासुरा (भञ्जिभासिमिदो धुरः । ५–२–७४ । इ. सू शीलादिसदर्थे भासूधातोः धुरप्रत्यय ।) देदीप्यमाना । पुनश्चामिषनिषेधिनैपुणा मिषं दम्भस्तस्य निषेधि निषेधकारकं नैपुणं चातुर्यं यस्या सा । पुन. अतीन्द्रियार्थवित् इन्द्रियमतिक्रान्ता अतीन्द्रियाः (प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्था प्रथमाद्यन्तैः । ३–१–४७ । इ. सु क्रान्ताद्यर्थे द्वितीयातत्पुरुष ।) ते च ते अर्थाश्च तान् स्वर्गनरकद्वीपसमुद्रकर्म्मजीवादिपदार्थान् वेत्तीति अतीन्द्रियार्थवित् । (इस्युक्तं कृता । ३–१–४९ । इ. सू. नित्य तत्पुरुष. ।) सव्वो लोगालोगो सज्झायचियस्स पच्चक्खे इत्यागमात् । चार्वाकमतनिराकरणपक्षे तु सा कथंभूता

आत्मनो जीवस्य परभवस्य स्वर्गनरकादिरूपस्य प्रसाधनं स्थापनं तेन आभातीति परभवप्रसाधनाभा । पुनः कथंभूता सा सुरामिषनिषेधिनैपुणा सुरा च मदिरा आमिषं च मांसं सुरामिषे तयोर्निषेधि नैपुणं यस्याः सा एतेन पिब खाद चारुलोचने यदतीतं वरगात्रि तन्न ते । नहि भीरु गतं निवर्तते समुदयमात्रमिदं कलेइत्यादिवचनं निराकृतम् । अतीन्द्रियार्थवित् अतिक्रान्तानि इन्द्रियाणि येन स एवंविधो यो धर्मार्थकाममोक्षेषु सार इन्द्रियगृद्धिरसरहितो धर्मस्तं वेत्ति इति । तत्र धर्मे निपुणा ॥ ६६ ॥ इति चार्वाकमतम् ।

**तां प्रवीणहृदयोपवीणयं–त्येकतानमनसं पुरः परा ।**
**निर्ममे खररवं स्ववल्लकी–दण्डमेव मृदुभास्वरस्वरा ॥ ६७ ॥**

(व्या०) तामिति । प्रवीणहृदया प्रवीणं कुशलं हृदयं यस्याः सा परा अन्या स्त्री स्ववल्लकीदण्डमेव स्वस्याः वल्लक्या दंडस्तमेव आत्मीयवीणासत्कदण्डमेव खररवं खरःरवो यस्य तं कठोरशब्दं निर्ममे चकार । किंकुर्वती पुरोऽग्रे एकतानमनसं एकतानं मनो यस्याः सा तां एकचित्तां सुमङ्गला उपवीणयन्ती वीणया गायन्ती । किंलक्षणा मृदुभास्वरस्वरा मृदुश्चासौ भास्वरश्च मृदुभास्वरः (स्थेशभासपिसकसोवरः । ५–२–८१ । इ. सू. शीलादिसदर्थे भासधातोर्वरप्रत्ययः । ) सुकुमालदेदीप्यमानः स्वरो यस्याः सा मृदुभास्वरस्वरा ॥ ६७ ॥

**अन्यया ऋषभदेवसद्गुण–ग्रामगानपरया रयागता ।**
**लभ्यते स्म लघु तामुपासितुं, किं न किन्नरवधूः स्वशिष्यताम् ॥६८॥**

(व्या०) अन्यया इति । अन्यया स्त्रिया किन्नरवधूः किन्नरस्य वधूर्भार्या स्वशिष्यतां स्वस्यात्मनः शिष्यस्य भावस्तां आत्मीयच्छात्रत्वं किं न लभ्यते ( स्मे च वर्तमाना । ५–२–१६ । इ. सू. स्मयोगे लभधातोः भूतेऽर्थे वर्तमाना । ) स्म न प्रापिता अपि तु प्रापितैव । किंविशिष्टा किन्नरवधूः लघु शीघ्रं तां सुमङ्गलां उपासितुं सेवितुं रयागता रयेण वेगेन आगता । किंविशिष्टया अन्यया ऋषभदेवसद्गुणग्रामगानपरया सन्तश्चते गुणाश्च सद्गुणाः ऋषभदेवस्य सद्गुणाः कुलीन १ शीलवंत २ वयस्थ ३ शौचवंत ४ सततव्यय ५ प्रीतिवंत ६ सुराग ७

सावयववंत ८ प्रियंवद ९ कीर्तिवंत १० त्यागी ११ विवेकी १२ शृङ्गारवंत अभिमानी १४ श्लाघ्यवंत १५ समुज्ज्वलवेष १६ सकलकलाकुशल १७ सत्यवंत १८ प्रिय १९ अवदान २० सुगंधप्रिय २१ सुवृतमंत्र २२ क्लेशसह २३ प्रदाधपथ्य २४ पंडित २५ उत्तमसत्त्व २६ धर्म्मित्व २७ महोत्साही २८ गुणग्राही २९ सुपात्रग्राही ३० क्षमी ३१ परिभावुकश्चेति लौकिक ३२ द्वात्रिंशत् नायकगुणाः तेषां गुणानां ग्रामः समूहः तस्य गाने परा तत्परा तया ॥

**आङ्गिकाभिनयविज्ञयाऽन्यया, शस्तहस्तकविहस्तहस्तया ।**
**एतदीयहृदिपूरितं मरु-ल्लोलपल्लवलताकुतूहलम् ॥ ६९ ॥**

(व्या०) आङ्गिक इति । अन्यया स्त्रिया एतदीयहृदि एतस्याः सुमङ्गलाया इदं एतदीयं एतदीयं च हृदयं च तस्मिन् एतस्याः सुमङ्गलाया हृदये मरुल्लोलपल्लवलताकुतूहलं मरुता वायुना लोलाश्चञ्चलाः पल्लवा यस्याः सा एतादृशी या लतावल्ली तस्याः कुतूहलं कौतुकं पूरितम् । किंलक्षणया अनन्यया आङ्गिकाभिनयविज्ञया अङ्गस्यायं आङ्गिकः अङ्गसंबंधी आङ्गिकश्चासौ अभिनयश्च नाट्यविधिः तस्मिन् विज्ञया चतुरया पुनः शस्तहस्तकविहस्तहस्तया शस्ताश्चते हस्तकाश्च शस्तहस्तकाः प्रशस्ताः पताकुत्रिपताकुकर्तरीमुखइत्यादि चतुःषष्टिः हस्तकाः तेषु विहस्तौ व्याकुलौ हस्तौ यस्याः सा तया शस्तहस्तकविहस्तहस्तया ॥६९॥

**अप्युरःस्तननितम्बभारिणी, काचिदुल्लसदपूर्वलाघवा ।**
**लास्यकर्मणि विनिर्मितभ्रमि-र्निर्ममे विधृतकौतुकं न कम् ॥ ७० ॥**

(व्या०) अपीति । काचित् स्त्री विधृतकौतुकं विधृतं कौतुकं येन स तं धृताश्चर्यं कं न निर्ममे न कृतवती अपि तु सर्वं निर्ममे । किंलक्षणा स्त्री उरःस्तननितम्बभारिणी अपि उरश्च स्तनौ च नितम्बश्च एषां समाहारः उरःस्तननितम्बं (प्राणितूर्याङ्गाणाम् । ३-१-१३७ । इ. सू. प्राण्यङ्गत्वात् एकार्थद्वन्द्वः ।) हृदयस्थलस्तनकटीतटानि तस्य भारिणी भारवती अपि लास्यकर्मणि लास्यस्य कर्म तस्मिन् नाट्यकर्मणि उल्लसदपूर्वलाघवा उल्लसतीति उल्लसत् अपूर्वं लाघवं यस्याः सा । पुनः विनिर्मिता भ्रमिर्यया सा विनिर्मितभ्रमिः कृतभ्रमणिका ॥ ७० ॥

**शृण्वती धवलबंधबंधुरं, स्वामिवृत्तमुपगीतमन्यया।**
**आहकुंडनवकाधिकं सुधा-स्थानमास्यमिदमीयमेव सा ॥ ७१ ॥**

(व्या०) शृण्वती। सा सुमङ्गला इदमीयमेव अस्या इदं इदमीयमेव आस्य मुखं कुंडनवकाधिकं कुंडानां नवकात् अधिकं सुधास्थानं सुधाया अमृतस्य स्थानं तत् आहस्म प्रोक्तवती। किंकुर्वती सुमङ्गला धवलबंधबंधुरं धवलश्चासौ बंधश्च तेन बंधुरं (वाश्यसिवासिमसिमथ्युन्दि-रः। ४२३। इ. उ. सू. बन्धशूधातोः उरप्रत्ययः।) तत् मनोज्ञं धीरोद्धत १ धीरोदात्तरधीरललित ३ धीरोपशान्त ४ एतन्नायकगुणचतुष्करूप स्वामिवृत्तं स्वामिनो वृत्तं तत् श्रीऋषभदेवचरितं शृण्वती शृणोतीति शृण्वती ॥ ७२ ॥

**साधितस्वरगुणा ऋजूभव-द्देहदंडततुम्बकस्तनी।**
**कापि नाथगुणगानलालसा, व्यर्थतां ननु निनाय वल्लकीम् ॥७२॥**

(व्या०) साधित इति। कापि स्त्री ननु निश्चितं वीणा विपंची नकुलोष्ठी किंनरी शततंत्री जया हस्तिका कुब्जिका कच्छपी घोषवती सारंगी उदुबरी त्रिसरी ढिंबरी परिवादिनी आलिचिणिप्रभृतिरूपवल्लकीं व्यर्थतां व्यर्थस्य भावो व्यर्थता तां निरर्थकतां निनाय। किंलक्षणा स्त्री नाथगुणगानलालसा नाथस्य श्रीऋषभदेवस्य गुणानां वंश १ विद्या २ विनय ३ विजय ४ विवेक ५ विचार ६ सदाचार ७ विस्तार ८ प्रभृतिषण्णवतिगुणानां गाने लालसा तत्परा। पुनः साधितस्वरगुणा साधिताः स्वरस्य गुणाः यया सा। पक्षे साधितस्वरो गुणस्तन्त्री यस्याः सा। तद्यथा सप्तस्वरास्त्रयोग्रामा, मूर्च्छनास्त्वेकविंशतिः। ताना एकोनपञ्चाशत् इत्येतद्गीतलक्षणम् ॥१॥ उद्ग्राहादौ नकारो न, मध्येयकार एव च। अन्ते हकारो नो कार्यस्त्रयो गीतस्य वैरिणः ॥२॥ नामाक्षरो यदुद्गाने भवेत्तत्र न संशयः। हकारो वा घकारो वा रेफोवापि कुलक्षयः ॥ ३ ॥ नकारे नष्टसर्वस्वं यकारे घातमेव च। हकारे हरति लक्ष्मीं तस्माद्गीतं न धारयेत् ॥ ४ ॥ हे जधनतरषभवर्णान् कवयः परिहृत्य कुरुतसुकवित्वमित्यादिदोषान् विचार्यसुस्वरं १ सुतालं २ सुपदं ३ शुद्धं ४ ललितं ५ सुबद्धं ६ सुप्रमेयं ७ सुराङ्गना ८

रम्यं ९ समं १० सदर्थं ११ सुग्रहं १२ हृष्टं १३ सुकाव्यं १४ सुयमकं १५ सुरक्तं १६ संपूर्णं १७ सालंकारं १८ सुभाषाभव्यं १९ सुसंधिकव्युत्पन्नं २० गंभीरं २१ स्फुटं २२ सुप्रभं २३ अग्राम्यं २४ कुंचितकम्पितं २५ समायातं २६ ओजसः सन्नतं २७ प्रसन्नस्थितं २८ सुखस्थायकं २९ द्रुतं ३० मध्यं ३१ विलम्बितं ३२ द्रुतविलम्बितं ३३ गुरुत्वं ३४ प्राञ्जलत्वं ३५ उक्तप्रमाणं ३६ चेत् यदि त्रिंशत् गीतिगुणानादाय लघुसालिग सूड धूउ माठऊ पडमठजत् त्रिवडऊ पडतालउ एकताली डूंबडउ कृपाणु पंचतालेश्वररागकदम्बकप्रभृतिगीतचतुरा । पुनः ऋजूभवद्देहदंडतततुंबकस्तनी ऋजूभवंश्चासौ देह एव दंडश्च सरलीभवद्देहदंडे ततौ विस्तीर्णौ तुंबकाकारौ स्तनौ यस्याः सा ऋजूभवद्देहदंडततुंबकस्तनी ( असहनञ् विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः । २-४-३८ । इ. सू. स्त्रियां स्तनशब्दात् ङीर्वा । ) ॥ ७२ ॥

**एकया किलकुलाङ्गनागुण-श्रेणिवर्णनकृता व्यधायि सा ।**
**कोशमाशु मम तात्त्विकं कदा-ऽदत्तसेयमिति संशयास्पदम् ॥ ७३ ॥**

(व्या०) एकयेति । एकया स्त्रिया सा सुमङ्गला इति संशयास्पदं संशयस्य संदेहस्य आस्पदं स्थानं व्यधायि क्रियतेस्म । इतीति किं सा इयं सखी मम तात्त्विकं ( विनयादिभ्यः । ७-२-१६९ । इ. सू. तत्त्वशब्दात् स्वार्थे इकण् । णित्वात् आदिस्वरवृद्धिः । ) पारमार्थिकं कोशं भांडागारं आशु शीघ्रं कदा कस्यां वेलायामादत्त गृहीतवती । किंविशिष्टया स्त्रिया कुलाङ्गनागुणश्रेणिवर्णनकृता कुलाङ्गनानां गुणाः सुरूपा १ सुभगा २ सुवेषा ३ सुरतप्रवीणा ४ सुनेत्रा ५ सुखाश्रया ६ वियोगिनी ७ विचक्षणा ८ प्रियभाषिणी ९ प्रसन्नमुखी १० पीनस्तनी ११ चारुलोचना १२ रसिका १३ लज्जान्विता १४ लक्षणयुक्ता १५ पठितज्ञा १६ गीतज्ञा १७ वाद्यज्ञा १८ नृत्यज्ञा १९ सुप्रमाणशरीरा २० सुगंधप्रिया २१ नीतिमानिनी २२ चतुरा २३ मधुरा २४ स्नेहवती २५ विषमर्षती २६ गूढमंत्रा २७ सत्यवती २८ कलावती २९ शीलवती ३० प्रज्ञावती ३१ गुणान्विता ३२ चेतिद्वात्रिंशन्नायिकानां गुणानां श्रेणीनां वर्णनं

करोतीति वर्णनकृत् तया कुलाङ्गनागुणश्रेणिवर्णनकृता । सर्वस्यापि तात्त्विकोः कोशाः गुणा एव ज्ञेया इति भावः ॥ ७३ ॥

**स्वेशसौहृदमवेत्य तन्मुख-स्वागतैः शरणमंतरिक्षतः ।**
**भास्करोदयभयादिवोडुभिः, काप्यरंस्त शुचिरत्नकंदुकैः ॥ ७४ ॥**

(व्या०) स्व इति । कापि स्त्री शुचिरत्नकंदुकैः शुचीनि च तानि रत्नानि च पवित्रपद्मरागस्फटिकवैडुर्यचन्द्रकान्तप्रभृतिरत्नानि तेषां रत्नानां कंदुकैः अरंस्त रेमे । उत्प्रेक्षते भास्करोदयभयात् भास्करस्य सूर्यस्य उदयस्तस्मात् भयं तस्मात् अन्तरिक्षतः अन्तरिक्षात् आकाशात् शरणं आगतैरुडुभिर्नक्षत्रैरिव । किंकृत्वा तन्मुखस्य तस्याः सुमङ्गलायाः मुखस्य स्वेशसौहृदं स्वस्य ईशः स्वामी चन्द्रः तेन चन्द्रेण सौहृदं (युवादेरण् । ७-१-६७ । इ. सू. सुहृदयशब्दात् भावे अण् । हृदयस्य हृल्लासलेखाण्ये ३-२-९४ । इ. सू. अणि परे हृदयस्य हृदादेशः णित्वात् आदिस्वरवृद्धिः । सुहृदो भावः सौहृदम् ।) मैत्र्यमवेत्य ज्ञात्वा मुखस्य चन्द्रदर्पणपद्मप्रमृतीनामुपमानं दीयते । अतो मुखस्य चन्द्रेण मैत्र्यं तेन ते शरणार्थं प्राप्ताः ॥ ७४ ॥

**को बली जगति कः शुचांपदं, याचितो वदति किं मितम्पचः ।**
**कीदृशं भटमनः सुरेषु को, भैरवस्तव धवश्च कीदृशः ॥ ७५ ॥**
**प्रश्नसन्ततिमिमां वितन्वती, काञ्चनग्लपितकाञ्चनच्छविः ।**
**नाभिभूत इति सैकमुत्तरं, लीलयैव ददति व्यसिस्मयत् ॥७६॥युग्मम्**

(व्या०) को इति । सा सुमङ्गला नाभिभूत इति एकमुत्तरं लीलयैव ददती ददातीति ददती सती काञ्चनसखीं व्यसिस्मयत् विस्मयं प्रापयति स्म । किंलक्षणा सुमङ्गला ग्लपितकाञ्चनच्छविः ग्लपितं च तत् काञ्चनं च तद्वत् छविर्यस्याः । सा द्रुतसुवर्णकान्तिः । किंकुर्वती काञ्चन सखीं इमां प्रश्नसन्ततिं प्रश्नानां सन्ततिस्तां प्रश्नश्रेणिं वितन्वतीं वितनोतीति वितन्वती तां कुर्वतीं इमा कां जगति विश्वे को बली बलवान् इति प्रश्नः ना पुरुष इत्युत्तरः । क शुचां पदं शोकानां स्थानमिति प्रश्न अभिभूतः पराभूत. इत्युत्तरः । मितंपचः मितंपचतीति

मितम्पचः (परिमाणार्थेमितनखात् पचः । ५-१-१०९ । इ. सू. मितपूर्वक-पच्धातोः खप्रत्ययः खित्यनव्ययाऽरुषोर्मोऽन्तो ह्रस्वश्च । ३-२-१११ । इ. सू. खित्प्रत्ययान्ते पचे परे मितशब्दात् मोऽन्तः । ) कृपणो याचितः सन् किंवदति इति प्रश्नः न निषधमित्युत्तरः । भटमनः भटस्य मनःसुभटस्वान्तं कीदृशमिति प्रश्नः अभि न विद्यते भीर्भयं यस्य तत निर्भयमित्युत्तरः सुरेषु देवेषु को भैरवो भयङ्करः इति प्रश्नः भूत इत्युत्तरः च अन्यत् तव धवो भर्ता कीदृशः नाभिभूतः नाभेर्भूतः नाभिभूतः नाभिजातः ॥ ७५-७६ ॥ युग्मम् ॥

**उत्तरोत्तरकुतूहलैरिमां, चान्तचेतसमुवाच काचन ।**
**दृश्यतां सहृदयेऽरुणोदयो, जात एव दिशि जम्भवैरिणः ॥ ७० ॥**

(व्या०) उत्तर इति । काचन सखी इमां सुमङ्गलां उवाच । किंलक्षणां सुमङ्गला उत्तरोत्तरकुतूहलैः उत्तराणि उत्तराणि इति उत्तरोत्तराणि तानि च तानि कुतूहलानि च तैः उपरिष्टात उपरिष्टात् वर्तमानैः कौतुकैः चान्तचेतसं चान्तं व्याप्तं चेतो हृदयं यस्याः सा तां व्याप्तमानसाम् । हे सहृदये विचक्षणे जंभवैरिणः जंभस्य दैत्यस्य वैरी शत्रुस्तस्य इन्द्रस्य दिशि पूर्वस्यां दिशि अरुणोदयः अरुणस्य उदयः सूर्योदयो जात एव दृश्यताम् ॥ ७७ ॥

**शंख एव तव सौखरात्रिको, द्वारि सनंदति दीयतां श्रुतिः ।**
**आर्यकार्यफलवर्धनस्वनो-पज्ञपुण्यपटलैरिवोज्ज्वलः ॥ ७८ ॥**

(व्या०) शंख इति । हे स्वामिनि एष शंख एव द्वारि द्वारे संनदति शब्दं करोति । श्रुतिः कर्णौ दीयताम् । किंलक्षणः शंखः तव सौख्यरात्रिकः सुखरात्रिं पृच्छतीति सौखरात्रिक । ( सुखातादिभ्यः पृच्छति । ६-४-४२ । इ. सू. सुखरात्रिशब्दात् पृच्छत्यर्थे इकण् प्रत्ययः णित्वात् आदिस्वरवृद्धिः । ) पुनः उत्प्रेक्षते आर्यकार्यफलवर्द्धनस्वनोपज्ञपुण्यपटलैः आर्याणि च तानि कार्याणि तेषां फलानि तेषां वर्द्धनस्य वृद्धिकारिणः स्वनस्य शब्दस्य उपज्ञैः संजातैः पुण्यानां पटलैः समूहैः उज्ज्वल इव धवल इव ॥ ७८ ॥

**जाग्रदेव तव शान्तदिग्मुखो, वक्ति यन्मृदुरवः प्रियं द्विकः ।**

**किं ततः सुचरितादु द्विजन्मना-मग्रभोजनिकतामयं गमी ॥ ७९ ॥**

(व्या०) जाग्रदिति । हे स्वामिनि जाग्रदेव जागर्तीति जाग्रदेव मृदुःरवो यस्य सः सुकोमलशब्दो द्विकः द्वौ ककारौ नाम्नि यस्य सः द्विकः काकः यत् तव प्रियं अभीष्टं वक्ति वदति । किंविशिष्टो द्विकः शान्तदिग्मुखः शान्तायां दिशि मुखं यस्य सः । ततस्तस्मात् सुचरितात् सदाचरणात् अयं द्विको द्विजन्मनां द्वैजन्मनी येषां तेषां ब्राह्मणानां अग्रभोजनिकतां भोजनिकभावो भोजनिकता अग्रेभोजनिकतां गमी गमिष्यतीति गमी (वर्त्स्यति गम्यादिः ५-३-१ ।। इ. सू. भविष्यत्यर्थे इन्नन्तो निपातः ॥ ७९ ॥

**सुदति नदति सोऽयं पक्षिणां चंडदीधि-**
**त्युदयसमयनश्यन्नेत्रमोहः समूहः ।**
**रजनि रजनि दूरेऽस्मादृशां स्वैरचार-**
**प्रमथनमथ नृत्यत्पक्षतीनामितीव ॥ ८० ॥**

(व्या०) सुदति इति । हे सुदति शोभनाः दन्ताः यस्याः सा सुदती (वयसि दन्तस्य दतृः । ७-३-१५१ । इ. सू. सुपूर्वस्य दन्तस्य बहुव्रीहौ दतृः ऋदित्वात् स्त्रियां ङीः ।) तस्याः संबोधनं क्रियते । सोऽयं पक्षिणां समूहो नदति शब्दयते । किंलक्षणः पक्षिणां समूहः चण्डदीधित्युदयसमयनश्यन्नेत्रमोहः चण्डा उग्रा दीधितयः किरणा यस्य स चंडदीधितिः सूर्यस्तस्य उदयस्य समयः तस्मिन् नश्यन् नेत्राणां मोहो निद्रा यस्य किंविशिष्टानां पक्षिणां नृत्यन्त्यः पक्षतयो (पक्षात्तिः । ७-१-८९ । इ. सू. पक्षशब्दात् मूले अर्थे तिप्रत्ययः पक्षाणां मूलानि पक्षतयः । ) येषां ते नृत्यत्पक्षतयस्तेषाम् । उत्प्रेक्षते-इतीव । इतीति किम् अथानन्तरं अस्मादृशां स्वैरचारप्रमथनं स्वैरं चारः स्वेच्छाचारस्तस्य प्रमथनं स्फेटनं रजनिः दूरेऽजनि जाता इतीव ॥ ८० ॥

**दिनवदनविनिद्रीभूतराजीवराजी,**
**परमपरिमलश्रीतस्करोऽयं समीरः ।**
**सरिदपहृतशैत्यः किञ्चिदाधूयवल्ली,**
**भ्रमति भुवि किमेष्यच्छूरभीत्याऽव्ययवस्यम् ॥ ८१ ॥**

(व्या०) दिन इति । अयं समीरः वायुः भुवि पृथिव्यां किं एष्यच्छूर-भीत्या एष्यतीति एष्यन् स चासौ शूरश्च तस्मात् भीतिस्तया आगामिष्यतः सूर्यात् सुभटाद्वा भीत्या भयेन अव्यवस्थं न विद्यते व्यवस्था मर्यादा यस्मिन् कर्मणि यथा भवति तथा व्यवस्थारहितं भ्रमति । किंकृत्वा वल्लीर्लताः किञ्चित् आधूय धुवित्वा । किंलक्षणः समीरः दिनवदनविनिद्रीभूतराजीवराजी परमपरिमलश्रीतस्करः दिनस्य वदनं दिनवदनं प्रभातं विगता निद्रा यस्याः सा विनिद्रा न विनिद्रा अविनिद्रा अविनिद्रा विनिद्रा भूता इति विनिद्रीभूता दिनवदने विनिद्रीभूता विकस्वरा या राजीवानां कमलानां राजी श्रेणिः तस्याः परमश्चासौ परिमलश्च तस्य श्रीर्लक्ष्मीः तस्यास्तस्करश्चौरः । पुनः सरिदपहृतशैत्यः सरितो नद्या अपहृतं गृहीतं शैत्यं येन सः सरिदपहृतशैत्यः । अन्योऽपि योऽपराधी स शूरात् बिभेति । कमलपरिमलहरणे वायोरेकोऽपराधः नद्याः शीतत्वहरणे द्वितीयोऽपराधः वल्लीधूनने परदारलम्पटत्वलक्षणस्तृतीयोऽपराधः । वायुश्च शीतो मन्दः सुरभिश्च त्रिगुणो वर्ण्यते इति भावः ॥ ८१ ॥

**लक्ष्मीं तथाम्बरमथात्मपरिच्छदं च,**
**मुञ्चन्तमागमितयोगमिवास्तकामम् ।**
**दृष्ट्वेशमल्परुचिमुज्झति कामिनीव,**
**तं यामिनी प्रसरमम्बुरुहाक्षि पश्य ॥ ८२ ॥**

(व्या०) लक्ष्मीमिति । हे अम्बुरुहाक्षि अम्बुनि जले रोहतः इति अम्बुरुहे कमले तद्वत् अक्षिणी नेत्रे यस्याः सा अम्बुरुहाक्षी तस्याः संबोधनं क्रियते हे कमललोचने पश्य विलोकय । यामिनी रात्रिः कामिनी इव प्रसरं उज्झति त्यजति । किं कृत्वा ईशं स्वामिनं तं चन्द्रं अल्परुचिं अल्पा रुचिः कान्तिरिच्छा वा यस्य तं अल्पप्रकाशमल्पेच्छं वा दृष्ट्वा विलोक्य किं कुर्वन्तं चन्द्रं लक्ष्मीं तथा अम्बरमाकाशं वस्त्रं च अथ आत्मपरिच्छदं (पुन्नाम्नि घ ५-३-१३० । इ. सू. संज्ञायां परिपूर्वकछादयतेर्घः । एकोपसर्गस्य च घे । ५-४-३४ । इ. सू. ह्रस्वः ।) आत्मनः परिच्छदस्तं आत्मपरिवारं च मुञ्चन्तं मुञ्चतीति मुञ्चन् तं

त्यजन्तम् । उत्प्रेक्षते अस्तकामं अस्तः कामो येन तं अस्ताभिलाषं निरस्तकंदर्पं वा आगमितयोगमिव आगमितो योगो येन तं अभ्यस्ताध्यात्ममिव ॥ ८२ ॥

**अवशमनशद्भीतः शीतद्युतिः स निरम्बरः,**
**खरतरकरे ध्वस्यद्ध्वान्ते रवावुदयोन्मुखे ।**
**विरलविरलास्तज्जायन्ते नभोऽध्वनि तारकाः,**
**परिवृढदृढीकाराभावे बले हि कियद्बलम् ॥ ८३ ॥**

(व्या०) अवशमिति । स शीतद्युतिः शीता द्युतिर्यस्य सः चन्द्रः भीतः सूर्यभयात् भीतः त्रस्तः निरम्बरः निर्गतमम्बरं यस्य स निरम्बरः निर्वस्त्रः सन् अवशं यथा भवति तथा अनशत् नष्टः । क्व सति खरतरकरे अतिशयेन खरा-स्तीक्ष्णाः कराः किरणाः यस्य स तस्मिन् । ध्वस्यद्ध्वान्ते ध्वस्यत् ध्वान्तं तमो यस्मात् तस्मिन् एवंविधे रवौ सूर्ये उदयोन्मुखे उदयस्य उन्मुखे सति तत् तेन कारणेन नभोऽध्वनि नभसः अध्वा नभोऽध्वा तस्मिन् आकाशमार्गे तारका विरलविरला अतिशयेन अल्पा जायन्ते । हि निश्चितं परिवृढदृढीकाराभावे परिवृढस्य (क्षुब्धविरिब्धस्वान्तध्वान्तलग्नम्लिष्टफाण्टबाढपरिवृढं मन्थस्वरमनस्तमःसक्ताऽस्पष्टा-ऽनायासभृशप्रभौ । ४-४-७० । इ. सू. प्रभौ अर्थे परिवृढो निपातः । ) नायकस्य दृढीकारः तस्य अभावे सति बले सैन्ये बलं कियद्भवति । अपि तु न किमपि । अन्योऽपि शीतद्युतिः शीतलस्वभावो यः स्यात् स कठोरान्नश्यति तस्मिन्नष्टे तत्परिवारोऽपि विनश्यतीति भावः ॥ ८३ ॥

**गंभीराम्भः स्थितमथजपन्मुद्रितास्यं निशाया-**
**मन्तर्गुञ्जन्मधुकरमिषान्नूनमाकृष्टिमन्त्रम् ।**
**प्रातर्जातस्फुरणमरुणस्योदये चन्द्रबिम्बा-**
**दाकृष्याब्जं सपदि कमलां स्वाङ्कतल्पीचकार ॥८४॥**

(व्या०) गंभीर इति । अब्जं कमलं कमलां लक्ष्मीं चन्द्रबिम्बात् चन्द्रस्य बिम्बात् आकृष्य सपदि झटिति स्वाङ्कतल्पीचकार स्वस्य अङ्क उत्सङ्ग एव तल्पं शय्या यस्याः सा स्वाङ्कतल्पा न स्वाङ्कतल्पा अस्वाङ्कतल्पा। अस्वाङ्कतल्पां स्वाङ्क-

तल्पां चकार इति स्वाङ्कतल्पीचकार स्वोत्सङ्गे निवेशयति स्मेत्यर्थः । किंलक्षणं अब्जं गंभीराम्भः स्थितं गंभीरं च तत् अम्भश्च गंभीराम्भः तस्मिन् स्थितं गंभीरजलेस्थितं किंकुर्वन् नूनं निश्चितं निशायां रात्रौ अन्तर्मध्ये गुञ्जन्मधुकरमिषात् गुञ्जन्तश्च ते मधुकराश्च भ्रमरास्तेषां मिषात् गुञ्जारवकारिभ्रमरच्छलात् मुद्रितास्यं मुद्रितमास्यं मुखं यस्य तत् मुद्रितमुखं सत् आकृष्टिमन्त्रं आकृष्टेर्मन्त्रं जपत् आकर्षणमंत्रस्य जापं कुर्वाणम् । पुनः प्रातः प्रभाते जातस्फुरणं जातं स्फुरणं यस्य तत् सञ्जातमन्त्रसिद्धि । अन्योऽपि साधको जले स्थित्वा मौनेन रात्रौ मन्त्रं जपतीति भावः ॥ ८४ ॥

**सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि,**
**र्धम्मिल्लादिमहाकवित्वकलनाकल्लोलिनीसानुभाक् ।**
**वाणीदत्तवरश्चिरं विजयते तेन स्वयं निर्मिते,**
**सर्गो जैनकुमारसंभवमहाकाव्ये दिशासङ्ख्यभाग् ॥ १ ॥**

इतिश्रीमदञ्चलगच्छकविचक्रवर्तिश्रीजयशेखरसूरिविरचितस्य श्रीजैनकुमारसंभवमहाकाव्यस्य तच्छिष्यश्रीधर्मशेखरमहोपाध्यायकृतायां टीकायां श्रीमाणिक्यसुन्दरसूरिशोधितायां दशमसर्गव्याख्या समाप्ता ॥ १० ॥

## ॥ अथ एकादशः सर्गः प्रारभ्यते ॥

**निराकरिष्णुस्तिमिरारिपक्षं, महीभृतां मौलिषु दत्तपादः ।**
**अथ ग्रहाणामधिभूरुदीये, प्रसादयन् दिग्ललनाननानि ॥ १ ॥**

(व्या०) निराकरिष्णुरिति । अथानन्तरं ग्रहाणां अधिभूः स्वामी श्रीसूर्य उदीये उदयं प्राप्तः । किंकुर्वन् सूर्यः दिग्ललनाननानि दिश एव ललनाःस्त्रियस्तासां आननानि मुखानि प्रसादयन् प्रसादयतीति दिगङ्गनानां मुखानि प्रसन्नीकुर्वन् पुनः किंविशिष्टः तिमिरारिपक्षं तिमिराणि एव अरयस्तेषां पक्षं अन्धकारशत्रुपक्षं निराकरिष्णुः (भ्राज्यऽलङ्कृग्निराकृग्भूसहिरुचिवृतिवृधिचरिप्रजनापत्रप इष्णुः ५–२–२८ । इ. सू. शीलादिसदर्थे निरापूर्वककृग्धातोः इष्णुप्रत्ययः।) निराकरोतीत्येवं शीलः । पुनः महीभृतां महीं बिभ्रतीति महीभृतस्तेषां पर्वतानां राज्ञां च मौलिषु शिखरेषु मस्तकेषु वा दत्तपादः दत्ताः पादा येन सः दत्तकिरणः दत्तचरणो वा ॥ १ ॥

**तमिस्रबाधांबुजबोधधिष्ण्य–मोषांबुशोषाध्वविशोधनाद्याः ।**
**अर्थक्रिया भूरितरा अवेक्ष्य–वेधा व्यधादस्य करान् सहस्रम् ॥ २ ॥**

(व्या०) तमिस्र इति । वेधा ब्रह्मा अस्य रवेः सूर्यस्य सहस्रं करान् व्यधात् चकार । यथा विंशतिः पुरुषाः अत्रैकवचनं तथा अत्रापि। किंकृत्वा तमिस्रबाधांबुजबोधधिष्ण्यमोषांबुशोषाध्वविशोधनाद्याः तमिस्राणामन्धकाराणां बाधा तमिस्रबाधा अन्धकारपीडा अंबुजानां बोधः अम्बुजबोधः कमलविकासः धिष्ण्यानां मोषः धिष्ण्यमोषः नक्षत्रमोष अंबुनः शोषः अम्बुशोषः जलशोषः अध्वनां विशोधनं अध्वविशोधनं मार्गशोधनं तमिस्रबाधा च अम्बुजबोधश्च धिष्ण्यमोषश्च अम्बुशोषश्च अध्वविशोधनं च इति विशोधननानि तानि आद्यानि यासां ताः भूरितराः प्रचुराः अर्थक्रियाः अर्थानां क्रियास्ताः कार्याणि अवेक्ष्य ज्ञात्वा ॥ २ ॥

**प्रातःप्रयाणाभिमुखं तमिस्रं, कोकास्यमालिन्यसरोजमोहौ ।**
**आलम्ब्य सार्थं न हि मार्गमेको, गच्छेदितिच्छेदितवन्न नीतिम् ॥३॥**

(व्या०) प्रातः इति । तमिस्रं अन्धकारं इति नीतिं न्यायं नच्छेदितवत् न छिनत्तिस्म । इतीति किं न हि एको मार्गं गच्छेत । किंरूपं तमिस्रं प्रातःप्रयाणाभिमुखं प्रभाते प्रयाणस्य गमनस्य संमुखं किंकृत्वा कोकास्यमालिन्यसरोजमोहौ कोकानां चक्रवाकानामास्यानि तेषां मालिन्यं कोकास्यमालिन्यं सरसि जातानि सरोजानि तेषां मोहः सरोजमोहः कोकास्यमालिन्यं च सरोजमोहश्च कोकास्यमालिन्यसरोजमोहौ तौ द्वौ सार्थं आलम्ब्य आश्रित्य ॥ ३ ॥

**तमो ममोन्मादमवेक्ष्य नश्य-देतैरमित्रं स्वगुहास्वधारि ।**
**इति क्रुधेव द्युपतिर्गिरीणां, मूर्ध्नो जघानायतकेतुदंडैः ॥ ४ ॥**

(व्या०) तम इति । द्युपतिः (उ पदान्तेऽनूत् । २-१-११८ । इ. सू. दिवोवकारस्य उः ।) दिवः पतिः सूर्यः गिरीणां पर्वतानां मूर्ध्नः मस्तकानि आयतकेतुदंडैः आयताश्च ते केतवश्च त एव दंडास्तैः । विस्तीर्णकिरणदंडैः जघान । उत्प्रेक्षते इति क्रुधा इव रोषेण इव । इतीति किं एते पर्वतैर्मम अमित्रं शत्रुरूपं तमः अन्धकारं स्वगुहासु स्वस्य गुहास्तासु आत्मीयगुहासु अधारि धृतम् किंकुर्वत् तमः मम उन्मादं अवेक्ष्य दृष्ट्वा नश्यत् नश्यतीति नश्यत् ॥ ४ ॥

**क्षाराम्बुपानादनिवृत्ततृष्णः, पूर्वोदधेरेष किमौर्ववह्निः ।**
**नदीसरःस्वादुजलानि पातु-मुदेति कैश्चिज्जगदे तदेति ॥ ५ ॥**

(व्या०) क्षार इति । तदा तस्मिन्नवसरे कैश्चित् पुरुषैः इति जगदे जल्पितम् । इतीति किम् । एष पूर्वोदधेः (पूर्वापरप्रथमचरमजघन्यसमानमध्यममध्यमवीरम् । ३-१-१०३ । इ. सू. कर्मधारयसमासः ।) पूर्वश्चासौ उदधिश्च तस्मात् पूर्वसमुद्रात् किं और्ववह्निः वडवानलः क्षाराम्बुपानात् क्षारं च तत् अम्बु च जलं तस्य पानात् अनिवृत्ततृष्णः न निवृत्ता अनिवृत्ता अनिवृत्ता तृष्णा यस्य सः अभग्नतृष्णः सन् नदीसरःस्वादुजलानि स्वादूनि च तानि जलानि स्वादुजलानि नद्यश्च सरांसि नदीसरांसि नदीसरसां स्वादुजलानि नदीसरःस्वादुजलानि पातुं उदेति उदयं प्राप्नोति ॥ ५ ॥

**इन्दोः सुधाश्राविकरोत्सवज्ञा-विज्ञातभाव्यर्ककरोपतापा ।**
**व्याजान्निशाजागरगौरवस्य, शिश्ये मुखं कैरविणी सरस्सु ॥ ६ ॥**

(व्या०) इन्दोः । कैरविणीकुमुदिनी या इन्दोः किरणैर्विकसति सा। कैरविणी कुमुदिनीत्युच्यते । निशाजागरगौरवस्य निशायां रजन्यां जागरस्य गौरवं गुरुता तस्य व्याजात् सरस्सु सरोवरेषु सुखं यथा भवति तथा शिश्ये सुप्ता संकोचमाप्ता इत्यर्थः । किंलक्षणा कैरविणी इन्दोश्चन्द्रस्य सुधास्राविकरोत्सवज्ञा सुधां श्रवन्तीति सुधास्राविणः ते च ते कराश्च तेषां अमृतस्राविणां किरणानां उत्सवं जानातीति सुधास्राविकरोत्सवज्ञा । विज्ञातभाव्यर्ककरोपतापा भविष्यतीति भावी (वत्स्र्यति गम्यादिः । ५-३-१ । इ. सू. भविष्यत्यर्थे भूधातो र्णिन्-दिकोणिन् ।) स चासौ अर्कश्च सूर्यः भाव्यर्कस्तस्य कराः तेषां भविष्यत्सूर्यकिरणानामुपतापः विज्ञातः भाव्यर्ककरोपतापो यया सा ॥ ६ ॥

**बद्धाञ्जलिः कोशमिषाद्रतेना, जातश्रियं पङ्कजिनीं दिनाप्त्या ।**
**जहास यत्तद्व्यसने निशायां, कुमुद्वती तत् क्षमयांबभूव ॥ ७ ॥**

(व्या०) बद्धाञ्जलिः । कुमुद्वती कुमुदिनी निशायां रात्रौ यत् तद्व्यसने तस्याः कमलिन्या व्यसने कष्टे सति जहास हसितवती विकसिता वा तत् क्षमयांबभूव । किंकृत्वा दिनाप्त्या दिनस्य आप्तिः प्राप्तिस्तया दिवसप्राप्त्या पङ्कजिनीं कमलिनीं जातश्रियं जाता श्रीर्यस्याः सा ताम् । किंलक्षणा कुमुद्वती कोशमिषात् कोशस्य मुकुलस्य मिषात् बद्धाञ्जलिः बद्धः अञ्जलिर्यया सा योजितहस्ता ॥७॥

**देहेन सेहे नलिनं यदिन्दु-पादोपघातं निशि तं ववाम ।**
**पराभवं सूरकराभिषङ्गे, प्रगे हृदो निर्यदलिच्छलेन ॥ ८ ॥**

(व्या०) देहेन इति । नलिनं कर्तृपदं कमलं निशि रात्रौ यत् इन्दुपादोपघातं इन्दोश्चन्द्रस्य पादाः किरणास्तेषां पादाश्चरणा वा तेषां उपघातः प्रहारस्तं देहेन शरीरेण सेहे । प्रगे प्रभाते सूरकराभिषङ्गे सूरस्य सूर्यस्य कराः किरणास्तेषामभिषङ्गे सूर्यकिरणसंसर्गे हृदो हृदयात् निर्यदलिच्छलेन निर्यन्तश्चते अलयश्च भ्रमरास्तेषां मिषेण निर्गच्छद्भ्रमरमिषेण तं पराभवं ववाम वमतिस्म ॥ ८ ॥

**भित्त्वा तमःशैवलजालमंशु-मालिद्विपे स्फारकरे प्रविष्टे ।**
**आलीनपूर्वोऽपससार सद्यो, वियत्तडागाद्उडुनीडजौघः ॥ ९ ॥**

(व्या०) भित्त्वा इति । उडुनीडजौघः उडूनि एव नीडजानां पक्षिणा मोघः नक्षत्ररूपपक्षिसमूहः आलीनपूर्वः पूर्वमालीन आलीनपूर्वः पूर्वनिविष्टः सन् सद्यस्तत्कालं वियत्तडागात् वियदेव तडागस्तस्मात् आकाशसरोवरात् अपससार अपसृतः । क्व सति तम शैवलजालं तमांसि एव शैवलानि तेषां जालं तत् अन्धकाररूपशैवालसमूहं भित्त्वा स्फारकरे स्फार करो यस्य स तस्मिन् प्रौढकिरणे महाशुंडादंडे वा अंशुमालिद्विपे अंशूनां किरणानां मालाः सन्ति अस्येति अंशुमाली सूर्यः स एव द्विपोगजस्तस्मिन् सूर्यरूपगजे प्रविष्टे सति ॥ ९ ॥

**किञ्चित् समासाद्य महः पतङ्ग–पक्षः क्षपायां यदलोपि दीपैः ।**
**तां वैरशुद्धिं व्यधिताभिभूय, दीपान् प्रगे कोऽप्युदितः पतङ्गः ॥१०॥**

(व्या०) किञ्चित् इति । दीपै क्षपायां रात्रौ किञ्चिन्महस्तेजः समासाद्य प्राप्य पतङ्गपक्ष पतङ्गस्य पक्ष शलभपक्षः पक्षे सूर्यपक्षः यत् अलोपि लुप्तः । प्रगे प्रभाते कोऽपि पतङ्ग उदितः सन् दीपान् अभिभूय अभि भूत्वा इति पराभूय वैरशुद्धिं वैरस्य शुद्धिस्तां व्यधित कृतवान् । अत्रापि पतङ्गः सूर्यः शलभो वा ज्ञेयः ॥ १० ॥

**गते रवौ संववृधेऽन्धकारो, गतेऽन्धकारे च रविर्दिदीपे ।**
**तथापि भानुःप्रथितस्तमोभि–दहो यशो भाग्यवशोपलभ्यम् ॥११॥**

(व्या०) गत इति । रवौ सूर्ये गते सति अन्धकारो ववृधे वृद्धिं प्राप्तः अन्धकारशब्द पुंनपुंसकः । अन्धकारे गते गते सति रविः सूर्योदि दीपे दीप्तः । तथापि भानु सूर्य तमोभित् तमांसि भिनत्तीति तमोभित् अन्धकारभित् प्रथितो विख्यातः । अहो इति आश्चर्ये यशो भाग्यवशोपलभ्यम् भाग्यस्य वशेन उपलभ्यं प्राप्यं वर्तते ॥ ११ ॥

**कृतो रटद्भिः कटु लोककर्णो–च्चाटो निशाटैस्तमसो बलाद्यैः ।**
**सूरे तमो निघ्नति मौनिनस्ते, निलीय तस्थुर्दरिणो दरीषु ॥ १२ ॥**

(व्या०) कृतो इति । यैः निशाटैः निशायामटन्तीति निशाटास्तैः घूकैः तमस बलात् अन्धकारस्य बलात् कटुरटद्भिः कर्णस्य कटुशब्दं कुर्वद्भिः सद्भिः

लोककर्णोच्चाटः लोकानां कर्णेषु उच्चाटः कृतः । ते घूका दरिणो भययुक्ताः । मौनिनः मौनमस्ति एषामिति मौनिनः मौनयुक्ता दरीषु गुहासु निलीय तस्थुः स्थिताः । क सति सूरे सूर्ये तमोऽन्धकारं निघ्नति विनाशयति सति ॥ १२ ॥

**कोकप्रमोदं कमलप्रबोधं, स्वेनैव तन्वंस्तरणिः करेण ।**
**नीतिं व्यलंधिष्ट न पोष्यवर्गे-ष्वनन्यहस्ताधिकृतिस्वरूपाम् ॥१३॥**

(व्या०) कोक इति । तरणिः सूर्यः कोकप्रमोदं कोकानां चक्रवाकानां प्रमोदो हर्षस्तं कमलप्रबोधं कमलानां प्रबोधं विकाशं स्वेनैव करेण आत्मीयेन किरणेन हस्तेन वा तन्वन् तनोतीति तन्वन् सन् पोष्यवर्गेषु पोष्याणां वर्गास्तेषु अनन्यहस्ताधिकृतिस्वरूपां हस्तस्य अधिकृतिः हस्ताधिकृतिः अन्यस्य हस्ताधिकृतिर्न भवतीति अनन्यहस्ताधिकृतिः सा एव स्वरूपं यस्या सा तां नीतिं न व्यलंधिष्ट न लंघयतिस्म ॥ १३ ॥

**इलातले बालरवेर्मयूखै रुन्मेषिकाश्मीरवनायमाने ।**
**सुमङ्गला कौङ्कुममङ्गरागं, निर्वेष्टुकामेव मुमोच तल्पम् ॥ १४ ॥**

(व्या०) इलेति । इलातले इलाया पृथिव्यास्तलं तस्मिन् पृथ्वीतले बालरवेः बालश्चासौ रविश्च तस्य बालार्कस्य मयूखैः किरणैः । उन्मेषिकाश्मीरवनायमाने काश्मीराणां वनं काश्मीरवनं उन्मेषि च तत् काश्मीरवनं च तदिव आचरति तस्मिन् विकस्वरकाश्मीरवनवत् आचरति सति सुमङ्गला कौंकुमं अङ्गरागं कुङ्कुमस्य अयं तं अङ्गस्यरागस्तं निर्वेष्टुं कामो यस्याः सा निर्वेष्टुकामा इव उपभोक्तुकामा इव तल्पं शयनीयं मुमोच ॥ १४ ॥

**जलेन विश्वग्विततैस्तदंशु-जालैरभेदं भजता प्रपूर्णाम् ।**
**करे मृगाङ्कोपलवारिधानीं, कृत्वा सखी काप्यभवत्पुरोऽस्याः ॥१५॥**

(व्या०) जलेनेति । कापि सखी करे हस्ते जलेन प्रपूर्णा मृगाङ्कोपलवारिधानी वारीणि धीयन्ते अस्यामिति वारिधानी (करणाधारे । ५-३-१२९ । इ. सू. वारिशब्दपूर्वकधाधातो अधिकरणे अनट् । टित्वात् ङी ) मृगाङ्कोपलानां वारिधानी तां चन्द्रकान्तमणिनिर्मितकरकं कृत्वा अस्या सुमङ्गलाया पुरोऽग्रे

अभवत् । किंविशिष्टेन जलेन विष्वक् समन्तत: विततैः प्रसृतैः तदंशुजालैः तस्याः मृगाङ्कोपलवारिधान्या. अंशूनां जालानि तैः किरणसमूहैः अभेद न भेदोऽभेदस्तं ऐक्यं भजता प्राप्नुवता ॥ १५ ॥

**सुमङ्गला मृदुपाणिदेशे, सा मुञ्चती निर्मलनीरधाराः ।**
**उल्लासयन्ती गुरुभक्तिवल्लीं, कादम्बिनीवालिजनेन मेने ॥ १६ ॥**

(व्या०) सुमङ्गला इति । आलिजनेन आलीनां जनस्तेन सखीवर्गेण सा स्त्री कादम्बिनी इव मेघमालेव मेने मन्यते स्म । किंकुर्वती सा सुमङ्गलाया मृदुपाणिदेशे पाण्योर्देश: मृदुश्चासौ पाणिदेशश्च तस्मिन् कोमलहस्तप्रदेशे कोमलहस्ते निर्मलनीरधारा: निर्मलं च तत् नीरं च निर्मलनीरं तस्य धारास्ताः मुञ्चती । पुनः गुरुभक्तिवल्लीं गुरोः भक्ति: सा एव वल्ली तां उल्लासयन्ती उल्लासयंतीति वर्द्धयन्ती ॥ १६ ॥

**यदम्भसा दम्भसमुज्झिताया, राज्ञ्या मुखेन्दोर्विहितोऽनुषङ्गः ।**
**कृतामृताख्यं कृतकर्मभिस्त-ज्जगत्सु तज्जीवनतां जगाम ॥ १७ ॥**

(व्या०) यदिति । अम्भसा पानीयेन दम्भसमुज्झिताया: दम्भेन समुज्झिता तस्या माया मुक्ताया राज्ञ्याः सुमङ्गलाया मुखेन्दो. मुखमेवेन्दुस्तस्य मुखचन्द्रस्य यत् अनुषङ्गः संपर्को विहित. । तत् तस्मात् कारणात् तत् अम्भः कृतकर्मभि. कृतानि कर्माणि यैस्ते कृतकर्माणस्तैः कृतकर्मभिः विद्वद्भिः जगत्सु विश्वेषु कृतामृताख्यं कृता अमृतमिति आख्या यस्य तत् सत् जीवनतां जीवनस्य भावो जीवनता तां जगाम प्राप । अमृतं जीवनं पानीयमेवोच्यते ॥ १७ ॥

**मुखं परिक्षालनलग्नवारि-लवं चलच्चञ्चलनेत्रभृङ्गम् ।**
**प्रातःप्रबुद्धं परितःप्रसक्ता-वश्यायमस्या जलजं जिगाय ॥ १८ ॥**

(व्या०) मुखमिति । अस्या: सुमङ्गलाया मुखं कर्तृपदं जलजं (सप्तम्याः ५-१-१६९ । इ. सू. जलपूर्वकजनेर्डः । डित्वात् अन्त्यस्वरादिलोप ।) जले जातं तत् कमलं कर्मपदं जिगाय जयति स्म । किंलक्षणं मुखं परिक्षालनलग्नवारिलवं परिक्षालनेन लग्ना: सक्ता: वारिणो लवा बिन्दवो यस्मिन् तत् । पुन.

चलच्चञ्चलनेत्रभृङ्गं चलतः इति चलन्तौ चलन्तौ चञ्चले नेत्रे एव भृङ्गौ भ्रमरौ यस्मिन् तत् । किंविशिष्टं कमलं प्रातः प्रभाते प्रबुद्धं विकसितम् । पुनः परितः समन्ततः प्रसक्तावश्यायं प्रसक्तोऽवश्यायो यस्य तत् लग्नतुहिनम् ॥ १८ ॥

**निशावशाद्भूषणजालमस्या, विसंस्थुलं सुष्ठु निवेशयन्ती ।**
**काप्युज्झितं लक्षणवीक्षणस्य, क्षणे करं दक्षिणमन्वनैषीत् ॥ १९ ॥**

(व्या०) निशा इति । कापि सखी अस्याः सुमङ्गलाया दक्षिणं करं अन्वनैषीत् हृष्टं प्रीतिमन्तं चकार । किंलक्षणं दक्षिणं करं लक्षणवीक्षणस्य लक्षणानां वीक्षणं तस्य क्षणे समये लक्षणावलोकनसमये उज्झितं त्यक्तम् । पुरुषस्य दक्षिणहस्ते लक्षणानि वीक्ष्यन्ते नार्यास्तु वामहस्ते । तदा दक्षिणो हस्तो हृष्ट इति भावः । किंकुर्वती सखी निशावशात् निशाया रजन्या वशात् अस्याः सुमङ्गलाया विसंस्थुलं भूषणजालं भूषणानां जालमाभरणसमूहं सुष्ठु शोभनं निवेशयन्ती निवेशयतीति कुर्वती तदा दक्षिणहस्तस्यापि भूषणानि सुष्ठु निवेशितानि इति प्रीतिमांश्चक्रे ॥ १९ ॥

**यं दर्पणो भस्मभरोपरागं, प्रगेऽन्वभूत् कष्टधिया म्रदिष्ठः ।**
**तदा तदास्यप्रतिमामुपास्य, सखीकरस्थः प्रशशंस तं सः ॥ २० ॥**

(व्या०) यमिति । दर्पण आदर्शः प्रगे प्रभाते कष्टधिया कष्टस्य धीस्तया कष्टबुद्ध्या यं भस्मोपरागं भस्मन उपरागस्तं भस्मना मार्जनोपप्लवं म्रदिष्ठः (गुणाङ्गाद्वेष्ठे यसू । ७–३–९ । इ. सू. मृदुशब्दात् इष्ठः । पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः । ७–४–३९ । इ. सू. इष्ठे परे ऋतः रः ।) अतिशयेन मृदुः इति सुकुमालतरः सन् अन्वभवत् अनुभवति स्म । तदा तस्मिन्नवसरे दर्पणः सखीकरस्थः ( स्थापास्नात्रः क । ५–१–१४२ । इ. सू. करपूर्वकस्थाधातोः क प्रत्ययः । इडेत् पुसीति आलोपः । ) सख्याः करयोस्तिष्ठतीति सखीहस्तस्थित सन् तदास्यप्रतिमां तस्याः सुमङ्गलायाः आस्यं मुखं तस्य प्रतिमां प्रतिबिम्बं उपास्य सेवित्वा तं भस्मभरोपरागं प्रशशंस शंसितवान् ॥ २० ॥

**समाहिता संनिहितालिपालि-प्रणीतगीतध्वनिदत्तकर्णा ।**
**उपस्थितं सा सहसा पुरस्ता-द्दक्षा ऋभुक्षाणमथालुलोके ॥ २१ ॥**

(व्या०) समाहिता इति । सा दक्षा चतुरा सुमङ्गला सहसा झटिति ऋभुक्षाण ( अर्ते भुक्षिनक् । ९२८ । इ. उ. सू. ऋधातोः भुक्षिनक् प्रत्ययः इयर्ति इति ऋभुक्षाः । ) मिन्द्रं उपस्थितं आगतं पुरस्तात् अग्रे आलुलोके अपश्यत् । किंलक्षणा सुमङ्गला समाहिता समाधियुक्ता संनिहितालिपालिप्रणीतगीतध्वनिदत्तकर्णा संनिहिता चासौ समीपस्था आलीनां सखीनां पालिश्च तया प्रणीते कृते गीतस्य ध्वनौ दत्तौ कर्णौ यया सा ॥ २१ ॥

**युगादिभर्तुर्दयितेति तीर्थं, तां मन्यमानः शतमन्युरूचे ।**
**नत्वाञ्जलेर्योजनया द्विनाल-नालीककोशभ्रममादधानः ॥ २२ ॥**

(व्या०) युग इति । शतमन्यु शतं मन्यव प्रतिमाभिग्रहविशेषाः यस्य स. इन्द्र. अस्य इन्द्रस्य कार्तिकभवे शतं प्रतिमाभिग्रहविशेषा अभवन् इत्यागमविदः तां सुमङ्गलां युगादिभर्तुः आदिश्चासौ भर्ता च आदिनाथः युगे आदिभर्ता युगादिभर्ता तस्य दयिता भार्या इति तीर्थं मन्यमानः मन्यते इति मन्यमानः सन् नत्वा ऊचे । किंविशिष्टः इन्द्रः अञ्जले योजनया करणेन द्विनालनालीककोशभ्रमं द्वौनालौ यस्य तत् द्विनालं द्विनालं च तत् नालीकं द्विनालनालीकं तस्य कोशस्तस्य भ्रमं भ्रान्ति आदधानः आधत्ते इति आदधान ॥ २२ ॥

**परिच्छदाप्यायकसौम्यदृष्टे, मृगेक्षणालक्षणकोशसृष्टे ।**
**जयैकपत्नीश्वरि विश्वनाथ, श्रीमञ्जुहृत्पञ्जरसारिकेत्वम् ॥ २३ ॥**

(व्या०) परिच्छद इति । हे परिच्छदाप्यायकसौम्यदृष्टे परिच्छदे (परितः छाद्यते अनेन इति परिच्छद । पुंनाम्नि घः । ५-१-१३० । इ. सू. करणे अर्थे घः एकोपसर्गस्य च घे । ४-२-३४ । इ. सू. घे परे परिपूर्वकछादयतेर्ह्रस्वः ।) परिवारजने आप्ययका सौम्या दृष्टिर्यस्याः सा तस्याः संवोधनं क्रियते परिवारजने मनोहरशान्तदृष्टिमति । मृगेक्षणालक्षणकोशसृष्टे मृगस्य ईक्षणे इव ईक्षणे यासां ता मृगेक्षणाः स्त्रियस्तासां लक्षणानि यथा 'त्रिषु श्यामां त्रिषुश्वेतां,

त्रिषु ताम्रां त्रिषून्नताम्। त्रिगंभीरां त्रिविस्तीर्णां आयतां त्रिकृशीयसीम् ॥ १ ॥ एतद्व्याख्या चेयम्—नेत्र १ दृष्टिमध्य २ स्तनान्तेषु त्रिषु श्यामां नेत्रमध्य १ दन्त २ यशःसु ३ त्रिषुश्वेतां हस्त १ ओष्ठ २ तालु ३ त्रिषु ताम्रां आरक्तां योनि १ नख २ स्तनेषु ३ त्रिषु उन्नतां नाभि १ सत्त्व २ स्वरेषु ३ त्रिषु गंभीरां मुख १ जघन २ हृदयेषु ३ त्रिषु विस्तीर्णां नासा १ अङ्गुली २ नेत्रेषु ३ त्रिषु आयतां प्रलम्बां मध्यं १ अणि २ रोमावलीषु ३ त्रिषुकृशीयसीं इदृक्स्त्रीलक्षणानां कोशस्य भाण्डागारस्य सृष्टे। हे एकपत्नीश्वरि। हे विश्वनाथश्रीमञ्जुहृत्पञ्जरसारिके विश्वाना जगतां नाथ आदिदेवस्तस्य श्रिया मञ्जु— मनोज्ञं यत् हृदयं तदेव पञ्जरं तस्मिन् सारिके सारिकासदृशे। त्वं जय ॥२३॥

**जाता महीध्रादिति या शिला सा, त्वां स्पर्धमानास्तु जडा मृडानी।**
**अम्भोधिलब्धप्रभवेति मत्सी, न श्रीरपि श्रीलवमश्नुते ते ॥ २४ ॥**

(व्या०) जाता इति। सा मृडानी मृडस्य शिवस्य भार्या मृडानी (वरुणेन्द्ररुद्रभवशर्वमृडादान् चान्तः। २–४–६२। इ. सू. मृडशब्दात् डीः अन्तस्य आन् च।) पार्वती त्वां स्पर्धमाना स्पर्धते इति स्पर्धमाना जडा अज्ञाना अस्तु। या पार्वती महीध्रात् महीं धरतीति महीध्र (मूलविभाजय.। ५–१–१४४। इ. सू महीध्रशब्दो। कान्तो निपात्यते।) स्तस्मात् पर्वतात् जाता इति शिला वर्तते। श्रीरपि लक्ष्मीरपि ते तव श्रीलवं श्रियः शोभाया लव अंशं न अश्नुते न प्राप्नोति किंविशिष्टा लक्ष्मी अम्भोधिलब्धप्रभवा अम्भोधेः लब्धः प्रभवो यथा सा समुद्रात् जाता इति कारणात् मत्सी (मत्स्यस्य यः। २–४–८७। इ. सू. मत्स्यशब्दस्य यस्य डौ परे लोप।) मत्सीतुल्या २४

**केनापि नोढा स्थविराङ्गजेति, या निम्नगाख्यामपि कर्मणाप्ता।**
**पपात पत्यौ पयसां पिपर्ति, कथं सरस्वत्यपि सा तुलां ते ॥ २५ ॥**

(व्या०) केनेति। या सरस्वती स्थविराङ्गजा स्थविरो ब्रह्मा वृद्धश्च तस्य अङ्गजा पुत्री इति कारणात् केनापि न ऊढा न परिणीता। या सरस्वती कर्मण निम्नगाख्यां निम्नं नीचैर्गच्छतीति निम्नगा। नदीनी च गामिनी स्त्री वा तस्या

आख्यां नाम आप्ता प्राप्ता सती पयसां पत्यौ समुद्रे पपात । सा सरस्वती अपि ते तव तुलां सादृश्यं कथं पिपर्ति प्राप्नोति ॥ २५ ॥

**या स्ववर्धूः काचन काञ्चनाङ्गी, तुलां त्वयारोढुमियेष मूढा ।**
**असारतां किं विबुधैर्विचार्य, रम्भेति तस्या अभिधा व्यधायि ॥२६॥**

(व्या०) येति । या काञ्चनाङ्गी ( नासिकोदरौष्ठजङ्घादन्तकर्णश्रृङ्गाङ्गगात्रकण्ठात् । २-४-३९ । इ. सू. काञ्चनपूर्वक अङ्गशब्दात् वा ङीः । ) काञ्चनमिव अङ्ग यस्या सा सुवर्णशरीरा काचन स्ववर्धू देवाङ्गना मूढा सती त्वया तुलां सादृश्यमारोढुमियेष वाञ्छति स्म । विबुधैर्विद्वद्भि देवैर्वा असारतां असारस्य भाव असारता विचार्य तस्याः स्ववर्ध्वाः किं रंभा इति नाम व्यधायि कृता । रम्भाशब्देन कदली सा मध्ये असारा भवति ॥ २६ ॥

**कलाकुलाचारसुरूपताद्यं, यं तावकं गौरि गुणं गृणीमः ।**
**मज्जामहाब्धाविव तत्र मग्ना, वाग् न स्वमुद्धर्तुमधीश्वरी नः ॥ २७ ॥**

(व्या०) कलेति । हे गौरि वयं तावकं तव अयं तावक ( वा युष्मदस्मदोऽञीनञौ युष्माकास्माक चास्यैकत्वे तु तवकममकम् । ६-३-६७ । इ. सू. युष्मद् अञ् तवकादेशश्च । ) एतं त्वदीयं कलाकुलाचारसुरूपताद्यं कलाश्च कुलाचारश्च सुरूपता च ता आद्या यस्य स त य गुणं गृणीमः ब्रूम तत्र तस्मिन् गुणे मग्ना नोऽस्माकं वाक् स्वं उद्धर्तुं न अधीश्वरी न समर्था । का इव मज्जा इव छागीव महाब्धौ महांश्चासौ अब्धिश्च तस्मिन् महासमुद्रे मग्ना सती स्वं उद्धर्तुं समर्था न स्यात् ॥ २७ ॥

**सीमासि सीमन्तिनि भाग्यवत्सु, यल्लोकभर्तुर्हृदयङ्गमासि ।**
**यच्चेदृशं स्वमसमूहमूह–क्षमं श्रुताधेयधियामपश्यः ॥ २८ ॥**

(व्या०) सीमा इति । हे सीमन्तिनि त्वं भाग्यवत्सु भाग्यमस्ति एषामिति भाग्यवन्तस्तेषु लोकेषु सीमा अवधिरसि । यत् त्वं लोकभर्तुः लोकानां भर्ता स्वामी तस्य श्रीयुगादीश्वरस्य हृदयङ्गमा हृदयं गच्छतीति हृदयङ्गमा (नाम्नो गम खड्डौ च विहायसस्तु विह । ५-१-१३१ । इ. सू. हृदयशब्दपूर्वकगमधातोः

खप्रत्ययः खित्यनव्ययाऽरुषोर्मोऽन्तो ह्रस्वश्च । ३-२-१११ । इ. सू. मोऽन्तः । हृदयवल्लभा असि । च अन्यत् श्रुताधेयधियां श्रुतानामाधेया धीर्येषां ते तेषां बहुश्रुतानां ऊहक्षमं ऊहस्य विचारस्य क्षमस्तं ईदृशं स्वप्नसमूहं स्वप्नानां समूहस्तं अपश्यः ॥ २८ ॥

**अतः परं किं तव भाग्यमीडे, यद्विश्वनेत्रा निशि लम्भितासि ।**
**स्वप्नार्थनिश्चायिकया स्ववाचा, रहः सुधापानसुखानि देवि ॥ २९ ॥**

(व्या०) अतः इति । हे देवि तव अतः परं किं भाग्यं ईडे स्तुवे । विश्वनेत्रा विश्वस्य नेता तेन जगन्नाथेन निशि रात्रौ स्वप्नार्थनिश्चायिकया स्वप्नानामर्थस्य निश्चायिका निश्चयकारिणी तया वाचा रहः एकान्ते सुधापानसुखानि सुधाया अमृतस्य पानं तस्य सुखानि तानि लम्भिता प्रापितासि ॥ २९ ॥

**न पाययन् गोरसमर्थिनीं त्वां, धत्ते स्म चित्ते रजनीमपीशः ।**
**क्षुधातुरं भोजयतां न दोषा, दोषापि यस्मादियमर्हदाज्ञा ॥ ३० ॥**

(व्या०) नेति । अर्थिनीं त्वा गोरसं गो रसस्तं गोरसं पाययन् पाययतीति पाययन् ईशः श्रीऋषभस्वामी रजनीमपि रात्रिमपि चित्ते न धत्ते स्म । यस्मात्कारणात् अर्हदाज्ञा अर्हतामाज्ञा श्रीसर्वाज्ञा इयं वर्तते । इयमिति किम् । दोषापि रात्रावपि अत्र दोषाशब्दोऽव्ययोज्ञेयस्तेन विभक्तिलोपः । क्षुधातुरं क्षुधया आतुरस्तं बुभुक्षितं भोजयतां भोजयन्तीति तेषां दोषा न स्युः अस्मिन् श्लोके पूर्वार्धे भगवता सुमङ्गलायै यो गोरसः पायितः इत्यत्र गोरसशब्देन सरस्वतीरसो ज्ञेयः तेन उत्तरार्धे दोषा अपि क्षुधातुरं भोजयतां न दोषाः । इति भोजनसंबन्धिनी या अर्हदाज्ञा लिखिता तत्रापि तत्त्वाद्युपदेशविषयकमेव भोजनं ज्ञेयं न त्वशनपानादि चतुर्विधं भोजनम् ॥ ३० ॥

**कदाचिदुद्गच्छति पश्चिमायां, सूरः सुमेरुः परिवर्तते वा ।**
**सीमानमत्येति कदापि वार्धिः, शैत्यं समास्कन्दति वाश्रयाशः ॥३१॥**
**सर्वंसहत्वं वसुधाऽवधूय, श्वभ्रातिथित्वं भजते कदाचित् ।**
**रम्भोरु दम्भोरगगारुडं ते, वचो विपर्यस्यति न प्रियस्य ॥ ३२ ॥**

(व्या०) कदाचिदिति । हे कल्याणि कदाचित् सूरः सूर्यः पश्चिमायां दिशि उद्गच्छति । वा अथवा कदापि सुमेरुः परिवर्तते मेरुपर्वतः स्वस्थानाच्चलति । कदापि वार्धिः समुद्रः सीमानं मर्यादां अत्येति अतिक्रामति । कदापि आश्रयाशः अग्निः शैत्यं समास्कन्दति समागच्छति । कदाचित् वसुधा पृथिवी सर्वसहत्वं सर्वं सहते इति सर्वंसहा (सर्वात् सहश्च । ५-१-१११ । इ. सू. सर्वशब्दात् सह्धातोः खप्रत्ययः खित्वात् मोऽन्तः अदन्तात् स्त्रियामाप् ) तस्या भावः सर्वंसहत्वं तत् अवधूय विमुच्य श्वभ्रातिथित्वं अतिथेः भावः अतिथित्वं श्वभ्रस्य पातालस्य अतिथित्वं तत् भजते सेवते । तथापि हे रम्भोरु (उपमानसहितसंहितसहशफवामलक्ष्मणाद्यूरोः । २-४-७५ । इ. सू. रंभाशब्दपूर्वकऊरुशब्दात् स्त्रियांसमूङ् ।) रम्भा कदली तद्वत् ऊरू यस्याः सा तस्याः संबोधनं हे रम्भोरु ते तव प्रियस्य श्रीयुगादीशस्य दम्भोरगगारुडं दंभ एव उरगः तस्य गारुडं मायारूपसर्पस्य गारुडमन्त्रसमानं वचो न विपर्यस्यति न परावर्तते ॥ ३१-३२ ॥ युग्मम् ।

**यथातथामस्य मनुष्व वाचं, वाचंयमानामपि माननीयाम् ।**
**पूर्णेऽवधौ प्राप्स्यसि देवि सूनुं, स्वं विद्धि नूनं सुकृतैरनूनम् ॥३३॥**

(व्या०) यथा इति । हे देवि त्वं अस्य भगवतो यथातथां सत्यां वाचं वाणीं मनुष्व जानीहि । किंविशिष्टां वाचं वाचंयमानामपि वाचं यच्छन्तीति वाचंयमा (वाचंयमो व्रते । ५-१-११५ । इ. सू. व्रतविषये वाचंयमशब्दो निपात्यते) मुनयस्तेषां यतीनामपि माननीयां ( तव्यानीयौ । ५-१-२७ । इ. सू. मान्धातोः कर्मणि अनीयः अकारान्तत्वात् आप् मानयितुं योग्या माननीया । ) मान्यां हे देवि त्वं अवधौ पूर्णे सति सूनुं पुत्रं प्राप्स्यसि । त्वं नूनं निश्चितं स्वं आत्मानं सुकृतैः पुण्यैः अनूनं न ऊनः अनूनस्तमनूनं संपूर्णं विद्धि जानीहि ३३

**दाता कुलीनः सुवचा रुचाढ्यो, रत्नं पुमानेव न चाश्मभेदः ।**
**तद्रत्नगर्भां भवतीं निरीक्ष्य, तयाऽप्ययापत्रपतेतरां भूः ॥ ३४ ॥**

(व्या०) दाता इति । हे देवि पुमानेव रत्नं वर्तते न च अश्मभेदः अश्मनो भेदः पाषाणविशेषो रत्नम् । किंलक्षणःपुमान् दाता ददातीति दाता विश्वे

सर्वेषामर्थिजनानामाशापूरकत्वात् । उपकारकर्तृत्वाच्च । कुलीनः कुले भव सत्कुलोत्पन्नः मातृकी जातिः पैतृकं कुलमिति । सुवचाः शोभनानि वचांसि यस्य सः सुवचाः सत्यवाक् मधुरवचनभाषणपरगुणग्रहणादित्वात् । रुचाढ्यः रुचा कान्त्या आढ्य समृद्ध । तत् तस्मात् कारणात् भवतीं त्वां रत्नगर्भा रत्नं गर्भे यस्याः सा तां निरीक्ष्य दृष्ट्वा भूः पृथ्वी तया आख्यया रत्नगर्भा इति नाम्ना अपत्रपतेतरां लज्जतेतराम् ॥ ३४ ॥

**सुवर्णगोत्रं वरमाश्रितासि, गर्भं सुपर्वागममुद्वहन्ती ।**
**श्रियं गता सौमनसीमसीमां, न हीयसे नन्दनभूमिकायाः ॥ ३५ ॥**

(व्या०) सुवर्ण इति । हे देवि त्वं नन्दनभूमिकायाः नन्दनस्य भूमिका तस्याः नन्दनवनसंबंधिभूमिकातो न हीयसे न हीना भवसि । किंविशिष्टा त्वं सुवर्णगोत्र सुष्ठु शोभना वर्णा अक्षराणि यस्मिन् तत् सुवर्णं एवंविधं गोत्रं नाम यस्य सः तं वरं पतिं आश्रितासि । नन्दनवनभूमिपक्षे वरं श्रेष्ठं सुवर्णगोत्रं मेरुं । त्वं किं कुर्वन्ती सुपर्वागमं सुपर्वाणोदेवाः तेभ्यः आगम आगमनं यस्य स तं एवंविधं गर्भमुद्वहन्ती पक्षे सुपर्वणां देवानां आगमो यस्मिन् तं एवंविधं गर्भं मध्यमुद्वहन्ती । पुनः असीमां नास्ति सीमा यस्या सा तां सौमनसीं सुमनसः सन्तः तेषामियं तां सत्सम्बन्धिनीं श्रियं शोभां श्रिता पक्षे सुमनसः पुष्पाणि तत्संबंधिनीं शोभां श्रिता एतावता नन्दनभूमेः सुमङ्गलायाः सादृश्यं जातम् ॥ ३५ ॥

**रिपुद्विपक्षेपिबलं गभीरा, न भूरिमायैः परिशीलनीया ।**
**गर्भं महानादममुं दधाना, परैरधृष्यासि गिरेर्गुहेव ॥ ३६ ॥**

(व्या०) रिपु इति । हे देवि त्वं अमुं गर्भं दधाना धत्ते इति दधाना सती गिरेः पर्वतस्य गुहा इव परैरन्यैरधृष्या न धृष्या अधृष्या (ऋदुपान्त्यादक्लृपिचृदचः । ५-१-४१ । इ. सू. धृषूधातोः कर्मणि क्यप् कित्वात् गुणाभाव । ) अनाकलनीयासि । किंविशिष्टममुं महानादं महान् नादः कीर्त्तिरूपो यस्य तं पक्षे महानादं सिंहं पुनः रिपुद्विपक्षेपि बलं रिपव एव द्विपाः करिणः तेषां क्षेपि तिरस्कारि बलं यस्य तम् । किंलक्षणा त्वं गुहा च गभीरा पुनः भूरिमायैः

भूरिर्माया येषां तैः मायाबहुलैः शृगालैर्वा न परिशीलनीया परिशीलितुं योग्या परिशीलनीया अनाश्रयणीया ॥ ३६ ॥

**जित्वा गृहव्योममणी स्वभासा, ध्रुवं तव प्रोल्लसिता सुतेन ।**
**तदेन मध्ये वसताभ्रगेह-द्वयीव धत्से नवमेव तेजः ॥ ३७ ॥**

(व्या०) जित्वेति । हे देवि तव सुतेन स्वभासा स्वस्य भाः तया आत्मीयकान्त्या गृहव्योममणी गृहं च व्योम च तयोर्मणी गृहमणिः प्रदीपः व्योममणिः सूर्यः तौ जित्वा ध्रुवं निश्चितं प्रोल्लसिता उल्लसिष्यते । तत् तस्मात् कारणात् तेन सुतेन मध्ये उदरे वसता वसतीति वसन् तेन त्वं अभ्रगेहद्वयी इव अभ्रं च गेहं च तयोर्द्वयी (द्वित्रिभ्यामयट् वा । ७-१-१५२ । इ. सू. द्विशब्दात् अवयवे अर्थे अयट् वा टित्वात् ङी ।) इव अभ्रं आकाशं गृहं तद्वत् नवमेव तेजो धत्से दधासि । अथवा अभ्रगृहमिव जो धत्से ॥ ३७ ॥

**सूते त्वया पूर्वदिशात्र भास्व-त्युल्लासिनेत्राम्बुजराजि यत्र ।**
**दृष्टामृताघ्राणसुखं वपुर्मे, सरस्यते तद्दिनमर्थयेऽहम् ॥ ३८ ॥**

(व्या०) सूते इति । अहं तत् दिनमर्थये प्रार्थयामि यत्र यस्मिन् दिने पूर्वदिशा पूर्वा चासौ दिक् च पूर्वदिक् तया पूर्वदिशा पूर्वदिक्सदृशया त्वया अत्र अस्मिन् सुते सूते सति मम वपुः शरीरं सरस्यते (सो वा लुक् च । ३-४-२७ । इ. सू. आचारे अर्थे पयस् शब्दात् क्यङ् वा सकारस्य लुगभावश्च ङित्वादात्मनेपदम् ।) सर इवाचरति । किंविशिष्टे अत्र सुते भास्वति देदीप्यमाने सूर्यसदृशे वा किंविशिष्टं वपुः उल्लासिनेत्राम्बुजराजि नेत्राणि एव अम्बुजानि नेत्राम्बुजानि उल्लसतीति उल्लासिनी उल्लासिनी नेत्राम्बुजानां नेत्रकमलानां सहस्रत्वात् राजिः श्रेणिर्यस्मिन् तत् पुनः दृष्टामृताघ्राणसुखं दृष्टं अमृतेन आघ्राणस्य तृप्तस्य सुखं येन तत ॥ ३८ ॥

**प्राप्ता ध्रुवं खेलयितुं तनूजं, तवोपगुह्यासमुदस्त्रिदश्यः ।**
**तथा रतिं न स्वरितारतार्त-प्रियोपगूढा अपि बोधितारः ॥ ३९ ॥**

(व्या०) प्राप्ता इति । त्रिदश्यो देवाङ्गनाः स्वरिता स्वर्गं इता गताः

सत्यः रतार्तप्रियोपगूढाः अपि रतेन आर्ताः रतार्ताः ते च ते प्रियाश्च स्वामिनस्तैः उपगूढाः अपि संभोगावसरपीडितदयितालिङ्गिता अपि रतिं सुखं तथा न बोधितारः न ज्ञास्यन्ति । यथा तव तनूजं पुत्रं उपगुह्य आलिङ्गच आप्तमुदः आप्ता मुद्याभिस्ताः प्राप्तहर्षाः सत्यः भुवं खेलयितुं प्राप्ता यथा सुखं बोधितारः ज्ञास्यन्ति ॥ ३९ ॥

**अस्मिन् मयैकासनसन्निविष्टे, मत्तो महत्त्वादिगुणैरनूने ।**
**चिह्नैरिलास्पर्शनिमेषमुख्यै, रस्यैव मां लक्षयितामरौघः ॥ ४० ॥**

(व्या०) अस्मिन् इति । हे देवि अस्मिन् तव सुते मया सह एकासनसन्निविष्टे एकं च तत् आसनं एकासनं तस्मिन् सन्निविष्टस्तस्मिन् एकासने उपविष्टे सति अमरौघः अमराणामोघः देवसमूहः । अस्य एव तव पुत्रस्यैव इलास्पर्शनिमेषमुख्यैः इलायाः स्पर्शः इलास्पर्शः इलास्पर्शश्च निमेषाश्च ते मुख्यानि येषु तानि तैः पृथ्वीतलस्पर्शनादिचिह्नैः मां लक्षयिता उपलक्षयिष्यति । किंविशिष्टे अस्मिन् मत्तो (अहीयरुहोऽपादाने । ७-२-८८ । इ. सू. पञ्चम्यर्थे अस्मद् शब्दात् वा तसुप्रत्ययः । ) मत्सकाशात् महत्त्वादिगुणैः महतो भावो महत्त्वं तत् आदि येषां ते महत्त्वादयः ते च ते गुणाश्च तैः गुणैः अनूने न ऊनः अनूनस्तस्मिन् संपूर्णे ॥ ४० ॥

**अस्मिन्नसिव्यग्रकरे करीन्द्रा-रूढे रणाय प्रयतेऽरिभूपाः ।**
**पलायमाना वपुषो विगास्य-न्त्युच्चत्वमेके गुरुतां तथान्ये ॥ ४१ ॥**

(व्या०) अस्मिन् इति । अस्मिन् तव पुत्रे असिव्यग्रकरे असिना व्यग्रः करो यस्य सः तस्मिन् खड्गव्यग्रहस्ते करीन्द्रारूढे करिणामिन्द्रस्तस्मिन् आरूढे रणाय संग्रामाय प्रयते आदरपरे सति एके अरिभूपाः अरयश्चते भूपाश्च शत्रुनृपाः वपुषः शरीरस्य उच्चत्वं तथा अन्ये वपुषो गुरुतां गुरोर्भावस्तां गुरुत्वं विगास्यन्ति । किंविशिष्टा अरिभूपाः पलायमाना पलायन्ते इति पलायमानाः ॥ ४१ ॥

**अस्येषु पुंलक्षणवीक्षणेन, क्षरन्मदाः संख्यमतन्त्रतोऽपि ।**
**यास्यन्ति दास्यं समुपास्य लास्यं, दूरे मनुष्या दनुजारयोऽपि ॥४२॥**

(व्या०) अस्येति । हे देवि ते सर्वप्रसिद्धाः सदानवाः दानवसहिताः दनुजारयः अपि दनुजानामरयोऽपि मागधवरदामप्रभाससिन्धुखंडप्रपातगुफातमिस्रगुफासत्कप्रभृतिदेवा अपि अस्य तव पुत्रस्य लास्यं नाट्यं समुपास्य कृत्वा अस्य तव पुत्रस्य दास्यं यास्यन्ति । किंविशिष्टा दनुजारयः इषु पुंखाक्षरवीक्षणेन इषोर्बाणस्य पुंखोऽन्तिमभागस्तस्मिन् अक्षराणां वीक्षणेन दर्शनेन क्षरन्मदाः क्षरन् मदो येषां ते नश्यद्गर्वाः । किंकुर्वतोऽस्य संख्यं संग्रामं अतन्वतोऽपि तनोतीति तन्वन् न तन्वन् अतन्वन् तस्य अकुर्वतोऽपि ॥ ४२ ॥

**अस्मिन् दधाने भरताभिधान-मुपेष्यतो भूमिरियं च गीश्च ।**
**विद्वद्भुवि स्वात्मनि भारतीति, ख्यातौ मुदं सत्प्रभुलाभजन्माम् ।**

(व्या०) अस्मिन् इति । अस्मिन् तव पुत्रे भरताभिधानं भरत इति अभिधानं तत् दधाने सति धत्ते इति दधानस्तस्मिन् इयं भूमिः पृथ्वी च अन्यत् गीः सरस्वती च विद्वद्भुवि विदुषां भूः तस्यां विद्वद्भुवि विद्वज्जनस्थाने स्वात्मनि स्वस्यात्मा तस्मिन् आत्मविषये भारतीति ख्यातौ सत्यां सत्प्रभुलाभजन्मां संश्चासौ प्रभुश्च तस्य लाभः प्राप्तिः तस्मात् जन्म यस्याः सा तां सुस्वामिप्राप्तिसमुत्पन्नां मुदं हर्षं उपेष्यतः प्राप्स्यतः । विद्वांस इति वदन्ति भरतस्य इयं भारती भरतक्षेत्रभूमिः सरस्वती च ॥ ४३ ॥

**उदच्यमाना अपि यान्ति निष्ठां, सूत्रेषु जैनेष्विव येषु नार्थाः ।**
**तेषां नवानां निपुणे निधीनां, स्वाधीनता वर्त्स्यति ते तनूजे ॥४४॥**

(व्या०) उदच्यमाना इति । येषु निधिषु उदच्यमाना अपि निष्कास्यमाना अपि अर्था द्रव्याणि निष्ठां क्षयं न यान्ति केषु इव सूत्रेषु इव । यथा जैनेषु सूत्रेषु आगमेषु अर्था निष्ठां न यान्ति । तद्यथा—सव्व नईणं जाहुज्जवालुया सव्व उदहिजं नीरं इत्तोवि अणंतगुणो अणंतसो अत्थसुत्तस्स ॥१॥ इति न्यायात् आगमोऽर्थनिष्ठां न यातीति भावः । हे निपुणे तेषां नवानां निधीनां स्वाधीनता स्ववशता ते तव तनूजे पुत्रे वर्त्स्यति भविष्यति । अमूनि नवनिधानानि ज्ञेयानि । नेसप्पे १ पेडुयए २ पिंगल ३ सव्वरयण ४ महपउमे ५

कालेय ६ महाकाले ७ माणगमहानिही ८ संखे ९ । एतेषु एते पदार्थाः स्युः पुर १ कण २ भूसण ३ रयण ४ वत्थ ५ सिप्पा ६ गरुणे ७ सत्थणे ८ नाडय ९ उप्पत्तिकमासनामसुरठियनिहीणं ॥ २ ॥ चकट्ठपइट्ठाणा अठ्ठुस्सेहा ये नवयविक्खंभा । बारसजोयणमंजू ससंठ्ठिया जक्ष वीयमुहे ॥ ३ ॥ ४४ ॥

**न मानवीष्वेव समाप्तकामः, प्रभामयीं मूर्तिमुपेतयासौ ।**
**समाः सहस्रं सुरशैवलिन्या, समं समेष्यत्युपभोगभङ्गीः ॥ ४५ ॥**

(व्या०) न इति । हे देवि असौ तव पुत्रः मानवीषु (तस्येदम् । ६–३–१६० । इ. सू. मनुशब्दात् इदमर्थे अण् । अणञेयेकण्–म् २–४–२० इ. सू. ङी. ।) एव न समाप्तकामः समाप्तः कामो यस्य सः असंपूर्णाभिलाषः सन् प्रभामयीं (प्रकृतेमयट् । ७–३–१ । इ सू. प्रचुरेऽर्थे प्रभाशब्दात् मयट् टित्वात् ङी. । ) कान्तिमयीं मूर्तिमाकृतिमुपेतया प्राप्तया सुरशैवलिन्या सुराणां देवानां शैवलिनी नदी तया गङ्गया समं सहस्रं समाः सहस्रं वर्षाणि उपभोगभङ्गीः उपभोगानां भङ्गयस्ताः विलासादिसुखविच्छित्तीः समेष्यति प्राप्स्यति ॥ ४५ ॥

**सत्धर्मिकान् भोजयतोऽस्य भक्त्या, भक्तैर्विचित्रैः शरदां समुद्रान् ।**
**भक्तेश्च भुक्तेश्च रसातिरेकं, वक्तुं भविष्यत्यबुधा बुधाली ॥ ४६ ॥**

(व्या०) सत् इति । हे देवि तव अस्य सुतस्य सम्यक्त्वधारिणः १ । सचित्तपरिहारिणः २ । एकाहारिणः ३ । ब्रह्मचारिण ४ । सत्यव्यवहारिणः ५ । द्वादशव्रतधारिणः ६ ॥ ईदृग्षट्रीयुक्तान् साधर्मिकान् सुश्रावकान् भक्त्या विचित्रैः शालिदालिपक्वान्नघृतघोलाद्यैर्भक्तैरन्नैः शरदां वर्षाणां समुद्रान् कोटाकोटीः भोजयतः सतः भक्तेश्च अन्यत् भुक्तेश्च रसातिरेकं रसस्य अतिरेकस्तं रसाधिक्यं वक्तुं जल्पितुं बुधाली बुधानामाली बुधाली विद्वत्श्रेणिः अबुधा न बुधा अबुधा मूर्खा भविष्यति ॥ ४६ ॥

**निवेशिते मूर्ध्न्यमुनाविहार–नीमेमणिस्वर्णमये किरीटे ।**
**न सुभ्रु भर्ता किमुदारशोभां, भूभृद्वरोऽष्टापदनामधेयः ॥ ४७ ॥**

(व्या०) निवेशिते इति । हे सुभ्रु शोभने भ्रुवौ यस्याः सा तस्याः

संबोधनं क्रियते अष्टापदनामधेयः अष्टापद इति नामधेयं (नामरूपभागाद् धेयः । ७-२-१५८ । इ. सू. नामशब्दात् स्वार्थे धेयप्रत्ययः नाम एव नामधेयम् ।) यस्य स भूभृद्वर भुवं बिभ्रतीति भूभृत पर्वतास्तेपु वरः श्रेष्ठः पर्वतमुख्यो राजा उदारशोभां उदारा चासौ शोभा च तां किं न भर्ता न धरिष्यति । अपि तु धरिष्यत्येव । क सति अमुना तव पुत्रेण विहारनिभे विहारस्य निभे सदृशे प्रासादसदृशे मणिस्वर्णमये मणिस्वर्णनिर्मिते किरीटे मुकुटे मूर्ध्नि मस्तके निवेशिते सति। यत् उच्यते उत्सेधाङ्गुलदीर्घयोजनमितं क्रोशत्रयं चोच्छ्रितं विस्तारे भरताधिराजविहित गव्यूतमात्रोद्वरम् । एकाहर्निशवामनित्यशिवदं कैलासभूषामणिं नाम्ना सिंहनिषाद्यमुत्तममहं चैत्य स्तुवे सर्वदा राजापि शिरसि मुकुटे निवेशिते शोभां प्राप्नोति । अष्टापदेनापि प्रासादेन शोभा प्राप्तेति भाव ॥४७॥

**तथैष योगानुभवेन पूर्व-भवे स्वहस्तेऽकृत मोक्षतत्त्वम् ।**
**स्वरूपवीक्षामदकर्मबन्धात्-त्रातुं यथा सत्स्यति तद्रयेण ॥ ४८ ॥**

(व्या०) तथेति । एपः तव सुत पूर्वभवे पूर्वश्चासौ भवश्च पूर्वभव(पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम् । ३-१-१०३ । इ. सू पूर्वशब्देन सह भवशब्दस्य कर्मधारयसमास ।) तस्मिन् योगानुभवेन योगस्य अनुभवस्तेन योगसामर्थ्येन स्वहस्ते स्वस्य हस्तस्तस्मिन् स्वकरे मोक्षतत्त्वं मोक्ष इति तत्त्वं मोक्षतत्त्वं तत् तथा अकृत । यथा तत् मोक्षतत्त्वं रयेण वेगेन स्वरूपवीक्षामदकर्मबन्धात् स्वरूपस्य वीक्षा वीक्षणं तया मदस्य कर्मणो बन्धस्तस्मात् त्रातुं रक्षितुं आसत्स्यति आसन्न भविष्यति ॥ ४८ ॥

**एवं पुमर्थप्रथने समर्थः, प्रभानिधिर्नैःस्व्यनिरासनिष्ठः ।**
**पाल्यो महोर्व्यास्तव पद्मराग, इव प्रयत्नान्न न गर्भगोऽयम् ॥ ४९ ॥**

(व्या०) एवमिति । हे देवि एव अमुना पूर्वोक्तप्रकारेण पुमर्थप्रथने पुमर्थानां प्रथन तस्मिन् पुरुपार्थविस्तारणे समर्थ प्रभानिधि प्रभाणा निधि । नैःस्व्यनिरासनिष्ठ निर्गतं स्व धनं यस्य सः नि स्व निःस्वस्य भावो नैःस्व्य (पतिराजान्तगुणाङ्गराजादिभ्य कर्मणि च । ७-१-६० । इ. सू नि स्वश-

ब्दात् व्यण् णित्वात् वृद्धिः ।) दारिद्र्यं तस्य निरासे निष्ठा यस्य सः दारिद्र्यनिराकरणतत्परः । एवंविधोऽयं गर्भगः गर्भे गच्छतीति तव पुत्रः महोर्व्याः महतीचासौ उर्वी च महोर्वी तस्याः महापृथिव्याः पद्मराग इव प्रयत्नात् महोद्यमात् न नपाल्यः अपि तु पालनीय एव ॥ ४९ ॥

**गीर्वाणलोकेऽस्मि यथा गरीयां-स्तथा नृलोके भविता सुतस्ते ।**
**वयस्थ एवात्र सदग्वयस्य-संपर्कसौख्यानि गमी ममात्मा ॥ ५० ॥**

(**व्या०**) गीर्वाणे इति । अहं गीर्वाणलोके गीर्वाणानां लोकस्तस्मिन् देवलोके यथा गरीयान् (गुणाङ्गाद्वेष्ठेयसू । ७--३-९ । इ. सू. गुरुशब्दात् अतिशयेऽर्थे ईयसुः । प्रियस्थिरस्फिरोरुगुरु-म् । ७-४-३८ । इ. सू. ईयसुपरे गुरोर्गरादेशः । ) अतिशयेन गुरुः अस्मि । तथा नृलोके नृणां लोकस्तस्मिन् मनुष्यलोके तव सुतः पुत्रो गरीयान् भविष्यति । वयस्थे एव वयसि तिष्ठतीति वयस्थं तस्मिन् एव यौवनं प्राप्ते एव सुते मम आत्मा सदग्वयस्यसंपर्कसौख्यानि सदक् चासौ वयस्य (हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्यधेनुष्यागार्हपत्यजन्यधर्म्यम् । ७-१--११ । इ. सू. मित्रेऽर्थे वयस्यशब्दो यान्तो निपात्यते)श्च तस्यसंपर्कसङ्गमस्तस्य सौख्यानि तानि सदक्षमित्रसमागमसुखानि गमी गमिष्यतीति गमी (वर्त्स्यति गम्यादिः । ५-३-१ । इ. सू इन्नन्तो गमिन् निपात्यते।) ॥५०॥

**इत्युक्तिभिर्वृष्टसिताम्बुमेघ-श्लाघाममोघां मघवा विधाय ।**
**तिरोदधे व्योमनि विद्युदर्चिः-स्तोमं स्वभासा परितो वितत्य ॥५१॥**

(**व्या०**) इतीति । मघवा इन्द्र इति उक्तिभिः पूर्वोक्तवचनैः वृष्टसिताम्बुमेघश्लाघां वृष्टं सितायाः शर्करायाः उदकं येन स वृष्टसिताम्बुः स चासौ मेघश्च तस्य श्लाघां प्रशंसा तां अमोघां न मोघा अमोघा तां सफलां विधाय कृत्वा तिरोदधे अदृश्यो बभूव । किंकृत्वा व्योमनि आकाशे स्वभासा स्वस्य भाः तया आत्मीयकान्त्या परितः समन्ततो विद्युदर्चिःस्तोमं विद्युतः अर्चिषस्तेजांसि तेषां स्तोमं समूहं वितत्य विस्तार्य ॥ ५१ ॥

**तस्मिन्नथालोकपथाद्विभिन्ने, हृन्नेत्रराजीवविकाशहेतौ**

**सा पद्मिनीवानघचक्रबन्धौ, क्षणात्तमः श्याममुखी बभूव ॥ ५२ ॥**

(व्या०) तस्मिन् इति। अथानन्तरं तस्मिन् इन्द्रे आलोकपथात् आलोकस्य पन्थाः आलोकपथ(ऋक्पूःपथ्यपोऽत्। ७-३-७६। इ. सू. आलोकपूर्वकपथिन् शब्दात् अत् प्रत्ययः।) तस्मात् दर्शनमार्गात् विभिन्ने पृथग्भूते सति सा सुमङ्गला पद्मिनी इव क्षणात् तमः श्याममुखी (नखमुखादनाम्नि। २-४-४०। इ. सू. मुखशब्दात् स्त्रियां ङी।) तमसा विषादेन श्यामं मुखं वदनं यस्या सा बभूव जाता। किंविशिष्टे इन्द्रे हृन्नेत्रराजीवविकाशहेतौ हृदयं च नेत्रे च एतेषां समाहारो हृन्नेत्रं (प्राणितुर्याङ्गाणाम्। ३-१-१३७। इ. सू. प्राण्यङ्गत्वात एकार्थद्वन्द्वः।) तदेव राजीवं कमलं हृदयकमलनयनकमलानां विकाशः तस्य हेतु कारणं तस्मिन्। पुनः अनघचक्रबन्धौ न विद्यते अघं पापं येषां ते अनघाः निष्पापाः तेषां चक्रे समूहे बन्धौ बन्धुसदृशे पक्षे अनघे निर्दूषणे चक्रबंधौ सूर्ये आलोकपथात् विभिन्ने सति कमलिनी तमःश्याममुखी स्यात् तथा सा सुमङ्गला जाता ॥ ५२ ॥

**अवोचदालीरुपजानुपाली-भूय स्थिता गद्गदया गिरा सा।**
**अतृप्त एवात्र जने रसस्य, हला बलारिर्व्यरमत् किमुक्तेः ॥ ५३ ॥**

(व्या०) अवोचत् इति। सा सुमङ्गला गद्गदया गिरा स्खलिताक्षरया वाण्या उपजानु (विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययाऽसम्प्रतिपश्चात्क्रमख्यातियुगपत् सदृक्-म्। ३-१-३९। इ. सू समीपेऽर्थे अव्ययीभावः।) समीपे पालीभूय श्रेणीभूय स्थिता एवंविधा आली सखीरवोचत्। हे हला सख्यः बलारिः बलस्य अरि इन्द्र अत्र अस्मिन् मल्लक्षणे जने रसस्य अतृप्त एव उक्तेर्वचनत किं व्यरमत् विरराम ॥ ५३ ॥

**दौःस्थ्यं किमस्यापि कथाप्रथासु, न्यासोचिता वा किमु नास्मि तासाम्।**
**वाणीरसे मामसमाप्तकामा, विहाय यत्सैष ययौ विहायः ॥ ५४ ॥**

(व्या०) दौःस्थ्यमिति। अस्यापि इन्द्रस्य कथाप्रथासु कथानां प्रथास्तासु किंदौःस्थ्यं दुःस्थस्य भावः दारिद्र्यं वर्तते। वा अथवा तासां कथाप्रथानां कि-

महं न्यासोचिता न्यासस्य उचिता संन्यासयोग्या नास्मि । यत् यस्मात् कारणात् स एष इन्द्रः वाणीरसे वाण्या वाचायाररसस्तस्मिन् असमाप्तकामां न समाप्तः असमाप्तः असमाप्तः कामो यस्याः सा तां असंपूर्णाभिलाषां मां विहायमुक्त्वा विहाय आकाशं ययौ ॥ ५४ ॥

**यस्यामृतेनाशनकर्म तस्य, वचःसुधासारति युक्तमेतत् ।**
**पातुः पुनस्तत्र निपीयमाने, चित्रं पिपासा महिमानमेति ॥ ५५ ॥**

(व्या०) यस्येति । यस्य इन्द्रस्य अमृतेन अशनकर्म अशनस्य भोजनस्य कर्म आहारो वर्तते । तस्य इन्द्रस्य वच. सुधासारति सुधाया अमृतस्य आसारः धारावृष्टिः सुधासार इव आचरति सुधासारति (कर्तुः क्विप् गल्भक्लीबहोडात्तु ङित् ३-४-२५ । इ. सू. आचारार्थे सुधासारशब्दात् क्विप् प्रत्ययः ।) अमृतवृष्टिरिव भवति एतद् युक्तम् । पुनश्चित्रं आश्चर्यं तत्र वचसि निपीयमाने निपीयते इति निपीयमानं तस्मिन् सति पातु पिबतीति पाता तस्य पिबतः पुरुषस्य पिपासा पातुमिच्छा पिपासा तृष्णा महिमानं महतो भावो महिमा तं महिमान (पृथ्वादेरिमन् वा । ७-१-५८ । इ. सू महत शब्दात् भावे इमन् वा । त्र्यन्तस्वरादे । ७-४-४३ । इ. सू अन्त्यस्वरादेर्लुक्) महत्त्वं एति प्राप्नोति ॥५५॥

**न मार्जितावत्कवलेन लेह्या, न क्षीरवच्चाञ्जलिना निपेया ।**
**अहो सतां वाग् जगतोऽपि भुक्त-पीतातिरिक्तां विदधाति तुष्टिम् ५६**

(व्या०) नेति । अहो इति आश्चर्ये सतां वाक् मार्जितावात् (स्यादेरिवे । ७-१-५२ । इ सू सादृश्येऽर्थे मार्जिताशब्दात् वत् प्रत्ययः मार्जिता इव मार्जितावत् ) रसवत् भोजनवत् कवलेन ग्रासेन लेह्या न आस्वाद्या वर्तते । च अन्यत् सतां वाग् क्षीरवत् ( स्यादेरिवे । ७-१-५२ । इ सू. सादृश्येऽर्थे क्षीरशब्दात् वत् प्रत्ययः क्षीरमिव क्षीरवत् । ) पानीयवत् अञ्जलिना निपेया निपातुं योग्या पेया न वर्तते । सतां वाग् जगतोऽपि विश्वस्यापि भुक्तपीतातिरिक्ता भुक्तं च पीतं च भुक्तपीते ताभ्यां अतिरिक्ता अधिका भुक्तपीतातिरिक्ता तां भोजनात् क्षीरपानात् विशेषकारिणीं तुष्टिं विदधाति ॥ ५६ ॥

**न चन्दनं चन्द्रमरीचयो वा, न वाप्यपाचीपवनो वनी वा ।**
**सितानुविद्धं न पयः सुधा वा, यथा प्रमोदाय सतां वचांसि ॥५७॥**

(व्या०) नेति । न चन्दनं वा अथवा चन्द्रमरीचयः चन्द्रस्य मरीचयः किरणाः न अपाचीपवनः अपाच्याः पवनः दक्षिणदिशः पवनः दक्षिणपवनः अथवा वनी महद्वनं वनी सितानुविद्धं सितया शर्करया अनुविद्धं शर्करामिश्रं पयो वा दुग्धं वा अथवा सुधा अमृतं तथा प्रमोदाय हर्षाय न स्युः । यथा सतां सत्पुरुषाणां वचांसि वचनानि प्रमोदाय स्युः ॥ ५७ ॥

**अङ्गुष्ठयन्त्रार्दनया ददानौ, रसं रसज्ञा सुधियां रसज्ञे ।**
**सुधां प्रकृत्या किरती परेष्टु–स्तनेक्षुयष्टी न नधिकरोति ॥ ५८ ॥**

(व्या०) अङ्गुष्ठ इति। सुधियां शोभना धीर्येषां ते सुधियः तेषां रसज्ञा रसंजानातीति रसज्ञा (आतोडोऽह्वावामः । ५–१–७६ । इ. सू. रसशब्दपूर्वकज्ञाधातो. ड प्रत्ययः डित्वात् अन्त्यस्वरादिलोपः अदन्तत्वात् स्त्रियामाप् । ) जिह्वा परेष्टुस्तनेक्षुयष्टी परेष्टु बहुप्रसूतागौ तस्याः स्तनेः इक्षोर्यष्टिः परेष्टुस्तनश्च इक्षुयष्टिश्च द्वौ न न धिक्करोति अपि तु धिक्करोति तिरस्करोत्येव । किंविशिष्टौ द्वौ परेष्टुस्तनेक्षुयष्टौ अङ्गुष्ठयन्त्रार्दनया अङ्गुष्ठश्च यन्त्रश्च तयोरर्दनापीडना तया रस ददानौ ददाते इति ददानौ । किंविशिष्टा रसज्ञा रसज्ञे रसं जानातीति रसज्ञस्तस्मिन् पुरुषे प्रकृत्या स्वभावेन सुधाममृतं किरती विस्तारयन्ती ॥५८॥

**अवेदि नेदीयसि देवराजे, श्रोत्रोत्सवं तन्वति वाग्विलासैः ।**
**दिनो न गच्छन्नपि हन्त सख्यः, कालः किमेवं कुतुकैः प्रयाति ॥५९॥**

(व्या०) अवेदि इति । हे सख्य हन्त इति वितर्के मया दिनो गच्छन् गच्छतीति गच्छन् अपि न अवेदि न ज्ञात । क सति नेदीयसि अतिशयेन अन्तिक इति नेदीयान् ( गुणाङ्गाद्वेष्ठेयसू । ७–३–९ । इ. सू अन्तिकशब्दात् तरप्विषये ईयसुप्रत्ययः बाढान्तिकयोः साधनेदौ । ७–४–३७ इ. सू. ईयसौ परे अन्तिकशब्दस्य नेदादेशः । ) तस्मिन् प्रत्यासन्ने देवराजे ( राजन् सखेः । ७–३–१०६ । इ. सू. देवपूर्वकराजन् शब्दात् अट् समासान्त. । नोऽपदस्य

तद्धिते । ७–४–६१ । इ. सू. अट् परे अन्त्यस्वरादेर्लुक् । ) देवानां राजा देवराजस्तस्मिन् इन्द्रे वाग्विलासैः वाचां विलासास्तैः श्रोत्रोत्सवं–श्रोत्रयोरुत्सवस्तं कर्णोत्सवं वितन्वति वितनोतीति वितन्वन् तस्मिन् कुर्वति सति । कालः किमेवं अमुना प्रकारेण कुतुकैः आश्चर्यैः प्रयाति ॥ ५९ ॥

**विज्ञापयांचक्रुरथालयस्तां, विमुग्धचित्ते गतचिन्तयालम् ।**
**स्नातुं च भोक्तुं च यतस्व पश्य, खमध्यमास्कन्दति चंडरोचिः ६०**

(व्या०) विज्ञापयां चक्रुरिति । अथानन्तरं आलयः सख्यः तां सुमङ्गलां विज्ञापयांचक्रुः । हे विमुग्धचित्ते विमुग्धं चित्तं यस्याः सा तस्याः संबोधनं क्रियते गतचिन्तया गतस्य चिन्ता तया अलंपूर्यतां पश्य विलोकय । चंडरोचिः चंड रोचिर्यस्य सः सूर्यः खमध्यं खस्य मध्यं तत् आस्कन्दति आक्रामति । त्वं स्नातुं स्नानं कर्तुं च अन्यत् भोक्तुं भोजनं कर्तुं यतस्व उपक्रमं कुरु ॥६०॥

**अहो अहः प्राप्यकृतप्रयत्नः, शनैः शनैरुच्चपदोपलब्धौ ।**
**करे खरीभूय नयस्य तत्त्वं, व्यनक्ति सूरेष्वपरेषु सूरः ॥ ६१ ॥**

(व्या०) अहो इति । अहो इति आश्चर्ये सूरः सूर्यः अह दिनं प्राप्य शनैः शनैः उच्चपदोपलब्धौ उच्चं च तत् पदं उच्चपदं तस्य उपलब्धौ प्राप्तौ कृतप्रयत्नः कृतः प्रयत्नो येन सः सन् करे किरणे खरीभूय कठोरो भूत्वा अपरेषु सूरेषु भटेषु नयस्य ज्ञेयस्य तत्त्वं व्यनक्ति प्रकटीकरोति । दिवसे प्राप्ते सति उच्चपदप्राप्त्यर्थं प्रयत्नः क्रियते करे दंडे च खरत्वं क्रियते इति भावः ॥ ६१ ॥

**लोकं ललाटन्तपरश्मिदंडै, रुत्सार्यभानुर्विजनीकृतेषु ।**
**सरस्स्ववक्रान्वियदन्तरस्थः, क्रोडे करान्न्यस्यति पद्मिनीनाम् ॥६२॥**

(व्या०) लोकमिति । भानुः सूर्यः विजनीकृतेषु विगता जना येभ्यस्तानि विजनानि न विजनानि अविजनानि अविजनानि विजनानि कृतानीति विजनीकृतानि तेषु निर्जनेषु सरस्सु सरोवरेषु पद्मिनीनां क्रोडे उत्संगे वियदन्तरस्थः वियत अन्तरे तिष्ठतीति आकाशमध्ये स्थितः सन् अवक्रान् न वक्राः अवक्रास्तान् अवक्रान् करान् न्यस्यति व्यापारयति । किंकृत्वा ललाटन्तपरश्मिदंडैः

ललाटं तापयन्तीति ललाटन्तपाः (ललाटवातशर्द्धात्तिपाऽजहाकः ५-१-१२५ । इ. सू. ललाटपूर्वकतपूधातोः खश् प्रत्ययः । खित्वात् मोऽन्तः । ) रश्मय एव दंडाः रश्मिदंडाः ललाटन्तपाश्च ते रश्मिदंडाश्च तैः लोकं उत्सार्य परत्र कृत्वा ६२

**पद्मं श्रियः सद्म बभूव भानोः, करैरधूमायत सूर्यकान्तः ।**
**भर्तुः प्रसादे सदृशेऽपि सम्प-त्फलोपलब्धिः खलु दैववश्या ॥६३॥**

(व्या०) पद्ममिति । भानोः सूर्यस्य करैः किरणैः पद्मं कमलं श्रियः लक्ष्म्याः सद्मगृहं बभूव । सूर्यस्य करैः सूर्यकान्तः अधूमायत (क्यङ् । ३-४-२६ । इ. सू. धूमशब्दात् आचारेऽर्थे क्यङ् । ङित्वात् आत्मनेपदम् । ) धूमवदाचरितः । भर्तुः स्वामिनः प्रसादे सदृशेऽपि तुल्येऽपि सम्पत्फलोपलब्धिः सम्पदां फलानामुपलब्धिः लक्षणया फलावाप्तिः खलु निश्चितं दैववश्या दैवस्य वश्या दैवायत्ता स्यात् ॥ ६३ ॥

**यः कोऽपि दध्रे निशि राजशब्दं, दिगन्तदेशानियता ययौ सः ।**
**दधासि कस्योपरि तिग्मभावं, पान्थैःश्रमार्तै रविरेवमूचे ॥ ६४ ॥**

(व्या०) य इति । श्रमार्तैः श्रमेण आर्ताः तैः श्रमाकुलैः पान्थैः (नित्यं णः पन्थश्च । ६-४-८९ । इ. सू. द्वितीयान्तात् पथिन् शब्दात् नित्यं याति इत्यर्थे णप्रत्ययः पथश्च पन्थादेश. पन्थानं नित्यं यान्ति इति पान्थाः ।) पथिकैः रविः सूर्यः एवमूचे । एवमिति किं यः कोऽपि निशि रात्रौ राजशब्दं राजा इति शब्दस्तं दध्रे धरति स्म । स इयता दिगन्तदेशान् दिशामन्ताः तेषां देशास्तान् ययौ । तर्हि कस्योपरि तिग्मभावं तिग्मश्चासौ भावश्च तं तीव्रत्वं दधासि ॥६४॥

**तोयाशया धावित एष पान्थ-व्रातो विमुह्यन् मृगतृष्णिकाभिः ।**
**अप्राप्य तोयं क्षरदश्रुपूरै-रुत्थापयत्यम्बु किलोषरेऽपि ॥ ६५ ॥**

(व्या०) तोय इति । एष पान्थव्रात. पान्थानां व्रातः पान्थव्रातः पथिकसमूहः तोयाशया तोयस्य जलस्याशा तया जलस्येच्छया धावितः सन् तोयं जलं अप्राप्य न प्राप्य क्षरदश्रुपूरैः क्षरन्ति च तानि अश्रूणि च तेषां पूरैःसमूहैः किल इति सत्ये उषरेऽपि अम्बु ऊत्थापयन्ति ऊषरस्थानेऽपि जलं प्रकटं करोति ।

किंकुर्वन् पान्थव्रातः "मृगतृष्णिकाभिर्मृगजलैर्विमुह्यन् विमुह्यतीति विमुह्यन् ६५

**अमी निमीलन्नयना विमुक्त–बाह्यभ्रमा मौनजुषः शकुन्ताः ।**
**श्रयन्ति सान्द्रद्रुमपर्णशाला, अभ्यस्तयोगा इव नीरजाक्षि ॥ ६६ ॥**

(व्या०) अमीति । हे नीरजाक्षि (असहनञ् विद्यमानपूर्वपदात् स्वाङ्गा-दक्रोडादिभ्यः । २–४–३८ । इ. सू. स्त्रियां नीरजपूर्वकअक्षिशब्दात् ङीर्वा ।) नीरे जाते नीरजे कमले ते इव अक्षिणी यस्याः सा तस्याः संबोधनं क्रियते हे कमललोचने अमी निमीलन्नयनाः निमीलन्ति नयनानि येषां ते निमील्यमानलोचनाः विमुक्तबाह्यभ्रमाः बाह्यश्चासौ भ्रमश्च विमुक्तो बाह्यभ्रमो यैस्ते । मौनजुषः मौनं जुषन्ते इति मौनजुषः ( क्विप् । ५–१–१४८ । इ. सू. मौनशब्दपूर्वकजुष्-धातोः क्विप् प्रत्ययः ।) एवंविधाः शकुन्ताः पक्षिणः सान्द्रद्रुमपर्णशालाः सान्द्राश्च ते द्रुमाश्च तेषां पर्णशालाः पर्णैः पत्रैर्निर्मिताः पर्णशालास्ताः निबिडवृक्षपत्रशालाः श्रयन्ति । उत्प्रेक्षते अभ्यस्तयोगा इव अभ्यस्तो योगो यैस्ते इव ॥ ६६ ॥

**उदीयमानोऽकृत लोककर्म–साक्षीत्यभिख्यामयमाहितार्थाम् ।**
**भास्वानिदानीं तु कृतान्ततात, इति त्विषा त्रासितसर्वसत्त्वः ॥६७॥**

(व्या०) उदीयमानः इति । अयं भास्वान् भासोऽस्य सन्तीति भास्वान् सूर्यः उदीयमानः उदीयते इति उदीयमानः सन् लोककर्मसाक्षी लोकानां कर्मणां साक्षी ( साक्षाद्द्रष्टा । ७–१–१९७ । इ. सू. साक्षात् शब्दात् द्रष्टा इत्यर्थे इन् प्रत्ययः । प्रायोऽव्ययस्य । ७–४–६५ । इ. सू. इन् परे अन्त्यस्वरादे-र्लुक् । ) इति अभिख्यां नाम आहितार्थां आहितोऽर्थो यस्यां सा तां सत्यार्थां अकृत कृतवान् तु पुनः इदानीं अधुना कृतान्ततातः कृतोऽन्तो नाशो येन स कृतान्तो यमस्तस्य तातः पिता इति अभिख्यां आहितार्थां सत्यार्थां अकृत । किंविशिष्टः सूर्यः त्रासितसर्वसत्त्वः सर्वे च ते सत्त्वाश्च सर्वसत्त्वाः (पूर्वकालैकस-र्वजरत्पुराणनवकेवलम् । ३–१–९७ । इ. सू. कर्मधारयसमासः ।) सर्वप्राणिनः त्रासिताः त्रासं गमिताः सर्वसत्त्वाः सर्वप्राणिनो येन सः त्रासितसर्वसत्त्वः ६७

**इतीरयित्वा विरतासु तासु, तारुण्यमारूढमहर्निरीक्ष्य ।**
**सुमङ्गलाथ स्वयशोनियुक्त–धीमज्जना मज्जनसद्म भेजे ॥ ६८ ॥**

(व्या०) इतीति। अथानन्तरं सुमङ्गला मज्जनसद्म मज्जनस्य स्नानस्य सद्म-गृहं स्नानगृहं भेजे। किंकृत्वा अहर्दिनं तारुण्यं ( पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च। ७-१-६०। इ. सू. तरुणशब्दात् भावेटयण् टित्वात् आदि-स्वरवृद्धिः।) तरुणस्य भावस्तारुण्यं तत् यौवनं आरूढं निरीक्ष्य दृष्ट्वा। कासु सतीषु तासु सखीषु इति ईरयित्वा कथयित्वा विरतासु सतीषु। किंलक्षणा सुमङ्गला स्वयशोनियुक्तधीमज्जना स्वस्य यशसा नियुक्ता व्यापारिता धीमन्तो बु-द्धिमन्तो जना यया सा आत्मीययशसा व्यापारितविद्वज्जना ॥ ६८ ॥

**तद्वक्षोजश्रीप्रौढिमालोक्य हैमैः, कुंभैर्मंदाक्षेणेव नीचीभवद्भिः।**
**अम्भः संभारभ्राजिभिः स्नानपीठ, न्यस्तां सख्यस्तां मज्जयामासुराशु ॥**

(व्या०) तदिति। सख्य (नारी सखीपङ्गूश्वश्रू। २-४-७६। इ सू. सखीशब्दो ङयन्तो निपात्यते।) स्नानपीठन्यस्तां स्नानस्य पीठे न्यस्तामुपविष्टां तां सुमङ्गलां अम्भः संभारभ्राजिभिः अंभसां जलानां संभारेण समूहेन भ्राजन्ते इति अम्भः संभारभ्राजीनि तै जलसमूहेन शोभमानैः भृतैः हैमैः हेम्नः विकाराः हैमाः तै हैमैः (हेमादिभ्योऽञ्। ६-२-४५। इ. सू. हेमन्शब्दात विका-रेऽर्थे अञ् ञित्वात् आदिस्वरवृद्धिः। नोऽपदस्य तद्धिते। ७-४-६१ इ सू. अन्त्यस्वरादेर्लोप।) सुवर्णमयैः कुंभैः घटैः आशु शीघ्रं मज्जयामासुः स्नानं कारयामासुः। किंकुर्वद्भिः कुंभैः उत्प्रेक्षते तद्वक्षोजश्रीप्रौढिं तस्याः सुमङ्गलाया वक्षोजौ स्तनौ तयोः श्री शोभा तस्याः प्रौढिस्तां आलोक्य दृष्ट्वा मन्दाक्षेण इव लज्जया इव नीचीभवद्भिः (कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्वे च्वि। ७-१-१२६। इ. सू. नीचशब्दात् अभूततद्भावे भूयोगेच्वि। ईश्चावर्णस्याऽनव्य-यस्य। ४-३-१११। इ सू च्वौ परे पूर्वस्य अस्य ई) न नीचा अनीचाः अनीचा नीचा भवन्त इति नीचीभवन्तस्तैः ॥ ६९ ॥

**जगद्भर्तुर्वाचा प्रथममथ जंभारिवचसा,**
**रसाधिक्यात्तृप्तिं समधिगमितामप्यनुपमाम्।**
**स्वरायातैर्भक्ष्यैः शुचिभुवि निवेश्यासनवरे,**
**बलादालीपाली चटुघटनयाऽभोजयदिमाम् ॥ ७० ॥**

(व्या०) जगदिति । आलीपाली आलीनां पाली सखीश्रेणिः शुचिभुवि शुचिश्चासौ भूश्च तस्यां पवित्रभूमौ आसनवरे आसनेषु वरं तस्मिन् श्रेष्ठासने इमां सुमङ्गलां बलात् निवेश्य निवेशयित्वा इति निवेश्य उपवेश्य स्वरगयातैः स्वरात् आयातानि तैः स्वर्गात् आगतैर्भक्ष्यैः भोजनैः चटुघटनया चटूनां घटना तया चाटुवचनरचनया अभोजयत् किंलक्षणां सुमङ्गला प्रथमं जगद्भर्तुर्जगतां भर्ता तस्य श्रीऋषभस्वामिनो वाचा वचनेन अथ अनन्तरं जंमारिवचसा जंमारेरिन्द्रस्य वचो वचनं तेन इन्द्रस्य वाण्या रसाधिक्यात् रसस्य आधिक्यं तस्मात् अनुपमामपि न विद्यते उपमा यस्याः सा ता तृप्तिं समधिगतामपि प्राप्तामपि ॥ ७० ॥

**सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छवि,**
**धम्मिल्लादिमहाकवित्वकलनाकल्लोलिनीसानुभाक् ।**
**वाणीदत्तवरश्चिरं विजयते तेन स्वयं निर्मिते,**
**सर्गो जैनकुमारसंभवमहाकाव्येयमेकादशः ॥ १ ॥**

इतिश्रीमदचलगच्छकविचक्रवर्त्तिश्रीजयशेखरसूरिविरचितस्य **श्रीजैनकुमारसंभवमहाकाव्यस्य** तच्छिष्यश्रीधर्मशेखरमहोपाध्यायकृतायां टीकायां श्रीमाणिक्यसुन्दरसूरिशोधितायां एकादशसर्गव्याख्या समाप्ता ॥ ११ ॥

सुरासुरनराधीश–सेव्यमानपदाम्बुज । नाभिराजाङ्गजोनित्य, श्रीयुगादिजिनो मुदे ॥ १ ॥ श्रीमदञ्चलगच्छेश–**जयशेखरसूरयः** । चत्वारस्तैर्महाग्रन्था, कविशक्रैर्विनिर्मिता ॥ २ ॥ प्रबोधश्चोपदेशश्च, चिन्तामणिकृतोत्तरौ । कुमारसंभवं काव्य, चरित्रं धम्मिल्लस्य च ॥ ३ ॥ तेषां गुरूणां गुणबंधुराणा, शिष्येण धर्मोत्तरशेखरेण । श्रीजैनकौमारकसंभवीया, सुखाय बोधाय कृतेति टीका ॥४॥ देशे सपादलक्षे, सुखलक्ष्ये पद्यरे पुरप्रवरे । नयनवसुवार्धिचन्द्रे ॥ १४८२ वर्षे हर्षेण निर्मिता सेयम् ॥५॥ विद्वत्पद्मविकाशने दिनकरा सूरीश्वरा भास्वरा, माणिक्योत्तरसुन्दरा कविवरा कृत्वा प्रसादं परम् । भक्त्या **श्रीजयशेखरे** निजगुरौ शुद्धामकार्षुर्मुदा, श्रीमज्जैनकुमारसंभवमहाकाव्यस्य टीकामिमाम् ॥६॥ यावन्मेरुर्महीपीठे, स्थिरतां भजते भृशम् । वाच्यमाना जनैस्ताव–ट्टीकासौ नन्दताच्चिरम् ॥७॥

## श्रीमहीमेरुमुनिप्रणीता जिनस्तुतिपञ्चाशिका क्रियागुप्ता.

सकलसुरेश्वमुख्या, विबुधाः सुविशुद्धबुद्धिनिचयोऽपि । स्तवनं तीर्थाधिपते !, जिनेश ! ते नैव कर्तुमिह ॥ १ ॥ इति जानन्नपि नित्यं, तथाप्यहं मुग्धमानसः पवितुम् । विनयी हे जिनराज !, स्तवनमिषात्ते निजां जिह्वाम् ॥ २ ॥ मन्ये न सर्वशास्त्रे, तव वृत्तं विबुधवर्ण्यमानमिह । पुण्यप्रभूतगुरुतर–महिमातिक्रान्तरा कुसुमम् ॥ ३ ॥ स्तुतिवादीक्षेऽमकरध्वजं जिन ! त्वां सुरेशसंसेव्यम् । समवसृतिमध्यभाजं, संसृतिहरणं कदामोक्षात् ॥ ४ ॥ तत्त्वतरुजलदधारा, शासितभूवलय ! भव्यजनवारा. । अतिशयसमूहशाली, नाथ ! भवांश्चरणगुणपाली ॥५॥ सकल ! ससार ! सलक्षण ! संसारासारतां समधिगत्य । सर्वज्ञ ! सर्वसङ्गो, भगवन्न भवानभावाय ॥ ६ ॥ संसारवारिराशिं, विषमतरं दुस्तरं च जिनराज ! । विदभासिततारसुखं, लब्ध्वा वैराग्यमत्रभवान् ॥७॥ भाषितशुचिसत्यागम, उदितोदितधाम ! सद्गुणग्राम ! कृत्वा कर्मनिगस, दूरीकृतदुःखभववासम् ॥ ८ ॥ निर्जितमनोजहारो–ज्ज्वलगुणमण्डल ! विशालतमभाल । कृपया भावारिभयं, भविनां भूमौ भवानेव ॥ ९ ॥ अष्टविधकर्मरोगा–पनोदविशदागद सदा विमदः । त्वमविपदं जन्तूना, हितेच्छया शुद्धसिद्धान्तम् ॥ १० ॥ शशिशोभमानसाधित, यशोऽतिधवलीकृतावनीवलय । निःशेषजन्तुकरुणां, निष्कारणवत्सलोऽत्र भवान् ॥११॥ कनकविराजितमोचे, सुरनरतिर्यग्विजातसङ्कोचे । भवतेश ! समवसरणे, द्वेधा धर्मो धराभरणे ॥ १२ ॥ न कदा करुणाम्बुनिधे, रजनीश ! परोपकारिता भवत. । विद्रुतेह यथा तपनात्, प्रकाशिता विश्व विश्वहिता ॥१३॥ उज्झितसंसृतदोषे, पापिन्यपि जनितपुण्यमतिपोषे । मैत्र्याऽपरत्र रोषे, निरीक्षिते भवति कृततोषे ॥१४॥ ननु निर्ममेत्वदीये, हृदये जिन ! वेद्मिमुदितयावास । मित्रामित्रेषु यतस्त्व–मेकरूप सदा विदित. ॥ १५ ॥ शिवपदसाधनविहिता–दरस्य भवतरतप समाचरत । हृदये सत्क्षान्तिमये, स्थानं न कदापि रोषेण ॥१६॥ दुःसहसुरनरतिर्यक्–कृतोपसर्गावली त्वया त्रेधा । विश्वे क्षमीश ! सम्यक्–सिद्धिसुखास्वादरसिकेन ॥ १७ ॥ जनदुर्जनेन लपितं, दुर्वचनं श्रवणशूलसदृशमपि । भवता सुरपतिविहित–स्तुतितुल्यममानि मुनिमुख्य ? ॥१८॥ भव्यजननयनकैरववने, विकाशं सदा ददानेन । चन्द्रोपमितिर्भवता, सितेन युक्तं जगन्नाथ ॥१९॥

विषयमतिविषमरजनी–विनाशमनिशं वितन्वता भवता । रवितोऽधिकेन लोके, भाविख्यातिप्रतापेन ॥ २० ॥ भव्यविभारोचिष्णु–र्निगकरिष्णुर्भवं भयोपेतम् । एकस्त्वमेवसंवर, मिन्द्रियजयसम्भवं सत्यम् ॥२१॥ चित्रं विशददयास्थः, क्षमा-वतां मुख्यतां सदैव दधत् । सकलं भावारिकुलं, नाथ ? त्वं त्रिभुवने विदितः ॥२२॥ अमृतरसादपि समधिकरसं विशेषादशेषशान्तरसम् । नक्तं दिवापि चित्रं त्वं न सदासावधान जिन ? ॥२३॥ ननु नव्यरम्यरञ्जित सुरनम्यपद ? प्रभावतो भवतः । आजन्मजातवैरा–श्चित्रं तिर्यग्गणेनापि ॥ २४ ॥ विदितचरित्रेपु रहो, मुख्यां के के न विषयजं सौख्यम् । जिनवर ? भवता तु जने, तत्त्यक्तमत्यन्तं विष-मिवावेत्य ॥२५॥ दोषैरष्टादशभिर्नाथ ! मनस्ते मलीमलं न जने । समतानितरां क्षालित–कर्ममलत्वात् कदाचिदपि ॥२६॥ इहते विशदाचारा चरणपरस्य प्रभो ? मनोनमनाक् । संवेगसावधानं कदापिपञ्चप्रमादेषु ॥ २७ ॥ हरिहरमुख्या देवा, जिन ! विख्याता जगत्त्रये सन्तु । त्वय्येव पर प्रकटं दृश्यतया वीतरागत्वम् ॥ २८ ॥ परिनम्रनृपे देदीप्यमानचरणे सुभक्तिरिह भवति । येन जिनेश्वरसत्या, दुःप्रापामुक्तिरपि तेन ॥२९॥ प्रकटितसुख ? कलिकाले, लयालयं शमरसं जने-योऽत्र । स तवप्रसादविशदः, परमां पुष्टिं जगामैवम् ॥३०॥ ये परमायुरमार्य, तव शासनयानपात्रमतिनिविडम् । ते तेरुरतारतरं, भवजलधिं लीलया लोके॥३१॥ ये दुर्गतिभयभीता, नैवविकारेषु मानसं स्वीयम् । लब्ध्वा ते जिन ? वचनं, ते धन्याः शिवपुरं प्राप्ता. ॥ ३२ ॥ या भवमतयो धुर्या, मोहबले मुख्यतां क्षमा–धीश ? । तास्तत्त्वज्ञस्तरसा, तवाज्ञया वर्जिताः सततम् ॥३३॥ कामाग्नि जलद दुर्बल दुःखक्षेप्येषु ये कषायेषु । चित्तप्रसरं न जनास्ते, वसुधायां तवादेश्याः ॥३४॥ यः परमविभाव ? सदानन्दमये तव मते ह्यकम्पमतिः । तस्य जिनेश्वर ? विश्वे, न दुर्लभा शिवपदावाप्तिः ॥३५॥ यः किल निर्मलमनसाऽस्मरदेवममाय ? निर्ममाधीश ? तव नाम महामन्त्रं, समीहितं करगतं तस्य ॥३६॥ य श्रीजि–नेन्द्र ! मिथ्यामतिमुदितो मानसे नवक्रोधात् शुभवति भवति द्वेषं, नहि भवति स भव्यताशाली ॥३७॥ संख्यात्यतीतनवनव भवसम्भूतानि पापकर्माणि । तव शिवकर ! सद्ध्यानाज्जिनातिभक्ति प्रसक्तात्मा ॥ ३८ ॥ तापं पापं च जने, समन्ततः सन्ततं निरस्यन्ती । तव वागविबुधैर्गङ्गावादीन्द्र वर्ण्यतम ! ॥ ३९ ॥

तादक्षसमवसरणं, भवभयहरणं जगत्त्रयीशरणम् । न तव पुरा के भव्या, दृष्ट्वा पुरतः परानन्दम् ॥४०॥ भवत्या धाम मनोज्ञम, सुरनिर्मितसमवसरणऋद्धिवरम् । हृदये भवन्तमीशं, न वयं मिथ्यात्वमतिमूढा ॥ ४१ ॥ सुरतरुरिह तव चरितं, निशम्य मन्ये विदूरतद्देशम् । चिन्तातिगफलदातु- र्बहुधामविराजमानस्य ॥४२॥ अकृतकलाविलासा, दिलातलभासि केवलालोकात् । भवतोऽधित्यसुकृतं, ससार मूलतः सुजनः ॥४३॥ विज्ञप्तैः पापपारा, वदलितनरकालिमोहनृपकारा । कांस्कान्नते जिनाज्ञा, सुपालिता साधुजनमान्या ॥४४॥ आज्ञायदित्वदीया, लब्धा- भवकोटिदुर्लभेहमया । तत्तां कामगावीमपि, नाहं तु समीहया युक्त ॥ ४५ ॥ संसारिकान्तारेऽनन्त- भवान्नाथ जन्तुनाऽनेन । दुःखं वचनातीतं, विना तवाज्ञ जिनाधीश ! ॥ ४६ ॥ त्रिभुवनविदितोद्योत, त्वयि दृष्टे यद्यहं न जगदीश ! मोहान्धकारभिदुरे, स कोऽपि दोषो ममैव तदा ॥ ४७ ॥ नित्यं प्रीणितहृदये, भाषितनिःशेषजन्तुजातदये । विहितान्तरारिविजये, त्वयीक्षिते मोदमहमभये॥४८॥ सितकरसौम्यतरास्ये, योगिजनैस्तत्त्वतस्तु समुपास्ये । मोह नाहं दास्ये, कथं त्वयीशेश्रितेऽहास्ये ॥ ४९ ॥ अहमिह हरिहरमुख्याऽनेकसुराणां चरित्रमाकर्ण्य । त्वमेव देवदेवं, निष्कारणवत्सलं लोके ॥५०॥ भव्यजनेशाधीश्वर !, पवित्रचारित्राधनं सुमतिम् । सततं समीहमान, माममलज्ञाननीरनिधिः ॥५१॥ पदनत- निर्जरराजे, भवत्यहं सेवकोऽपि गाढतरम् । तेन त्वदीयसेवा, भवे भवे मे भृशं भूयात् ॥ ५२ ॥ गच्छाधिप **श्रीजयकीर्तिसूरि** शिष्यो महीमेरुरहं स्तवं ते । कृत्वा क्रियागुप्तकवित्वमित्थं त्वामेव दध्यां हृदये जिनेन्द्र ! ॥ ५३ ॥

श्री अर्हते नमः विद्यानामनरस्यरूपमधिकं प्रच्छन्नगुप्तं धनं विद्या भोगकरी यश सुखकरी विद्या गुरूणां गुरु **विद्या** बन्धुजनो विदेशगमने विद्या परादेवता विद्या राजसु पूजिता न तु धनं विद्या विहीन पशु । न जारजातस्य ललाटशृङ्ग कुलप्रसूतेर्न च पाणिपद्मम् । यदा यदा मुञ्चति वाक्यबाणं, तदा तदा जाति कुलप्रमाणम् ॥

इह खलु तत्रभवन्त सकलकविशिरोमणय **श्रीजयशेखर**सूरय 'काव्यं यशसेऽर्थकृते व्यवहारविदेशिवेतरक्षतये । सद्य परनिर्वृतये कान्तासंमिततयोप- देशयुजे' इत्याद्यालंकारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेय साधनताम् 'काव्या-

लापांश्च वर्जयेत्' इत्यस्य निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन्तो जैनकुमारसंभवाख्यं महाकाव्यं चिकीर्षवश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनभूतविशिष्टवस्तुनिर्देशात्मकमङ्गलस्य शिष्टाचारपरिप्राप्तत्वात् 'आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्

इत्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात् ग्रन्थादौ वस्तुनिर्देशात्मकं अस्त्युत्तरस्येति मङ्गलमाचरन्ति।

ध्यात्वा श्री शारदां देवीं नत्वा श्री सद्गुरूनपि। कुमारसंभवस्येयं विवृतिर्लिख्यते मया ॥ १ ॥ यस्मै काव्ययुगप्रदा च वरदा श्रीशारदा देवता श्रीमज्जैनकुमारसंभवमहाकाव्यादिकर्ताकलौ। सिद्धान्तोदधिचन्द्रमाः सहृदयश्रेणीशिरःशेखरः सोऽयं **श्रीजयशेखराख्यसुगुरुर्जीयाज्जगन्मङ्गलम्** ॥२॥ लौकिककाव्यानुसारेण अस्त्युत्तरस्यांदिशीति सप्ताक्षराणि वर्तन्त इति न ज्ञातव्यं किन्तु श्रीस्तंभतीर्थे श्रीमदञ्चलगच्छगगन–प्रभाकरेण सकलविद्वज्जनचित्तचकोरनिशाकरेण यमनियमासनप्राणायामाद्यष्टांगयोगविशिष्टेन समाधिध्यानोपविष्टेन निजमतिजितसुरसूरिः परमगुरु **श्रीजयशेखरसूरिणा** चन्द्रमण्डलसमुज्ज्वलराजहंसस्कंधोषितया चंचलकुण्डलाद्याभरणविभूषितया भगवत्या श्रीभारत्यावत्स त्वं कविचक्रवर्तित्वं प्राप्य निश्चिन्त इवासीनः किंकरोपीति प्रोच्य जैनकुमारसंभवं महाकाव्यं कुरु इत्युक्त्वा अस्त्युत्तरस्यां १ संपन्नकामानयनाभिरामा २ एतदाद्यं काव्ययुग्मं दत्त्वा विहितसुरासुरसे च श्रीयुगादिदेवसत्कजन्मबालकेलियौवनमहेन्द्रस्तवनसुनन्दा सुमङ्गलापाणिग्रहणचतुर्दशस्वप्नदर्शन भरतसंभवप्रातर्वर्णनपुरस्सरं श्रीजैनकुमारसंभवमहाकाव्यं कारितं। तथा लौकिककुमारसंभवे कुमारः कार्त्तिकेय तस्य संभवश्चात्र कुमारो भरतस्तस्य संभवो ज्ञेय पुत्राश्च सर्वे कुमारा उच्यन्ते अत कुमारसंभव इति नाम्ना महाकाव्यमत्रापि ज्ञायते तेनादौ ध्यात्वा श्रीशारदा।

इति सम्।